# कुलचन्द्रगौतमप्रणीताया अमरकोशटीकाया व्याकरणदृष्ट्या पर्यालोचनम्

नेपालसंस्कृतविश्वविद्यालयान्तर्गतानुसन्धानकेन्द्रे
विद्यावारिधिः(पीएच्.डी.)इत्युपाधिप्राप्तये प्रस्तुतः
नव्यव्याकरणविषयसम्बद्धः

## शोध-प्रबन्धः

**शोधप्रस्तोता**
पूर्णशङ्करगौतमः
पञ्जीकरणसंख्या १९४/०६९

२०८२

# निर्देशकसम्मतिः

निर्देशकसम्मतिः

शोधप्रबन्धप्रस्तोता पूर्णशङ्करगौतमोऽयं नेपालसंस्कृतविश्वविद्यालयस्य व्याकरणविषयस्य सहप्राध्यापकः । अस्य खलु शोधप्रबन्धस्य शीर्षकमस्ति 'कुलचन्द्रगौतमप्रणीताया अमरकोशटीकाया व्याकरणदृष्ट्या पर्यालोचनम्' इति । पर्यालोचनं नाम समीक्षणं परिपक्वो वा विमर्शः । अत्र परिपक्वं विमर्शनमस्तीत्यहं मन्ये ।

शाब्देबोधे शब्दानां शक्तिज्ञानमावश्यकं भवति । शक्तिग्राहकाश्च संस्कृतवाङ्मयेऽष्टौ सन्ति । ते च व्याकरणमुपमानं कोश आप्तवाक्यं व्यवहारो वाक्यशेषो विवृतिः प्रसिद्धपदस्य सान्निध्यञ्च । एषु अष्टसु शक्तिग्राहकेषु शिरोमणित्वन्तु व्यवहारस्यैव विद्वत्सम्मतस्य व्यवहारबोध्यस्य च । कोशोऽप्यन्यतमः शक्तिग्राहकः । स्वसमानार्थबोधकात् शब्दसमूहात्मकात् अमरसिंहादिकोशात् 'सर्वज्ञः सुगतो बुद्धः' इत्यादिरूपेण सर्वज्ञादिशब्दानांबुद्धे शक्तिग्रहः कृतो दृश्यते । अत एव कोशाध्ययनस्य तत्समीक्षणस्य चावश्यकत्वम् । कवीनां रचयितॄणां वाक्पाटवमिच्छताञ्च कृते कोशास्तञ्ज्ञानञ्चात्यावश्यकम् । अत एव शोधकर्तुर्गौतमस्यात्र प्रवृत्तिरित्यहं मन्ये । वाग्व्यवहर्तारो व्याकरणज्ञानाभावे अन्धा भवन्ति, कोशज्ञानवर्जिता बधिरा भवन्ति, साहित्यरचनाशक्तिहीना रचनादृष्ट्या पङ्गवो भवन्ति, तर्कज्ञानरहिताश्च मूका भवन्ति । तदुक्तं केनापि कोशज्ञानवता तत्प्रणयिना च –

अवैयाकरणस्त्वन्धो बधिरः कोशवर्जितः ।
साहित्यरहितः पङ्गुर्मूकस्तर्कविवर्जितः ॥ इति

एवं बाधिर्यनिरासार्थं कोशज्ञानं तत्परीक्षणं समीक्षणञ्चावश्यकमिति विचारेणात्र प्रवर्तितः शोधकर्ता ।

विषयचयनतत्पञ्जीकरणादित एव मन्निर्देशनं पालयतो शोधकर्तुर्गौतमस्य शोधोऽयं प्रायः पूर्णताङ्गत इति नियमानुसारेण विषयगतपरीक्षणार्थमुपयुक्तं मन्यमानस्तमग्रे सारयामि –

दिनाङ्कः २०८२।०१।२२

शोधनिर्देशकः
प्रा.डा.विष्णुप्रसादशर्मादेवकोटा
सेवानिवृत्तः



CS Scanned with CamScanner

# शोधविशेषज्ञसम्मतिः

पूर्णशङ्करगौतमेन सपरिश्रमेण लिखितः 'कुलचन्द्रगौतमप्रणीताया अमरकोशटीकाया व्याकरणदृष्ट्या पर्यालोचनम्' शीर्षकस्य प्रस्तुतो विद्यावारिधिशोधप्रबन्धो मया दृष्टः । अस्यावश्यकता परिपूर्तये सम्बद्धनिकायेऽग्रे सारयामि ।

दिनाङ्कः २०८२।०१।२२

डा. बद्रीविशालभट्टराई

सेवानिवृत्तप्राध्यापकः

त्रिभुवनविश्वविद्यालयस्य



Scanned with CamScanner

## विशेषज्ञसम्मतिः

पूर्वाञ्चलस्थस्य पिण्डेश्वरविद्यापीठस्य व्याकरणधर्मशास्त्रयोर्विभागाध्यक्षेण सहप्राध्यापकेन श्रीमता पूर्णशङ्करगौतममहोदयेन महताऽध्यवसायेन गभीरया गवेषणया लिखितः 'कुलचन्द्रगौतमप्रणीताया अमरकोशटीकाया व्याकरणदृष्ट्या पर्यालोचनम्' इति शीर्षकसंवलितः शोधग्रन्थो मया व्यलोकि । सरस्वत्या वरदपुत्रस्य कुलचन्द्रगौतमस्यामरकोशस्य स्वयंबोधिनीटीकाकृतिर्विशिष्टविश्लेषणमपेक्षते । शोधकर्त्रा प्रयत्नपूर्वकं व्याकरणदृष्ट्या विश्लेषणनैपुणी प्रदर्शितेति मोदस्य विषयः । शोधप्रबन्धमिममहं प्रविधिपरीक्षणं विधाय विषयपरीक्षणञ्च विधाय विद्यावारिधिपदवीप्रदानार्थं नेपालसंस्कृतविश्वविद्यालयस्य सम्बद्धनिकाये तदर्थमग्रे सारयामि ।

दिनाङ्कः २०८२/०१/२२

नारायणदत्त

------------------

नारायणदत्तशर्मा पौडेलः

शोधविशेषज्ञः

सेवानिवृत्तप्राध्यापकः

नेपालसंस्कृतविश्वविद्यालयस्य



Scanned with CamScanner

## प्रतिबद्धतापत्रम्

कुलचन्द्रगौतमप्रणीताया अमरकोशटीकाया व्याकरणदृष्ट्या पर्यालोचनम् इति नामकः शोधप्रबन्धो मया लिखितः । शोधप्रबन्धसम्पादनावसरे निर्देशकस्य निर्देशनानि सर्वथानुसृतानि सन्ति । इतः पूर्वमत्रत्या विषयाः कुत्रापि नैव प्रकाशिताः । शोधप्रबन्धेऽस्मिन् प्रमाणतया स्वीकृतानि वचनानि विहाय कस्मादपि ग्रन्थादत्रत्या विषया यथावन्नैवोद्धृताः । अत्र प्रमाणार्थं कुलचन्द्रगौतमस्य व्याकरणात्मकग्रन्थाः, कोशविज्ञानस्य भाषाविज्ञानस्य च ग्रन्थाः, कोशग्रन्थाः, कोशकारस्य मतानि स्थापितानि तथैव अन्ये सन्दर्भग्रन्थाश्च । अत्र समाविष्टा अनुशीलिताश्च सर्वे विषयाः सर्वथा मौलिकाः प्रमाणिकाश्चेत्यहं तत्र सर्वथा प्रतिबद्धोऽस्मि ।

दिनाङ्कः २०८२।०१।२२

पूर्णशङ्कर गौतम

शोधप्रस्तोता

पूर्णशङ्करगौतमः



Scanned with CamScanner

# कृतज्ञताज्ञापनम्

नेपालसंस्कृतविश्वविद्यालयस्य नव्यव्याकरणविषये विद्यावारिध्युपाधिप्राप्तये 'कुलचन्द्रगौतमप्रणीताया अमरकोशटीकाया व्याकरणदृष्ट्या पर्यालोचनम्' इति विषये शोधप्रबन्ध-प्रस्तुत्यै आवश्यकसहयोगप्रदातॄन् महानुभावान् प्रति हार्दिकीं कृतज्ञतां समर्पयामि ।

कुलचन्द्रगौतमो न केवलमलङ्कारशास्त्रस्य विद्वान् सुकविश्च अपि तु स व्याकरणकोशदर्शनवैद्यकशास्त्रादिनानाविधविषयाणामप्युत्कृष्टो विद्वान् वर्तते । तेन संस्कृतभाषायां राष्ट्रभाषायां नेपाल्याञ्चानेकानि ग्रन्थरत्नानि प्रणीतानि । अमरकोशामरकोशपरिशेषलघुनामकोशप्रभृतयः कोशग्रन्था व्याख्यामूलकाः स्वतन्त्रमूलग्रन्थाश्चानेन रचिताः । सर्वप्रथममरकोशस्य स्वयंबोधिनीटीकाकर्तारं विद्वच्छिरोमणिं सूक्ष्मदर्शिनं स्वर्गतं कुलचन्द्रगौतमं प्रति कृतज्ञताकुसुमानि सश्रद्धमर्पयामि । ततश्च करुणावरुणालयां विद्यादेवीं प्रणम्य वात्सल्यनिधिभूतानां स्वर्गवासिनां पूजनीयानां श्रोत्रियाणां ब्रह्मनिष्ठानां कलाधरगौतम इति पवित्राभिधानानां जनकचरणानां परिचरणीयौ चरणौ प्रणमामि सश्रद्धम् ।

शोधप्रबन्धस्य प्रकृतस्य लेखनकार्ये मामकीनां विषयावबोधसम्बद्धन्यूनतां भाषिकाभिव्यक्तिगतत्रुटीश्च यथार्थतो निर्दिश्य समुचितशोधकार्याय सत्प्रेरणां प्रददतो विद्यावारिध्युपाधिमूलकशोधनिर्देशनप्रवीणान् व्याकरणमर्मज्ञान् विद्वत्तल्लजान् प्राध्यापकपदमलङ्कुर्वतः श्रद्धास्पदीभूतान् आदरणीयान् प्रा.डा.विष्णुप्रसादशर्मदेवकोटामहोदयान् प्रति साभारप्रदर्शनं हार्दिकीं कृतज्ञतां विनिवेदये ।

तथैव मामकीनेऽस्मिन् शोधकार्ये शोधविशेषज्ञतामभ्युपगम्यास्य शोधप्रबन्धस्य लेखनकार्ये विषयप्रस्तुतीकरणेऽभिव्यक्तिशैल्यां स्वरूपसंरचनापक्षे शोधप्रविधिव्यवस्थितिसम्बन्धे शोधप्रविधिपूर्णतासन्दर्भे च मदीयावश्यकतानुसारेण समये समयेऽमूल्यपरामर्शात्मकसाहाय्यप्रदानपूर्वकं मां बहूपकुर्वतो व्याकरणशास्त्रमर्मज्ञान् विद्वदग्रीयान् प्रा.नारायणदत्तशर्मपौडेलमहाभागान् तथा कोशविशेषज्ञान् प्रा.डा.बद्रीविशालभट्टराईमहानुभागान् प्रति सश्रद्धं सबहुमानञ्चाभारान् प्रकटयामि । एवमेव ममैतस्मिन् शोधकार्ये शोधप्रबन्धस्य विषयचयने प्रत्यक्षतोऽप्रत्यक्षतश्च समुचितं सहयोगं प्रदायावश्यकपरामर्शं सत्प्रेरणाञ्च दददभ्यः शोधविशेषज्ञेभ्यः प्रा.डा. माधवशरणोपाध्यायमहाभागेभ्यः सविनयमाभारान् प्रकाशयामि ।

स्थितं शिक्षाध्यक्षचरं पुरुषोत्तमभट्टराईमहाभागं प्रति च सविनयं श्रद्धां प्रकटयामि । एवमेव येन मध्ये मध्येऽहं प्रबोधितः शोधकार्ये पिण्डेश्वरविद्यापीठस्य प्राचार्यमादरणीयं प्रेरणाप्रदातारं गुरुं प्रा.डा.चन्द्रमणिनेपालमहोदयं प्रति च कृतज्ञतां प्रकटयामि । मम शोधविषये सदैव हितचिन्तकौ प्रा.डा.गुरुप्रसादसुवेदिनं प्रा.भीमप्रसादकण्डेलं प्रति च धन्यवादान् प्रकटयामि । शोधप्रविधिविषये परामर्शदातारं सहप्राध्यापकं डा.मतिप्रसादढकालञ्च न विस्मरामि । नेपालसंस्कृतविश्वविद्यालयस्योपकुलपतिचरं विद्यावाचस्पतिं प्राध्यापकमादरणीयं गुरुं पूर्णचन्द्रढुङ्गेलं प्रति सदैव कृतज्ञोऽस्मि ।

अध्ययनाय समयपुस्तकादिसुविधाप्रदायिनीभ्यः संस्थाभ्यः पिण्डेश्वरविद्यापीठाय, संपूर्णानन्दसंस्कृतविश्वविद्यालयाय, हिन्दुविश्वविद्यालयाय, गोयनकापुस्तकालयाय च कृतज्ञतां प्रकटयामि । अस्मिन् समये मम पूजनीयां वात्सल्यमयीं हार्दिकतयाशीर्वादप्रदात्रीं मातरं पूर्णकलीगौतमं प्रति च सविनयमाभारं प्रकटयामि । धर्मपत्नीं कमलागौतमञ्च प्रति धन्यवादान् प्रकटयामि यया सह मया गृहस्थधर्मो रक्षितः । सुसांख्यविषये साहाय्यकर्तारौ सुपुत्रौ शिवचेतनौ प्रशंसार्हौ । मुद्रणसज्जाविषये कार्यकर्त्रीं विदुषीं शिष्यां मैयाबरालं प्रति च धन्यवादान् प्रकटयामि ।

दिनाङ्कः २०८२।०१।२२।

शोधप्रस्तोता

पूर्णशङ्करगौतमः



Scanned with CamScanner

# विषयसूची

निर्देशकसम्मतिः क

शोधविशेषज्ञसम्मतिः ख

विशेषज्ञसम्मतिः ग

प्रतिबद्धतापत्रम् घ

कृतज्ञताज्ञापनम् ङ

विषयसूची छ

तालिकासूची ढ

संक्षिप्तशब्दसूची ण

शोधसारः **थ**

**प्रथमोऽध्यायः**

**शोधपरिचयः**

१.१ विषयप्रवेशः १

१.२ शोधसमस्या ४

१.३ उद्देश्यम् ४

१.४ पूर्वकार्यसमीक्षा ५

१.५ शोधविधिः १७

१.६ प्राक्कल्पनाः १७

१.७ अध्ययनस्य क्षेत्रं सीमा च २०

१.८ शोधसामग्रीसङ्कलनम् २१

१.९ रूपरेखा २१

**द्वितीयोऽध्यायः**

**प्रकृतसमीक्ष्यकोशस्य व्याकरणात्मकग्रन्थस्य च परिचयः**

**.कोशविज्ञानव्याकरणदृष्ट्या पर्यालोचनम्**

२.१ कोशस्य महत्त्वम् २२

२.१.२ कोशशब्दस्यार्थः २३

२.१.३ कोशप्रयोजनम् २४

२.१.४ कोशव्याकरणयोः सम्बन्धः २४
२.१.५ कोशविधानकार्यम् २५
२.१.६ कोशस्य वर्गीकरणम् २५
२.१.६.१ विषयानुक्रमकोशः २५
२.१.६.२ वर्णक्रमकोशः २५
२.१.६.३ नामलिङ्गानुशासनकोशः २६
२.१.६.४ व्याकरणपरककोशः २६
२.१.६.५ एकभाषिककोशः २७
२.१.६.६ द्विभाषिककोशः २७
२.१.६.७ पर्यायवाचिकोशः २७
२.१.७ वाङ्मये कोशव्याकरणयोः साहचर्यम् २८
२.१.८ अमरपूर्वाः कोशाः २९
२.१.९ विविधकोशानां कोशकाराणाञ्च नामानि ३४
२.१.१० कोशकाराणां कालविभागः ३९
२.१.११ अमरकोशः ४०
२.१.१२ अमरसिंहस्य व्यक्तित्वम् ४०
२.१.१३ अमरकोशस्य रचनाकालः ४१
२.१.१४ अमरकोशस्याध्ययनम् ४२
२.१.१५ अमरकोशस्यालोचनाप्रत्यालोचने ४३
२.१.१६ पर्याययोजना ४४
२.१.१७ शब्दहानिः ४५
२.१.१८ अमरकोशस्य लोकप्रियता ४६
२.१.१९ अमरकोशे लिङ्गनिर्देशनम् ४८
२.१.२० स्वयंबोधिनीटीकायां ध्येयो विषयः ४९
२.१.२१ भाषाविज्ञाने लिङ्गविज्ञानम् ४९
२.१.२२ कोशे शब्दशक्तिः ४९
२.१.२३ शब्दार्थयोः सम्बन्धः ५०
२.१.२४ शब्दशक्तिज्ञाने व्याकरणकोशादीनामावश्यकता ५१
२.१.२५ नानार्थशब्देषु शक्तिः ५३

२.१.२६ शक्तेर्भेदाः ५५
२.१.२७ शब्दे समासादिवृत्तयः ५५
२.१.२८ शाब्दबोधे सहकारिकारणानि ५७
२.१.२९ अमरकोशस्य टीकाः ५८
२.१.३० अमरकोशस्य टीकाकाराः ६२
२.१.३१ अमरकोशस्य नेपालीटीका ६३
२.२ विद्वच्छिरोमणिकुलचन्द्रस्य जीवनवृत्तम् ६४
२.२.१ कुलचन्द्रगौतमस्य कृतीनां संक्षिप्तपरिचयः ६६
२.३ कुलचन्द्रस्य वैयाकरणत्वम् ८२
२.४ कृष्णकर्णाभरणम् ८४
२.५ स्वदेशप्रेम ८७
२.६ स्वाभाविकं वर्णनम् ८७
२.७ अध्ययनचिन्ता ८८
२.८ सात्त्विकाहारः ८८
२.९ स्वयंबोधिनीटीकाया उद्देश्यम् ८८
२.१० अध्यायनिष्कर्षः ८९

**तृतीयोऽध्यायः**

**३.अमरकोशस्य स्वयंबोधिनीटीकागतपदानां व्युत्पत्तिप्रदर्शनम्**

**३.१ अमरकोशस्य स्वयंबोधिनीटीकायां स्थिताष्टिप्पण्यः**

**शब्दार्थदृष्ट्या पर्यालोचनम्**

३.१.१ स्वर्गवर्गः (अप्सरस्-अष्टमूर्ति-ऐश्वर्य-काम-गन्धर्व-निधि-वायु-सप्तमातृका-सप्तार्चि-सुदर्शनशब्दानां टिप्पण्यः) ९२
३.१.२ दिग्वर्गः (नक्षत्र-परिवेष-पारिपार्श्विक-सप्तर्षिशब्दानां टिप्पण्यः) ९५
३.१.३ कालवर्गः (ऋतु-कल्प-काल-पाप-पुष्पवन्त-मन्वन्तरशब्दानां टिप्पण्यः) ९७
३.१.४ धीवर्गः (इन्द्रिय-मेधा-मोक्षशब्दानां टिप्पण्यः) १०१
३.१.५ शब्दादिवर्गः (अङ्ग-अबद्ध-आहत-क्लिष्ट-ग्रस्त-ग्राम्य-पुराण-प्रलाप-प्रहेलिका-यशःकीर्ति-समस्या-स्मृति-शब्दानां टिप्पण्यः) १०२

३.१.६ नाट्यवर्गः (आङ्गिक-उत्कण्ठा-कुतूहल-भाव-रस-ललित-लीला-विहसित-विभ्रम-विलास -
विव्वोक-सात्विक-स्मित-स्वर-हाव-हेलाशब्दानां टिप्पण्यः) १०८
३.१.७ पातालभोगिवर्गः (आशिस्-पातालशब्दयोष्टिप्पण्यौ ( ११५
३.१.८ नरकवर्गः (नरकशब्दस्य टिप्पणी ) ११५
३.१.९ वारिवर्गः (तिमि-पृषतशब्दयोष्टिप्पण्यौ ) ११६
३.१.१० भूमिवर्गः (अनूपशब्दस्य टिप्पणी ) ११७
३.१.११ पुरवर्गः (एडूक-विच्छन्दशब्दयोष्टिप्पण्यौ ) ११७
३.१.१२ शैलवर्गः ( धातु-पर्वतशब्दयोष्टिप्पण्यौ ) ११८
३.१.१३ वनौषधिवर्गः (अम्लवेतस-ऋद्धि-ऋषभ-जीवक-वर्वरी/वर्वरा-शाकशब्दानां
टिप्पण्यः ) ११९
३.१.१४ मनुष्यवर्गः (गौरी-ग्रहणी-पुँश्चली-प्ता-प्रवाहिका-बाल्य-मेखला-वरवर्णिनीशब्दानां
टिप्पण्यः) १२१
३.१.१५ ब्रह्मवर्गः (अभिवादन-इष्ट-नियम-पूर्त-ब्रह्मचारि-भिक्षु-मुनि-यमशब्दानां
टिप्पण्यः) १२४
३.१.१६ क्षत्रियवर्गः (अक्षौहिणी-भिन्दिपाल-मत्त-राज्याङ्गशब्दानां टिप्पण्यः ) १२७
३.१.१७ वैश्यवर्गः (ऋत-कृषर-धान्यव्रीहि-पङ्क्ति-फेला-रसाञ्जन-रसाला-लाज-लोह-
वेवसारशब्दानां टिप्पण्यः १२९
३.१.१८ शूद्रवर्गः (म्लेच्छशब्दस्य टिप्पणी ) १३४
३.१.१९ विशेष्यनिघ्नवर्गः (आततायि-कदर्य-फाण्टशब्दानां टिप्पणी ) १३४
३.१.२० संकीर्णवर्गः (प्रवरण-संयमनशब्दानां टिप्पणी ) १३५
३.१.२१ नानार्थवर्गः (ईति-कच्छपी-केतु-खेटक-ब्रह्मबन्धु-भग-व्यसन-सुवर्ण-
सूनाशब्दानां टिप्पण्यः ) १३६
३.१.२२ लिङ्गादिसंग्रहवर्गः (भाष्यशब्दस्य टिप्पणी ) १३९
**३.२ स्वयंबोधिनीटीकायां टीकाकारेण निर्दिष्टाः समस्तशब्दाः** १४०

## समासदृष्ट्या पर्यालोचनम्

३.२.१ स्वर्गवर्गः (इन्द्र-कामदेव-कुमार-कुवेर -गणेश-गरुड-देव-दैत्य-बलभद्र-ब्रह्म-पार्वती-
महादेव-लक्ष्मी-विष्णु-स्वर्गवाचकाः शब्दाः) १४१
३.२.२ व्योमवर्गः (आकाशवाचकशब्दः १४८

३.२.३ दिग्वर्गः ( चन्द्र-बृहस्पति-मेघ-सूर्यशब्दाः) १४९

३.२.४ वारिवर्गः ( कमल-भागिरथी-यमुना-समुद्रवाचकाः शब्दाः ) १५१

**३.३ स्वयंबोधिनीटीकायां स्थिता अनेकरूपशब्दाः** १५३

## वैकल्पिकदृष्ट्या पर्यालोचनम्

३.३.१ स्वर्गवर्गः (अग्नि-अमृत-इन्द्र-कुवेर-गन्धर्व-पार्वती-ब्रह्मन्-राक्षस -वज्र-विष्णु- शिव-स्वर्गाणां नामानि ) १५४

३.३.२ दिग्वर्गः (अगस्त्य-किरण-बृहस्पति-राहु-वातप्रक्षिप्त-विद्युत्-शनैश्चर-सूर्य-हिमानां नामानि) १५८

३.३.३ कालवर्गः (अमवास्या-पर्वन्-प्रातःकाल-रात्रि-सायंकालानां नामानि) १६१

३.३.४ धीवर्गः (कषायरस-श्वेतवर्ण-मोक्षाणां नामानि ) १६४

३.३.५ शब्दादिवर्गः (कीर्ति-निन्दयोर्नामनी ) १६५

३.३.६ नाट्यवर्गः (आकारगुप्ति-इच्छा-क्रीडा-ज्येष्ठभगिनी-तन्द्रा-दुन्दुभि-भ्रुकुटी-मधुराणां नामानि) १६६

३.३.७ पातालभोगिवर्गः (सर्पग्राहिणो नामनी ) १६८

३.३.८ वारिवर्गः (कमल-कर्कट-तडाग-नाली-पद्मकन्द-मृणाली-शैवालानां नामानि ) १६८

३.३.९.भूमिवर्गः (दुर्मार्ग-पृथिवी-भूतल-मार्ग-सेतूनां नामानि ) १७०

३.३.१० पुरवर्गः (अलिन्द-आभीरपल्ली-ईश्वरगृहविशेष-एडूक-कपाट-गृह-निःश्रेणि-पानीयशाला-वलभी-विपणी-शाल-संकर-सूतिकागृहाणां नामानि ) १७२

३.३.११ शैलवर्गः (अतट-चक्रवाल-पर्वतविशेष-शिलानां नामानि १७६

३.३.१२ वनौषधिवर्गः (अक्षोट-अङ्कोट-असन-आम्रातक-आवली-उरुवूक-ओषधि-कपित्थ-कर्कन्धू-किसलय-कुम्भोलूखल-केसर -घण्टा-चिरिविल्ल-जम्वीर-तितिण्डी-तिन्दूक-नेमी-पट्टी -पर्कटी-पूतिकरज-बालतनय-मञ्जरी-मज्जन्-मधूक-मोघा-राजवृक्ष-लता-विकङ्कत-वृक्ष -व्याकोश-राजादन-रेखा-शस्य-शारद-शावर-शेलु-शोणाक-शोभाञ्जन-सक्तुफला-साल- सुसमानां नामानि) १७६

**३.४. स्वयंबोधिनीटीकायां स्थितानामव्ययपदानामुदाहरणानि** १९२

## शब्दार्थदृष्ट्या पर्यालोचनम्

नानार्थवर्गः (अग्रतस्-अति-अथ-अथो-अनु-अन्तर-अभितस्-अपि-अमा-अलम्-अहह-अहहा-आः-आ-आङ्-आरात्-इति-उत-उररी-ऊररी-ऊरी-एवम्-कम्-किम्-किल-कु-खलु-च-जोषम्-तावत्-

तिरस्-तु-धिक्-ननु-नाना-नाम-नि-नु-नूनम्-पश्चात्-पुनस्-पुरस्तात्-पुरा-प्रति-प्रादुस्-मिथस्-यावत्-वत-वा-वृथा-शश्वत्-सकृत्-समया-साक्षात्-सामि-स्वः-स्वस्ति-स्वित्-हन्त-हा-हि-हुंशब्दानामुदाहरणानि ) १९३
३.४.६ अध्यायनिष्कर्षः २१०

**चतुर्थोऽध्यायः**

## .स्वयंबोधिनीटीकाया विशेषतान्यूनतयोः प्रदर्शनम्

४.१ स्वयंबोधिनीटीकाया विशेषता २१०
४.१.१ अमरकोशपरिशेषः (परिशेषकोशः) २१०

## लिङ्गानुशासनदृष्ट्या पर्यालोचनम्

४.१.२ कोशे लिङ्गविषये स्त्रीप्रत्ययः स्त्रीत्वशक्तिश्च २४८
१.१.३ आदर्शरूपावल्यां लिङ्गादिसंग्रहस्य लिङ्गानुशासनस्य च सङ्गमनम् २५३

## लिङ्गानुशासनदृष्ट्या पर्यालोचनम्

४.१.४ प्रत्येकशब्दानां लिङ्गनिर्धारणम् २९६
४.१.५ संस्कृतनेपालीशब्दानां वर्णक्रमे स्थापनम् २९६
४.१.६ आदर्शरूपावलिप्रदर्शनम् २९७
४.१.७ क्षेपकश्लोकाः २९७
४.१.८ पदपदावलीवाक्यानामनुवादः ३०२
४.१.९ नेपालीभाषायां पर्यायवाचिशब्दाः ३०३
४.१.१० तद्भवशब्दानां प्रयोगः ३०५
४.१.११ निर्देशनम् ३०५
४.१.१२ अध्याहारः ३०६
४.१.१३ अधिकव्याख्या ३०६
४.१.१४ विशेषटिप्पणी ३०६
४.१.१५ विविधव्याख्या ३०७
४.१.१६ संस्कृतशब्दानामनुक्रमणिका ३०८
४.१.१७ भाषाशब्दानां वर्णानुक्रमः ३०८
४.२ स्वयंबोधिनीटीकाया न्यूनतावलोकनम् ३०८
४.२.१ प्रतिपृष्ठं वर्गनाम्नामभावः ३०९

४.२.२ कामदेवस्य नामानि वानिरुद्धस्य ३०९
४.२.३ किरणस्य नामानि ३०९
४.२.४ कषायरसस्य नामनी ३१०
४.२.५ नरकस्य भेदा ३१०
४.२.६ परिशेषकोशस्याभावः ३११
४.२.७ अमरकोशपरिशेषः ३१४
४.२.८ आदर्शरूपावल्यामव्ययस्य प्रसङ्गाभावः ३१२
४.२.९ वकारस्य बकारः ३१२
४.२.१० आगमशब्दस्यार्थाभावः ३१३
४.२.११ द्विरूपमज्जीशब्दाभावः ३१३
४.२.१२ स्त्रीलिङ्गनेमिशब्दस्याभावः ३१३
४.२.१३ शोभाञ्जनशब्दस्य न्यूनरूपे ३१३
४.२.१४ प्लक्षस्य नामनी ३१४
४.२.१५ तिन्तिडीशब्दस्य रूपत्रयाभावः ३१४
४.२.१६ चिरिबिल्लस्य समग्ररूपाप्रदर्शनम् ३१५
४.२.१७ केषाञ्चन क्षेपकाणामभावः ३१५
४.२.१८ तात्कालिकनेपालीभाषाप्रयोगप्रदर्शनम् ३१६
४.२.१९ क्रियायां स्त्रीलिङ्गत्वम् ३१७
४.२.२० हिन्दीभाषायाः प्रभावः ३१८
४.२.२१ विश्वद्रचङ्शब्दस्य रूपाप्रदर्शनम् ३१८
४.२.२२ लिङ्गाभावः ३१८
४.२.२३ रूपाल्यां धनुष्शब्दस्य स्थाने दुर्मनश्शब्दस्य प्रयोगः ३१८
४.२.२४ विश्ववाह्-द्रुह्-मुह्शब्दानां रूपाप्रदर्शनम् ३१९
४.२.२५ अर्थासङ्गतिः ३१९
४.२.२६ केषाञ्चनापशब्दानां दिग्दर्शनम् ३१९
४.२.२७ अध्यायनिष्कर्षः ३२२

## पञ्चमोऽध्यायः

## अध्ययनसारांशनिष्कर्षोपलब्धयः

५.१ विषयप्रवेशः ३२४

५.२ उपसंहारः ३२४

५.३ अध्ययनसारांशः ३२४

५.४ निष्कर्षः ३२६

५.५ उपलब्धयः ३३०

५.६ भाविशोधस्य विषयाः ३३१

**परिशिष्टम्** ३३२

**संदर्भसामग्री** ३७२

# तालिकासूची


३.१.३.१. वैदिक-ऋतुचक्रम् ९७

३.१.३.२. आयुर्वेदीय-ऋतुचक्रम् ९७

३.१.३.३. कल्पपरिचयचक्रम् ९८

३.१.३.४. कालपरिचयचक्रम् ९९

३.१.३.५. मनुपरिचयचक्रम् १००

३.१.४.१. इन्द्रियपरिचयचक्रम् १०१

३.१.६.५. रसपरिचयचक्रम् १०९

३.१.७.१. सप्तलोकाः ११५

३.१.८.१. नरकभेदाः ११५

३.१.१६.१. अक्षौहिणीसैन्यपरिचयचक्रम् १२८

३.१.१६.४. सप्त राज्याङ्गानि १२९

३.१.१४.४. संख्याचक्रम् १३१

# संक्षिप्तशब्दसूची

अ. =अष्टाध्यायी ।

अ.को.= अमरकोशः ।

अ.लि.= अमरसिंहस्य लिङ्गादिसंग्रहः ।

पा.लि. = पाणिनेर्लिङ्गानुशासनम्

अ.व. = अव्ययवर्गः ।

ई.स. = ईसवीयसन् ।

का.व. = कालवर्गः ।

क्ष.व. = क्षत्रियवर्गः ।

क्षे. = क्षेपकः ।

ग.सू. = गणसूत्रम् ।

टि. = टिप्पणी ।

दि.व.= दिग्वर्गः ।

ध.नि.= धन्वन्तरिनिघण्टुः ।

धी.व. = धीवर्गः ।

न.व. = नरकवर्गः ।

ना.व. = नाट्यवर्गः ।

नाना.व. = नानार्थवर्गः ।

पं. = पंक्तिः ।

पा.= पाणिनिः ।

पा.लि. = पाणिनेर्लिङ्गानुशासनम्

पा.व. = पातालभोगिवर्गः ।

पा.सू. = पाणिनीयसूत्रम् ।

पु.व. = पुरवर्गः ।

पृ.= पृष्ठम् ।

प्र.= प्रक्रमाङ्कः ।

प्र.का.= प्रथमं काण्डम् ।

ब्र.व. = ब्रह्मवर्गः ।

भू.व. = भूमिवर्गः ।

म.व. = मनुष्यवर्गः ।

व.व. = वनौषधिवर्गः ।

रू = रूपाङ्काः ।

वा.= वार्तिकम् ।

वा.व. = वारिवर्गः ।

वि.व. = विशेष्यनिघ्नवर्गः ।

वि.सं. = विक्रमसंवत् ।

वै.व. = वैश्यवर्गः ।

व्यो.व. = व्योमवर्गः ।

श.व. = शब्दादिवर्गः ।

शू.व. = शूद्रवर्गः ।

शै.व. = शैलवर्गः ।

श्लो. = श्लोकः ।

सं.व. = संकीर्णवर्गः ।

सम्पा. = सम्पादकः ।

सिं.व. = सिंहादिवर्गः ।

सू. = सूत्रम् ।

स्व.व. = स्वर्गवर्गः ।

स्त्री.सं. = स्त्रीलिङ्गसंग्रहः ।

# शोधसारः

पर्यालोचितस्य शोधप्रबन्धस्य संक्षेपेण ज्ञातुं सारोऽनेन प्रकारेण वर्तते । अत्र क्रमेण प्रत्यध्यायं विवेचितानां विनिवेशितानाञ्च विषयाणां संक्षिप्तः परिचयो दीयते ।

## प्रथमेऽध्याये

शोधपरिचये संस्कृतवाङ्मये कोशस्येतिहासः प्राचीनतमः । सर्वप्रथमः कोशो निघण्टुः । तस्य व्याख्यानक्रमे यास्कस्य निरुक्तं संजातम् । कोशेषु 'नामलिङ्गानुशासनम्' इति नामकोऽमरकोशः प्रसिद्धः । नैपालकेन विदुषा कुलचन्द्रगौतमेन नेपालीभाषायां सर्वोपयोगिनी स्वयंबोधिनीनामिका टीका प्रणीता । शब्दब्रह्मज्ञानेनैव परब्रह्मप्राप्तिश्च भवति । वाङ्मयस्य सम्यक् ज्ञानाय कोशस्य व्याकरणस्य च परमावश्यकता प्रतिक्षणं अनुभूयते । शाोधसमस्या, शोधोद्देश्यं, पूर्वकार्यसमीक्षा, शोधविधिः, प्राक्कल्पना, अध्ययनस्य क्षेत्रं सीमा च, शोधसामग्रीसङ्कलनं, रूपरेखा च प्रतिपादिताः सन्ति ।

## द्वितीयेऽध्याये

अस्मिन्नध्याये प्रकृतसमीक्ष्यकोशस्य कोशविज्ञानस्य कुलचन्द्रस्य व्याकरणात्मक-ग्रन्थस्य च परिशीलनमस्ति । शब्दार्थज्ञानाय व्याकरणम्, उपमानम्, कोशः, आप्तवाक्यम्, व्यवहारः, वाक्यशेषः, विवृतिः, सान्निध्यञ्चैतेऽनेके उपायाः सन्ति । तस्मात् कोशशब्दः प्राचीनकालादेव प्रचलितः । कोशशब्दस्यार्थः सामान्यतया शब्दसङ्कलनेऽर्थे ज्ञायते सर्वैः । अमरकोशे कोशशब्दः शब्दादिसंग्रहे नास्ति । कोशकारेण स्वकीयकोशस्य नामापि 'नामलिङ्गानुशासनम्' निर्धारितमस्ति । पर्यायवाचिशब्दसंग्रहस्य वाचकत्वेन कोशशब्दस्य प्रयोगः पुरषोत्तमदेवेन स्वकीये त्रिकाण्डकोशे लिखितः । कोशविज्ञानस्य महत्त्वं वर्गीकरणं तथा कुलचन्द्रस्य व्याकणात्मकग्रन्थाश्च विवेचिताः ।

## तृतीयेऽध्याये

तृतीयेऽध्यायेऽमरकोशस्य स्वयंबोधिनीटीकागतपदानां व्युत्पत्तिप्रदर्शनमस्ति। अस्मिन्नध्याये स्वयंबोधिनीटीकायां स्थितानां टिप्पणीनां समस्तशब्दानामनेकरूपशब्दा-नामव्ययानाञ्चोदाहरणानां विशेषविमर्शनं कृतम्।

अमरकोशस्य स्वयंबोधिनीटीकायां स्थितानां टिप्पणीनां शब्दार्थदृष्ट्या पर्यालोचनमेवमस्ति। सर्वेषु कोशेषु काश्चन टिप्पण्यः प्राप्यन्ते। टीकाकारैस्तु सर्वैः स्वकीयासु टीकासु टिप्पण्यः कृता एव। अस्यां टिप्पण्यां कुत्रचित् शब्दानां परिभाषा कुत्रचित् शब्दानामर्थः कुत्रचित् शब्दानां भेदा दत्ताः सन्ति। प्रायः पादटिप्पण्यः काश्चन पाठटिप्पण्यश्च दृश्यन्ते। मूलोक्तार्थस्य टिप्पणीगतार्थस्य च स्फुटता सम्पादनाय मत्प्रबन्धे शब्दानां व्युत्पादनं कृतं गौतमकृतानां टिप्पणीनाम्।

स्वयंबोधिनीटीकायां टीकाकारेण निर्दिष्टानां समस्तशब्दानां समासदृष्ट्या पर्यालोचनं कृतम्।

व्याकरणशास्त्रं खलु पदव्युत्पादकं भवति। कृतां तद्धितानामिव समासानामपि पदव्युत्पादकत्वं संस्कृतवाङ्मये बहुलं दृश्यते। समासश्च लाघवत्वात् बह्वर्थबोधकत्वाच्च गद्ये पद्ये चम्पूकाव्यादिषु च स्वीक्रियते। समासश्चानेकेषां पदानामेकीभवनम्। पाणिन्यादिसङ्केतसम्बन्धेन समासपदव्युत्पादकत्वरूपम्। एकार्थीभावापन्नपदसमुदायविशेषत्वं वा तत्त्वम्। समासप्रक्रिययाऽप्यनेकानि पदान्येकपदीभवन्ति। स्वयंबोधिनीटीकाकारोऽप्यमरकोशेऽप्रयुक्तानामनुल्लिखितानां शब्दानां संग्रहमुल्लेखं वा करोति। स्वयंबोधिनीटीकायां स्थितानामनेकरूपशब्दानां वैकल्पिकदृष्ट्या पर्यालोचनं कृतम्।

संसारे सर्वेषां वस्तूनां यथा परिवर्तनं भवति तथैव भाषायामपि परिवर्तनं दृश्यते। भाषाया ध्वनिषु, रूपप्रक्रियासु, शब्दराशौ, वाक्यविन्यासे तथार्थेषु परिवर्तनं भवति।

संस्कृतभाषायामपि परिवर्तनं जातं यथा वैदिकलौकिकादिभाषासु। लौकिकभाषास्वपि समये समये परिवर्तनं जातम्। तेषां शब्दानां विवृतिपूर्वकं प्रदर्शनं कृतम्।

स्वयंबोधिनीटीकायां स्थितानामव्ययपदानामुदाहरणानां शब्दार्थदृष्ट्या पर्यालोचनं कृतम्। कोशविज्ञानानुसारेण कोश उदाहरणानि दातुं शक्यन्ते। कुलचन्द्रेणाऽपि विशेषतयाऽव्ययशब्दानामुदाहरणानि दत्तानि।

## चतुर्थेऽध्याये

अस्मिन्नध्याये स्वयंबोधिनीटीकाया विशेषतान्यूनतयोः प्रदर्शनं कृतम्। अस्मिन्प्रकरणेऽमरकोशपरिशेषस्य रूपावल्याश्च शब्दानां लिङ्गानुशासनदृष्ट्यानुशीलनं कृतम्। अमरकोशपरिशेषः कुलचन्द्रप्रणीतग्रन्थोऽस्ति। अयं कोशोऽमरकोशस्याङ्गत्वेन चतुर्थकाण्डरूपेण बालकृष्णाचार्येण प्रकाशितः। व्यावहारिककोशश्चास्यापरं नाम। अयं कोशोऽपि विवेचितः। अमरकोशस्यापरं नाम 'नामलिङ्गानुशासनम्' इत्यपिवर्तते। कुलचन्द्रगौतमस्य स्वयंबोधिन्यां टीकायामपि लिङ्गविषये चर्चा दरीदृश्यते। व्याकरणशास्त्रे पठितलिङ्गानुशासनं दृष्ट्वा लिङ्गं ज्ञेयम्। व्याकरणं लिङ्गस्य निर्धारणं करोति तथाप्यनुगाम्यस्ति। एकवारमेव लिङ्गनिर्धारणं करोति। भाषा तु स्रोतस्विन्यस्ति सदा वहत्येव। अतो व्याकरणमपि सर्वदा लिङ्गस्य निर्णयं कर्तुं न शक्नोति। तस्मात् लिङ्गस्य विषयोऽपि विवेचितः।

आदर्शरूपावल्यां लिङ्गादिसंग्रहस्य लिङ्गानुशासनस्य च सङ्गमनं कृतम्। लिङ्गानुशासनदृष्ट्या पर्यालोचनञ्च कृतम्।

## पञ्चमेऽध्याये

पञ्चमेऽध्यायेऽध्ययनसारांशनिष्कर्षोपलब्धयः सन्ति। अमरकोशस्य कुलचन्द्रगौतमप्रणीता स्वयंबोधिनीटीका नेपालीभाषायां प्रसिद्धा। अयं द्विभाषिककोशः स्रोतोभाषा संस्कृतं लक्ष्यभाषा नेपाली। तस्मादत्रोभयोः संस्कृतनेपाल्योः प्रयोगः।

अमरसिंहेन लिङ्गानुशासनं कृतम् । तस्य कोशस्य नाम च लिङ्गानुशासनमासीत् । तथापि शब्दानामन्येष्वर्थेषु शासनं नैव जातम् । कुलचन्द्रेणापि टीकायामङ्काः प्रदत्ताः परन्तु तत्रापि शास्त्रीयदृष्ट्या ज्ञानं नैव भवति । पाणिनेर्लिङ्गानुशासनमस्ति तथैवामरस्य लिङ्गानुसंग्रहश्च । मयात्वेतयोऽत्र सङ्गमनं कृतम् । लिङ्गानुशासनपूर्वकज्ञानेनैव व्यापकबोधो भवति । तस्मात् मयादर्शरूपावल्यां परिशेषकोशे टिप्पण्याञ्च लिङ्गस्य सङ्गमनं कृतम् ।

# प्रथमोऽध्यायः

# शोधपरिचयः

## १.१ विषयप्रवेशः

संस्कृतवाङ्मये कोशस्येतिहासः प्राचीनतमो वर्तते । सर्वप्रथमः कोशो निघण्टुरस्ति । तस्य व्याख्यानक्रमे यास्कस्य निरुक्तं संजातम् । निरुक्तकालपश्चादनेके लौकिककोशा अभूवन् । तेषु कोशेषु 'नामलिङ्गानुशासनम्' इति नामकोऽमरकोशः प्रसिद्धः । संस्कृते तथान्यासु विविधासु भाषासु चामरकोशस्यानेकाष्टीका अभूवन् । नैपालकेन विदुषा कुलचन्द्रगौतमेन नेपालीभाषायां सर्वोपयोगिनी स्वयंबोधिनी नामिका टीका प्रणीता । तामवलम्ब्य प्रकृतशीर्षके शोधकार्यं क्रियते ।

प्रसिद्ध एव शब्दब्रह्मणो महिमा व्याकरणदर्शने यथा-

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।

विवर्ततेऽर्थभावेन प्रक्रिया जगतो यत : ॥[१]इति

तस्माद् शब्दो ब्रह्मैव ज्ञानाधारो जगदाधारश्च । येन विना सर्वे व्यवहारा न चलन्ति यथा सूर्यं विना जगत् । तदेव शब्दब्रह्म प्रथममोङ्काररूपेण वेदरूपेण वा प्रादुरभूत् । तदेव वर्णरूपेण सर्वत्रानुस्यूतम् । वर्णा एव पाणिनिना महेश्वरप्रसादाल्लब्धाः सूत्ररूपेण वा । तान्येव सूत्राणि वर्णसमाम्नाय इत्यपि कथ्यन्ते । यथोक्तं व्याकरणमहाभाष्ये-

"सोऽयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चन्द्रतारकादिवत् प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः, सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति मातापितरौ चास्य स्वर्गे लोके महीयेते" इति । पूर्वं शब्दब्रह्मज्ञानेनैव परब्रह्म-प्राप्तिश्च भवतीति सिद्धान्तः सङ्गच्छते ।

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।

अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥[२] इति

व्याकरणमपि वेदाङ्गमेव यथा-

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।

ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥

---

[१] भर्तृहरिः, ***वाक्यपदीयम्***( १/१), (सम्पा.सत्यनारायण शास्त्री), वाराणसी : कृष्णदास अकादमी, वि.सं. २०४०, पृ. १ ।
[४] पूर्ववत्(१।१२३),पृ.२३६ ।

शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।

तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥[३] इति

यद्यपि व्याकरणानि बहूनि सन्ति यथा -

ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् ।

सारस्वतं चापिशलं शाकलं पाणिनीयकम् ॥

तथाप्यधुना पाणिनीयव्याकरणमेव प्रसिद्धं सर्वत्र पठनपाठने व्यवहारे च प्रचलितम् । कथयत्याचार्यः पतञ्जलिः- "प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचावकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म । तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्, किं पुनरियता सूत्रेण" इति ।[४]

"सामर्थ्ययोगान्नहि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात्" इति ।[५]

इत्यादिभिर्वाक्यैर्महिमाभिव्यक्तो भाष्यकारेण । पाराशरोपपुराणेऽपि यथा-

पाणिनीयमहाशास्त्रं पदसाधुत्वलक्षणम् ।

सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन । इति

व्याक्रियन्ते व्युत्पाद्यन्ते असाधुशब्देभ्यः पृथक्कृत्य निष्पाद्यन्ते साधुशब्दा अनेनेति व्याकरणम् । (लक्ष्यलक्षणं व्याकरणम्) एवमस्ति व्याकरणस्य महिमा, व्याकरणं शब्दसिद्धये साधनमस्ति । साध्यं तु शब्दज्ञानमेव । व्याकरणं सार्वकालिकं न भवति, भाषा तु स्रोतस्विन्यस्ति, सर्वदा वहत्येव । तस्मात् शब्दानां सम्यगर्थज्ञानाय पारम्पर्यरूपेण दानाय च शब्दसङ्कलनस्यावश्यकता भवति । तदेव शब्दसङ्कलनं पश्चात् कोशरूपेण दृश्यतेऽत्र । यथा पूर्वं कश्यपो वेदस्य शब्दसङ्कलनं कृत्वा निघण्टुमरचयत् तथैवाधुना विकशितरूपोऽमरकोशसदृशकोशो विद्यमानश्चाऽस्त्यस्माकमग्रे । तस्मात् केवलं व्याकरणेनापि शक्तिज्ञानं पर्याप्तं न भवति । तदेवैकं न शक्तिग्रहं किन्त्वन्येऽपि । ते च -

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च ।

---

[३] पाणिनिः, ***पाणिनीयशिक्षा*** (श्लो.४१-४२), (सम्पा.गोस्वामी प्रह्लाद गिरि), वाराणसी : चौखम्बा संस्कृत सीरिज आफिस, वि.सं.२०४०, पृ.२० ।

[४] पतञ्जलिः, ***व्याकरणमहाभाष्यम्*** (आ.३, पा.सू.१।१।१), (सम्पा. चारुदेव शास्त्री ), वाराणसी : मोतीलाल बनारसी दास, इ.सं.१९८४, पृ.१२७ ।

[५] पतञ्जलिः, ***व्याकरणमहाभाष्यम्*** (पा.सू.६।१।७७), (भार्गव शास्त्री) वाराणसी : चौखम्बा सुरभारती प्रकाशन, इ.सं.१९९१, पृ.७८ ।

वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥[६]

यथा राजसु कोषस्यावश्यकता भवति तथैव कोशस्यावश्यकता भवत्येव शब्दार्थ-सम्बन्धजिज्ञासूनाम् । सुभाषितमस्ति यथा -

विदुषां भूभुजां वापि शब्दविद्या तथा प्रजा ।

संसारे वसतामेति न विना कोषसङ्ग्रहम् ॥[७]

कोशविषयेऽन्याश्च सूक्तयः सन्ति –

अवैयाकरणस्त्वन्धो बधिरः कोशवर्जितः ।

साहित्यरहितः पङ्गुर्मूकस्तर्कविवर्जितः ॥

कोशश्चैव महीपानां कोशश्च विदुषामपि ।

उपभोगे महानेषः क्लेशस्तेन विवर्जितः ॥[८]

संस्कृतवाङ्मयस्य सम्यक् ज्ञानाय कोशस्य व्याकरणस्य च परमावश्यकता प्रतिक्षणं विद्वद्भिरनुभूयते ।

अमरकोशस्य टीकाक्रमे नेपाल्यां कुलचन्द्रगौतमप्रणीता टीकाग्रेऽस्ति । आधुनिकशैल्या विज्ञानशैल्या च लिखितैषा टीका पठनपाठने चिन्तने चापूर्वा सरला । तस्माच्छात्राणां शिक्षकाणाञ्चोपयोगिनी । अकारादिक्रमेण स्थापनात्तथादर्शरूपावलिसमायोजनाच्च विशिष्टा । राष्ट्रभाषायां नेपाल्यां लिखितैषा टीका लोकप्रिया च ।

अस्यां स्वयंबोधिनीटीकायामधुना पर्यन्तं शोधकार्यं नैव जातम् । तस्मादस्मिन्विषये शोधकार्यस्यावश्यकताऽस्त्येव । अमरकोशटीकायां व्याकरणतत्त्वानां सत्त्वात् व्याकरणदृष्ट्यैव शोधकार्यस्यावश्यकता ।

तथैव कुलचन्द्रगौतमेनाऽपि व्याकरणस्य दृष्ट्या शब्दा निर्दिष्टाः सन्ति टीकायां टिप्पण्याञ्च । तस्मादमरकोशस्य व्याकरणदृष्ट्यैव शोधकार्यस्यावश्यकता । यतो हि शोधग्रन्थे कुलचन्द्रगौतमप्रणीतायाः स्वयंबोधिनीटीकाया विविधदृष्ट्या शोधकार्यं विहितम् । प्रकृतटीकायां वैयाकरणतत्त्वानां प्रदर्शनं शोधकार्यस्य मुख्यमुद्देश्यम् ।

## १.२ शोधसमस्या

---

[६]भट्टः नागेशः, ***परमलघुमञ्जूषा,*** वाराणसी : कृष्णदास अकादमी, सन् १९८५, पृ.२८० ।

[७]त्रिपाठी ब्रम्हानन्दः, ***अमरकोशः*** (रत्नप्रभा टीका), वाराणसी : चौखम्बा सुरभारती प्रकाशन, सन्१९९६ भूमिका पृ.१ ।

[८]अभिमन्युः मन्नालालः, ***अमरकोशः*** (धराटीका भूमिका ), वाराणसी : चौखम्बा विद्याभवन, इ.सं.२०१२, पृ.१ ।

कोशस्येतिहासस्तु प्राचीनतमस्तथापि पूर्वस्मिन् काले संस्कृतवाङ्मयस्य कोशा एकभाषिन आसन् पश्चादेव द्विभाषिककोशा अभूवन्। द्विभाषिककोशपरम्परायां स्रोतभाषा संस्कृतम्, लक्ष्यभाषा हिन्दी, बङ्गाली, तिब्बतीत्यादयोऽभूवन्। कुलचन्द्रगौतमेनामरकोशस्य नेपाले स्वयंबोधिनीटीकां विलिख्य द्विभाषिककोशस्य परम्परा स्थापिता । अत्र स्रोतभाषा संस्कृतं लक्ष्यभाषा नेपाली वर्तते। कुलचन्द्रगौतमस्य संक्षिप्तटिप्पणीसहितस्यामरकोशस्य टीका ढुण्डिराजहृषीकेशशर्मभ्यां वि.सं.१९५८तमे वर्षे हितचिन्तकमुद्रणालये काश्यां प्रकाशिता। ततः परमेव बहुवर्षानन्तरं टर्नरेण नेपालीभाषायास्तुलनात्मकस्तथा व्युत्पत्तिमूलककोशो(A Comparative and Etymological Dictionry of Nepali Language 1931 A.D. ) लिखितः। अत्र स्रोतभाषानेपाली लक्ष्यभाषाऽऽङ्गलोऽस्ति। संस्कृतवाङ्मये सन्त्यनेके कोशग्रन्थास्तथा तेषां टीकाश्च। तासु टीकास्वनुसन्धानं जातं तथापि कुलचन्द्रगौतमप्रणीतायाममरकोशटीकायां नैव जातम्। तस्मादस्मिन्विषये समस्या निम्नाङ्किताः सन्ति –

(क) कुलचन्द्रगौतमस्य व्याकरणात्मकग्रन्थास्तथा कोशविज्ञानश्च कीदृशः ?

(ख) अमरकोशस्य स्वयंबोधिनीटीकायां व्याकरणगताः कोशगताश्च विषयाः के? तत्र स्थितानां टिप्पणीसमस्तानेकरूपाव्ययशब्दानां व्युत्पत्तिः कीदृशी ?

(ग) स्वयंबोधिनीटीकाया विशेषतान्यूनते के ?

## १.३ उद्देश्यम्

यथाऽमरकोशः सर्वेष्वपि कोशेषु प्रसिद्धोऽस्ति तथैव तस्य टीका अपि सन्त्येव बह्व्यः। कुलचन्द्रगौतमप्रणीतस्याऽमरकोशस्य स्वयंबोधिनीटीका च प्रसिद्धा शिक्षकेषु छात्रवर्गेषु च प्रिया। तथाप्यस्याष्टीकाया वैशिष्ट्यानुसन्धानं नैव जातम्। प्रवर्तमानस्य शोधकार्यस्येमान्युद्देश्यानि सन्ति –

(क) कुलचन्द्रगौतमस्य व्याकरणात्मकग्रन्थानां कोशस्य कोशविज्ञानस्य च परिशीलनम्।

(ख) अमरकोशस्य स्वयंबोधिनीटीकायां व्याकरणगतानां कोशगतानाञ्च विषयाणां प्रदर्शनम्। तत्र स्थितानां टिप्पणीसमस्तानेकरूपाव्ययशब्दानां व्युत्पादनम्।

(ग) स्वयंबोधिनीटीकाया विशेषतान्यूनतयोः प्रदर्शनम्

## १.४ पूर्वकार्यसमीक्षा

कुलचन्द्रगौतमस्य परिचयः तस्य कृतिगतभूमिकादिषु कृतो दृश्यते। संस्कृतकृतिषु नेपालीकृतिषु च भूमिकारूपेण सम्मतिरूपेण च यत्र तत्र स्वल्पतया व्यवहृतः। गौतमस्य विविधकृतिषु परिचयो वर्तते –

कुलचन्द्रगौतमप्रणीतः *'अमरकोशः'* संक्षिप्तटिप्पणीपरिशेषसहितः १९८३ तमे वैक्रमाब्दे ढुण्डिराजहृषिकेशशर्मभ्यां हितचिन्तकमुद्रणालये काश्यां प्रकाशितः। तस्यैव पुस्तकस्य २०१७ तमे वैक्रमाब्दे पुनः प्रकाशनसन्दर्भे पं.बालकृष्णाचार्येण भूमिकायां कुलचन्द्रस्य सामान्यपरिचयेन सह विशिष्टं वैदुष्यं वैदेशिकविद्वद्भिः कृतं प्रशंसनं च लिखितम्।

गौतमेन विरचितस्य २०१५ तमे वैक्रमाब्दे प्रकाशितस्य राघवालङ्कारस्य प्रारम्भे 'एक अञ्जलि' शीर्षकभूमिकायां पण्डितराजसोमनाथसिग्देलेन कुलचन्द्रस्य वैदुष्यं व्यक्तित्वञ्च सामान्यपरिचयात्मकरूपेण स्थापितमस्ति।

नेपाल राजकीय प्रज्ञा-प्रतिष्ठानस्योपकुलपतिना बालकृष्णसममहोदयेन २०२६ तमे वैक्रमाब्देऽमरकोशस्य प्रकाशकीयभूमिकायां कुलचन्द्रस्य व्यक्तित्वस्य विद्वत्त्वस्य च परिचयो मुक्तकण्ठेन प्रशंसितः। साहित्याचार्यविद्वच्छिरोमणिकुलचन्द्रगौतमोऽस्माकं देशस्य गौरवोऽस्ति। संस्कृतभाषायाश्चर्चायां तस्मिन् समये सर्वश्रेष्ठ आसीत्। न केवलं नैपालकाः परन्तु भारतीया विद्वांसोऽपि मुक्तकण्ठैर्गीतवन्तः। साहित्यदर्शनव्याकरणादिशास्त्रेषु सरस्वत्याः पुत्रवदासीत् कुलचन्द्रः। राष्ट्रभाषायां रचितौ अलङ्कारचन्द्रोदय-राघवालङ्कारौ प्रशंसनीयौ स्तः। पण्डितराजसोमनाथस्य आदर्शराघववत् राघवालङ्कारो दृश्यते। संस्कृतनेपालीपाठकानां छात्राणां कृतेऽमरकोशो लाभप्रदोऽस्ति। अधुनामरकोशस्य प्रकाशनावसरः प्राप्त इति प्रसन्नोऽमि। यद्यपि प्रथमवारप्रकाशनसमयाच्चत्वारिंशत् वर्षाणि व्यतीतानि तथाप्यधुना बहवो विषयाः समाविष्टाः सन्ति। आदर्शरूपावल्याः स्थापनेनामरकोशेन पूर्णता प्राप्ता। अनेकैरुदाहरणैस्तथा नेपालीव्याख्यानैरत्यन्तलाभप्रदोऽस्त्यमरकोशः स्वयंबोधिनीटीकासहितः। अयं ग्रन्थो लेखकेन न दृष्टस्तथापि कुलचन्द्रस्य नाम धन्यमस्त्यमरं भविष्यति चेति

विदुषा हंसपुरेसुवेदिना लिखिते २०३७ तमे वैक्रमाब्दे प्रकाशिते *'संस्कृतवाङ्मय संक्षिप्त अध्ययन'* नामके ग्रन्थे 'विद्वच्छिरोमणिः कुलचन्द्रगौतमः' शीर्षके विदुषो गौतमस्य

जन्म-मृत्युकाव्यात्मककृतीनां परिचयेन जीवने आगताभ्यामारोहावरोहाभ्यां च सह तदीया प्रतिभा परिचायिता वर्तते ।

ईश्वरबरालेन 'मधुपर्क' पत्रिकायाः 'आधुनिक नेपाली साहित्यका अग्रदूत कुलचन्द्रगौतम' इति शीर्षकमवलम्ब्य कुलचन्द्रस्य जन्म-मृत्यु-जीवन-घटितारोहावरोहाणां चर्चया सह तदीयकाव्यात्मकविशिष्टप्रतिभायाश्चर्चाऽपि कृताऽस्ति ।

सूर्यविक्रमज्ञवालीकविरपि कुलचन्द्रेणानूदितस्य *शिवमहिम्नः स्तोत्रस्य* भूमिकायां कुलचन्द्रस्य प्रतिभया नितरां प्रभावितः कुलचन्द्रगौतमस्य प्रशंसां कृतवान् । तस्य व्यक्तित्वञ्च निजे कुलचन्द्रसम्बद्धे निबन्धे वर्णितवान् ।

चूडानाथभट्टरायविदुषा २०४१ तमस्य वैक्रमाब्दस्य माघमासस्य त्रयोदशदिवसे प्रकाशितस्य गोरखापत्रस्य शनिवासरीयपरिशिष्टाङ्के 'महान् साहित्यसेवी कुलचन्द्रगौतम' इति शीर्षकमवलम्ब्य कुलचन्द्रगौतमस्य जीवनम्, जन्ममृत्यू, काव्यात्मकविशिष्टप्रतिभा, जीवनस्यारोहावरोहौ, शलाकापरीक्षा चेत्यादिविविधविषयेषु अनुसन्धानात्मको लेखः प्रस्तुतः ।

घटराजभट्टराईविदुषा *'प्रतिभै प्रतिभा र नेपाली साहित्य'* नामके ग्रन्थे 'कुलचन्द्रगौतम' इति शीर्षकमवलम्ब्य तस्य जीवन्याः कृतीनाञ्च सामान्यः परिचयः प्रस्तुतः । 'एवं माध्यमिककालीन कवि र कविता' इति कृतौ कुलचन्द्रस्य स्वल्पपरिचयेन सह तस्य नेपालीकृतित्रयस्य लोकशिक्षा, दुर्गे पाहि माम्, उन्माद, इत्येतस्य सामान्यः परिचयः प्रदत्तः ।

शिवराजाचार्येण वाल्मीकिविद्यापीठेन प्रकाशिताया मर्यादापत्रियाः सप्तदशपूर्णाङ्के *'अमरकोशको ब्रह्मवर्गमा र तेस्का कुलचन्द्रकृत टीकामा वर्तमान केइ आलोच्य विषयहरू'* नामके शीर्षकेऽमरकोशस्य ब्रह्मवर्गे स्थितानां केषाञ्चनशब्दानामालोचना कृतास्ति । एष लघुप्रयास एव स्मरणीयोऽस्ति ।

डिल्लीरामतिम्सिना, माधवभण्डारी, यज्ञराजसत्याल, एच.बी. नवपानीय, राममणि आ.दी., रत्नध्वजजोशी, शरद्चन्द्रशर्मा भट्टराई, तानाशर्मा, टीकारामपन्थी, नरहर्याचार्यादयो नैपालका विद्वांसो विभिन्नग्रन्थेषु क्वचिद् ग्रन्थमध्ये क्वचिद् भूमिकादिषु च कुलचन्द्रगौतमस्य जीवनम्, योगदानम्, काव्यकलाम्, वैयक्तिकविशेषताम्, विशिष्टं वैदुष्यञ्चाधिकृत्य स्वकीयान् विचारान् प्रास्तुवन् ।

कुलचन्द्रगौतमस्य कृतीरधीत्य भारतीया विद्वांसस्तदीयकाव्यकलावैदग्ध्येनातीव प्रभाविता आसन् । तैः कुलचन्द्रस्य काव्यकलाविषये हार्दिकप्रशंसात्मका उद्गारा अभिव्यक्ताः । ते हि तदीयकाव्यकलावैशिष्ट्येन विमुग्धहृदया विद्वच्छिरोमणिं महान्तं मन्यन्ते स्म । तैरपि

कुलचन्द्रस्य कृतीनां विश्लेषणात्मकमध्ययनं न कृतम् । ते च कुलचन्द्रस्य भागवतमञ्जर्या आदर्शदम्पती सीतारामौ इति काव्यस्य च प्रकाशनसन्दर्भे सम्मतिप्रदायकत्वेन तस्य विद्वत्ताया विश्लेषणमकुर्वन् । तत्र भागवतमञ्जर्यां सम्मतिप्रदाने उद्गारस्य अभिव्यञ्जका विद्वांसो यथा–

देवर्षिभट्टः श्रीरामनाथशास्त्री, एंवार.कृष्णमाचार्यः, एच्.डी.बेलाङ्कारः, महामहोपाध्यायबामाचरणभट्टाचार्यः महामहोपाध्यायमुरलीधरझा, श्रीनारायणशास्त्रिखिस्ते च सन्ति ।

आदर्शदम्पती सीतारामौ इति काव्ये च सम्मतिप्रदाने सप्रमोदमुद्गारस्याभिव्यञ्जका विद्वांसो यथा –

सुरेन्द्रनाथद्विवेदी, बदरीनाथशुक्लः, मुकुन्दशास्त्री खिस्ते, अनन्तशास्त्री फड्के, बटुकनाथशास्त्री खिस्ते, विश्वनाथशास्त्री भारद्वाजः, रामचन्द्रशास्त्री बझे च सन्ति ।

कुलचन्द्रस्य काव्यमधिकृत्य कुलचन्द्रस्य काव्यकलाविषये काशीस्थविद्वत्परिषदा सम्मतिपत्रं प्रदत्तम् । तत्सम्बद्धा विद्वांसो नारायणशास्त्री खिस्ते, सत्यनारायणशास्त्री, राजनारायणशुक्लश्च प्रमुखा आसन् । अधुना यावत् कुलचन्द्रस्य विषये शोधप्रबन्धात्मकलेखा ये प्राप्यन्ते तेषां सामान्यपरिचयो यथा –

मुकुन्दप्रसादगुरागाइँनामकेन स्नातकोत्तरनेपालीविषयकच्छात्रेण त्रिभुवनशिवविद्यालयस्य स्नातकोत्तरोपाधये प्रस्तुतेऽष्टमे पत्रे कुलचन्द्रगौतममधिकृत्य लघुशोधप्रबन्धः प्रस्तुतः *'पण्डित कुलचन्द्रगौतमको जीवनी व्यक्तित्व र कृतित्वको अध्ययन'* इति शीर्षके लघुशोधप्रबन्धे कुलचन्द्रगौतमस्य संक्षिप्ता जीवनी संक्षिप्तं व्यक्तित्वञ्च प्रस्तुत्य तस्य नेपालीभाषात्मकप्रबन्धानां 'उन्मादः, अलङ्कारचन्द्रोदयः, राघवालङ्कारः, लोकशिक्षा, दुर्गे पाहि माम्' इत्येतेषामतिसरलं सामान्यं संक्षिप्तमध्ययनं कृतम् ।

टीकारामाधिकारिणा त्रिभुवनविश्वविद्यालयस्य लघ्वनुसन्धानपरियोजनान्तर्गतत्वेन लघुशोधप्रबन्धः प्रस्तुतः । तस्मिन् शोधप्रबन्धे कुलचन्द्रगौतमस्य कासाञ्चन संस्कृतकृतीनां विश्लेषणस्य प्रयासः सञ्जातः । तत्र कुलचन्द्रस्य प्रकाशितानामप्रकाशितानाञ्च संस्कृतकाव्यकृतीनां नेपालीकाव्यकृतीनामन्यविध-रचनानाञ्च विश्लेषणं नास्ति । तस्मिन् प्रबन्धे कवेः कुलचन्द्रस्य जीवन्यास्तत्रापि गौतमवंशस्य विशेषतायाः सविस्तरं चर्चा दृश्यते । स प्रबन्धो गुरागाई-प्रस्तुतप्रबन्धादुल्लेख्यतरो वर्तते ।

अम्बिकाप्रसादाधिकारिणापि लेखनाथसम्बद्धे निजे निबन्धे प्रसङ्गतः कुलचन्द्रस्य चर्चा कृता । परं स्वगुरोः सोमनाथस्यैव महत्तां दृढयितुं प्रयासरतो दृश्यते ।

नारायणप्रसादगौतमेन नेपालसंस्कृतविश्वविद्यालये प्रस्तुतस्य विद्यावारिधिशोधप्रबन्धस्य *'कुलचन्द्रगौतमस्य काव्यात्मकसंस्कृतकृतीनां विश्लेषणम्'* इत्यप्रकाशितशोधग्रन्थे कुलचन्द्रगौतमस्य प्रकाशितानामप्रकाशितानाञ्च संस्कृतकाव्यकृतीनां विश्लेषणप्रसङ्गेऽन्यसमस्तकृतीनां सामान्यपरिचयो दत्तो वर्तते । तस्मिन् विद्यावारिधिशोधप्रबन्धे नारायणेन कुलचन्द्रस्य जन्म, जन्मस्थानम्, पारिवारिकस्थितिः, बाल्यकालः, शिक्षाप्राप्तिः, वैदुष्यम्, कृतिनिर्देशश्च कृतः । काव्यतत्त्वचमत्कृतानामष्टानां कृतीनां कृष्णकर्णाभरणकाव्यम्, भागवतमञ्जरी, गङ्गागौरवम्, प्रपञ्चचर्चा, प्रेमपञ्चपञ्चाशिका, रामायणवन्दना, भागवतवन्दना, आदर्शदम्पती सीतारामौ चेति प्रथितानां काव्यशास्त्रदृष्ट्या समीक्षा कृता । विषयान्तरप्रधानानां प्रकाशितानां विकीर्णसंस्कृतकृतीनां शोकमहोर्मिः, काशिराजकीयसंस्कृतमहाविद्यालयः, आदित्यार्यास्तुतिः, शिवस्तुतिनक्षत्रमाला, नवरत्नहारः, शीतवर्णनम्, भारतीवैभवशुभाशंसनम्, स्वर्णतुलादानम्, वैद्यवल्लभः, योगकौमुदी चेति दशकृतीनां प्रथितानां संक्षिप्तं विश्लेषणं विहितम् । तथैवाप्रकाशितानां संस्कृतकृतीनां हरिवरिवस्या, विष्णुसहस्रनामविवृतिः, श्रीमद्भगवदवतारस्तवराजः, श्रीशक्तिस्तुतिकौमुदी, श्रीवैष्णवषोडशनामावली, प्रातःस्मरणम्, गौतमवंशवृत्तञ्चेति सप्तकृतीनां परिचयात्मकं विश्लेषणं कृतम् । कोशगतकृतीनामनूदितकृतीनां सम्पादितकृतीनाञ्चामरकोशपरिशेषः, अमरकोशस्य स्वयंबोधिनीव्याख्या, संस्कृतनेपालीशब्दकोशः (लघुनामकोशः) महिम्नः स्तोत्रस्य नेपालीभाषानुवादः, रामचरितमानसस्य भावबोधिनी नेपालीटीका, गौरीशङ्करगुटिका, विवाहपद्धतिश्चेति सप्तकृतीनां परिचयः प्रदत्तः । एवमेव नारायणेन नेपालीभाषायां रचितानां समस्तकृतीनामलङ्कारचन्द्रोदयः, राघवालङ्कारः, उन्मादः, उपहारः (दुर्गे पाहि माम्), लोकशिक्षा, अलङ्कारसङ्ग्रहः, सत्सङ्गमुक्तावली, स्वयंवैद्यः, पुरुषार्थकल्पवल्ली, तत्त्वबोधिनी चेति दशकृतीनां परिचयः प्रदत्तः ।

अनेन प्रकारेणानेकैर्विद्वद्भिः कुलचन्द्रगौतमस्य विद्वद्व्यक्तित्वं कृतित्वञ्च विवेचितं तथापि तस्यामरकोशस्य स्वयंबोधिनीटीकाविषये कैश्चिद्विद्वद्भिः केवलं चञ्चूप्रवेशः कृतः । पूर्ववर्तिभिरध्येतृभिः कृतानि टिप्पणीविवेचनविश्लेषणान्यध्ययने सामग्रीं संपाद्यास्मिन्नध्ययने कुलचन्द्रस्य कोशकारव्यक्तित्वस्य तथैव कोशीयप्रविष्टीनां व्युत्पत्तेरध्ययनं करणीयमस्ति ।

अमरकोशस्य स्वयंबोधिनीटीकायाः सामान्यपरिचये दत्तेऽपि व्याकरणदृष्ट्या विश्लेषणं नैवजातं तस्मादध्ययनं कृतमधुना ।

**संस्कृतनेपालीकोशाः कोशकाराश्च** – २०६८तमे वैक्रमाब्दे टीकादत्तबरालेन प्रकाशितः *तत्सम नेपाली व्युत्पत्ति शब्दकोश* नेपालीभाषिपाठकानां कृते महत्त्वपूर्णोऽस्ति । व्यृत्पत्तिमूलकत्वात् संस्कृतक्षेत्रेऽप्युपयोगी वर्तते । तत्र शब्दानां संस्कृते नेपाल्याञ्च विग्रहं कृत्वा टिप्पण्यां सूत्राणि दत्तानि सन्ति । अत्र नेपालीभाषाया जननी संस्कृतभाषा व्यवहारेण दर्शिता । उदाहरणानि सरलतया दत्तानि । अल्पज्ञानां विदूषाञ्चोपयोगिकोशोऽस्ति । अल्पज्ञानां केवलमर्थो विदुषान्तु सूत्रविग्रहौ महत्त्वपूर्णौ स्तः ।

टीकादत्तबरालस्य *तत्सम नेपाली व्युत्पत्ति शब्दकोश* नामककोशस्य भूमिकायां दुर्गाप्रसाददाहालो लिखति यत् – कुलचन्द्रगौतमो वर्गीयकोशप्रियो वर्णानुक्रमकोशप्रियश्चासीत् । पठनपाठनक्रमे सारल्यार्थं श्लोकात्मकवर्गीयकोशस्य परम्परा प्राचीना । अमरपूर्वे पश्चाच्च बहवः कोशाः श्लोकात्मकरूपेण लिखिताः । तदेवौचित्यं दृष्ट्वा कुलचन्द्रगौतमेन *अमरकोशपरिशेषः कोशः (व्यावहारिककोशः)* श्लोकात्मकशैल्या रचितः । व्यावहिरिककोश आधुनिककोशकाराणां प्रेरणां ददाति । पाठकानां कण्ठस्थीकर्तुं सारल्यञ्च ।

अपरपक्षे तु कुलचन्द्रवर्णक्रमशैल्यापि लिखति । नेपालसंस्कृतविश्वविद्यालयेन प्रकाशितो *लघुनामकोश* उदाहरणरूपेण दृश्यते । वर्णक्रमकोशे पाठकानां शब्दानन्वेष्टुं सारल्यं भवति । आधुनिकपाठ्यक्रमेऽपि भाषाशिक्षणकाले बालकानां वर्णानुक्रमकोशस्य शिक्षा दीयते ।

कुलचन्द्रः शिक्षाया रहस्यं ज्ञात्वा द्विप्रकारकयोः कोशयोराश्रयं करोति न त्वेकाङ्गितया । पूर्वस्मिन् कालेऽपि वर्णक्रमकोशस्य प्रचलनमासीदेव । अजयपालेनापि वर्णक्रमशैल्या कोशो रचितः । सर्वप्राचीनतमकोशो निघण्टुः गद्ये लिखितः पश्चात् पदस्य प्रचलनमभूत् ।

२०७३ तमे फणीन्द्रप्रसादपाण्ड्ययेन लिखितो नेपालसंस्कृतविश्वविद्यालयेन प्रकाशितः *संस्कृत नेपाली वृहत्शब्दकोश* संस्कृतभाषिपाठकानां नेपालीभाषिपाठकानाञ्च बहूपयोगी अस्ति । तत्र शब्दानामर्था लिङ्गान्यपि दर्शितानि । केषाञ्चन शब्दानां व्युत्पत्तयो दर्शितानि पाणिनीयसूत्राण्यपि स्थापितानि सन्ति ।

इतः पूर्वं केवलं कुलचन्द्रस्यामरकोशस्य स्वयंबोधिनीटीकासीत् । तत्र शब्दानां सीमासीत् । अनेन फणीन्द्रेण शब्दान् सङ्ख्यार्था दत्ताः । संस्कृतभाषाया नेपालीभाषायाश्च सुदृढः संबन्धः सञ्जातः । उभयोः पाठकानां बहूपयोगी वर्तत एव ।

२०७५ तमे वैक्रमाव्दे प्रकाशिते *विद्वच्छिरोमणि श्री कुलचन्द्र गौतम* नामके स्मृतिग्रन्थे ज्ञानमणिनेपालः कुलचन्द्रस्यामरकोशस्य टीकायाश्चर्चां कुर्वन् काँश्चनानुच्छेदान् लिखति । अमरकोशः प्राचीनकालात् संस्कृतछात्राणां कृते अत्यावश्यकः पाठ्यपुस्तकः । यथा शासकः कोषं विना राज्यसञ्चालनं कर्तुं नैव पारयति तथैव कोशं व्याकरणञ्च विना शास्त्रं पठितुं पाठको नैव शक्नोति । इममेव विषयमनुभूय कुलचन्द्रेणामरकोशस्य स्वयंबोधिनी नामिका टीका लिखिता । अमरकोशपरिशेषश्च रचितः । अमरकोशे टीकायां कुलचन्द्रेण प्रत्येकशब्दानां लिङ्गसङ्केतः, टिप्पणी, वर्णानुक्रमिका,शास्त्रे नैव दृष्टा व्यवहारे प्रचलिताः शब्दाश्च स्थापिताः ।

कुलचन्द्रेणापरोऽपि शब्दकोशष्टिप्पणीसहितप्रकाशितः १९८३ तमे वैक्रमाब्दे । पश्चात् वाराणस्यां बालकृष्णाचार्येण गुरोराज्ञां विना प्रकाशितः स्वनाम्नि । भारते तस्मिन् समये ब्रिटिसशासनमासीत् । प्रतिलिप्यधिकारः(कपिराइटर) नियमः सबल आसीत् । द्विलक्षदण्ड आसीदनुकरणकारिणाम् ।

बाकृष्णार्येण यशोदापुस्तकालयात् प्रकाशितासीत् कुलचन्द्रस्य रचना । तस्मात् कुलचन्द्रस्य पुत्रेण लक्ष्मीनाथगौतमेन प्रकाशकस्य विरुद्धे निवेदनं दत्तम् । पश्चात् भयेन बालकृष्णाचार्यः कुलचन्द्रस्य शरणमगच्छत् । तस्मात् कुलचन्द्रेणानुमतिर्दत्ता । यथा –

संक्षिप्तटिप्पणीयुक्तः कोशश्चात्र सुखावहः ।
प्रदत्तो बालकृष्णाय कुलचन्द्रविपश्चिता ॥

तस्मात् बालकृष्णाचार्येण बालकृष्णाश्रमी नामिका टीका पुरुषोत्तमदेवस्यैकाक्षरिकोशसहितः शब्दभेदप्रकाशश्च समावेशः कृतः ।

२०७५ तमे वैक्रमाव्दे प्रकाशिते *विद्वच्छिरोमणि श्री कुलचन्द्र* नामके स्मृतिग्रन्थे वेणीमाधवढकालेन कुलचन्द्रस्य व्याकरणपरकसाहित्यस्य *कृष्णकर्णाभरणम्* नामकग्रन्थस्य विवेचना कृता । कुलचन्द्रेण जार्ज मुद्रणालये कालभैरवे काश्यां १९७५ वैक्रमाव्दे कृष्णकर्णाभरणनामकं खण्डकाव्यं प्रकाशितम् । अस्मिन् ग्रन्थे ६२ पुनः २ पृष्टाः सन्ति । १२२ पद्यानि सन्ति । तस्मिन् काले पुस्तकस्य मूल्यं १२ आना आसीत् । सिद्धान्तकौमुद्या लकारार्थप्रक्रियामवलम्ब्य रचितमस्ति । अत्र ६३ सूत्राणि प्रयुक्तानि सन्ति । अस्मिन् काव्ये व्याकरणस्य नियमाः काव्यस्य विषयवस्तुनि स्थापिताः सन्ति । काव्यं भट्टीकाव्यवदतुलनीयमस्ति ।

२०७५ तमे वैक्रमाव्दे प्रकाशिते *विद्वच्छिरोमणि श्री कुलचन्द्र* नामके स्मृतिग्रन्थे चूडानाथभट्टरायेनापि कृष्णकर्णाभरणस्य कुलचन्द्रगौतमस्य परिशिष्टसहितस्यामरकोशस्य स्वयंबोधिनीटीकाया चर्चा कृता ।

२०७८ तमे वैक्रमाव्दे नीलमणिढुङ्गानया प्रकाशितो *व्युत्पत्तिमूलक संस्कृतनेपाली शब्दकोश* नामककोशो द्विभाषिककोशोऽस्ति । अत्र स्रोतभाषा संस्कृतं लक्ष्यभाषा नेपाली वर्तते । अस्मिन् व्युत्पत्तिमूलकशब्दकोशे धातूनामर्था दत्ताः । शब्दानां विग्रहोऽपि प्रदर्शितः । प्रविष्टौ उपप्रविष्टौ चार्था दत्ताः । केषाञ्चन शब्दानामुदाहरणान्यपि दत्तानि । व्याख्यानञ्च कृतं विश्वकोशवत् केषाञ्चन शब्दानाम् । तथापि लेखनविषये प्रतिज्ञा नास्ति । स्वेच्छया विस्तारः सङ्कोचश्च दृश्येते । साहित्यविषये ज्योतिषविषये धर्मशास्त्रविषये भूगोलविषये खगोलविषये संस्कृतिविषये च महत्त्वं दत्तम् । समासविग्रहो लिङ्गनिर्देशनञ्च सर्वत्रैव सङ्केतितम् । अत्र लेखकेन प्रचलितान्येवोदाहरणानि दत्तानि । विग्रहक्रमे पाणिनीयसूत्राणि लिखितानि ।

ढुङ्गानया नेपालीपाठकानां लक्ष्यीकृत्य परिश्रमः कृतः । तथापि कुलचन्द्रवदुदाहरणानि नैव दत्तानि केवलं स्वेच्छया दत्तानि । कुलचन्द्रस्तु यत्रोदाहरणस्यावश्यकताभवत् तत्रैव दत्तवान् । द्विभाषिककोशक्रमे नीलमणेः प्रयासः प्रशंसनीयः । स्वकीयः पठनस्य पाठनस्य चानुभवः सम्यक्तया प्रदर्शितः । बहुप्रयत्ने कृतेऽपि विदुषां स्वल्पपोषणं ददाति कोशः । आदौ कोशे प्रतिज्ञाभावादेकरुपता नास्ति । तथापि नेपालीभाषिपाठकानां प्रेरणां ददाति व्यवहारे चोपयोगी भवत्येव कोशः । शब्दानामुदाहरणक्रमे लेखकेन कुलचन्द्रस्यानुकरणं कृतम् ।

केशवानन्दस्वामिना निर्मित एको दूरदर्शनयन्त्रे सम्पादितः संस्कृत–नेपाली–हिन्दी–आङ्लकोशोऽस्ति । स व्यवहारेऽधुनोपयोगी वर्तते । तेन वाचस्पत्यम्, शब्दकल्पद्रुमः, नेपालसंस्कृतविश्वविद्यालयेन प्रकाशितः फणीन्द्रप्रसादपाण्डेयेन लिखितः संस्कृतनेपालीशब्दकोश इत्यादीन् मेलयित्वा कोशः सम्पादितः । स संस्कृतपाठकानां नेपालीपाठकानां हिन्दीपाठकानामाङ्लपाठकानाञ्च लक्ष्यीकृत्य सम्पादितः । केषाञ्चन शब्दानां व्युत्पत्तिर्दर्शिता सूत्राण्यपि स्थापितानि । अधुना मोबायलयन्त्रे स्थापयित्वा व्यवहारकाले सर्वदा द्रष्टुं शक्यते । केशवान्दस्वामिना समयसापेक्षं कार्यं कृतम् ।

२०७८ तमे वैक्रमाव्दे चिरञ्जीविखतिवडया लिखितो महेशगुरुकुलम् रामानन्द अनुसन्धान केन्द्रेण प्रकाशितोऽमरकोशश्छात्राणामुपयोगी वर्तते । तत्र सर्वं कुलचन्द्रस्यानुकरणं कृतमस्ति । संक्षेपीकरणं बहुप्रयासेन कृतम् । कुलचन्द्ररचितव्यवहारिककोशोऽपि समाविष्टः । उभयो कोशयोः शब्दानुक्रणिकापि दत्ता । अत्र नेपालीशब्दानामनुक्रमणिका तथा

संस्कृतशब्दानां रुपावली न दत्ता । व्याख्यापि नैव स्थापिता । तथापि नवशैल्या लिखितः प्रयासः प्रशंसनीयः ।

**कोशविज्ञानं नैपालककोशाश्च** – कुलचन्द्रगौतमस्य स्वयंबोधिनीटीकायां श्रोतभाषा संस्कृतं लक्ष्यभाषा नेपाल्यस्ति । नेपालीभाषायां वर्णक्रमानुसारेण शब्दाः स्थापिताः सन्ति । तत्र कुलचन्द्रेण सस्कृततो नेपाल्यां नेपालितः सस्कृतेऽर्थो दत्तः । तस्मात् कोशविज्ञानस्य नेपालीकोशस्य च पूर्वकार्यस्य समीक्षा क्रियते ।

बल्लभमणिदाहालेन २०३३ तमे वैक्रमाब्दे *नेपाली भाषा र कोश* शीर्षकस्य लेखे नेपालीभाषायाः शब्दकोशस्य निर्माणं माग्लैः कृतानां प्रयासानां चर्चां कृत्वा लक्षितसमूहस्य प्रयोजनस्य सूचनायाश्चाधारे शब्दकोशो विभिन्नप्रकारस्य भवतीति टिप्पणी कृता । तेन नेपाल्यां प्रकाशितेभ्यः कोशेभ्यः सामान्यतया द्विभाशिकस्तथा बहुभाशिककोशः, आधिकारिकवर्णनात्मककोशः, व्युत्पत्तिमूलककोशः, विशेशकोशश्चेति चतुःप्रकारेण वर्गीकरणं कृतम् । वैदेशिकैर्द्वितीयभाषारूपे आङ्गलहिन्दीशिक्षणाय प्रारम्भे केचन शब्दकोशा निर्मिताः । पुष्करसमशेरस्य *नेपाली अंग्रेजी कोशः* १९९३ तमे वैकमाब्दे प्रकाशितः, चक्रपाणिचालिसयः *नेपाली बगली कोशः*, रामचन्द्रढुङ्गानायाः *संङ्क्षिप्त नेपाली कोशः*, बालचन्द्रशर्मणो *नेपाली शब्दकोश*श्चाधिकारिका दर्शिताः । *र्याल्फ लिलि टर्नरस्य नेपालीभाषायास्तुलनात्मकस्तथा व्युत्पत्तिमूलककोशः (A Comparative and Etymological Dictionry of Nepali Language 1931 A.D.)* इत्यस्मै व्युत्पत्तिमूलककोशे स्थापितः । तेन प्राविधिककोशः, अर्थसीमितकोशः, ध्वनिप्रधानकोशश्च विशेषकोशे उल्लिखिताः । केशवलालकर्माचार्यस्य *संक्षिप्तनेपालीकोशः* २०२० तमे वैक्रमाब्दे प्रकाशितः, डी.वी. श्रेष्ठस्य *ए गाइड टु कमन टर्म्स अन भेरियस सब्जेक्ट* २०३२ तमे वैक्रमाब्दे प्रकाशितः इत्याभ्यां निर्माणकोशस्य पदक्रमं मत्वा निश्चितप्राविधिककोशो नेपाल्यां नास्तीति टिप्पणी कृता । चक्रपाणिचालिसयः पर्यायवाची कोषः १९९८ तमे वैक्रमाब्दे प्रकाशितः पुष्करसमशेरस्य *नेपाली उखान टुक्का र वाक्यांशकोशः* १९९८ तमे वैक्रमाब्दे प्रकाशितः इत्याभ्यामर्थसीमितकोशौ स्वीकृतौ । महानन्दसापकोटायाः *सरिशब्दः* २०२१ तमे वैक्रमाब्दे प्रकाशितो ध्वनिप्रधानकोशे स्थापितः ।

महानन्दसापकोटया २०३४ तमे वैक्रमाब्दे प्रकाशितस्य नेपालीशब्दकोशस्य भूमिकायां प्रकाशितेषु नेपालीशब्दकोशेषु स्वकीयकोशः पञ्चम उक्तः । अयं कोशः शब्दानां परिचयं निर्वचनं व्युत्पत्तिञ्च दातुं सम्पादितः । तत्र वर्णक्रमेण संस्कृतमूलशब्दान् दत्वा नेपाल्यां

तद्भवशब्देषु विकशिताः प्रचलिताश्च शब्दाः स्थापिताः । निर्वचनविषयेऽयं कोशो नेपाल्यां प्रथमः । महानन्दस्य शब्दकोशे प्रविष्टिस्त्वुपयोगिनी परन्तु कोशस्य श्रेणिनैंव निश्चिता ।

सूर्यविक्रमज्ञवालिना २०३४ तमे वैक्रमाब्दे प्रकाशितस्य नेपालीशब्दकोशस्य भूमिकायां संक्षिप्तसमीक्षा कृता । तेन कोशे तद्भवशब्दानां वर्णक्रमं विनान्वेष्टुं काठिन्यं प्रदर्शितम् । ज्ञवालिना व्यवस्थापने बहुप्रचलितस्य वर्णक्रमस्य वैज्ञानिकयुक्तित्वादिति टिप्पणी कृता ।

डिल्लिरामतिम्सिनया २०३४ तमे वैक्रमाब्दे प्रकाशितं *नेपालीकोशको व्युत्पत्तिज्ञान* इति शीर्षकं दत्वा महानन्दसापकोटाया नेपालीशब्दकोशस्य संक्षिप्तपरिचयो दत्तः ।तेन शब्दकोशस्य प्रयोजनं प्रकारस्तथा कोशकारे सम्भावनीया ज्ञानस्य कलाया अध्यवसायस्य च संक्षिप्तटिप्पणी कृता । नेपाल्यां प्रकाशितेषु शब्दकोशेषु टर्नरस्य शब्दकोशवत् नेपालीशब्दानां निर्वचनस्य व्युत्पत्तेश्च दृष्ट्या कोशः समुल्लेख्य उक्तः । तिमिल्सिनायाष्टिप्पण्यां सामान्यपरिचयोऽस्ति न तु सामग्र्या विश्लेषणम् ।

ज्ञानमणिनेपालेन २०३५ तमे वैक्रमाब्दे प्रकाशितस्य *नेपाली शब्द परिचय नियालेर हेर्दा* शीर्षकस्य लेखे कोशे प्रविष्टेरौचित्यस्यार्थस्य व्युत्पत्तेश्च विषये विवेचना कृता । महानन्देनात्रानावश्यकाः केचन शब्दाः प्रविष्टौ स्थापिताः केचनावश्यकाः शब्दा नैवात्र स्थापिताः । व्युत्पत्तिरहितानां शब्दानां स्थापनात् कलेवर एव वर्धितः । नेपालेन द्वितीयलेखे कोशस्य विवेचनं कृतम् । तेन तत्र कोशे प्रयुक्ताः शब्दास्त्रुटिपूर्णा उक्ताः ।

घटराजभट्टराई विदुसा २०३९ तमे वैक्रमाब्दे प्रकाशितस्य *मोतिरामभट्टको शब्दकोश* इति शीर्षकस्य लेखे *अनुप्रास मञ्जरी* ( अप्रकाशिता ) नामके श्लोकबद्धसंग्रहस्याधारे मोतिरामभट्टाय कोशकारस्य क्षेत्रं परिचायितुं प्रयासं कुर्वन्ननुसन्धातुर्ध्यानमाकर्षणं कृतम् । तस्य प्रयासो नेपाल्यैकभाषिककोशस्य पूर्वरूपमन्वेष्टुं केद्रितः ।

हर्षनाथभट्टराई विदुषा २०४१ तमे वैक्रमाब्दे प्रकाशितस्य *संस्कृत अंग्रेजी र नेपाली शब्दकोश परम्पराको सङ्क्षिप्त सर्वेक्षणस्य* क्रमे वर्णक्रमवर्गीययोरुभयोः कोशयोर्निर्माणे प्रारम्भिकादर्शस्य प्रयासस्य विशेषचर्चा कृता । अजयपालेन १२२९–३२ तमे ईसवीये वर्णानुक्रमस्यावलम्बनं कृत्वा नानार्थसंग्रहनामकः कोशः प्रस्तुतः । सा पद्धतिरन्यैः कोशकारैर्नैवावलम्बिता । पौरस्त्यशब्दकोशपरम्परायां वर्गीयपद्धत्या व्यापकता प्राप्तेति स्पष्टीकरणं कृतम् । पौरस्त्यकोशकारैरक्षरसंख्यापद्धत्या वर्गीयपद्धत्यान्ताक्षरिपद्धत्याधारे कोशाः प्रस्तुताः । हर्षनाथेन प्रविष्टशब्दानामेव व्यवस्थायां युक्तेश्चर्चा कृता ।

शिवरेग्मिणा १९८६ तमे ईसवीये प्रकाशितस्य *मोतीराम भट्ट र उनको शब्दसंग्रह प्रकरण* इति शीर्षकस्य लेखे घटराजभट्टराएः *अनुप्रास मञ्जरी* एव मोतिरामभट्टस्य शब्दकोश इति मतस्य खण्डनं कृतम् । मोतीरामेण कवितारचनाक्रमे शब्दानां संकलनं कृतं तदेव नेपाल्येकभाषिकोशस्य पूर्वरूपमस्ति ।

घटराजभट्टराईविदुषा २०४४ तमे वैक्रमाब्दे प्रकाशितस्य ***बालचन्द्र शर्मा व्यक्तित्व र साधना*** नामके पुस्तके ***कोशकार बालचन्द्र*** नामक उपशीर्षके नेपालीशब्दकोशस्य सङ्क्षिप्तचर्चा कृता । तेन नेपालीशब्दकोशस्य परम्परायां चक्रपाणिचालिसेरामचन्द्रढुङ्गानयोः कोशौ विस्तृतौ बहुसूचनाप्रयुक्तौ चेति मूल्याङ्कनं कृतम् । घटराजस्य समीक्षया नेपालीशब्दकोशस्य सङ्क्षिप्तसामान्यरूपे परिचयो दत्तः । अनेन लेखेनान्तवस्तुविश्लेषणस्य रुचिर्नैव दर्शिता ।

चूडामणिबन्धुना १९९५ तमे ईसवीये प्रकाशितस्य ***डिक्सनरी मेकिङ् इन नेपाली*** शीर्षकस्य लेखे श्रोतभाषा वा लक्ष्यभाषा काऽपि स्यात् नेपालीभाषायां प्रयुक्तकोशानां सम्पादनप्रकाशनादिसम्बद्धसूचनायाः सङ्क्षिप्तटिप्पणीसहितनेपालीशब्दकोशस्य सर्वेक्षणं कृतम् । तेन नेपाल्येकभाषिककोशस्य परम्परारम्भो नेपाली बगली कोशादभूदित्युक्तम् । बालचन्द्रस्य शब्दकोशः समयानुसारःश्रेष्ठस्तथाप्यत्राप्रचलितशब्दानामाधिक्यता । विश्वविद्यालयस्य प्राध्यापकैर्निर्मितो नेपालीबृहत्शब्दकोशोऽपि त्रुटिरहितो न । बन्धुना विभिन्नस्तरवयसां शिक्षर्थिनां कृते उपयोगी, ऐतिहासिकव्युत्पत्तिसहितस्येकभाषिकस्य द्विभाषिकस्य बहुभाषिकस्य च कोशस्य स्पष्टावश्यकता दर्शिता । तेन नेपालीबृहत्शब्दकोशस्य त्रुटिक्षेत्रञ्च दर्शितम् ।

योगेन्द्रयादवचूडामणिबन्धुभ्यां १९९५ तमे ईसवीये प्रकाशितस्य ***डिक्सनरी अफ द नेपाली लङ्गेजअन* हिस्टोरिकल प्रिन्सिपल** शीर्षकस्य लेखे नेपालीभाषायाः कोशानां मध्ये टर्नरस्य तुलनात्मकव्युत्पत्तिमूलकशब्दकोशः, बालचन्द्रशर्मणो नेपालीकोशः,महानन्दसापकोटाया नेपालीशब्द परिचयः, नेपालराजकीयप्रज्ञाप्रतिष्ठानेन प्रकाशितो नेपाली बृहत्शब्दकोशश्च नेपालीभाषायां प्रकाशिता महत्त्वपूर्णाः कोशा उक्ताः । एतैः कोशैः शब्दानां व्युत्पत्तिर्विविधसूचनाश्च दत्ता नेपालीभाषायै एकरूपतां दातुं प्रयासः कृतः । ताभ्यां वर्णविन्यासेऽन्तर्विरोधः, उच्चारणसम्बन्धिसूचनाया अभावः, व्युत्पत्तिगतभिन्नता, व्युपत्तिविषये शब्दानामैतिहासिकभाषावैज्ञानिकविधितुलनात्मकपुनर्निर्माणकार्याणां न्यूनता चोल्लिखिता । यादवबन्ध्वोः समीक्षया नेपालीभाषायाः कोशस्य त्रुटिर्दर्शिता । ताभ्यां केवलं टिप्पणी कृता समीक्षा चैकाङ्गी तथा सङ्क्षिप्ता ।

हेमाङ्गराजाधिकारिणा २०६३ तमे वैक्रमाब्दे ***नेपालीवर्णविन्यास र यसमो मानकीकरण*** नामके लेखे वर्णविन्यासे परिष्कारस्य व्याकणकोशयोर्निर्माणेन लेख्यभाषायां प्रचलितमान्यतायाः प्रचारप्रसारौ भूत्वा भाषाया मानकीकरणे सहयोगो भवेदियुक्तम् । तेनोच्चरणवर्णविन्यासयोर्विविधताया उत्पन्नमनिर्णयं निराकणं कृत्वा भाषायै एकरूपतार्थमर्थप्रयोगयोर्निर्धारणे च सहयोगो भवेत् । मानकीकरणे शब्दकोशस्य महत्त्वमस्तीति स्पष्टीकृतम् । हेमाङ्गेन नेपालीभाषाया मानकीकरणे प्रारम्भिकप्रयासेषु हलन्तबहिष्कारान्दोलनाय वर्णविन्यासे परिष्कारस्य प्रथमप्रयासं स्वीकृत्य राममणेः मणिकोश नामकः शब्दकोशः मानकीकरणे उल्लेख्यभूमिका स्वीकृता । अनेन प्रकारेण चन्द्रिकाव्याकरण १९६९ तमे नेपालीबगलीकोशादिप्रकाशनेन तथैव नेपालीबृहत्शब्दकोशप्रकाशनेन नेपालीभाषाया लेख्यरूपस्य मानकमिति टिप्पणी कृता । शब्दकोशो लेख्यभाषायाः प्रमाणत्वात् हेमाङ्गस्य टिप्पण्युपयुक्ताः ।

रामचन्द्रलम्सालेन २०५७ तमे वैक्रमाब्दे शब्दकोशसम्बन्धिसैद्धातिकस्तथा प्रायोगिकपक्षस्य नेपालीशब्दकोशपरम्पराया सर्वेक्षणमेवं नेपालीभाषायां प्रकाशितप्रतिनिाधिशब्दानां समीक्षा कृता । अष्टाध्याये प्रबन्धितः ***कोशविज्ञान र नेपालीशब्दकोश*** नामकपुस्तकस्य विषयवस्तुनि शब्दकोशसम्बन्धिसैधान्तिकाध्ययनं तथा नेपालीशब्कोशपरम्पराया अध्ययनं कृत्वा द्विभागे विभक्तुं शक्यते ।

लम्सालेन कोशविज्ञाने विंशतिशताब्द्याः पूर्वार्द्धपश्चात् भाषावैज्ञानिकपद्धत्या उपयोगारम्भः संजातः प्रायोगिकभाषाविज्ञानन्तर्गते कोविज्ञानं स्थितमिति लिखितम् । तेन भाषाविज्ञानस्य सम्पूर्णशाखाः सम्पूर्णवाङ्मयानि च कशविज्ञाने सम्बद्धाविति स्पष्टीकृतम् । ऐतिहासिकशब्दकोशनिमर्नणे ऐतिहासिकभाषविज्ञानं समकालिकशब्दकोशनिर्माणे वर्णनात्मकभाषविज्ञानेन कोशविज्ञानाय सहयोगं करोति । अस्मिन्नेवाधारे कोशविज्ञानं भाषाविज्ञानस्य प्रयोगभूमिरस्ति । तेन शब्दकोशस्य प्राच्यप्रतीच्यपरम्परायाश्चर्चा कुर्वन् कठिनवैदिकशब्दानां प्राच्यवाङ्मये निघण्टुनिरूक्तौ जातौ । पश्चिमे बाइबलस्य कठिनशब्दानां शब्दार्थसूचिरूपे शब्दकोशस्य पूर्वरूपं जातम् । प्रारम्भे शब्दानामुपपत्तौ अर्थैश्च केवलं सीमासीत् पश्चात् सूचनासहितमनेकरूपशब्दो दृष्टः । विविधविषये सूचनायामाकृतौ च स्थितेऽप्याधाररूपे शब्दकोशविश्वकोशौ द्वौ दृष्टौ । प्रविष्टिक्षेत्रं भाषासंख्या प्रविष्टिपद्धतिः कालः प्रविष्टिक्रमः प्रयोजनं प्रयोक्तुराधारोऽन्ये च शब्दकोशस्य प्रकाराः सन्ति । लम्सालेन कोशाय पूर्वभागे मूलभागे उत्तरभागे च पृथक् कृत्वा तेषु स्थितेषु सामग्रयः स्पष्टीकृताः ।

परम्परागतशब्दकोशस्य तथाधुनिकशब्दकोशस्य स्वरूपस्य तुलनां कुर्वन् बरालेन क्षेत्रनिर्धारणस्य शब्दसङ्कलनस्य व्यवस्थापनस्य दृष्ट्या प्राचीनाधुनिककोशयोर्व्यापकभिन्नता दर्शिता । आधुनिकशब्दकोशो वैज्ञानिकस्तथा बहुसूचनात्मक उक्तः । तेनाधुनिकशब्दकोशस्य सम्पादनप्रक्रियायां योजना लेखनं मुद्रणञ्चैतानि त्रीणि विभाजनानि तेषां कार्यञ्च वर्णितम् । भाषासंख्याया आधारे शब्दकोशसम्पादने भिन्नता वर्तते । एकभाषिककोशे स्रोतभाषा लक्ष्यभाषा च एका भवति । तस्यां सामग्रीसङ्कलने मानकोच्चारणे वर्णविन्यासचयने अर्थविधाने समस्याः सन्ति तथापि बहुभाषिककोशादेकभाषिककोशो व्यापकः पूर्णश्चोक्तः । तेन सामाजिकस्तथा संस्कृतिभेदेन भाषान्तरेऽर्थविधानाय समस्यापतति द्विभाषिके बहुभाषिके च तस्मात् यान्त्रिकानुवाद एव जायते ।

लम्सालेन नेपालीशब्दकोशस्यैतिहासिकाय प्रारम्भिकस्तथाधुनिकौ द्वौ कालखण्डौ प्रस्तुतौ । प्रारम्भिककालखण्डे शब्दकोशनिर्माणस्य पूर्वचेष्टा प्रयासश्चाङ्लविदुषां शब्दार्थसूची केषाञ्चन नेपालविदुषां प्रयासो दर्शितः । तेनैकभाषिशब्दकोशस्य परम्परायाः स्थाने यशो मोतीरामाय दत्तम् । नेपालीबगलीकोशः प्रथमे, नेपालीशब्दकोशो द्वितीये, नेपालीबृहत्शब्दकोशस्तृतीये कोशविज्ञानस्य पूवभागे स्थानानि दर्शितानि ।

नेपालीभाषयाः प्रथमप्रकाशिते कोशविज्ञानसम्बन्धिपुस्तकरूपे लम्सालस्य ***कोविज्ञान र नेपालीकोश*** नामकः २०५७ तमे वैक्रमाब्दे प्रकाशितः कोश ऐतिहासिकमहत्त्वं स्थापयति । कोविज्ञानस्य तथा कोविज्ञानसम्बन्धिसैद्धान्तिकचिन्तनस्य सूत्रपातं करोति कृतिः परन्तु लेखको व्युत्पत्तौ अर्थसन्दर्भे परम्पायामुद्देश्ये उपयोगितायां प्रकारादौ च केन्द्रितः । कोशविधानस्य कोशविज्ञानस्य मूलभूतसिद्धान्तस्य विश्लेषणं विवेचना च न्यूनं दृश्यते । लम्सालेन नेपालीशब्दकोशविकाशपरम्पराया ऐतिहासिकविकाशक्रमं दर्शयित्वा नेपाल्येकभाषिककोशस्य परम्परायां मोतीरामस्य *अनुप्रास मञ्जरी* नामककोशः प्रथमः स्वीकृतः । लम्सालोऽर्थविज्ञानस्य शब्दसूचीं कोशे नैव गृह्णाति । नेपालीबृहत्शब्दकोशेऽपि तत्समशब्दा उक्ताः ।

हेमाङ्गराजाधिकारिणा २०५७ तमे वैक्रमाब्दे प्रकाशितस्य ***शब्दकोश निर्माण र नेपालका भाषिका*** शीर्षकस्य लेखे लेख्यसामग्रचा शब्दसङ्कलनं कृत्वा विविधतायां कोशः समग्रतां प्राप्नोतीत्युक्तम् ।

बल्लभमणिदाहालेन २०५७ तमे वैक्रमाब्दे प्रकाशिते ***महानन्दसापकोटाको सरि शब्द*** इति शीर्षके सरिशब्दनामकस्य २०२१ तमे वैक्रमाब्दे प्रकाशितस्य भिन्नार्थिकोशस्य समीक्षा कृता । कोशीयशब्दस्य विवेचनायां सहयोगं करोतीत्युक्तम् ।

माधवपोखरेलेन २०५७ तमे वैक्रमाब्दे प्रकाशिते ***महानन्दको कोशको सामान्य समीक्षा***शीर्षके सापकोटायाः कोशस्य सामान्यसमीक्षा कृता । तेन संस्कृतात् तथा तस्माद्विकसितात् प्राकृतादिभाषायामाङ्गलैर्यन्निश्चितं तादृशं महानन्दस्य कोशे नैव प्राप्यते इत्युक्तम् ।

बद्रीविशालभट्टराइणा २०६४ तमे वैक्रमाब्दे *नेपाली बृहत् शब्दकोश (२०४०) को कोशवैज्ञानिक अध्ययन* नामके शोधग्रन्थे कोविज्ञानस्य विश्लेषणं कृतम् । तत्र कालकमेण विदुषां मतानि स्थापितानि । द्विभाषिकबहुभाषिककोशयोः समीक्षां कुर्वन् बद्रीविशाल एकभाषिककोशे प्रवृत्तः । भट्टराइणा कोशविज्ञानस्य  कोशस्य च विश्लेषणं कुर्वन् नैपालककोशवैज्ञानिकानां मतानि विवेचितानि । नेपालीभाषायां कोशविज्ञानं तथा शब्दकोशजिज्ञासूनां मार्गः प्रशस्तः संजातः ।

नैपालकलेखकैः कोशविज्ञाने तथा शब्दकोशविषये विश्लेषणं कृतं परन्तु कुलचन्द्रगौतमस्य स्वयंबोधिनीटीकाविषये प्रत्यक्षतया नैवोक्तम् । कुलचन्द्रः संस्कृते नेपालीभाषायाञ्च प्रवीणः । तस्य योगदानं संस्कृतजगति नेपालीभाषायाञ्च प्रशंसनीयम् । कुलचन्द्रस्यामरकोस्य स्वयंबोधिनीटीकया वर्णक्रमकोशे लेखकाः प्रेरिताः ।

## १.५ शोधविधिः

अस्मिन् शोधप्रसङ्गे विद्यापीठेषु नेपालभारतयोर्विश्वविद्यालयेषु केन्द्रीयपुस्तकालयेषु च स्थितानां ग्रन्थानामध्ययनं कृत्वा विश्लेषणविधिरङ्गीकृतः। तथैवातीतकालिकानामन्यासां टीकानामध्ययनपूर्वकं कुलचन्द्रगौतमप्रणीताया अमरकोशटीकाया अध्ययनं कृत्वा तासां प्रभावसमीक्षणं तथा व्याकरणदृष्ट्या पर्यालोचनं कृत्वा विश्लेषणं प्रमुखविधिरभवत् ।

कोशसम्बन्धिग्रन्थानामध्ययनं कृत्वा ग्रन्थे ग्रन्थकर्त्रा चर्चितानां विशिष्टशब्दानां परिशीलनार्थं ग्रन्थप्रकृत्या लक्ष्यसाधनार्थमागमविधिः प्रयुक्तः । सामग्रीसङ्कलनस्य प्राथमिकस्रोतं कुलचन्द्रप्रणीताया अमरकोशस्य स्वयंबोधिनी टीकास्ति । द्वितीयकसामग्र्यां कोशविज्ञानं तथा पाणिनीयव्याकरणस्य ग्रन्थाः सन्ति । कोशसम्बन्धिटिप्पण्यो लेखा अपि गौणाः सन्ति । सामग्रीसङ्कलनार्थं सत्यापनाय च पुस्तकालयस्य प्रयोगः कृतः । उदाहरणार्थं विविधपुस्तकानि दृष्टानि ।

## १.६ प्राक्कल्पना

सदा सूक्तमेतत् मनसि मम भाति -

अपूर्वः कोऽपि कोशोऽयं दृश्यते तव भारति ।

व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ॥ [१]

यद्यप्यत्र कोशशब्दस्य तात्पर्यं समस्तवाङ्मयेऽस्ति तथापि सर्वप्रथमं शब्दसङ्ग्रहो बुध्यते । पठितश्च शैशवे काले लघुकौमुद्या सहामरकोशः । यदि कोशो न भवेत्तदा शब्दार्थसमस्यायां लिङ्गसमस्यायाञ्च पाठकः कुत्र गच्छेत् समाधानार्थम् । पठनपाठनसमये, लेखनसमये, रचनाकाले, प्रवचनरूपे, वार्तालापे च सर्वत्रैव समस्या जायते । तस्याः समाधानं कोशदर्शनमेव । सम्यक् विचार्य नामकरणं कृतं "नामलिङ्गानुशासन्" इत्यमरसिंहेन । अमरकोशे लिङ्गविषयमेव संस्थाप्याग्रेसरोऽभूत् कुलचन्द्रगौतमो लिङ्गव्यवस्थायां टीकायाञ्च ।

नाधुना परन्त्वतीतकालादेव मनीषिभिश्चिन्तनं कृतं कोशसाहित्यस्य । तस्मात्प्रशंसनीयमस्ति यत् सर्वप्रथमं विश्वस्मिन् निघण्टुः प्रकटोऽभूत् यद्यपि रचयितुर्नाम कश्यपो न वेति मतानि सन्त्येव तथापि ग्रन्थस्तु प्राच्यपाश्चात्यसर्वैर्विद्वद्भिः सर्वप्रथमः स्वीकृतः । निघण्टोरेव निरुक्तादयो वैदिककोशा अमरकोशादयो लौकिककोशास्तथाऽऽधुनिक-कोशा अधुना विपुलकोशसाहित्यत्वेन दृश्यन्तेऽस्माकमग्रे ।

अधुनाऽकारादिवर्णक्रमेण लिखितः कोशो लोकप्रियो भवति तथापि पर्यायवाचिशब्दज्ञाने, लिङ्गज्ञाने, कण्ठस्थीकरणार्थं तु पारम्पर्यवर्गीयकोशस्य महत्त्वमस्त्येव । शिशूनां कृते तु प्रारम्भिकशब्दज्ञानार्थं तथा प्रौढानामपि चिन्तनार्थञ्च भूमिकास्त्येवामरकोशादिग्रन्थानाम् ।

नवीनकोशसङ्कलनेऽपि प्राचीनकोशानां महत्त्वपूर्णा भूमिकास्त्येव । पारम्पर्यज्ञानं विनाग्रे पदं स्थातुं न शक्यते । लेखकानां ग्रन्थानां च पर्यालोचनार्थं प्राचीनकोशानामत्यन्तावश्यकतानुभूयतेऽस्माभिः । तस्माद्यथा कोशागारे (बैङ्के) निक्षिप्तः कोशो भवेत् तदा व्यक्तयो निश्चिन्ता भवन्ति तथैवास्माकं वाङ्मये कोशसाहित्यस्य विपुलभाण्डारत्वाद्वयं सन्तुष्टाः स्मः । केवलमेकस्मिन् वाङ्मये नहि परन्तु भाषान्तरेऽप्यनुवादार्थं कोशस्य महत्त्वपूर्णा भूमिकाऽस्ति । यथा कुलचन्द्रगौतमो नेपाल्यामकरोत् । तथैव विश्वस्यान्यासु भाषास्वप्यनुवादाः सन्त्येव । यद्यपि दर्शनस्य, धर्मस्य, संस्कृतेः कर्मकाण्डस्य च विवादोऽभूत् परन्तु कोशसाहित्यं निर्विवादमेव । निष्पक्षतया जगति विराजते कोशः ।

यद्यपि सन्त्यनेका आधुनिकाः कोशास्तथापि तेषां मूलज्ञानार्थं संस्कृतकोशानामावश्यकता भवत्येव । यथा नेपालीकोशोऽपि संस्कृतशब्दानां पृष्ठभूम्यां

---

[१]आचार्यः नारायणः, ***सुभाषितरत्नभाण्डागारम्,*** दिल्ली : मुन्सीराम मनोहरलाल, सन् १९५२, पृ.२९ ।

स्थितोऽस्ति । तथैव विश्वस्य प्रसिद्धाया आङ्गलभाषाया अक्सफोर्डादिषु कोशेष्वपि संस्कृतशब्दाः सन्त्येव । तेषां जनकोऽपि संस्कृतकोश एव ।

कोशसाहित्यस्य एतादृशं महिमानमङ्गीकृत्य मया कुलचन्द्रगौतमप्रणीताया अमरकोशटीकायाः पर्यालोचनमग्रे स्थापितम् । यद्यपि टीका प्रसिद्धा, लेखकश्च प्रसिद्धस्तथापि तयोः रहस्यं परिज्ञातुं शोधस्यावस्यकताऽस्त्येव । पारम्पर्यज्ञानं विना कोऽपि प्रवृत्तो न भवति । तस्माल्लेखकस्य टीकायाश्च हेतवः स्युः । तेषामुद्घाटनस्य चात्यन्तावश्यकतास्त्येव । तामेवाङ्गीकृत्य प्रवृत्तोऽहम् ।

कुलचन्द्रगौतमस्य तत्कृतीनां च सामान्यतया "*कुलचन्द्रगौतमस्य संस्कृतकृतीनां समीक्षात्मकमध्ययनम्*" इति विषये डा. टीकारामाधिकारिणा तथा "*कुलचन्द्रगौतमस्य काव्यात्मकसंस्कृतकृतीनां विश्लेषणम्*" इति विषये नारायणप्रसादगौतमेनाध्ययनं कृतमस्ति । तथापि कुलचन्द्रगौतमप्रणीताया अमरकोशटीकायाः शोधो नैव जातः । तस्मात् "कुलचन्द्रगौतमप्रणीताया अमरकोशटीकाया व्याकरणदृष्ट्या पर्यालोचनमिति" विषये शोधोपस्थापनं क्रियते मया ।

नेपालसंस्कृतविश्वविद्यालयस्य सोपाधिकानुसन्धानकार्यस्य कृते प्रस्तुतस्यास्य कुलचन्द्रगौतमप्रणीताया अमरकोशटीकाया व्याकरणदृष्ट्या पर्यालोचनमिति नामकस्य शोधप्रबन्धस्य प्रयोजनं भारतीयोपमहाद्वीपे स्फीतयशसः संस्कृतजगति स्वकीयसमये चर्चितस्य बहुशास्त्रपारङ्गतस्य प्रसिद्धविदुषः कुलचन्द्रगौतमस्य जीवनस्य तत्कृतीनां च समुद्घाटनेन साकमनेकासु कृतिषु प्रसिद्धस्यामरकोशस्य स्वयंबोधिनीटीकाया अध्ययनं मुख्यप्रयोजनम् । तस्यैवप्रसिद्धग्रन्थस्यामरकोशस्य स्वयंबोधिनीटीकायां टिप्पण्याञ्च विविधप्रसङ्गेन सूत्रप्रदर्शनपूर्वकं व्याकरणदृष्ट्या पर्यालोचनं तथाध्ययनं विद्यावारिध्युपाधिलाभश्चापरं प्रयोजनम् ।

कुलचन्द्रगौतमप्रणीतामरकोशटीका लोकप्रियास्ति । साऽस्माकं नेपालदेशेऽतुलनीया टीका तथाद्वितीयो न्यासश्च । तस्मादस्या रक्षणं पठनं पाठनञ्चास्माकं कर्तव्यमस्ति । अस्यां टीकायामधुना शोधकार्यं नैव जातम् । कोशानामितिहासप्रदानपूर्वकमध्ययनं तथा व्याकरणदृष्ट्या पर्यालोचनमस्या आवश्यकताऽस्ति । आदिकालादेव सर्वेषु कोशेषु कोशव्याकरणयोः सम्बन्धो दृश्यते । कोशकारा व्याकरणमङ्गीकृत्य कोशान् रचयन्ति च । तस्मात् कोशे व्याकरणस्य घटकानां धातुप्रत्ययसमासानां पदानाञ्च प्रयोगोऽस्त्येव । सर्वत्र

वर्णेषु ह्रस्वदीर्घभेदस्तथा वर्णभेदोऽपि दृश्यते। एतस्मादेव कारणात् व्याकरणदृष्ट्यैव पर्यालोचनं स्थापनीयमस्ति। तस्मादस्मिन्विषयेऽन्वेषणं कृतम्।

भाषायां दक्षताप्राप्तयेऽर्थबोधाय च कोशस्यातीवावश्यकता भवति। लोकव्यवहारे शब्दानां परिवीक्षणमाप्तजनकृतशब्दप्रयोगः, व्याकरणद्वारा शब्दानां व्युत्पत्तिविज्ञानञ्चैतानि शब्दनिधिं प्रवर्धयन्ति। तेषामेव शब्दानां कोशोऽर्थज्ञानस्य लिङ्गज्ञानस्य च सर्वमान्यव्यवस्थां करोति। सामान्यजनस्तु कोशस्य व्याकरणस्य च नियमं दृष्ट्वा शब्दानां प्रयोगं करोति नोल्लङ्घयति। कोशः शब्दभण्डारस्यापरं नाम। आवश्यके सत्यर्थनिर्णयं करोति। तस्मात् यथोक्तम् – 'शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च' इति। तस्मात् कोशव्याकरणादीनामत्यन्तावश्यकता भवति।

कोशकारा वैयाकरणाश्च ये विद्वांस आसन् ते लोकव्यवहारेऽपि मर्मज्ञा आसन्। यथा प्रथमो भाषावैज्ञानिकः पाणिनिरासीत् , स व्याकरणे लोकव्यवहारे च कुशल आसीत्। यथैकसूत्रेण सहस्रशः शब्दाः सिद्धा भवन्ति, तथैवैकेनापवादसूत्रेण केवलमेकः शब्दोऽपि सिध्यति। पाणिनेः सूत्रैः शब्दानुशासनं कृतम्। बहुकालपूर्वादारभ्य भाषायाः शब्दा नियन्त्रिताः सन्ति। संस्कृतभाषायाः संयमनस्य मूलकारणं धातुप्रत्ययविज्ञानमेव। संस्कृतस्य सर्वे शब्दाः पाणिनेरारभ्य भट्टोजिदीक्षितपर्यन्तं विमृष्टाः। पाणिनीयव्याकरणेन धातुप्रत्ययकल्पनया सर्वे शब्दा अमराः सञ्जाताः। व्याकरणव्युत्पत्त्या सर्वेषां शब्दानामर्थबोधो जायते। शब्दानां व्युत्पत्तिपूर्वकज्ञानस्यावश्यकता भवति। व्युत्पत्तिर्हि शब्दविज्ञानस्य निकषोऽस्ति [१०]। व्युत्पत्त्या मानमेव भाष्ये पतञ्जलिः कथयति – 'एकः शब्दः सम्यक् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुक् भवति।' इदं महावाक्यमेव कोशव्याकरणयोरौचित्यं स्थापयति।

## १.७ अध्ययनस्य क्षेत्रं सीमा च

अस्य शोधप्रबन्धस्येदं क्षेत्रं निर्धारितमस्ति यत् कुलचन्द्रगौतमप्रणीताममरकोशटीकां लक्ष्यीकृत्य प्रकृतसमीक्ष्यकोशस्य व्याकरणात्मकग्रन्थस्य परिचयप्रदानं संस्कृतकोशानामध्ययनं व्याकरणदृष्ट्या पर्यालोचनं च कृतम्। टीकायामतीतकालिकटीका अवलोक्य शब्दविषये चर्चा

[१०] शर्मा चतुर्वेदी द्वारकाप्रसादः, झा तारणी, ***संस्कृत शब्दार्थ कौस्तुभ,*** इलाहावाद : प्रकाशक रामनारायणलाल, द्वितीय संस्करण वि.सं२०१४।

कृता। अस्मिन्नध्ययनप्रसङ्गे केवलं कुलचन्द्रगौतमप्रणीतटीकाया एव व्याकरणदृष्ट्या पर्यालोचनं क्रियते नान्यटीकायाः।

### १.८ शोधसामग्रीसङ्कलनम्

अध्ययनक्रमेऽस्मिन् शोधविषये सामग्रीसंकलनाय विद्यापीठस्य पुस्तकालये स्थिता अनेके कोशग्रन्था तथैव व्याकरणस्य ग्रन्थाश्च स्वीकृताः । एवमनुसन्धानकेन्द्रेऽथवा विश्वविद्यालयस्य पुस्तकालये विद्यमाना विविधा लेखा पुस्तकानि च गृहीतानि। अन्येषु विश्वविद्यालयेषु पुस्तकालयेषु च ये विविधाः कोशग्रन्थाः प्राचीना आधुनिकाश्चासन् तेऽप्यङ्गीकृताः। यथावश्यकं विद्वद्भिः सहान्तर्वार्ताऽपि कृता।

### १.९ रूपरेखा

अस्मिन् शोधप्रबन्धे पञ्च अध्यायाःसन्ति। यथा-

**प्रथमेऽध्याये -** शोधपरिचयः।

**द्वितीयेऽध्याये -** प्रकृतसमीक्ष्यकोशस्य टीकाकारस्य व्याकरणात्मकग्रन्थस्य कोशविज्ञानस्य च परिशीलनम्।

**तृतीयेऽध्याये -** अमरकोशस्य स्वयंबोधिनीटीकागतपदानां विशेषविमर्शनम्।

**चतुर्थेऽध्याये –** स्वयंबोधिनीटीकाया विशेषतान्यूनतयोः प्रदर्शनम्।

**पञ्चमेऽध्याये –** अध्यनसारांसनिष्कर्षोपलब्धयः।

## द्वितीयोऽध्यायः

# २.प्रकृतसमीक्ष्यकोशस्य व्याकरणात्मकग्रन्थस्य कोशविज्ञानस्य च परिचयः

## कोशविज्ञानव्याकरणदृष्ट्या पर्यालोचनम्

## विषयप्रवेशः

अस्मिन्नध्याये कोशेतिहासस्य कुलचन्द्रगौतमस्य व्याकरणात्मकग्रन्थस्य कोशविज्ञानस्य **च** परिचयो दीयते । कोशस्य वर्गीकरणं तथैव कोशव्याकरणयोः सम्बन्ध उपस्थाप्यते । कुलचन्द्रस्य प्राप्तकृतीनां विशेषतो व्याकरणात्मककृतीनां पर्यालोचना क्रियते ।

### २.१ कोशस्य महत्त्वम्

कोशस्य महत्त्वप्रसङ्गे व्याकरणशास्त्रे एकः श्लोकः प्रसिद्धोऽस्ति । यथा–

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च ।

वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥[११]

शब्दार्थज्ञानाय व्याकरणम्, उपमानम्, कोशः, आप्तवाक्यम्, व्यवहारः, वाक्यशेषः, विवृतिः, सान्निध्यञ्चैतेऽनेके उपायाः सन्ति । तस्मात् कोशशब्दः प्राचीनकालादेव प्रचलितः । कोशशब्दस्यार्थः सामान्यतया शब्दसङ्कलनेऽर्थे ज्ञायते सर्वैः । कोशशब्दोऽनेकार्थ्यस्ति ।[१२] अमरकोशे कोशशब्दः शब्दादिसंग्रहे नास्ति । कोशकारेण स्वकीयकोशस्य नामापि 'नामलिङ्गानुशासनम्' निर्धारितमस्ति । अर्थज्ञानार्थं प्राचीनग्रन्थो 'निघण्टुः' अस्ति । तत्र वैदिकपर्यायवाचिशब्दाः सन्ति । असौ निघण्टुर्यास्कस्य निरुक्तग्रन्थेन सम्बद्धः । पर्यायवाचिशब्दसंग्रहस्य वाचकत्वेन कोशशब्दस्य प्रयोगः पुरषोत्तमदेवेन स्वकीये त्रिकाण्डकोशे

---

[११] भट्टः नागेशः, ***परमलघुमञ्जूषा***(नामार्थप्रकरणम्), वाराणसी : कृष्णदास अकादमी, स्न १९८५, (अथवा शब्दशक्तिप्रकाशिका श्लोकः २०) ।

[१२]कोशोऽस्त्री कुड्मले पात्रे पेस्यां शब्दादिसंग्रहे ।
जातिकोशोऽर्थसंघाते दिव्ये खड्गपिधानके ॥ इति मूर्द्धन्यान्तो मेदिनी । तालव्यान्तोऽप्ययम् । दीक्षितः भानुजि,***अमरकोशः***( सुधाटीका २.५.३७), वाराणसी : चौखम्बा विद्याभवन, सन्.२०११, पृ.२०० ।
आवरणविशेष इति ***भागवत*** २ । १। ३४।

लिखितः ।[१३] ततः परं तु शब्दसंग्रहार्थे नानार्थशब्दकोषः, अनेकार्थशब्दकोषः, कल्पद्रुमकोष इत्यादयोऽभूवन् । अधुना तु कोशशब्दः शब्दसंग्रहे सर्वत्रैव रूढः । यथा वेदाङ्गानि शिक्षा, व्याकरणम्, छन्दः, ज्योतिषः, कल्पः, निरुक्तञ्च वेदस्य ज्ञानार्थमभूवन् तथैव कोशस्यापि निर्माणं वेदार्थज्ञानार्थमभूत् । निघण्टुरूपेण सर्वप्राचीनतमकोशः प्राप्यतेऽधुना । निघण्टौ वैदिकपर्यायवाचिशब्दानां सङ्कलनमस्ति । यास्को निघण्टोर्भाष्यरूपे निरुक्तस्य रचनामकरोत् । पूर्वं मन्त्रद्रष्टारः ऋषयः साक्षात्कृतधर्माण आसन् । अग्रेऽसाक्षात्कृतधर्माणमुपदेशमकुर्वन् । तस्मात् पश्चात् मन्त्रज्ञाने काठिन्यमभूत् । तेषां सरलीकरणार्थं वेदस्य विभागोऽभूत् । वेदाङ्गानां रचनां तथैव निघण्टोरपि वैदिकपर्यायवाचिशब्दानां सङ्कलनमभूत् । पश्चात् यास्केन निरुक्तरूपेण भाष्यमकारि ।[१४]

## २.१.२.कोशशब्दस्यार्थः –

### २.१.२.१ विवृतिः –

कुष्यत इत्यर्थे 'कुष निष्कर्षे' इति धातोः ( क्र्या.प.से. १३१३) इति धातोः 'अकर्तरि च कारके संज्ञायाम्' ( पा.३।३।१९ ) इति घञ्प्रत्यये सति कोषशब्दो निष्पद्यते । शब्दादिसङ्ग्रहेऽमरकोशे मेदिन्यां च तालव्यान्तोऽपि । तस्मात्कोशशब्दस्यार्थः शब्दसङ्ग्रहः ।

### २.१.२.२ परिभाषा –

कासाञ्चिद् भाषाणां शब्दानां निश्चितक्रमानुसारेण शब्दसङ्कलनं कृत्वा व्याकरणात्मकव्यवस्थानुसारं तस्यां भाषायामन्यस्यां भाषायां वा शब्दानामर्थं लिखित्वा पर्यायशब्दान् तद्विशेषतां च दर्शयित्वा लिखितो ग्रन्थः शब्दकोशः ।[१५]

### २.१.२.३ शब्दसङ्ग्रहः –

शब्दकोशस्य मुख्यं कार्यमभिधार्थकथनं भवति । विश्वस्य प्रथमनिघण्टौ ( प्रथमशब्दकोशे ) तथा निरुक्ते च यास्कः शब्दस्याभिधार्थमेव प्रकटयति । तथापि कोशकारेणाभिधार्थेन सह लक्ष्यार्थश्च दीयते ।[१६]

---

[१३] अलौकिकत्वादमरः स्वकोशे न यानि नामानि समुल्लिलेख ।
विलोक्य तैरप्यधुना प्रचारमयं प्रयत्नः पुरुषोत्तमस्य ॥ श्लोकः २ ।
वर्गक्रमस्तथा नामलिंगयोस्तूपदेशता ।
परिभाषादिकं सर्वमत्राप्यमरकोशवत् ॥ श्लोकः ३ । प्रथमकाण्डम् ।

[१४] *यास्कः*, निरुक्तम् १ ।२० । साक्षात्कृतधर्माणः ऋषयो बभूवुः । तेऽवरेभ्योऽसाक्षात्कृतधर्मस्य उपदेशेन मन्त्रान्संप्राहुः । उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नसिषुः । वेदं च वेदाङ्गानि च ।

[१५] पराजुली कृष्णप्रसादप्रभृतयः, (निर्देशकः पोखल बालकृष्णः, ***नेपाली बृहत् शब्दकोश,*** काठमाण्डौ : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, द्वि. सं.२०५१, पृ.१२५३ ।

### २.१.३ कोशप्रयोजनम्

यद्यपि सर्वत्र प्रयोजनविषये चर्चा नास्ति तथापि भानुजिदीक्षितकृतसुधाटीकायां कोशस्योद्देश्यं लिखितमस्ति यदभीप्सितपुरुषार्थचतुष्टयप्राप्त्यर्थं हेतुभूतशास्त्रार्थज्ञाने सहयोगं प्रापयितुं शब्दस्य शक्तिग्रहे शक्तिमत्त्वम् ।[१७]

### २.१.४.कोशव्याकरणयोः सम्बन्धः

कोशव्याकरणे संबन्धिनी स्तः। व्याकरणं मानकता, अमानकता, शुद्धता, अशुद्धतेत्यादिषु विषयेषु निर्णयात्मकरूपेण कोशस्य सहयोगं करोति। कोशस्य संग्रहविषये भाषाविज्ञानस्यागाधं योगदानमस्ति। न्यायालयात्मककार्ये व्याकरणस्य वर्चस्वं प्रगाढमस्ति। भाषावैज्ञानिको ब्लुमफिल्डः कथयति 'शब्दकोशो व्याकरणस्य परिशिष्टोऽस्ति। आधारभूताया अनियमिततायाः सूचिरस्ति।' शब्दकोशव्याकरणयोः कार्यक्षेत्रं शब्द एवास्ति परन्तु व्याकरणं भाषाया नियमितं प्रागुक्तिसाध्यमस्ति। कोशस्त्वनियमितप्रागुक्तिबाध्यस्वरूपेऽपि आबद्धः। व्याकरणस्य नियमः कस्मिंश्चित्काल एव तिष्ठति, सीमितः। शब्दस्तु सदैव परिवर्तनशीलो भवति। तस्मात् कोशव्याकरणयोः सूक्ष्मो भेदोऽस्ति।[१८]

माधवप्रसादघिमिरे वदति –

भाषायां व्याकरणं कोशश्च महत्त्वपूर्णौ स्तः। इमौ द्वौ ग्रन्थौ भाषायां जीवन्तौ स्तः, उपयोगिन्यौ सामग्र्यौ मन्ये। इमौ ग्रन्थौ गतिशीला संस्थेति कथनमुचितम्। संस्कृतस्य विद्वद्भिरष्टाध्याय्यमरकोशयोर्मानवस्य मनसि स्थितौ मातृपितृवत्संस्थाया दर्शनादस्य पुष्टिर्भवति। सर्वोच्चन्यायालयात् सर्वसाधारणपर्यन्तं कोशस्यार्थः प्रामाणिको भवति।[१९]

उक्तञ्च कुत्रचित्

अष्टाध्यायी जगन्मातामरकोशो जगत्पिता।

---

[१६] पूर्ववत् भूमिका पृ.१।

[१७] लंसाल रामचन्द्रः, ***कोशविज्ञान र नेपाली कोश,*** काठमाण्डौ : विद्यार्थी पुस्तक भण्डार, वि.सं.२०५७, पृ.१८ ।

[१८]पूर्ववत् पृ.८।

[१९] भट्टराई बद्रीविशालः, ***नेपाली वृहत्शब्दकोश (२०४०)को कोशवैज्ञानिक अध्ययन*** (अन्तर्वार्ता), काठमाण्डौ नेपाल : शोधग्रन्थ त्रि.वि. २०६४, परिशिष्ट पृ.२३५।

भाषामा व्याकरण र कोश महत्त्वपूर्ण हुन्छन्। म यी दुई ग्रन्थलाई भाषाका जीवन्त उपयोगी सामग्री मान्दछु। अझ सामग्री भन्दा पनि गतिशील संस्था भन्नु ठीक होला। संस्कृतका विद्वान्हरूले अष्टाध्यायी र अमरकोशलाई मानवको मानसमा रहने मातृपितृवत् संस्थाको रूपमा हेरेबाट यसको पुष्टि हुन्छ। सर्वोच्च अदालतदेखि सर्वसाधारण सबैले कोशको अर्थ प्रामाणिक मान्दछन्।

बान्धवो भट्टिकाव्यञ्च स्वदेशो भुवनत्रयम् ॥

## २.१.५ कोशविधानकार्यम्

कोशविधानकार्यं कष्टसाध्यं गभीरं निरवच्छिन्नप्रयाससाध्यम् । असीमाध्यवसायो विशालं विद्वत्त्वमस्य पूर्वावश्यकता । १८१८ तमात् खिष्टाब्दात् प्रारब्धस्याऽक्सफोर्डाङ्लशब्दकोशस्योपसंहारः १९२८ तमे खिष्टाब्दे सम्पन्नः । पुनायां १९५२ तमे खिष्टाब्दे प्रारब्धस्य संस्कृतशब्दकोशस्याधुना केवलं द्वौ भागौ प्रकाशितौ स्तः । एतौ कालक्रमेण निर्मितौ कोशौ । कालक्रमेण निर्माणार्थं ग्रन्थानामध्ययनं क्रियते । पूर्वोक्तसंस्कृतशब्दकोशनिर्माणार्थं १५०० ग्रन्थानामवलोकनं कृतम् ।[२०] सप्तदशशताब्द्याः कोशकारः जे.जे.स्यालिगरोऽकथयत् यत् कस्मै अप्यपराधिने दण्डं दीयते चेत्तर्हि तस्य कोशनिर्माणे नियुक्तिः कार्या । एवं नेपालीकोशकारः पारसमणिप्रधानः कथयति ‘सरस्वत्या लक्ष्म्याश्च वासस्थानं हनुमत इवाध्यवसायः कश्चन भवेत् चेत्तर्हि स कोशकार्यं कर्तुं शक्नोति’ ।[२१]

## २.१.६.कोशस्य वर्गीकरणम्

विश्वस्मिन्ननेकासु भाषास्वनेके कोशाः सन्ति बहुधा कोशपद्धतिश्च । अस्मिन् प्रबन्धे प्रसङ्गतः कोशस्य सामान्यपरिचयो दीयते गीर्वाणवाण्यां स्थितानां प्राचीनकोशानां विवेचनञ्च क्रियते ।

### २.१.६.१.विषयानुक्रमकोशः

विषयानुक्रमकोशस्य परम्परा प्राचीना । प्राचीनकालिककोशा विशेषतोऽमरकोशादयः संस्कृतभाषायाः कोशाः सन्ति । अमरकोशे विषयानुक्रमोऽस्ति । यथा स्वर्गवर्गव्योमवर्गादयो विभागाः सन्ति । एवमाधुनिककालिककोशे रोजेटस्याङ्गलभाषायाः थेसौरसोऽन्ये च पर्यायवाचिकोशा अस्मिन्नेव शीर्षके वर्गीकृत्य सम्पादिताः सन्ति । एतादृशविभाजनायाऽर्थी धारणात्मकविषयानुसारिवर्गीकरणं च कथ्यते ।[२२]

### २.१.६.२ वर्णक्रमकोशः

---

[२०] लंसाल रामचन्द्रः, ***कोशविज्ञान र नेपाली कोश,*** काठमाण्डौ : विद्यार्थी पुस्तक भण्डार, वि.सं.२०५७, पृ.५ ।

[२१] पूर्ववत् पृ.५ ।

[२२] पूर्ववत् १०१ ।

एष कोशः सम्बद्धभाषायामङ्गीकृतवर्णानुसारेण वर्णक्रमे परिवर्तितः शब्दोऽथवा कोशिमः(िभहभm)प्रविष्टिविन्यासे सम्पादितः कोशः। अस्मिन् कोशे प्रथमः, द्वितीयः, इत्यादिवर्णानां क्रमादुच्चारितशब्दः(कोशिमः) क्रमशस्तदनुसारेण स्थाप्यते। आदिमे वर्णे समानता भवेत् तर्हि अन्योत्तरोत्तरवर्णक्रमं दृष्ट्वा तदनुसारेण क्रमिकस्थाननिर्धारणं कुर्वन्नन्तिमे गम्यते। उदाहरणार्थं पूर्वं कमलम् ततः कललम् ततो मदनादयः शब्दाः स्थाप्यन्ते। आधुनिकयुगे वर्णानुक्रमप्रकारः सर्वाधिकः प्रचलितः। वर्तमानकोशजगत्येष प्रकारो लोकप्रियः। आधुनिकशब्दकोशाः प्रायो वर्णानुक्रमेण स्थापिताः। वर्णक्रमकोशात्प्रभावितेन कुलचन्द्रेणाऽपि स्वकीयायां स्वयंबोधिनीटीकायां वर्णक्रमेण शब्दाः स्थापिताः।[२३]

### २.१.६.३.नामलिङ्गानुशासनकोशः

नामलिङ्गानुशासनकोशे शब्दानां लिङ्गं विचार्यते। रूपं दृष्ट्वा पुंलिङ्गं, स्त्रीलिङ्गं, नपुंसकलिङ्गं, पुंस्त्रीलिङ्गं, पुंनपुंसकलिङ्गं, स्त्रीनपुंसकलिङ्गं, विशेषणलिङ्गं (त्रिलिङ्गं), अव्ययञ्च ज्ञातुं शक्यते। अमरकोशो नामलिङ्गानुशासनकोशः। अमरसिंहेन कोशस्य नाम 'नामलिङ्गानुशासनम्' उक्तं तथापि लोकैरमरकोशः कथ्यते। अमरसिंहेन लिङ्गानुसंग्रहोऽपि स्थापितोऽस्ति तृतीयकाण्डेऽमरकोशे। उक्तञ्च केनाप्यालोचकेन 'अमरसिंहो हि पापीयान् सर्वं भाष्यमचूचुरदिति।

### २.१.६.४ व्याकरणपरककोशः

कस्या अपि भाषाया व्याकरणात्मकव्यवस्थायामाधारितं नियमं प्रयोगञ्चैकत्रीकृत्य संरचितो वर्णवर्गादीनां प्रस्तुतः व्याकरणपरककोशः। एतादृशः कोशः सम्बद्धभाषाया व्याकरणपरकव्यवस्थां ज्ञातुं सहयोगं करोति तथैवापरस्मिन्पक्षे गहनां कष्टसाध्याञ्च व्याकरणगतव्यवस्थां सरलानुक्रमिकरूपेण च प्रस्तुत्य जटिलादुन्मुक्तिं ददाति। तस्मादेव कारणादेतादृशानां कोशानां पूर्वभागे सम्बद्धभाषायाः सम्पूर्णव्याकरणगतस्वरूपस्य ज्ञानं कारयति। विविधव्याकरणात्मककोटिरूपायनं तथा व्युत्पादनप्रक्रियाङ्कनं च कारयति। एतेभ्योऽतिरिक्तं पूर्वभागे प्रत्येकं वैयाकरणव्यवस्थायामङ्के प्रतीके च निर्देशनं कृत्वा सैव मूलभागस्य प्रविष्टौ अन्विता भवति। अनेन प्रकारेण व्याकरणकोशे सम्बद्धभाषाया

[२३]पूर्ववत् पृ.३८।

व्यवस्थितरूपेण व्याकरणगतव्यवस्था प्रस्तुतायां सत्यां उपयोगी कोशो भवति। शिक्षणक्षेत्रेऽभ्यासक्षेत्रे चैतादृशकोशस्य भूमिकाऽत्यन्तमहत्त्वपूर्णाऽस्ति।[२४]

### २.१.६.५ एकभाषिककोशः

एकभाषिशब्दकोशस्य स्रोतोभाषा लक्ष्यभाषा च एका भवति। अस्मिन् कोशे एकस्यामेव भाषायां शीर्षशब्दोऽर्थविधानञ्च भवति। अस्मिन् कोशे यस्या भाषायाः शब्दाः समाविष्टा भवन्ति तस्यामेव भाषायां कोशस्यार्थविधानं भवति।[२५] एतादृशाः कोशाः निघण्टुः, निरुक्तम्, अमरकोशः, अमरकोशसुधा(रामाश्रमी)व्याख्येत्यादयः सन्ति।

### २.१.६.६ द्विभाषिककोशः

द्विभाषिककोशो द्वयोर्भाषयोः सम्बद्धः कोशः। अस्मिन् कोशे एकस्या भाषायाः कोशस्थस्य शक्दस्य व्याख्या वर्णनं परिभाषीकरणं च क्रियते। उभयोर्भाषयोर्मध्ये यस्या व्याख्या क्रियते सा स्रोतोभाषा भवति, यस्यां भाषायां व्याख्या क्रियते सा लक्ष्यभाषा भवति। अस्मादेव कारणत् द्विभाषिककोशे मूलप्रविष्टिः स्रोतभाषायामर्थविधानं लक्ष्यभाषायां भवति। [२६]यथामरकोशस्य स्वयंबोधिनीटीकायां स्रोतभाषा सस्कृतभाषा तथा लक्ष्यभाषानेपाल्यस्ति। द्विभाषिकस्याऽनेकभाषिकस्य वा कोशस्य सन्दर्भे नेपालीकोशपरम्परायामाधुनिककालस्य प्रवेशो भवति। नेपालीकोशस्य क्षेत्रे नेपालीभाषाया अनुसन्धाता संस्कृतस्य विशेषज्ञो विद्वान् प्राध्यापकः सर राल्फ टर्नरस्य नेपालीभाषायास्तुलनात्मकस्तथा व्युत्पत्तिपरकशब्दकोशः(अ कम्प्यारेटिभ एण्ड इटिलोमेजिकल डिक्सनरी अफ द नेपाली ल्याङ्गेज) १९३१ तमे ईशवीयवर्षे लण्डननगरात् प्रकाशितोऽस्ति।[२७] एष कोशः प्रथमत आधुनिककोशे उपस्थितो भवति। अस्मिन् कोशे षड्विंशतिः सहस्राणि शब्दाः सन्ति। तुलनात्मकस्य व्युत्पत्तिपरकस्य च कोशस्य दृष्ट्या ग्रन्थोऽयमाधुनिकार्यभाषायाः परम्परायामेव बहुमूल्यप्रदोऽत्युत्तमः। अयं कोशो व्युत्पत्तिपरकोऽस्ति।

### २.१.६.७.पर्यायवाचिकोशः

[२४] पूर्ववत् पृ.४९।

[२५] पूर्ववत् पृ.१४७॥

[२६] पूर्ववत् पृ.१५८।

[२७] पूर्ववत् पृ.१८४।

पर्यायकोशः निकटतमानां समानार्थशब्दानामभिव्यक्तिं करोति । यथा – आदित्यः= सूर्यः, शशी= चन्द्र इत्यादयः । संस्कृते प्रथमकोशो निघण्टुः, अमरकोशादयः पर्यायवाचिकोशाः सन्ति । आङ्लभाषायामपि रोजेटरस्य थेसौरस प्रसिद्धोऽस्ति पर्यायवाचिकोशे । अस्मिन् कोशे काषाञ्चन भाषाणां शब्दानां विशेषेण पर्यायार्थो दीयते । यद्यपि सामान्यकोशेऽपि पर्यायार्थो दीयते तथापि पर्यायवाचिकोशे पर्यायशब्दानां प्रदर्शनलक्ष्यं भवति ।[२८]

## २.१.७. वाङ्मये कोशव्याकरणयोः साहचर्यम्

व्याकरणदर्शने शब्दः साक्षात् ब्रह्मैव मन्यते । शब्दरूपेऽथवाऽनाहतरूपे प्राणिनो ब्रह्मसाक्षात्कारं कुर्वन्ति । यतो हि मानवजीवने शब्दज्ञानस्यैवं शब्दानुभूतेश्चोपगिता सर्वोपर्यस्तीत्यनुमातुं शक्यते । विद्वांसः सार्थकव्युत्पन्नशब्दानां प्रयोगं कुर्वन्ति । उक्तञ्च यथा – 'एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति' [२९] इति । तस्मादेकशब्देन सम्यक् ज्ञातेनेह लोके परलोके च मनोरथापूर्तिः प्राप्यते मनुष्यैः । एकशब्दज्ञानाभावेऽनर्थो भवति । उक्तञ्च –

यद्यपि बहुनाधीषे तथापि पठ पुत्र व्याकरणम् ।
स्वजनः श्वजनो माभूत् सकलं शकलं सकृच्छकृत् ॥[३०]

तस्माद् मानवानां शब्दज्ञानं परमावश्यकम् । वेदादारभ्याधुनापर्यन्तं सहस्रशो ग्रन्था अस्माकं ज्ञानराशय इतिहासप्रमाणानि च सन्ति । शब्दार्थसम्बन्धज्ञानेन विना शास्त्राध्ययनं कर्तुं न शक्यते । शब्दार्थविषये कथयति कालिदासः –

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ [३१]

यदि शब्दज्ञानं न भवेत्तदा नराणां भावना मनस्येव जायन्ते मनस्येव विलीयन्ते च । वाल्मीकिः, व्यासः, कालिदासः, भारविः, हर्ष इत्यादयः कवयः शब्दज्ञाने पारङ्गता आसन् । तस्मात्तेऽमरा अभूवन् । कोशस्य व्याकरणस्य च यथार्थज्ञानं विना कोऽपि शास्त्रं रचयितुं समर्थो न भवति । शास्त्रज्ञानार्थञ्च कोशव्याकरणयोरत्यावश्यकताऽस्त्येव । शब्दान्वयः,

---

[२८] पूर्ववत् लम्साल पृ.५३ ।

[२९] पतञ्जलिः ***व्याकरणमहाभाष्यम्,*** (सम्पा. भार्गवशास्त्री, ६।१।८४) वाराणसी :चौखम्बा संस्कृत सिरिज, सन्१९९१, पृ.८४ ।

[३०] आचार्यः नारायणः, ***सुभाषितरत्नभाण्डागारम्,*** दिल्ली : मुन्सीराम मनोहरलाल, सन् १९५२, पृ.४२ ।

[३१] कालिदास, ***रघुवंशः***(१।१), वाराणसी : चौखम्बा संस्कृत संस्थान, पञ्चमसंस्करण वि.सं. २०३९, पृ.१ ।

शब्दार्थः, खण्डान्वयः, दण्डान्वयः, वाक्यान्वयः, वाक्यार्थः, उत्तानार्थः (सरलार्थः), हृदयार्थश्चेति कर्तुमनेकेषु सन्दर्भेषु कोशव्याकरणयोर्महत्त्वपूर्णा भूमिकाऽस्ति ।

यथा राजसु कोशस्यावश्यकता भवति तथैव शब्दार्थसम्बन्धजिज्ञासूनां विदुषामपि कोशस्यातीवाऽवश्यकता भवत्येव । सुभाषितमस्ति यथा –

विदुषां भूभुजां वापि शब्दविद्या तथा प्रजाः ।

संसारे वसतामेति न विना कोशसंग्रहम् ॥[३२]

शब्दज्ञानस्यावश्यकता व्यवहारार्थं भवति । पूर्वं वैदिकशब्दज्ञानार्थं कश्यपेन 'निघण्टुः' अनुष्टुब्छन्दसि लिखितः । तत्र समासार्था नानार्थाश्च समायान्ति । कोशरचनायां विषयविभागः काण्डादिभेदेन कान्तखान्तादिभेदेन वा क्वापि वर्गभेदेनादिवर्णेन च क्रियमाणा दरीदृश्यन्त एव । महर्षेर्यास्कस्य निरुक्तं प्रसिद्धम् । निघण्टुकालानन्तरं निरुक्तानां कालः समभ्येति । भास्कराचार्यमहोदयेन वैदिककोशोऽकारि निघण्टुमेवानुसृत्य । संस्कृतवाङ्मयस्य सम्यग्ज्ञानाय कोशस्य व्याकरणस्य च परमावश्यकता प्रतिक्षणं विद्वद्भिरनुभूयते ।

अवैयाकरणस्त्वन्धः बधिरः कोशवर्जितः ।[३३]

## २.१.८ अमरपूर्वाः कोशाः

यद्यपि कोशसाहित्ये निघण्टुपश्चादमरकोशस्य नाम समायाति तथाप्यस्मिन् कालान्तरे कोशा आसन्नेव । स्वयमेवामरसिंहोऽपि समाहृत्यान्यतन्त्राणीति लिखितवानादौ । तस्मादस्मिन् प्रसङ्गेऽमरपूर्वाणां कोशानां विमर्शो क्रियते ।

### २.१.८.१ निघण्टुः

सर्वप्रथमं निघण्टौ यास्केन लिखिता वैदिकशब्दव्याख्या निरुक्तमित्युच्यते । निघण्टुस्त्रिषु काण्डेषु विभक्तोऽस्ति । १.नैघण्टुकाण्डम्, २.नैगमकाण्डम्, ३.दैवतकाण्डमिति । तत्र पञ्चाध्यायाः सन्ति । प्रथमद्वितीयतृतीया अध्याया नैघण्टुकाण्डम्, चतुर्थोऽध्यायो नैगमकाण्डम्, पञ्चमोऽध्यायो दैवतकाण्डं च । निघण्टुकाण्डस्य विषयः पर्यायवाचिशब्दानां सङ्ग्रहः । अस्मिन् काण्डे पृथिवीजलवायुमेघोषोदिवारात्र्यादीनां प्राकृतिकशब्दानां पर्यायवाचिनः शब्दाः सन्ति । नैगमकाण्डेऽनेकार्थवाचिशब्दानां सङ्ग्रहोऽस्ति । अस्मिन् काण्डे शरीराङ्गानां तथा तेषां गुणानां पदार्थानां क्रियाणां पर्यायवाचिनः शब्दाः सन्ति । दैवतकाण्डस्य विषयो

[३२] त्रिपाठी ब्रह्मानन्दः, ***अमरकोश*** (रत्नप्रभा टीका भूमिका), वाराणसी : चौखम्बा सुरभारती प्रकाशन, इ.१९९६, पृ.१ ।

[३३] अभिमन्युः मन्नालालः, ***अमरकोश*** (धराटीका भूमिका ), वाराणसी : चौखम्बा विद्याभवन, इ.सं.२०१२, पृ.१ ।

देवतावाचिशब्दानां सङ्ग्रहः । अस्मिन् काण्डेऽनेकार्थिशब्दानां गुरुतालघुताऽमूर्तार्थवाचिशब्दानां च पर्यायवाचिनः शब्दाः सन्ति । निघण्टौ शब्दानां वर्गीकरणस्य प्रयासोऽस्ति तथापि वैज्ञानिकी शैली नास्ति । तथाप्ययं कोशो विश्वस्मिन् प्रथमः । अस्माकं देशे कोशसाहित्यस्य प्रारम्भोऽस्मादेवकोशादभूत् । अस्मिन् कोशे ऋग्वेदस्य केचन शब्दाः सन्ति । अस्य रचनाकारस्य समयो नाम च निश्चितं नास्ति तथाप्येवमुक्तमस्ति महाभारते –

वृषो हि भगवान् धर्मः ख्यातो लोकेषु भारत ।
नैघण्टुकपदाख्याने विद्धि मां वृषमुत्तमम् ॥
कपिर्वराहः श्रेष्ठश्च धर्मश्च वृष उच्यते ।
तस्माद् वृषाकपिं प्राह कश्यपो मां प्रजापतिः ॥[३४]

यास्केनैव निघण्टूनां सङ्कलनं कृत्वा व्याख्या कृता । निघण्टुः कोशरचनायाः प्रथमः प्रयत्नोऽस्ति । अत्र पर्यायवाचिशब्दानां सङ्कलनमस्ति । यद्यपि शब्दाः सुनियोजितास्तु न सन्ति तथापि स्थापनाक्रमस्य प्रयासोऽस्ति । यास्केन सम्बद्ध एतादृशो निघण्टुर्वैदिकपरम्पराया अन्तिमः । इतः पूर्वमनेकनिघण्टूनां सङ्कलनं कृतं स्यात् । एषा सूचना पुराणादिग्रन्थेषु प्राप्यते । निघण्टोः कालस्य किमपि प्रमाणं नास्ति । यास्कस्य समयोऽपि विवादग्रस्तोऽस्ति । निघण्टोस्तु कुतो भूयात् कालस्य निर्णयः । यास्को निघण्टुं वेदाङ्गं वर्णयति । तस्माद् निघण्टव ईशापूर्वं सप्तशताद्यां विद्यमाना भवेयुः ।

### २.१.८.२ निरुक्तम्

ईसायास्त्रयोदशशतकपर्यन्तं व्याख्यानं पुनः पुनराक्षिप्तमस्ति निरुक्ते । अस्मिन् ग्रन्थे निर्वचनं तथा शब्दार्थविज्ञानं प्लेटो (Plato) तथाऽरस्तु (Aristotle) इत्यनयोः प्राचीनयुनानीयलेखकयोर्ग्रन्थेभ्योऽप्यधिकं प्रौढमस्ति । यास्कस्य निरुक्ते त्रयोदश वा चतुर्दश काण्डानि सन्ति । अस्य कालस्य निश्चयो नास्ति तथास्यावरसीमा ईशापूर्वं ५०० वर्षमनुमितमस्ति विद्वद्भिः । यास्कस्य निरुक्तं भाषाविज्ञानदृष्ट्या निर्वचनदृष्ट्या चात्यन्तमहत्वपूर्णमस्ति । पूर्वपश्चिमयोर्दृष्ट्या यास्को निर्वचनविद्यायाः प्रथमलेखकः । पञ्चविंशतिशतकपूर्वं यास्कस्य निर्वचनविद्याया आविष्कारोऽभूत् । बुद्धिमत्ता प्रशंसनीयाऽस्ति । निर्वचनविषये यास्कस्य युक्तय एतादृश्यः सन्ति –

–वैदिकपाठं ज्ञातुं निरुक्तस्यावश्यकताऽस्ति ।

---

[३४]व्यासः, (सम्पा.रामचन्द्र शास्त्री) (इ.सं.१९७९) ***महाभारत***(मोक्षपर्व अ.३४२, श्लो. ८६-८७), दिल्ली : ओरियण्टल बक्स रीप्रिण्ट कारपुरेशन, पृ.७२१ ।

– निरुक्तं व्याकरणस्य पूरकमस्ति ।

–निरुक्तं संहितापदपाठार्थं तथा पदानां धातुप्रत्ययविश्लेषणार्थमत्यन्तमावश्यकमस्ति ।

–निरुक्तस्य व्यावहारिकप्रयोगोऽप्यस्ति । देवताचयने सौकर्यं भवति, यस्यां सूक्तौ मन्त्रा बहवो भवेयुः ।

–निरुक्तमेकं विज्ञानमस्ति । ज्ञानस्येव प्रशंसां करोति, अज्ञानस्य निन्दां च ।

–निर्वचनस्य सिद्धान्तः

यास्कः स्वकीयनिरुक्ते नामशब्देषु सर्वत्र धातूनां चिन्तनं करोति तथापि सर्वत्र व्याकरणदृष्ट्या न सम्बध्यते । व्याकरणं तु सार्वकालिकं न भवति । तत्रानेकेऽपवादा भवन्ति । तस्माद्यत्र व्याकरणेन शब्दा न सिद्धचन्ति तत्र समीपताया आधारेणाध्ययनं कर्तव्यम् । शब्दस्यार्थे महत्त्वं देयं स्वरस्य च । प्रकरणज्ञानं विना शब्दस्य निर्वचनं न कर्तव्यम् । योग्याय शिष्याय निर्वचनस्य शिक्षा देया नायोग्याय । अर्थदृष्ट्या निर्वचनं कर्तव्यं शब्दार्थसाम्ये निर्वचनमपि साम्यं भवति । अर्थभिन्नत्वे सति निर्वचनमपि भिन्नं भवति । यथा –

–इष्टम् ( यथेप्सितम् ) – एषणमिति विग्रहे 'इषु इच्छायाम्' ( तु.प.से. १४३९) इति धातोः 'नपुंसके भावे क्तः' ( पा.३।३।११४ ) इति क्तप्रत्ययेऽनुबन्धलोपे ष्टुत्वे 'इष्टम्' इति ।

–इष्टम् ( इष्टकर्म ) – यजनमिति विग्रहे 'यज देवपूजासङ्गतिकरणदानेषु' ( भ्वा.उ.अ. १०७१) इति धातोः 'नपुंसके भावे क्तः' ( ३।३।११४ ) इति क्तप्रत्ययेऽनुबन्धलोपे 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' ( पा.८।२।३६ ) इति षत्वे 'वचिस्वपियजादीनां किति' ( ६।१।१५ ) इति संप्रसारणे 'इष्टम्' इति सिद्धम् । न इष्टं यस्य स इति विग्रहे नञ्समासे 'अनिष्टः' इति संपद्यते ।

अत्रानिष्टशब्दो द्व्यर्थकोऽस्ति । अयं शब्दः समस्तो धातुजश्चास्ति । नामाख्यातोपसर्गनिपाताश्चत्वारः शब्दानां भेदाः सन्ति । निरुक्तं निघण्टोर्व्याख्यारूपेण लिखितम् ।

यद्यपि निघण्टोः पश्चादमरकोशस्यैव नामायाति तथाप्येतस्मिन् दीर्घकाले केषामपि कोशानां कल्पनां कर्तुं शक्यते । स्वयममरसिंहो वदति–

समाहृत्यान्यतन्त्राणि संक्षिप्तैः प्रतिसंस्कृतैः ।
सम्पूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम् ॥

तथापि यथा पाणिनेरष्टाध्याय्या लोकप्रियतायाः कारणेनान्यानि व्याकरणानि विलुप्तानि तथैवामरकोशस्य लोकप्रियतायाः कारणेनान्ये कोशा लुप्तप्रायाः । यद्यप्यन्ये कोशा न प्राप्यन्ते तथाप्यमरकोशस्य टीकायां पूर्वकोशानां कोशकाराणाञ्च नामानि प्राप्यन्ते ।अमरकोशस्य टीकाकारेण सर्वानन्देनामरकोशस्योद्धृतश्लोकानां व्याख्यां कुर्वता व्याडिवररुच्योः कोशास्तथा त्रिकाण्डोत्पलिन्योरमरपूर्वकोशे नामन्युल्लिखिते स्त इति सुगृह्यत्वात् । क्षीरस्वामिनामरकोशपूर्ववर्तिनोर्धन्वन्तरिभागुर्योस्तथा रत्नकोशमालाकोशयोर्नामनी चोल्लिखिते स्तः । अपरेण कोशकारेण पुरुषोत्तमदेवेन हारावलीनामककोशे वाचस्पतिव्याडिविक्रमादित्यानां पूर्वकोशकाररूपेण नामानि गृहीतानि । एभिः क्रमशः शब्दार्णवः, उत्पलिनी, संसारावर्तनामकाश्च कोशा रचिताः । महेश्वरेण विश्वप्रकाशकोशस्य प्रारम्भे वाचस्पतिव्याडिभ्यां सह कात्यायनस्य स्मरणं कृतम् । तेषां संक्षेपेण वर्णनं क्रियतेऽमरकोशस्योपजीव्यत्वात् ।

### २.१.८.३ व्याडिः

'संग्रह' नामकाद् व्याकरणग्रन्थकारादि्भन्न एकः कोशकार आसीद् व्याडिः । व्याडेः कोऽपि कोश उपलब्धो नास्ति । तेन कारणेन व्यक्तित्वस्य, कालस्य, कृतेश्च किमपि मतं नैव प्राप्यते । परवर्तिटीकाकाराणामुद्धरणेनाऽस्य कोशो ज्ञायते । अमरकोशवत् पर्यायशैल्या लिखितोऽस्ति । यथा –

'मृगो बिन्दुः पृषंश्चैव पृषतश्च प्रकीर्तितः ।[३५]

ऋक्प्रातिशाख्ये व्याडेर्नाम स्थाने स्थाने प्राप्यते । 'मित्रावरुणयोः सूनुरौर्वशेयश्च वारुणिः' इति भानुनाप्युक्तम् ।[३६]अभिधानचिन्तामणौ च हेमचन्द्रेणोद्धरणं दत्तं तस्माद् व्याडेर्विशालकोशः स्यात् ।[३७]

### २.१.८.४.कात्यः

अमरपूर्वेषु कोशकारेषु कात्योऽप्येकः कोशकारोऽस्ति । व्याडिवत् कात्योऽप्युदाहरणैर्ज्ञायते । कात्यस्य कोशस्य नाम 'नाममाला' अस्ति । अत्र पर्यायवाचिनां तथानेकार्थिशब्दानां सङ्कलनमस्ति । हेमचन्द्रकेशवरायमुकुटभानुजिदीक्षितादिभिः कात्यस्योद्धरणानि दत्तानि ।

---

[३५] दीक्षितः भानुजि, ***अमरकोशः*** (सुधाटीका २.५.१०), वाराणसी : चौखम्बा विद्याभवन, सन्.२०११, पृ.१९० ।

[३६] पूर्ववत् पृ.३७ ।

[३७]अथ व्याडिर्विन्ध्यवासी नन्दिनीतनयश्च सः ॥

आचार्यः हेमचन्द्रः, ***अभिधानचिन्तामणिः,*** (३।११६), वाराणसी : चौखम्बा विद्याभवन, वि.स.२०२०, पृ.२११ ।

### २.१.८.५ भागुरिः

आफ्रेडस्यानुसारेण भागुरेः कोशस्य नाम त्रिकाण्डमासीत् । परन्तु डा.पाटकरोऽमरकोशस्यापरं नामैव त्रिकाण्डं कथयति तन्न समीचीनम् । सर्वानन्दरायमुकुटाभ्यां तथान्यटीकाकारैस्त्रिकाण्डस्योद्धरणानि दत्तानि । सर्वानन्दानुसारेण त्रिकाण्डे लिङ्गनिर्देशनं नास्ति । केवलं पदेन लिङ्गज्ञानं भवति । भागुरेः त्रिकाण्डस्य वा छन्दोऽनुष्टुबस्ति ।

### २.१.८.६ रत्नकोशः

सर्वानन्दस्यानुसारेण रत्नकोशो लिङ्गानुसारेणाध्याये विभक्त आसीत् । अस्य कर्ताऽज्ञातः, एष पर्यायकोश आसीत् । विभक्त्यनुसारेणात्र लिङ्गज्ञानं भवति ।

### २.१.८.७.माला तथा मालाकारः

विभिन्नेषु टीकाग्रन्थेषु मालाकोशः, मालाकारः तथाऽमरमाला नाम्नोद्धरणानि प्राप्यन्ते । अमरमालायाः कर्ता सम्भवतोऽमरदत्तः स्यात् । तस्य नामानुसारेणैव कोशस्य नामाऽमरमाला भवेत् । अस्य कालोऽनिश्चित एव । अयं कोशोऽतिप्राचीनः, प्रमाणरूपेणहलायुधश्चामरमालां मन्यते । अमरमालाया हलायुधस्य च साम्यं दृश्यते ।

### २.१.८.८ वाचस्पतिस्तथा शब्दार्णवः

वाचस्पतेः कोशः शब्दार्णव इति मन्यते । अस्मिन् कोशे विभिन्नाः पर्यायशब्दा पठिताः । एकस्य शब्दस्य विभिन्नानि रूपाणि दत्तानि सन्ति । हेमचन्द्रः स्वकीयाभिधानचिन्तामणेष्टीकायां प्रारम्भे वाचस्पतिमन्यांश्च प्रणमति ।

### २.१.८.९ धन्वन्तरिनिघण्टुः

धन्वन्तिरिकृतो धन्वन्तरिनिघण्टुरौषधिविज्ञानस्य कोशः । अत्र सप्ताध्यायाः सन्ति । केचन नवाध्यायान् केचन दशाध्यायान् कथयन्ति । अस्यापरं नाम द्रव्यावलिनिघण्टुरस्ति । अत्र निम्नलिखितवर्गाः सन्ति यथा - गुडुच्यादिशतपुष्पादिचन्दनादिकरवीरादिकञ्चनाद्याम्रादि-मिश्रकादयः ।

### २.१.८.१० शाश्वतकृतोऽनेकार्थसमुच्चयः

शाश्वतकृतोऽनेकार्थसमुच्चयोऽमरकोशस्य समकालिककोशोऽस्तीति केचन कथयन्ति नोचितमेतत् । नाम्नैव ज्ञायतेऽसौ कोशो नानार्थकोऽस्ति । षट्सु भागेषु विभक्तेऽस्मिन् कोशेऽष्टशतमनुष्टुप्छन्दसि श्लोकाः सन्ति । पण्डितो बलदेवोपाध्यायोऽस्य कोशस्य क्रमः परवर्तिकाले स्थापयति ।

### २.१.८.११ रसपालः

सर्वानन्दस्य टीकायां प्रदत्तैरुदाहरणैर्ज्ञायते यद्रसपालकोशस्यामरकोशेन सह साम्यमस्ति । रभसकोशादधिकानेव विषयान् प्रस्तौति । रभसकोशोऽमरकोशात्परवर्ती मन्यते ।

### २.१.८.१२ अग्निपुराणे कोशः

अग्निपुराणस्य ३४८ अध्याये 'एकाक्षराभिधानम्' कोशस्तथैवाग्रे ३६० अध्याये 'स्वर्गपातालदिवर्गः' ३७१ अध्याये 'नरकनिरूपणम्' कोशसामग्र्य उपलब्धाः सन्ति । ३४८ अध्यायस्य 'एकाक्षराभिधानम्' कोशं विहाय शेषेषु ११ अध्यायेषु स्थितानां सामग्रीणाममरकोशेन सहाधिकं साम्यमस्ति । अमरकोशवद्वर्गविभागो वर्तते । कुत्रचिदमरकोशस्य पाठः स्थापितो दृश्यते । अस्य कोशस्य कालो बलदेवोपाध्यायो नवमशताब्दीं स्वीकरोति ।[३८]

## २.१.९.विविधकोशानां कोशकाराणाञ्च नामानि

संस्कृतवाङ्मयेऽनेके कोशग्रन्थाः समये समये रचिताः कोशानां कोशकाराणाञ्च नामानि प्राप्यन्ते । केषाञ्चन ग्रन्थानां कोशकारा नैव प्राप्यन्ते तथैव कुत्रचित् कोशकाराः सन्ति परन्तु कोशा नैव प्राप्यन्ते । तस्मादत्र कोशानां कोशकाराणाञ्च नामानि दीयन्ते ।

### २.१.९.१ वैदिककोशाः –

| कोशाः | रचयितारः |
|---|---|
| निघण्टुः | कश्यपः |
| निरुक्तम् | आग्रायणः |
| निरुक्तम् | औपमन्यवः |
| निरुक्तम् | और्णनाभः |
| निरुक्तम् | काथव्यः |
| निरुक्तम् | कौष्टुकिः |
| निरुक्तम् | गार्ग्यः |
| निरुक्तम् | गालवः |
| निरुक्तम् | तैटिकः |
| निरुक्तम् | वार्ष्यायणिः |

[३८] त्रिपाठी कैलाशचन्द्रः, **अमरकोश का कोशशास्त्रीय तथा भाषाशास्त्रीय अध्ययन** (भूमिका), वाराणसी : चौखम्बा विद्याभवन, सन्२००८, पृ.१५ ।

| | |
|---|---|
| निरुक्तम् | शाकपुणिः |
| निरुक्तम् | स्थौलाष्ठीविः |
| निरुक्तम् | यास्कः |

**२.१.९.२ प्राचीनकोशाः –**

| कोशाः | कोशकाराः |
|---|---|
| १. नामलिङ्गानुशासनम् | अमरसिंहः |
| २. कल्पद्रुमकोशः | केशवः |
| ३. अभिधानचिन्तामणिः | जिनदेवमुनीश्वरः |
| ४. शिलोच्छकोशः | जिनदेवमुनीश्वरः |
| ५. शब्दार्णवः | दुर्गादासः |
| ६. शब्दार्णवः | वाचस्पतिः |
| ७. प्रमाणनाममाला | धनञ्जयः |
| ८. एकाक्षरकोशः | पुरुषोत्तमदेवः |
| ९. द्विरूपकोशः | पुरुषोत्तमदेवः |
| १०. त्रिकाण्डकोशः | पुरुषोत्तमदेवः |
| ११. हारावली | पुरुषोत्तमदेवः |
| १२. वर्णदेशना | पुरुषोत्तमदेवः |
| १३. द्विरूपकोशः | भरतसेनमल्लिकः |
| १४. मातृकानिघण्टुः | महीदासः |
| १५. अनेकार्थध्वनिमञ्जरी | महाक्षपणकः |
| १६. अव्ययकोशः | महादेवः |
| १७. विश्वप्रकाशः | महेश्वरः |
| १८. शब्दभेदप्रकाशः | महेश्वरः |
| १९. नानार्थशब्दकोशः | मेदिनीकरः |
| २०. मेदिनीकोशः | मेदिनीकरः |
| २१. वैजयन्ती | यादवप्रकाशः |
| २२. लिङ्गविशेषविधिः | वररुचिः |
| २३. पञ्चतत्त्वप्रकाशः | वेणीदत्तः |

| | |
|---|---|
| २४. नानार्थसमुच्चयः | शाश्वतः |
| २५. एकाक्षरीनाममाला | विश्वशम्भुः |
| २६. गणितनाममाला | हरिदत्तः |
| २७. अभिधानरत्नमाला | हलायुधः |
| २८. शारदीनाममाला | हर्षकीर्तिः |
| २९. अनेकार्थसङ्ग्रहः | हेमचन्द्रः |
| ३०. अभिधानचिन्तामणिः | हेमचन्द्रः |
| ३१. निघण्टुशेषः | हेमचन्द्रः |
| ३२. लिङ्गानुशासनम् | हेमचन्द्रः |
| ३३. लक्ष्मीनिवासः | शिवरामः |
| ३४. उत्पलिनी | व्याडिः |
| ३५. संसारावर्तः | विक्रमादित्यः |
| ३६. नाममाला | कात्यः |
| ३७. त्रिकाण्डम् | भागुरिः |
| ३८. नानार्थसङ्ग्रहः | अजयः |
| ३९. अनेकार्थकोशः | मङ्खः |
| ४०. नानार्थार्णवः | केशवस्वामी |
| ४१. शब्दरत्नसमन्वयः | शाहजी महाराजः |
| ४२. शब्दरत्नाकरः | सुन्दरमणिः |
| ४३. उक्तिरत्नाकरः | सुन्दरमणिः |
| ४४. धातुरत्नाकरः | सुन्दरमणिः |
| ४५. अमरमाला | अमरदत्तः |
| ४६. शब्दरत्नाकरः | वामनभट्टः |
| ४७. नानार्थरत्नमाला | इरुगदण्डाधिनाथभा. |
| ४८. नानार्थमञ्जरी | राघवः |
| ४९. कल्पतरुः | विश्वनाथः |
| ५०. नाममालिका | भोजराजः |
| ५१. एकाक्षरनाममाला | सौभरी |

| | |
|---|---|
| ५२. द्व्यक्षरनाममाला | सौभरी |
| ५३. वस्तुरत्नकोशः | अज्ञातः |
| ५४. आख्यातचन्द्रिका | महामल्लः |
| ५५. कविरहस्यः | हलायुधः |
| ५६. वाङ्मयार्णवः | रामावतारशर्मा |
| ५७. मुक्तावली | श्रीधरः |
| ५८. शब्दसङ्ग्रहः | अगस्त्यः |
| ५९. शब्दार्णवः | काशिनाथः |
| ६०. लोकप्रकाशः | क्षेमेन्द्रः |
| ६१. अनेकार्थध्वनिमञ्जरी | गदसिंहः |
| ६२. शब्दमाला | गोपीनाथः |
| ६३. नामावली | गोवर्द्धनः |
| ६४. शब्दसागरः | गोविन्दशर्मा |
| ६५. शब्दचन्द्रिका | चक्रपाणिदत्तः |
| ६६. अभिधानतन्त्रम् | जटाधराचार्यः |
| ६७. कोमलकोशसङ्ग्रहः | तीर्थस्वामी |
| ६८. गीर्वाणभाषाभूषणम् | त्रिविक्रमाचार्यः |
| ६९. नामार्थरत्नमाला | दण्डनाथः |
| ७०. नाममाला | दुर्गाचार्यः |
| ७१. नामार्थसमुच्चयः | धरणीशः |
| ७२. कविजीवनम् | धर्मराजः |
| ७३. वर्णाभिधानम् | नन्दनभट्टः |
| ७४. राजवल्लभः | नारायणदासः |
| ७५. रत्नकोशः | नृसिंहमुनिः |
| ७६. मङ्खकोशः | मङ्खः |
| ७७. त्रिरूपकोशः | विल्हणः |
| ७८. उणादिकोशः | रामशर्मा |
| ७९. शब्दचन्द्रिका | बाणभट्टः |

| | |
|---|---|
| ८०. नाममाला | भोजराजः |
| ८१. शब्दरत्नावली | मधुरेशः |
| ८२. पदचन्द्रिका | मयूरभट्टः |
| ८३. अनेकार्थतिलकः | महीपः |
| ८४. शब्दरत्नाकरः | महीपः |
| ८५. नामसङ्ग्रहमाला | अप्पयदीक्षितः |
| ८६. एकाक्षरनाममाला | अमरसिंहः |
| ८७. प्रयुक्तपदमञ्जरी | कालिदासः |
| ८८. रूपमञ्जरीनाममाला | रूपचन्द्रः |
| ८९. कविमञ्जरी | वल्लभः |
| ९०. शब्दरत्नाकरः | वामनभट्टः |
| ९१. शब्दार्थचिन्तामणिः | विठ्ठलाचार्यः |
| ९२. कोशकल्पतरुः | विश्वनाथः |
| ९३. शब्दार्थकल्पतरुः | वेङ्कटः |
| ९४. संयमिनाममाला | शंकरः |
| ९५. शिवकोशः | शिवदत्तः |
| ९६. सुप्रसिद्धपदमञ्जरी | मुरारिः |
| ९७. शब्दार्थनिर्णयः | राक्षसः |
| ९८. शब्दमाला | रामेश्वरः |
| ९९. द्विरूपकोशः | श्रीहर्षः |
| १००. श्लेषार्थपदसङ्ग्रहः | श्रीर्हषः |
| १०१. लिङ्गप्रकाशः | सारेश्वरः |
| १०२. भुवनप्रदीपिका | सार्वभौममिश्रः |
| १०३. शब्दरत्नाकरः | सुन्दरमणिः |
| १०४. अनेकार्थतिलकः | सोमभवः |
| १०५. कविदीपिकानिघण्टुः | विक्रमादित्यः |
| १०६. दशदीपनिघण्टुः | वेदान्ताचार्यः |

**२.१.९.३ विशेषकोशाः**

१. एकवर्णग्रहः	२. उष्मविवेकः	३. चकारभेदः

| | | |
|---|---|---|
| १. एकवर्णग्रहः | २. उष्मविवेकः | ३. चकारभेदः |
| ४. जकारभेदः | ५. सकारभेदः | ६. लिङ्गप्रकाशः |
| ७. सुभूतिकोशः | ८. दण्डिकोशः | ९.वीजकोशः |
| १०. रत्नकोशः | ११. साध्यकोशः | १२. मुनिकोशः |
| १३. पालकोशः | १४. गोभर्धनकोशः | १५. चन्द्रकोशः |
| १६. चरककोशः | १७. महाखण्डकोशः | १८. कोशसारः |
| १९. सारश्वताभिधानम् | २०. संसारावर्तः | |

### २.१.९.४ अज्ञातकृतीनां कोशकाराः

| | | |
|---|---|---|
| १. कात्यायनः | २. मङ्गलः | ३. महेशः |
| ४. रभसः | ५. मार्तण्डः | ६. रन्तिदेवः |
| ७. राजशेखरः | ८. राजमुकुटः | ९. अमरदत्तः |
| १०. गङ्गाधरः | ११. चन्द्रगोमी | १२. तारपालः |
| १३. रुद्रः | १४. वोपालितः | १५. साहसाङ्कः |
| १६. हड्डचन्द्रः | १७. दामोदरः | १८. धर्मदासः |
| १९. भागुरिः | २०. भोगीन्द्रः | २१. व्याडिः |
| २२. धरणीधरः | २३. वाचस्पतिः | २४. राजदेवः |
| २५. वामनः | २६. मुकुटः | २७. विक्रमादित्यः |
| २८. विश्वरूपः | २९. भट्टमल्लः | ३०. विश्वलोचनः |
| ३१. सोमनन्दी | ३२. वाग्भटः[३९] | |

### २.१.१० कोशकाराणां कालविभागः

इतिहासकारैरमरकोशकारं मध्यस्थीकृत्य कोशकाराणां कालो द्विधा विभक्तोऽस्ति । १. अमरपूर्वकालिकाः कोशकाराः, २. अमरपश्चात्कालिकाः कोशकाराश्च ।

### २.१.१०.१ अमरपूर्वकालिकाः कोशकाराः –

१. व्याडिः, २. कात्यः, ३. भागुरिः, ४. रत्नकोशः, ५. अमरदत्तः, ६. वाचस्पतिः, ७. धन्वन्तरिः, ८. महाक्षपणकश्च ।

### २.१.१०.२ अमरपश्चात्कालिकाः कोशकाराः –

[३९] त्रिपाठी ब्रह्मानन्दः, ***अमरकोशः*** (रत्नप्रभा टीका भूमिका) वाराणसी : चौखम्बा सुरभारती प्रकाशन, सन् १९९६, पृ.८ ।

१. शाश्वतः, २. धनञ्जयः, ३. पुरुषोत्तमदेवः, ४. हलायुधः, ५. यादवप्रकाशः, ६. महेश्वरः, ७. अजयः, ८. मेदिनी, ९. मङ्खः, १०. हेमचन्द्रः, ११. केशवस्वामी, १२. केशवः, १३. शाहजी महाराजः, १४. हर्षकीर्तिप्रभृतयश्च ।

## २.१.११ अमरकोशः

बहवः कोशग्रन्थाः सन्ति तथाप्यमरकोशस्य कर्त्रा स्वनामधन्येनामरसिंहेन तृतीयकाण्डे व्याकरणस्य सन्निवेशरूपं यद्वैशिष्ट्यं स्वकीयकोशे समुपन्यस्तं तदवलोक्य केनाप्यालोचकवरेण सूक्तं यत् –

'अमरसिंहो हि पापीयान् सर्वं भाष्यमचूचुरत् [४०] ।' इति ।

अत्रामरसिंहस्य प्रशंसा निन्दा च प्राप्यते। बौद्धेन सह विवदमाना विद्वांसस्तस्य बौद्धमतेऽश्रद्धालवो भवेयुरमरसिंहस्य बौद्धत्वात् । अनेके कोशाः समये समये निर्मिताश्च तथाप्यमरकोशस्याद्वितीयस्थानमस्ति संस्कृतजगति ।

## २.१.१२ अमरसिंहस्य व्यक्तित्वम्

अमरकोशस्य प्रत्येककाण्डान्त एकः श्लोकोऽस्ति। तस्माद् ज्ञायतेऽमरकोशस्य रचनाकारोऽमरसिंहोऽस्त्येव। अन्यपरिचयो न प्राप्यते। नाम्नाऽसौ क्षत्रियो मन्यते। अस्मिन् प्रसङ्ग एकः श्लोकोऽस्ति, अमरसिंहः शूद्रायां जातः –

ब्राह्मण्यामभवद् वराहमिहिरो ज्योतिर्विदामग्रणी,
राजा भर्तृहरिश्च विक्रमनृपः क्षत्रात्मजायामभूत् ।
वैश्यायां हरिचन्द्रवैद्यतिलको जातश्च शंकुः कृती,
शूद्रायाममरःषडेव शबरस्वामिद्विजस्यात्मजः ॥[४१]

अस्मादपराः का अपि सामग्र्यो न प्राप्यन्ते। तथापि सिंहपदेन क्षात्र आसीदिति तु निश्चितमेव। अमरसिंहो बौद्धस्तथा व्याकरणकोशाभिज्ञश्चासीत्। आयुर्वेदशास्त्रे च प्रौढ आसीत्। राजशेखरः काव्यमीमांसायां लिखत्युज्जयिन्यां कविसभायाममरोऽप्यागत इति। अमरसिंहनाम्ना प्रसिद्धो व्याकरणशास्त्रकर्तृषु पठ्यतेऽसौ –

इन्द्रश्चान्द्रकासकृत्नाऽऽपिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टौ च शाब्दिकाः ॥ [४२]

---

[४०] पूर्ववत् पृ.२ ।

[४१] पूर्ववत् भूमिका पृ.५ ।

अमरसिंहस्य जन्मसमयः स्थानं च कुत्रापि निश्चितरूपेण न प्राप्यते । विभिन्नविदुषां मतानि सन्ति । यथा –

धन्वन्तरिः क्षपणकोऽमरसिंहशङ्कु-
वेतालभट्टघटखर्परकालिदासाः ।
व्यासो वराहमिहिरो नृपतेः सभायां,
रत्नानि वै वररुचिर्नव विक्रमस्य ॥ [४३]

इति पद्मपुराणेन खिष्टाब्दात् प्राक् प्रथमे शतकेऽस्य कालोऽनुमीयते । विल्सनः ५०० मिते खिस्तीयेऽब्दे, डा. सर केर्नः खिस्तीयषष्ठशतकस्य पूर्वार्द्धे, वेवरः खिस्तीयैकादशे द्वादशे वेति कथयन्ति । आधुनिका अमरसिंहस्य समयः २२५ ईशवीयवत्सरेभ्यः पश्चाद्वर्ती भवितुं नैव शक्नोतीति । शङ्कराचार्यः शास्त्रार्थे बौद्धान् पराजित्य तेषां साहित्यं यदा समुद्रेऽमज्जयत् तदेतस्य गुणगणैकबद्धादरः स केवलममरकोशमेव ततो जग्राहेति श्रूयते । अमरस्यामरसिंहशाक्य अथवा वाणेति नाम वदन्ति लिखन्ति च, सर्वत्रैव किंवदन्त्यस्ति ।[४४]अयञ्च नेपालीय इत्यपि कथनं प्राप्यते। केचन तु काष्ठमण्डपस्य जयवागेश्वर्यामरसिंहो जात अत्रैव कोशं लिखितवानिति वदन्ति ।[४५]

### २.१.१३ अमरकोशस्य रचनाकालः

यथामरसिंहस्य किमपि व्यक्तित्वं न प्राप्यते तथैवामरकोशस्यापि कालनिर्णयो नास्ति । अस्य कालस्य निर्णयो बाह्यसाक्ष्याद्वान्तरसाक्ष्यादनुमातुं शक्यते। रचनाकालस्य विदुषां मतभेदोऽस्ति । एका किंवदन्त्यस्ति –

धन्वन्तरिक्षपणकामरसिंहशंकुवेतालभट्टघटखर्परकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य ॥[४६] इति

---

[४२] दीक्षितः भानुजि, ***अमरकोशः*** (व्याख्यासुधा टीका प्रस्तावना), बाराणसी : चौखम्बा संस्कृत सीरीज अफिस, वि.सं.२०२६, पृ.१७ ।

[४३] त्रिपाठी ब्रह्मानन्दः, ***अमरकोशः***(रत्नप्रभा टीका भूमिका), वाराणसी : चौखम्बा सुरभारती प्रकाशन, सन्१९९६, पृ.५ ।

[४४]खेमराज घिमिरे, ***अमरकोशस्य ब्रह्मवर्गेण सह वेदभाषानिघण्टोर्ब्रह्मवर्गस्य तुलनात्मकमध्ययनम्,*** दाङ् : आचार्यशोधपत्रम् वि.सं.२०७३ ने.सं.वि. पृ.२७ ।.

[४५]अन्तर्वार्ता, दाहाल डा.विष्णुप्रसादः, निर्देशकः ने.सं.वि.अनुसन्धानकेन्द्रः काठमाण्डौ ।

[४६] त्रिपाठी कैलाशचन्द्रः, **अमरकोश का कोशशास्त्रीय तथा भाषाशास्त्रीय अध्ययन** (भूमिका), वाराणसी : चौखम्बा विद्याभवन, सन् २००८, पृ.१९ ।

विक्रमस्य कालो ज्ञातुं न शक्यते। ईशायाः पञ्चशताब्द्या आरभ्यैकादश शताब्दीपर्यन्तममरकोशस्य रचनाऽभूत्। कैलाशचन्द्रत्रिपाठ्यमरसिंहस्य काल ईशवीयपञ्चम-शताब्द्याः पूर्वार्द्धं मन्यते।[४७]

## २.१.१४ अमरकोशस्याध्ययनम्

अमरसिंहकृतोऽमरकोशः 'नामलिङ्गानुशासनम्' संस्कृतवाङ्मयस्य विशिष्टग्रन्थोऽस्ति। विविधासु टीकास्वस्योद्धरणानि सन्ति। अमरकोशात् पूर्ववर्तिनः प्रायः कोशा लुप्ताः सन्ति। एष कोशो जीवितोऽस्ति, तस्मादपि ज्ञायते संस्कृतभाषायाममरकोशो महत्त्वपूर्णः। अद्यापि संस्कृतशिक्षणपरम्परायां प्रारम्भे विद्यार्थिभ्योऽष्टाध्यायी तथामरकोशश्च पाठ्येते, कण्ठस्थीक्रियेते च। तस्मात् संस्कृतशिक्षाया अमरकोश आधारशिलाऽस्ति। सर्वेषां कोशानां वरिष्ठत्वादध्ययनस्यावश्यकताऽस्ति। यतो हि भाषा साहित्यवाहिनी भवति तत एव कोशस्यावश्यकता।

एषा भाषा भारतवर्षस्योत्तरपश्चिमप्रदेशाद् नेपालाद्वाग्रे गत्वा मध्यप्रदेशे वा प्राच्यप्रदेशेऽग्रेसराभूत्। [४८]तस्मात् सर्वैरार्यैः संस्कृतभाषाऽऽदर्शभाषा स्वीकृता। तथा संस्कृतभाषा शिक्षासाहित्ययोर्गतिविधिषु प्रचलिताऽभूत्। ततः पश्चादुत्तरपश्चिमस्य भाषा मध्यप्रदेशेऽथवा प्राच्यप्रदेशे शिष्टजनानां भाषाऽभूत् संस्कृतनाम्ना च ख्यातिप्राप्ता संस्कृतजनानां शिष्टानां भाषात्वात्। देववाण्याः संस्कृतं नाम वाल्मीकिरामायणे काव्यादर्शे च सर्वप्रथमं प्राप्यते।[४९]

वाङ्मयस्य विकाशक्रमे संस्कृतव्याकरणस्य कोशस्य चावश्यकताभूत्। व्याकरणस्य क्षेत्रे पाणिनेः प्रयासः सर्वाधिकपूर्णोऽभूत् तस्मादेव कारणात् पूर्ववर्तीनि व्याकरणानि प्रायो

---

[४७] पूर्ववत् पृ.२६।

[४८] त्रिपाठी कैलाशचन्द्रः, ***अमरकोश का कोशशास्त्रीय तथा भाषाशास्त्रीय अध्ययन*** (भूमिका), वाराणसी : चौखम्बा विद्याभवन, सन्२००८, पृ.४३। उदिच्यां दिशि प्रज्ञाततरा वागुद्यत उदंच उ एव यन्ति वाचं शिक्षितुं यो वा तत आगच्छति तस्य वा शुश्रूषन्त। कौशितकि ब्राह्मण ७।६।

[४९] वाचं चोदाहरिष्यामि मानुषीमिह संस्कृताम्॥ १७॥
यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम्।
रावणं मन्यमाना मां सीता भीता भविष्यति॥ १८॥
अवश्यमेव वक्तव्यं मानुषं वाक्यमर्थवत्।
मया सान्त्वयितुं शक्या नान्यथेयमनिन्दिता॥ वाल्मीकिः, ***वाल्मीकीयरामायणम्*** सुन्दरकाण्ड (५। ३०। १७-१९), गोरखपुर : गीताप्रेस, वि.सं.२०४४, पृ.९४०।

तदिदं वाङ्मयं भूयः संस्कृतं प्राकृतं तथा।
अपभ्रंशश्च मिश्रं चेत्याहुराप्ताश्चतुर्विधम्॥ *काव्यादर्श* १। ३४।

लुप्तानि। पाणिनिरपि भारतवर्षस्योत्तरपश्चिमस्य नेपालस्य वा निवास्यासीत्। अर्घाखाँचीजनपदस्य 'पणेना' इति ग्रामे तपसे आगमनकारणाच्च पाणिनिर्निवसति स्मेति वदन्ति विद्वांसः। तस्मिन् समये संस्कृतभाषा लोकभाषाऽऽसीत्। मध्यप्रदेशे, प्राच्यप्रदेशे तथा दक्षिणप्रदेशे या विविधतासीत्तत्कार्यं वार्तिककारेण कृतम्, तस्मादेव कारणात् कात्यायनस्य संशोधनं मान्यमभूत्। पाणिनिकात्यायनयोः पश्चात् महाभाष्यकारेण पतञ्जलिना विशदरूपेण विवेचनं कृतम्, तस्मात् संस्कृतभाषा परिनिष्ठिताऽभूत्। भाषायामान्तरिकशब्दानां तथा बाह्यशब्दानां समावेशोऽभूत्। एतादृशी परिनिष्ठिता भाषाऽमरकोशे प्राप्यते। तस्मादमरकोशस्य संस्कृतभाषाया विकासरूपे महत्त्वमस्ति। अस्मिन् कोशे वैदिकभाषायां संस्कृतभाषायाञ्च वर्णानां तथाऽर्थानां का स्थितिरस्तीति ज्ञातुं शक्यते।[५०]

## २.१.१५ अमरकोशस्यालोचनाप्रत्यालोचने

आलोचनाप्रसङ्गेऽमरकोशस्य 'अमरखण्डनम्' नामकं पुस्तकं श्रीहर्षेण लिखितमस्ति। असौ नास्ति नैषधीयचरितस्य लेखकः। एतत् पुस्तकं तेलगुलिप्यां ताडपत्रे लिखितम्। अस्मिन् पुस्तके खण्डनमनेन प्रकारेण कृतमस्ति। अमरसिंहेन यथा प्रतिज्ञा कृताऽस्ति–

(क) अन्यतन्त्रसमाहारः।

(ख) सङ्क्षेपः।

(ग) प्रतिसंस्करणम्।

(घ) वर्गगतविभाजनम्।

(ङ) नामलिङ्गानुशासनम्।

(च) संपूर्णप्रस्तुतिकरणम्।

अमरसिंहेन सावधानतयाऽमरकोशस्य रचना कृता तथापि पूरकरूपेण पुरषोत्तमदेवः 'त्रिकाण्डशेषः' इत्यलिखत्। द्विरूपकोशस्य शब्दभेदप्रकाशस्य चावश्यकताऽभूत्। तथैव कुलचन्द्रगौतमोऽपि 'अमरकोशपरिशेषः' इति ग्रन्थमरचयत्। श्रीहर्षः कथयत्यमरसिंहेनामरकोशस्य स्वकीया प्रतिज्ञा नैव पालिता तस्मादसफलोऽस्तीति।

(क) अन्यतन्त्रसमाहारो नैव कृतो यथा – उच्चैःश्रवस्मातलिनन्दनां शब्दानामन्ये पर्यायवाचिनः शब्दाः शक्रवाहनः, देवसारथिः, देवकाननमित्यादयः सन्ति तथापि नैव दत्ताः।

---

[५०] त्रिपाठी कैलाशचन्द्रः, ***अमरकोश का कोशशास्त्रीय तथा भाषाशास्त्रीय अध्ययन***(भूमिका), वाराणसी : चौखम्बा विद्याभवन, सन्२००८, पृ.४४।

(ख) संक्षेपोऽपि नास्ति यथा – मत्स्यमीनाण्डजशब्दास्तथैवोपेन्द्रेन्द्र-वरजमाधव-श्रीपतिशब्दा दत्ताः सन्ति ।

(ग) प्रतिसंस्कारोऽपि नास्ति यथा– नामलिङ्गानुशासनमित्यत्र नानार्थस्य स्थानं नास्ति ।

(घ) वर्गविभाजनमपि क्रमेण नास्ति यथा–'असुरा दैत्यदैतेयदनुजेन्द्रारिदानवा..' (१।१।१२) तथोपवर्गोऽस्ति यथा– 'क्रव्यात्क्रव्याद...' (१।१।६०) तस्माद् न्यूनता दृश्यते ।

(ङ) नामलिङ्गानुशासनक्रमे शब्दानां विविधलिङ्गानि नैवदर्शितानि ।

(च) सम्पूर्णप्रस्तुतिकरणप्रसङ्गेऽमरसिंहेनैकशब्दस्य विभिन्नरूपाणि नैव प्रस्तुतानि ।

कृष्णसूरिविरचितं 'अमरमण्डनम्' श्रीहर्षस्य प्रत्यालोचना तथामरसिंहस्य प्रतिज्ञायाः पुनःस्थापनास्ति । इदं पुस्तकमपि हस्तलिखितमस्ति । अस्य कालः १७७० ई.मन्यते । कृष्णसूरिरमरस्य मण्डनं कुर्वन् यत्सुदृढीकृत्य कथयति यथा– अमरः प्रचलितान् शब्दान् गृह्णाति । अतिरिक्तरूपाणि प्राचुर्यविवक्षायाः कारणादधिकानि प्रचलितानि सन्ति । नामन्शब्दस्यार्थो पर्यायः, अव्ययं तथा नानार्थोऽपि भवति । अमरसिंहो नानालिङ्गाभिज्ञ आसीत्तथापि प्रचलितलिङ्गानामेव ग्रहणं कृतवानित्युक्तवान् कृष्णसूरिः ।[५१]

## २.१.१६.पर्याययोजना

शब्दार्थयोः सम्बद्धविषयाणां प्रस्तुतिरेव कोशकारस्य क्षमतां दर्शयति ।कोशकारस्य मौलिकतानवीनतयोरुपयोगिताया आधारस्तस्य प्रणाली भवति । शब्दसंयोजनदृष्ट्यामरकोशः पर्यायकोशोऽस्ति । एकार्थवाचकाः शब्दाः पर्याया भवन्ति ।[५२]सामान्यार्थमवलम्ब्य पर्यायशब्दाः स्थाप्यन्ते । विशिष्टार्थस्तु निरुक्तकारस्य कार्यम् । अमरकोशस्य सङ्कलितानां पर्यायशब्दानां मुख्यरूपेण त्रिवर्गे विभक्तुं शक्यते ।

(क) निश्चितोऽथवा शुद्धपर्यायः

अस्मिन् वर्गे बहुप्रचलिताः शब्दास्तथा रूढपर्यायाः स्थाप्यन्ते । तथापि मूलार्थे विशेषा हानिर्न भवति । यथा–

शंभुरीशः पशुपतिः शिवः शूली महेश्वरः । स्वर्गवर्गः ३० ।

भूर्भूमिरचलानन्ता रसा विश्वम्भरा स्थिरा । भूमिवर्गः २ ।

---

[५१] त्रिपाठी कैलाशचन्द्रः, ***अमरकोश का कोशशास्त्रीय तथा भाषाशास्त्रीय अध्ययन***(भूमिका), वाराणसी : चौखम्बा विद्याभवन, सन्२००८, पृ.४० ।

[५२]क्रमेणैकार्थवाचकाः शब्दाः पर्यायाः । *शब्दकल्पद्रुमः* खण्डः ३, भागः १ ।

(ख) आंशिकपर्यायोऽथवा पर्यायाभासः

अस्मिन् वर्गे पर्यायाणां शुद्धरूपाणि न भवन्ति, अन्यशब्दानामपि पर्याया भवन्ति । यथा–

ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः । (१.१.१६)

दामोदरो हृषीकेशः केशवो माधवः स्वभूः । (१.१.१८)

पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः । (१.१.२७) अत्र आत्मभूः =ब्रह्मा, आत्मभूः = कामदेवश्च भवति । एवं स्वयंभूः=ब्रह्मा, स्वयंभूः =विष्णुश्च भवति ।

(ग) अनिश्चितोऽथवास्पष्टपर्यायः

अस्मिन् वर्गे पर्यायाणामेकाधिकप्रयोगो भवति । यथा– कमलम् = पङ्कजम् । कमलम् = जलम् । पङ्कजः = ब्रह्मा । वारिवाहः जलधरः । अनन्ता रसा । नारदाद्याः सुरर्षयः । (१।१।५१) इति ।[५३]

## २.१.१७ शब्दहानिः

यद्यप्यमरसिंहः प्रतिज्ञायां 'सम्पूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम् ।' इति कथयति तथापि संक्षिप्तताप्रतिसंस्कृतयोः कारणादावश्यकशब्दा अपि न सन्ति । अमरसिंहस्य समये बहवः शब्दा अप्रचलिता भवेयुः । यथा वार्तिकैरुक्ते सत्यप्यष्टाध्याय्या महिमाऽस्त्येव । तथैवामरकोशेऽवशिष्टाः शब्दा अप्यध्ययनीया एव । तस्माद् ये शब्दा अवशिष्टाः सन्ति तेषां चर्चा क्रियतेऽत्र ।

### २.१.१७.१ ऋग्वेदसंहितामरकोशश्च

अस्मिन् ग्रन्थे स्थितानां प्रतिशतं पञ्चाशत् शब्दा अमरकोशे नैव सन्ति । यथा– अभिनेता (४.२०.८) अमीवा (१.१२९.३,२.३३.२) अर्वाचीनम् (१.८४.३,३.३०.२) इत्यादयः ।[५४]

### २.१.१७.२ निघण्टुरमरकोशश्च

अस्मिन् ग्रन्थे स्थितानां १९५ शब्दानां मध्ये २० शब्दा एवामरकोशे प्राप्ता भवन्ति । तेषामप्यर्थभेदोऽस्ति । यथा–

| शब्दाः | निघण्टुः | अमरकोशः |
|---|---|---|
| अद्भुतम् | ३.३ महान् | १.७.१७,१९ आश्चर्यम् |

[५३] त्रिपाठी कैलाशचन्द्रः, **अमरकोश का कोशशास्त्रीय तथा भाषाशास्त्रीय अध्ययन** (भूमिका), वाराणसी : चौखम्बा विद्याभवन, सन्२००८, पृ.९१ ।

[५४] पूर्ववत् पृ.१२६ ।

| | | |
|---|---|---|
| आपः | २.१ क्रिया | १.१०.३ जलम् |
| अमा | ३.४ गृहम् | ३.३.२३९ सहेत्यादयः । |

### २.१.१७.३ अष्टाध्यायी तथामरकोशश्च

अमरसिंहस्य व्याकरणकाराणां मध्येऽष्टाध्यायीकर्ता पाणिनिस्तथा महाभाष्यकर्ता पतञ्जलिश्च प्रमाणे स्तः । तथापि गणपाठे स्थिता महत्त्वपूर्णाः शब्दा न प्राप्यन्ते । यथा–अधिपतिः (गण.५.१.१२४) उपदेशः (गण.४.४.१२) नास्तिकः (गण.५.१.१२८) इत्यादयः ।

### २.१.१७.४ पातञ्जलमहाभाष्यं तथामरकोशश्च

पातञ्जलमहाभाष्ये महत्त्वपूर्णा ये शब्दाः सन्ति तेऽमरकोशे न सन्ति । यथा–दुर्लभः ( १.१.४५) तुम्बुरुः (१.१.४७) इत्यादयः ।

### २.१.१८.५ अमरकोशस्तथा धन्वन्तरिनिघण्टुः

अमरसिंहो धन्वन्तरिनिघण्टुग्रन्थात् प्रभावितोऽस्ति । यथा–

**शतावरी शतपदी पीवरीन्दीवरी वरी ।**

**ऋष्यप्रोक्ता द्वीपिशत्रुर्द्वीपिका चोर्ध्वकण्टका ॥** (ध.नि.१.१९१)

**शतमूली बहुसुता भीरुरिन्दीवरी वरी ।**

**ऋष्यप्रोक्ताऽभीरपत्रीनारायण्यः शतावरी ॥** (अमरकोशः २.४.१०१) ।[५५]

### २.१.१८ अमरकोशस्य लोकप्रियता

कोशसाहित्यस्य महिमा वाङ्मयेऽस्त्येव । अध्ययनक्षेत्रे यथा पाणिनेरष्टाध्यायी विद्यते तथैवामरकोशस्यापिसंस्कृतकोशसाहित्ये प्रथमं स्थानमस्ति । संस्कृताध्ययनस्य प्रारम्भेऽस्याध्ययनस्यावस्यकताऽस्ति । यत्र यत्र संस्कृतभाषाया अध्ययनं भवति तत्र तत्रामरकोशस्योपस्थितिर्भवति । अष्टाध्यायी जगन्माताऽमरकोशो जगत्पितेति । तस्मात् संस्कृतशिक्षापरम्परायामेतौ ग्रन्थौ पठ्येते पाठ्येते च सर्वैः । पाणिनिग्रन्थो व्युत्पत्तिशास्त्रे सीमितोऽस्ति परन्त्वमरकोशः सर्वत्रैवाऽस्ति यत्र संस्कृतभाषाऽस्ति । बहुभिष्टीकाकारैरत्र कार्यं कृतम् । अमरकोशस्य लोकप्रियतानेन प्रकारेण ज्ञातुं शक्यते । परवर्तिलेखकैः केवलं पूरकग्रन्था एव लिखिताः । लेखकैः केचन कोशास्तु प्रसिद्धिं प्राप्तुं लिखिताः । प्राचीनकालादेवामरकोशो विविधग्रन्थेषु टीकायामुद्धृतोऽस्ति । अस्य कोशस्य वास्तविकं नाम तु

---

[५५]पूर्ववत् पृ.१३६ ।

नामलिङ्गानुशासनमासीदेव, लिङ्गविधानकारणादस्य नाम सार्थकम् । त्रिविभागात् त्रिकाण्डमित्यप्यस्य नामास्ति तथापि प्रचलितं नाम त्वमरकोश एव । वैदिकनिघण्टोः पश्चादस्य स्थानं महत्त्वपूर्णम् । पूर्वस्थाः कोशाः क्रमहीना आसन् । अमरसिंहेनैष कोशः क्रमबद्धो लिखितः । पूर्वं लिङ्गानुसारेण पुंस्काण्डम्, स्त्रीकाण्डम्, नपुंसककाण्डमित्यादिषु विभक्ताः कोशा आसन् । लिङ्गानुसारेण लिखितोऽमरकोशो वैज्ञानिकोऽस्ति । एष विधिरग्रे प्रचलितोऽभूत् । तस्मादग्रे हलायुधभट्टस्याभिधानरत्नमाला, पुरुषोत्तमदेवस्य त्रिकाण्डशेषः, शाश्वतस्यानेकार्थसमुच्चयः, यादवप्रकाशस्य वैजयन्ती तथैव हेमचन्द्रस्याभिधानचिन्तामणिरित्यादयः कोशा अभूवन् । एषु कोशेष्वमरसिंहस्य प्रभावोऽस्ति । हलायुधेनाभिधानरत्नमालायाममरकोशस्य तथैव वररुचिभागुरिवोपालितकोशानां प्रभावो वर्णितः ।[५६] कुलचन्द्रगौतमेनापि 'अमरकोशपरिशेषः' कोषो लिखितः ।

अमरकोशस्तिब्बते लोकप्रियोऽभूत् । कीर्तिचन्द्रेण तिब्बतीभाषायामनुवादः कृतः । सुभूतिचन्द्रस्य टीकाया अप्यनुवादः कृतः । कामधेनुटीका व्याकरणकर्त्राधर्मपालभद्रेण लिखिता ।[५७] अमरकोशे नामज्ञानाद्, रूपज्ञानाद्, लिङ्गभेदैः सहार्थज्ञानाद् तथैवैकवचनद्विवचनबहुवचनज्ञानात् , लिङ्गज्ञानेऽप्येकद्वित्रिलिङ्गज्ञानादमरकोशो विशिष्टोऽस्ति । अमरकोशे वैज्ञानिकव्याकरणतत्त्वं प्राप्यते ।

अमरकोशस्य तृतीये सामान्यकाण्डे नानार्थवर्गेऽनेकार्थशब्दानामन्त्यवर्णानुसारेण शब्दाः स्थापिताः सन्ति । एषो विधिरप्यध्येतृवर्गाणां सुकरोऽभूत् । तथैव कालान्तरेऽप्यस्यानुकरणमभूत् । मङ्खेनानेकार्थकोशे शब्दनियमोऽमरकोशस्याधारे कृतोऽस्ति ।[५८]

यद्यप्यमरकोशः पर्यायवाचिकोशोऽस्ति तथापि तृतीयकाण्डे नानार्थवर्गेऽनेकार्थिकोश-शैल्याश्चेष्टा प्रस्तुता । लिङ्गादिसंग्रहेण लिङ्गमपि स्पष्टीकृतम् । अत्र पौर्वापर्यस्य दृष्ट्यापि पुराणे प्रसिद्धः क्रमः प्रतीतो भवति । यथा क्रमशोब्रह्मविष्णुमहेश्वराणां नामान्युल्लिखितानि

---

[५६] इयममरदत्तवररुचिभागुरिवोपालितादिशास्त्रेभ्यः ।
अभिधानरत्नमाला कविकण्ठविभूषणार्थमुद्ध्रियते ॥ *हलायुधकोशः*, भूमिकाण्डम्, छन्दः ८ ।

[५७] त्रिपाठी कैलाशचन्द्रः, ***अमरकोश का कोशशास्त्रीय तथा भाषाशास्त्रीय अध्ययन***(भूमिका), वाराणसी : चौखम्बा विद्याभवन, सन्२००८, पृ.४१ ।

[५८] भागुरिकात्यहलायुधदुर्गामरसिंहशाश्वदादिकृतान् ।
कोशान्निरीक्ष्य ।निपुणं धन्वन्तरिनिर्मितं निघण्टुं च ॥ अनेकार्थकोशः, छन्दः २ ।

सन्ति। अमरकोशस्य सर्वाङ्गपूर्णत्वात् संस्कृतजगति सर्वत्रैव प्रचारोऽभूत्। पूर्वममरकोशमवलोक्य यत्र मौनं भवेत् तत्रान्ये कोशा दृश्यन्ते। अन्यकोशानामावश्यकताऽस्त्येव तथाप्यमरकोशस्य दोषो नास्ति। एतादृश्यां व्यापकसंस्कृतभाषायां सर्वे शब्दा अमरकोशान्तः स्थापयितुं दुष्करमेव भवति। केचन शब्दास्त्ववशिष्टा भवन्त्येव। एतस्मादेव कारणादमरकोशस्य लोकप्रियताऽस्ति।[५९]

### २.१.१९.अमरकोशे लिङ्गनिर्देशनम्

अमरकोशस्य नामामरसिंहेन नामलिङ्गानुशासनं कल्पितमासीत्। पश्चादेव तस्य नाम्नि कोशस्य नाम प्रख्यातम्। अमरसिंहेन लिङ्गज्ञानार्थं नियमा दत्ताः सन्ति। यथा –

### २.१.१९.(क) प्रायशो रूपभेदेन

प्रथमाया एकवचनस्य रूपं दृष्ट्वा लिङ्गज्ञानं भवति। उदाहरणं यथा 'पद्मालया पद्मा' इत्यत्र पद्माशब्द आकारान्तत्वात् स्त्रीलिङ्गेऽस्ति तथैव 'पिनाकोऽजगवं धनुः'इत्यत्र पिनाकशब्दःपुंलिङ्गः, अजगवधनुषी शब्दौ नपुंसकलिङ्गे स्तः।

### २.१.१९.(ख) साहचर्याच्च कुत्रचित्

कस्मिंश्चित् स्थाने साहचर्यादपि लिङ्गज्ञानं भवति। यथा 'अश्वयुगश्विनी' इत्यत्राश्विनीशब्दसाहचर्यादश्वयुक्शब्दोऽपि स्त्रीलिङ्गोऽस्ति। एवं ' वियद्विष्णुपदम् ' इत्यत्र विष्णुपदशब्दसाहचर्याद्वियत्शब्दोऽपि नपुंसकलिङ्गो वर्तते।

### २.१.१९.(ग) तद्विशेषविधेः क्वचित्

कस्मिश्चित् स्थाने **पुंलिङ्गम्, स्त्रीलिङ्गम्, नपुंसकलिङ्गम्, तथा पुमान्, स्त्री, क्लीबमित्यादिपदैर्लिङ्गज्ञानं भवति।** यथा 'भेरी स्त्री दुन्दुभिः पुमान्' इत्यत्र क्रमशो भेरीशब्दः स्त्रीलिङ्गी, दुन्दुभिशब्दः पुंलिङ्गो वर्तते। तथैव कुत्रचित् सर्वनामविशेषणशब्दाभ्यां लिङ्गज्ञानं भवति। यथा 'शुचिस्त्वयम्' इत्यत्र पुंलिङ्गो, 'संहुतिर्बहुभिः कृता' इत्यत्र स्त्रीलिङ्गो वर्तते।

**२.१.१९.**(घ) पर्यायशब्दानां लिङ्गभेदस्य स्पष्टार्थकोशे द्वन्द्वः, एकशेषः, संकरश्च नैव कृतः। यथा 'स्तवः स्तोत्रं स्तुतिर्नुतिः' इत्यत्र क्रमशः पुंलिङ्गः शब्दः, नपुंसकलिङ्गः शब्दः, स्त्रीलिङ्गौ शब्दौ च प्रयुक्ताः सन्ति। 'स्तुतिः स्तोत्रं स्तवो नुतिः।' एतादृशो लिङ्गव्यति क्रमजन्यसंकरोऽपि नैव कृतः।

---

[५९] त्रिपाठी कैलाशचन्द्रः, ***अमरकोश का कोशशास्त्रीय तथा भाषाशास्त्रीय अध्ययन***(भूमिका), वाराणसी : चौखम्बा विद्याभवन, सन्२००८, पृ.२२८।

**२.१.१९.**(ङ) त्रिलिङ्गपदसूचनार्थं 'त्रिषु' शब्दः, पुंलिङ्गस्त्रीलिङ्गसूचनार्थं 'द्वयोः' शब्दश्च प्रयुक्तौ स्तः । अनेनैव प्रकारेण पुंलिङ्गनपुंसकलिङ्गसूचनार्थं 'पुंनपुंसकम्' शब्दस्तथैव स्त्रीलिङ्गनपुंसकलिङ्ग-सूचनार्थं 'स्त्रीनपुंसकम्' शब्दश्च प्रयुक्तौ स्तः ।

**२.१.१९.**(च) निषेधावस्थायां निषिद्धलिङ्गादिभन्नं शेषलिङ्गं तस्य शब्दस्य भवति । यथा 'सम्वत्सरो वत्सरोऽब्दो हायनोऽस्त्री' इत्यत्र स्त्रीलिङ्गनिषेधात् संवत्सरादिशब्दाः पुंलिङ्गास्तथा हायनशब्दो नपुंसकलिङ्गोऽपि भवति ।

**२.१.१९.**(छ) 'तु' अन्तस्तथा 'अथ' आदिपदस्य स्वस्मात् पूर्वपदेन सह सम्बन्धो न भवति । यथा 'अन्तर्धा व्यवधा पुंसि त्वन्तर्धिरपवारणम् ।' इत्यत्र 'पुंसि' पदं केवलं 'अन्तर्धिः' पदस्यैव पुंलिङ्गव्यवस्थां करोति न पूर्वेषां शब्दानाम् ।

शङ्कारहितस्थाने तु प्रतिज्ञाहानिर्न भवति । यथा 'स्वर्गनाकत्रिदिवत्रिदशालयाः' इत्यत्र सर्वे पुंलिङ्गाः शब्दाः सन्ति तस्मात् ।

अमरसिंहस्यानुकरणं कुर्वन् कुलचन्द्रः पाठकहिताय स्वयंबोधिनीटीकायां लिङ्गनिर्देशनार्थं प्रत्येकशब्दानामग्रेऽङ्कान् ददाति । यथा–

(क) मूलशब्दस्याग्रे '१' इत्यङ्को भवेत्तर्हि स शब्दः पुंलिङ्गो भवति ।
(ख) ,, '२' इत्यङ्को भवेत्तर्हि स शब्दः स्त्रीलिङ्गो भवति ।
(ग) ,, '३' इत्यङ्को भवेत्तर्हि स शब्दः नपुंसकलिङ्गो भवति ।
(घ) ,, '४' इत्यङ्को भवेत्तर्हि स शब्दः पुंलिङ्गःस्त्रीलिङ्गश्च भवति ।
(ङ) ,, '५' इत्यङ्को भवेत्तर्हि स शब्दः पुंलिङ्गःक्लीबलिङ्गश्च भवति ।
(च) ,, '६' इत्यङ्को भवेत्तर्हि स शब्दः स्त्रीलिङ्गः क्लीबलिङ्गश्च भवति ।
(छ) ,, '७' इत्यङ्को भवेत्तर्हि स शब्दः त्रिलिङ्गो (पुं.स्त्री.नपुं.) भवति ।
(ज) ,, '८' इत्यङ्को भवेत्तर्हि स शब्दोऽव्ययं भवति ।

## २.१.२०. स्वयंबोधिनीटीकायां ध्येयो विषयः

स्वयंबोधिनीटीकायां पाठकानां ध्येया विषया अर्थात् चिह्नानि सन्ति । यथा–

(क) ' ' " " अस्य चिह्नस्य मध्ये क्षेपकास्तथाऽवान्तरवाक्यानि भवन्ति ।
(ख) =अस्य चिह्नस्याग्रे समानार्थकाः शब्दाः (पर्यायशब्दाः) भवन्ति ।
(ग) ( ) अस्य चिह्नस्य मध्ये पाठभेदाः स्पष्टीकरणानि च भवन्ति ।
(घ) ॱ अस्य चिह्नस्य मध्ये नामानि भवन्ति ।

## २.१.२१.भाषाविज्ञाने लिङ्गविज्ञानम्

सर्वनामशब्दे भारतयूरोपीयभाषासु प्राचीनकालादेव लिङ्गं विद्यमानमासीत् । यथा–

भारतयूरोपीयभाषायाम् – सो सा तोद्

संस्कृतभाषायाम् – सः सा तद्

ग्रीकभाषायाम् – हो हे तो[६०]

अकारान्तशब्दात् पुंलिङ्गस्य, आकारान्तशब्दात् स्त्रीलिङ्गस्य विकासोऽभूत् । पुंलिङ्गनपुंसकलिङ्गयोर्मध्ये तु प्रथमविभक्ता एकवचनद्विवचनबहुवचनानां तथा द्वितीयविभक्तौ द्विवचनबहुवचनयोः रूपाणि पृथक् दृश्यन्ते । पुंलिङ्गनपुंसकलिङ्गयोर्मध्ये भ्रमो जायते प्रायेण । तस्मात् भाषायां व्यत्ययोऽभूत् पुंलिङ्गनपुंसकलिङ्गयोर्मध्ये । भाष्यकारः पतञ्जलिस्तु कथयति– 'लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य' । अमरसिंहोऽपि पाणिनीयलिङ्गानुशासनमनुकरोति ।

## २.१.२२. कोशे शब्दशक्तिः

जगति शब्दज्ञानं विना कोऽपि प्रत्ययो न भवति । तदुक्तं भर्तृहरिणा –

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।

अनुविद्धमिव ज्ञानं सर्वं शब्देन भाषते [६१]॥

व्याकरणाचार्याणां मतमस्ति यद् जगति यानि ज्ञानानि सन्ति तेषु शब्दस्य प्रतीतिर्भवत्येव । अत्र निर्विकल्पं ज्ञानं न ग्राह्यम् । अस्मिन् शब्दज्ञानाभाने सति तस्य निर्विकल्पत्वस्य भङ्गो भवति । शब्देऽर्थे च तादात्म्यमस्ति । अत्र भेदो वास्तविकोऽस्त्यभेदोऽवास्तविकः । तादात्म्यं भेदाभेदघटितं भवति । तस्मादग्न्याद्युच्चारणे मुखं न ज्वलति । शब्दस्य द्वे शक्ती भवतः । यथा –

ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा ।

तथैव सर्वशब्दानामेते पृथगवस्थिते ॥

विषयत्वमनादृत्य शब्दैर्नार्थः प्रकाश्यते [६२] ।

## २.१.२३. शब्दार्थयोः सम्बन्धः

---

[६०] त्रिपाठी कैलाशचन्द्रः, ***अमरकोश का कोशशास्त्रीय तथा भाषाशास्त्रीय अध्ययन***(भूमिका), वाराणसी : चौखम्वा विद्याभवन, सन्२००८, पृ.२१६ ।

[६१]भर्तृहरिः, (सम्पा.सत्यनारायण शास्त्री) ***वाक्यपदीयम्*** (१।१२३),वाराणसी : कृष्णदास अकादमी, वि.सं.२०४०,पृ.२३६ ।

[६२] कौण्डभट्टः, (सम्पा.चन्द्रिकाप्रसाद द्विवेदी), ***वैयाकरणभूषणसारः*** (श्लो.३७), वाराणसी : चौखम्वा संस्कृत प्रतिष्ठान, वि.सं.१९९९, पृ.२६६ ।

पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः, वाच्यवाचकभावापरपर्याया। तद्ग्राहकञ्चेतरेतराध्यासमूलकं तादात्म्यम्। तदेव सम्बन्धोऽन्यस्मिन्नन्यधर्मावभासोऽध्यासः। एतन्मूलकमेव तादात्म्यम्। यथेदं रजतमित्यादा इदं पदार्थरजतपदार्थयोस्तादात्म्यं तथैव पदपदार्थयोरपि 'अयं घटः' इति तादात्म्यमध्यासमूलकमेव न तु वास्तविकम्। अन्यच्च –

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।

अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा ॥[६३]

स्वार्थो द्रव्यं च लिङ्गञ्च संख्या कर्मादिरेव च।

अमी पञ्चैव नामार्थास्त्रयः केषाञ्चिदग्रिमाः ॥[६४]

वाक्यपदीयकारेण शब्दनिष्ठशक्त्यास्तुलना दीपादिनिष्ठशक्तया सह कृता। यथा दीपके प्रकाशकत्वं प्रकाश्यत्वञ्चेति द्वे शक्ती स्तः। यदा दीपेन सह घटादिपदार्थानां सम्बन्धो भवति तदा प्रकाशकत्वं प्रकाश्यत्वञ्च शक्तिर्द्वे कार्ये करोति। दीपः स्वं प्रकाशयति घटादिपदार्थाश्ँच। यदा घटादिपदार्था न भवन्ति तदा शक्तिः केवलं स्वमेव प्रकाशयति। एतादृश्येव स्थितिः शब्दशक्तिविषयेऽपि वर्तते।

शब्दस्यार्थो शब्दोऽपि भवति। तस्माद् 'विष्णुमुच्चारय' इत्यादौ भगवत उच्चारणं न भवति। तस्माद् विष्णुशब्दस्य प्रतीतिर्भवति। अनुकरणेनानुकार्यस्य प्रतीतिर्भवति। अर्थाद्यस्य शब्दस्यानुकरणं क्रियते तस्यैव ज्ञानं भवति। पश्चादनुभवे सति विष्णुतत्त्वस्यानुकार्यस्य ज्ञानं भवति।

### २.१.२४. शब्दशक्तिज्ञाने व्याकरणकोशादीनामावश्यकता

शब्दशक्तिज्ञाने व्याकरणकोशादीनामावश्यकता भवति। यथोक्तञ्च –

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च।

वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥[६५]

वृद्धा व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतो वाक्यस्य शेषाद्विवृतेः सिद्धपदस्य सान्निध्यतश्च शक्तिग्रहं वदन्ति।

---

[६३]पूर्ववत् पृ.२६६।

[६४]भट्टः नागेशः, (सम्पा.जयशङ्करलाल त्रिपाठी) ***परमलघुमञ्जूषा,*** वाराणसी : कृष्णदास अकादमी, सन् १९८५, पृ.२८६।

[६५]पूर्ववत् पृ.२८०।

### २.१.२४.१ व्याकरणात्

'पाचकः' इत्यत्र 'डुपचष् पाके' ( भ्वा.उ.अ.१०६५ ) इति धातोः 'कर्तरि कृत्' ( पा.३।४।६७) इति सूत्रस्याधिकारे 'ण्वुल्तृचौ' (पा.३।१।१३३ ) इति सूत्रेण ण्वुल्प्रत्ययेऽनुबन्धलोपे 'युवोरनाकौ' (पा.७।१।१) इत्यकादेशे स्वादिकार्ये 'पाचकः' इति रूपं सिद्धम् । अत्र ण्वुल्प्रत्ययः कर्तरि वर्तते । पच्धातोरर्थः पाकक्रिया, ण्वुल्प्रत्ययस्यार्थः कर्ता भवति । उभौ मिलित्वा पाककर्ता,पाकानुकूलव्यापारवान् वा सम्पद्यतेऽर्थः ।

### २.१.२४.२ उपमानात्

यो व्यक्तिर्गवयं न जानाति, तमवबोधयितुं कोऽपि वदति 'गौरिव गवयः' अनेन प्रकारेणोपमानवाचकगोशब्दादुपमेयवाचकगवयशब्दस्य शक्तिग्रहो जायते ।

### २.१.२४.३ कोशात्

अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः । इत्यादितोऽमरादिशब्दानां देवतार्थे शक्तिग्रहो जायते ।

### २.१.२४.४ आप्तवाक्यात्

पाणिनिः 'वृद्धिरादैच्' (१।१।१ ) इति सूत्रे 'आदैच्' इत्यर्थे वृद्धिपदस्य प्रयोगं करोति ।

तस्मात् 'वृद्धिः' इत्याप्तवाक्यम् । आ, ऐ, औ, इत्येषां बोधकमेवमन्यत्रापि ।

### २.१.२४.५ व्यवहारतः

प्रयोज्यप्रयोजकवृद्धव्यवहारात् 'गामानय' 'अश्वं नय' इत्यादिवाक्यानां ( आवापोद्वापाभ्याम्) तद्घटकपदानाञ्च शक्तिग्रहो जायते । अयञ्च शक्तिग्राहकेषु शिरोमणिर्मन्यते ।

### २.१.२४.६ वाक्यस्यशेषात्

यवैर्जुहोतीत्यत्र यवपदस्य दीर्घशूकविशिष्टेऽर्थ आर्याणां प्रयोगात् प्रियङ्गौ म्लेच्छानां प्रयोगात् क्व शक्तिरिति सन्देहे सति यदाग्न्या ओषधयो म्लायन्त अथैते मोदमानास्तिष्ठन्तीति वाक्यशेषेण दीर्घशूकविशिष्टे शक्तिस्तन्निर्णयो भवति ।

### २.१.२४.७ विवृतेः

पचति = पाकं करोतीत्यादिविवरणेनाप्यर्थबोधो भवति । एवञ्च पाकानुकूलो व्यापार इति शाब्दबोधः ।

### २.१.२४.८ सिद्धपदस्य सान्निध्यतः

इह सहकारतरौ मधुरं पिको रौतीत्यादौ सहकारपदसन्निधानात् पिकपदस्य कोकिलार्थे शक्तिग्रहो जायते न तु शुकार्थे ।

### २.१.२५ नानार्थशब्देषु शक्तिः

सैषा शक्तिर्नानार्थेषु शब्देषु संयोगादिना नियम्यते । यथा –

संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥[६६]

एते संयोगादयो नानार्थेषु शब्देषु शब्दार्थस्य सन्देहे तदपाकरणद्वारा विशेषार्थनिर्णायका भवन्ति ।

यथा –

#### २.१.२५.१ संयोगः

सवत्सा धेनुः । धेनुशब्दस्य नवप्रसूतामात्रवाचकत्वेनेदमुक्तम् । यथाऽयं धेनुशब्दो नवप्रसूतगोमात्रवाचक उच्यते तदा । 'सशङ्खचक्रो हरिः' इत्युदाहरणान्तरं बोध्यम् ।

#### २.१.२५.२ विप्रयोगः

'अवत्सा धेनुः' । अवत्साधेनुरित्यत्रनिषेधस्य प्राप्तिपूर्वकत्वात् प्राप्तेश्च गव्येव सम्भवात् 'अवत्सा' इत्यनेनापि गौरेवोच्यते ।

#### २.१.२५.३ साहचर्यम् ( सादृश्यम् )

रामलक्ष्मणौ । साहचर्यशब्दस्य सादृश्यार्थकमुच्यते । अत्र दशरथस्यापत्यत्वरूपं सादृश्यम् ।

#### २.१.२५.४ विरोधिता

'रामार्जुनगतिस्तयोः' इत्यत्र परस्परं विरोधेनोभयोर्नियमनम् । तेन परशुरामकार्तवीर्ययोर्बोधः ।

#### २.१.२५.५ अर्थः ( प्रयोजनम् )

'अञ्जलिना जुहोति' 'अञ्जलिना सूर्यमुपतिष्ठते' इत्यत्र जुहोतीत्यादिपदार्थवशादञ्जलिपदस्य तत्तदाकाराञ्जलिपरकत्वत् ।

---

[६६] भट्टः नागेशः, (सम्पा.जयशङ्करलाल त्रिपाठी) ***परमलघुमञ्जूषा,*** वाराणसी : कृष्णदास अकादमी, सन् १९८५, पृ.४० ।

**२.१.२५.६ प्रकरणम् ( तात्पर्यनियमनम् )**

'सैन्धवमानय' इति वाक्ये भोजनप्रकरणे प्रयुक्ते सति लवणम्, यात्राप्रकरणे चाश्वं बोधयति ।

**२.१.२५.७ लिङ्गम्**

'अक्ताः शर्करा उपदधाति' इत्यादौ 'तेजो वै घृतम्' इति घृतस्तुतिरूपाल्लिङ्गादक्ता इत्यस्य घृतसाधनकाञ्जनपरकत्वम् । अस्य प्रसिद्धमुदाहरणम् 'कुपितो मकरध्वजः' इत्यत्र समुद्रव्यावृत्तात् कोपात् कामदेवार्थे नियमनमिति बोध्यम् ।

**२.१.२५.८ अन्यस्य शब्दस्य सन्निधिः**

'रामो जामदग्न्यः' इति जामदग्न्यपदसन्निधानाद्रामः = परशुरामः ।

**२.१.२५.९ सामर्थ्यम्**

'अभिरूपाय कन्या देया' इत्यादौ अभिरूपतरायेति सामर्थ्यात् प्रतीयते ।

**२.१.२५.१० औचिती ( योग्यता )**

यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा ।

यश्चैनं गन्धमाल्याद्यैः सर्वस्य कटुरेव सः ॥[६७]

इत्यौचित्यात् परशुनेत्यस्य छेदनार्थत्वम् । मधुसर्पिषेत्यस्य सेचनार्थत्वम् । गन्धमाल्याद्यैरित्यस्य पूजनार्थत्वम् ।

**२.१.२५.११ देशः ( ग्रामादिस्थानम् )**

'भात्यत्र परमेश्वरः' इत्यत्र राजधानीरूपदेशात्परमेश्वरपदं राजबोधकम् । परब्रह्मणो नहि बोधो भवति ।

**२.१.२५.१२ कालः ( समयः )**

'चित्रभानुर्भाति' इत्यादौ यदा रात्रौ प्रयुज्यते तदाऽग्निरूपोऽर्थः, यदा दिने प्रयुज्यते तदा सूर्यरूपोऽर्थः प्रतीयते ।

**२.१.२५.१३ व्यक्तिः ( पुंलिङ्गत्वादिः )**

'मित्रो भाति मित्रं भाति' इत्यादौ पुंलिङ्गत्वे सूर्यरूपोऽर्थः, नपुंसकत्वे सुहृद्रुपोऽर्थोऽवगम्यते ।

**२.१.२५.१४ स्वरादयः ( उदात्तादिस्वराः )**

---

[६७] भट्टः नागेशः, (सम्पा.जयशङ्करलाल त्रिपाठी) ***परमलघुमञ्जूषा*** वाराणसी : कृष्णदास अकादमी, सन् १९८५, पृ.४२ ।

'स्थूलपृषती' इत्यादौ स्वरात्तत्पुरुषबहुव्रीह्यर्थनिर्णयः । स्थूला चासौ पृषती च इति तत्पुरुषः, अथवा स्थूलानि पृषन्ति यस्याः सेति बहुव्रीहिः, इति सन्देहेऽत्र निर्णयार्थः स्वरो द्रष्टव्यः । यदि पूर्वपदस्य स्थूलशब्दस्य प्रकृतिस्वरस्तदा बहुव्रीहिः । 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' (पा.६।२।१ ) इति नियमात् । यदि चान्तोदात्तस्तदा तत्पुरुषः । 'समासस्य' ( पा.६।१।२२३ ) इति नियमात् । अत्र पूर्वपदस्य प्रकृतिस्वरोऽन्तोदात्तः स्थूलशब्दस्तेन बहुव्रीह्यर्थनिर्णयः ।

### २.१.२६ शक्तेर्भेदाः

#### २.१.२६.१ रूढः

अवयवार्थमुपेक्ष्य समुदायशक्तिमात्रेणार्थबोधकत्वं रूढत्वम् । यथा – रथन्तरमित्यादौ, जहत्स्वार्थवत् ।

#### २.१.२६.२ योगरूढः

अवयवार्थसंवलितसमुदायशक्त्यर्थबोधकत्वं योगरूढत्वम् । यथा – पङ्कजम् ।

#### २.१.२६.३ यौगिकः–

अवयवशक्त्यैवार्थबोधकत्वं यौगिकत्वम् । यथा – पाचिका, पाठिकेत्यादौ ।

#### २.१.२६.४ यौगिकरूढः

अवयवशक्त्या समुदायशक्त्या चार्थबोधकत्वं यौगिकरूढत्वम् । यथा – मण्डपानकर्तृपरोऽपि , गृहविशेषपरोऽपि 'मण्डप' शब्दः ।[६८]

### २.१.२७.शब्दे समासादिवृत्तयः

कोशे समस्तवाङ्मये वा बहवः शब्दा भवन्ति । तेषां कृत्तद्धितसमासैकशेष-सनाद्यन्तधातुरूपाः पञ्च वृत्तयो भवन्ति ।परार्थाभिधानं वृत्तिः । वृत्त्यर्थावबोधकं वाक्यं विग्रहः कथ्यते । यथा –

#### २.१.२७.१ कृद्वृत्तिः

कारकः – करोतीति विग्रहे 'डु कृञ् करणे' ( त.उ.अ. ) इति धातोः 'ण्वुल्तृचौ' ( पा.३।१।१३३ ) इति ण्वुल्प्रत्ययेऽनुबन्धलोपे 'युवोरनाकौ' ( पा.७।१।१ ) इत्यकादेशे स्वादिकार्ये 'कारकः' इति रूपं सिद्धम् ।

#### २.१.२५.२ तद्धितवृत्तिः

---

[६८] भट्टः नागेशः, (सम्पा.जयशङ्करलाल त्रिपाठी) ***परमलघुमञ्जूषा,*** वाराणसी : कृष्णदास अकादमी, सन् १९८५, पृ.३७ ।

गार्ग्यः – गर्गस्य गोत्रापत्यं पुमानिति विग्रहे 'गर्गादिभ्यो यञ्' ( पा.४।१।१०५ ) इति यञ्प्रत्ययेऽनुबन्धलोपे 'तद्धितेष्वचामादेः' ( पा.७।२।११७ ) इत्यादिवृद्धौ स्वादिकार्ये 'गार्ग्यः' इति रूपं सिद्धम् ।

### २.१.२७.३ समासवृत्तिः

समासे वृत्तिर्द्विधा, जहत्स्वार्थाऽजहत्स्वार्था च ।

–जहत्स्वार्था

अवयवार्थनिरपेक्षत्वे सति समुदायार्थबोधिकात्वं जहत्स्वार्थात्वम् । यथोदाहरणम् – रथन्तरम् = सामभेदः । शुश्रूषा = सेवा ।

–अजहत्स्वार्था –

अवयवार्थसंवलितसमुदायार्थबोधिकात्वमजहत्स्वार्थात्वम् । उदाहरणं यथा – राज्ञः पुरुष इति विग्रहे 'षष्ठी' ( पा.२।२।८ ) इति समासे 'सुपो धातुप्रातिपदिकयोः' ( पा.२।४।७१ ) इति सुपो लुकि 'नलोपः प्रातिपदिकान्तस्य' ( पा.८।२।७ ) इति नलोपे स्वादिकार्ये 'राजपुरुषः' इति रूपं सिद्धम् ।

पङ्कजपदे योगार्थस्वीकारे शैवालादेरपि प्रत्ययः स्यात् । व्यपेक्षापक्षे दूषणं शक्तिसाधकं यथा –

समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत् ।
बहूनां वृत्तिधर्माणां वचनैरेव साधने ॥
स्यान्महद्गौरवं तस्मादेकार्थीभाव आश्रितः ।[६९]

### २.१.२७.४ एकशेषवृत्तिः

हंसौ – हंसी च हंसश्चेति विग्रहे 'पुमान् स्त्रिया' ( पा.१।२।६७ ) इति पुंस्त्वस्त्रीत्वकृतवैरूप्यात् हंसशब्दस्यैकशेषसमासे , प्रथमाद्विवचने 'हंसौ' इति सिद्धम् ।

### २.१.२७.५ सन्नन्तवृत्तिः

पिपठिषति – पठितुमिच्छतीति विग्रहे 'पठ व्यक्तायां वाचि' ( भ्वा.प.से. ) इति धातोः 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' ( पा.३।१।७ ) इति सन्प्रत्ययेऽनुबन्धलोपे 'पठ् स' इति जाते 'आर्धधातुकस्येड् वलादेः' ( पा.७।२।३५ ) इतीडागमे 'पठ् इ स' इति जाते 'सन्यङोः' ( ६।१।९ ) इति द्वित्वेऽभ्याससंज्ञायां हलादिशेषे 'प पठ् इ स' इति जाते 'सन्यतः' (

---

[६९] कौण्डभट्टः, (सम्पा.चन्द्रिकाप्रसाद द्विवेदी), ***वैयाकरणभूषणसारः*** (श्लो.३१-३२), वाराणसी : चौखम्वा संस्कृत प्रतिष्ठान, वि.सं.१९९९, पृ.२३४ ।

पा.७।४।७९) इत्यभ्यासस्येत्वे 'पि पठ् इ स' इति जाते वर्णमेलने षत्वे 'पिपठिस' इति जाते 'सनाद्यन्ता धातवः' (पा. ३।१।३२) इति धातुसंज्ञायां लटि तिपि शपि पररूपे 'पिपठिषति' इति सिद्धम् ।[७०] सनादयो द्वादश सन्ति –

सन्क्यच्काम्यच्क्यङ्क्यषोऽथाचारक्विब्णिज्यङौ तथा ।

यगाय ईयङ् णिङ् चेति द्वादशामी सनादयः ॥

## २.१.२८.शाब्दबोधे सहकारिकारणानि

शाब्दबोधे सहकारिकारणानामपि महत्त्वपूर्णं स्थानमस्ति । तानि सन्ति – आकांक्षा-योग्यता-आसत्ति-तात्पर्याणि चत्वारि ।

### २.१.२८.१आकाङ्क्षा

वाक्यसङ्केतग्राहिकाकाङ्क्षा । उत्थापकताविषयतान्यतरसम्बन्धेनोभयसम्बन्धेन वाऽर्थान्तरजिज्ञासाकाङ्क्षा । आद्यम् 'पश्य मृगो धावति' इत्यत्र दर्शनार्थस्य कारकधावनाकाङ्क्षोत्थापकत्वं धावनं तु तद्विषयतैव । अन्त्यस्तु 'पचति तण्डुलं देवदत्तः' इत्यादौ क्रियाकारकयोर्द्वयोरपि परस्परं तदुत्थापकत्वात्तद्विषयत्वाच्च ।[७१]

### २.१.२८.२ योग्यता

परस्परान्वयप्रयोजकधर्मवत्त्वं योग्यता । तेन 'पयसा सिञ्चति' इति वाक्यं योग्यम् । अस्ति च सेकान्वयप्रयोजकद्रवद्रव्यत्वं योग्यता जले, कारणत्वेन जलान्वयप्रयोजकार्द्रकरणत्वं योग्यता सेकक्रियायाम् ।[७२]

### २.१.२८.३ आसत्तिः

प्रकृतान्वयबोधानुकूलपदाव्यवधानमासत्तिः । 'गिरिरग्निमान्' इत्यासन्नम् । 'गिरिर्भुक्तमग्निमान्देवदत्तेन' इत्यनासन्नम् ।

### २.१.२८.४ तात्पर्यम्

नानार्थस्थले लोके तात्पर्यस्यावश्यकता भवति ।एतत्पदं वाक्यं वा एतदर्थप्रत्ययाय मयोच्चारितमिति प्रयोक्तुरिच्छारूपम् । तात्पर्यनियामकञ्च लोके प्रकरणादिकमेव । अतो

---

[७०] दीक्षितः,भट्टोजि, ***वैयाकरणसिद्धान्तकौमुदी,*** (जेबी गुटका, सम्पा.गोपालशास्त्री नेने) वाराणसी : चौखम्वा अमरभारती प्रकाशन, पंचम संस्करण वि.सं.२०३४, पृ.१७८ ।

[७१] भट्टः नागेशः, (सम्पा.जयशङ्करलाल त्रिपाठी) ***परमलघुमञ्जूषा*** वाराणसी : कृष्णदास अकादमी, सन् १९८५, पृ.८३ ।

[७२]पूर्ववत् पृ.८४ ।

भोजनप्रकरणे 'सैन्धवमानय' इत्युक्ते सैन्धवपदेन लवणप्रत्ययः। युद्धावसरेऽश्वप्रत्ययः। वेदवाक्ये चेश्वरतात्पर्यार्थबोधः।

एकस्यापि शब्दस्य तदर्थज्ञाने लेशमात्रमपि शङ्कावसरस्तेषां कदाचिदपि कुत्रापि न सम्भवति। एतत्मूलक एव। 'सति तात्पर्ये, सर्वे सर्वार्थवाचकाः' इति वैयाकरणानां सिद्धान्तः साम्प्रतमपि जरीजागर्ति।

## २.१.२९.अमरकोशस्य टीकाः

अमरकोशस्य टीकाश्चत्वारिंशत् सन्ति। काश्चन प्रकाशिताः काश्चन हस्तलिखिताः सन्ति। कासाञ्चित् टीकानां तूल्लेखमात्रं प्राप्यते। एकादशशताब्द्या उत्तरार्द्धादारभ्याष्टादश-शताब्दीपर्यन्तं प्राप्ताः काश्चन सप्तदशानां महत्त्वपूर्णटीकानामत्र परिचयो दीयते।[७३]

## २.१.२९.१ कामधेनुः

सुभूतिचन्द्रविरचिता 'कामधेनुः' टीका सम्भवतोऽमरकोशस्य सर्वप्रथमा ज्ञाता टीकाऽस्ति। सुभूतिचन्द्रो बौद्ध आसीत्तस्मादस्य टीका तिब्बतीभाषायाःशैक्षिकसंस्थानेषु सुरक्षितास्ति। एषा टीका राहुल सांकृत्यायनस्य तथा डा.टी.आर.चिन्तामणेश्च प्रयत्नेन ज्ञाताऽभूत्। सुभूतिचन्द्रस्य कालो द्वादशशताब्द्याः पूर्वार्द्धं भवितुं शक्नोति।[७४]

## २.१.२९.२ अमरकोशोद्घाटनम्

क्षीरस्वामिविरचिता 'अमरकोशोद्घाटनम्' नामाख्या टीका प्राचीनटीकासु सर्वाधिकप्रचलिता टीकाऽस्ति। क्षीरस्वामी काश्मीरवासी व्याकरणकार आसीत्। अनेन राज्ञे जयपीडाय शिक्षा दत्ता। क्षीरस्वामिनष्टीका संक्षिप्ता तथा सरलाऽस्ति। मूलपाठे दत्तानां शब्दानां प्रायो व्युत्पत्तिर्दत्ताऽस्ति। टीकायां शताऽधिकग्रन्थानां तथा ग्रन्थकाराणामुद्धरणानि सन्ति। अस्य क्षीरस्वामिनः कालो विक्रमात् ९२० इत्यस्मात् पूर्वं भवितुं शक्नोति।[७५]

## २.१.२९.३ टीकासर्वस्वम्

अमरकोशस्यैषा 'टीकासर्वस्वम्' नामाख्या टीका बङ्गदेशीयेन सर्वानन्देन लिखिता। टीकाकारः स्वस्मात् पूर्ववर्तिनां दशटीकाकाराणां चर्चां करोति परन्तु टीकाकाराणां नामानि नैव

---

[७३] त्रिपाठी कैलाशचन्द्रः, ***अमरकोशका कोशशास्त्रीय तथा भाषाशास्त्रीय अध्ययन,*** वाराणसी : चौखम्बा विद्याभवन सन् २००८, पृ.२६।

[७४] पूर्ववत् पृ.२७।

[७५] पूर्ववत् पृ.२८।

दत्तानि । सर्वानन्दस्य टीकायामनेकान्युद्धरणानि प्राप्तानि । चतुर्नवत्युत्तरशतग्रन्थानामुद्धरणानि दत्तानि सन्ति । अस्य कालस्तु स्वयं लिखति, एकाशीत्युत्तरसहस्रं वर्षमिति ।[७६]

### २.१.२९.४ अमरकोशटीका

त्रिलोचनदासकृतैका 'अमरकोशटीका' नामाख्या टीकाऽस्ति । त्रिलोचनदाशस्य कालो द्वादशशताब्द्यस्ति ।

### २.१.२९.५ अगमरकोशमाला

परमानन्दशर्मकृतैका 'अमरकोशमाला' नामाख्या टीकाऽस्ति ।काव्यप्रकाशस्य टीकाकारोऽपि परमानन्दशर्माऽस्ति । यदि स एव भवेत्तर्ह्यमरकोशमालाया रचनासमयः षोडशशताब्द्यस्ति ।

### २.१.२९.६ पदचन्द्रिका

बङ्गीयविदुषा रायमुकुटेनैषा टीका 'पदचन्द्रिका' लिखिताऽस्ति । इयं पूर्ववर्तिनःषोडशटीकार्थस्य सारमादाय निर्मितेति स्वयं लिखति टीकाकारः ।अस्य टीका पूर्णा मान्या चास्ति । रायमुकुटेन स्वकीयायां टीकायां २७० ग्रन्था उद्धृताः सन्ति । अस्यापरनाम बृहस्पतिस्तथा जातिनाम रायमुकुटमणिरस्ति । अस्य कालस्तु १३५३ शकाब्दः स्वयं लिखति ।[७७]

### २.१.२९.७ अकोशटीका

अस्याः टीकायाः कर्ता दुर्लभवल्लभोऽधुनाऽज्ञातोऽस्ति । एषा केवलं हस्तलिखिता नलिनीनाथदासगुप्तायाः पार्श्वेस्थापिताऽसीत् । एषा टीका पूर्णाऽस्ति । टीकाकारेणानेकग्रन्थानामुद्धराणि दत्तानि सन्ति । अस्य कालः पञ्चदशशताब्दी भवितुं शक्नोति ।

### २.१.२९.८ अमरकोशटीका

अमरकोशटीका नामिका टीकालङ्कारस्य तथा वेदान्तस्य च ख्यातविदुषाप्ययदीक्षितेन लिखिता । अस्य कालः षोडशशताब्दी भवितुं शक्नोति । अस्य साहित्यिककार्यकालः १५४९ इत्यारभ्य १६१३ ई.यावदासीत् । एषापि हस्तलिखितास्ति ।[७८]

---

[७६]पूर्ववत् पृ.२९ । 'इदानीं चेकाशीतिवर्षाधिकसहस्रिकापर्यन्तेन शकाब्दकालेन (१०८१) षष्टिवर्षाधिकद्विचत्वारिंशच्छतानि कलिसन्ध्याया भूतानि (४२६०) ।

[७७]पूर्ववत् पृ.३० । 'इदानीं कालः शकाब्दः १३५३ द्वात्रिंशदधिकपञ्चशतोत्तरचतुःसहस्रवर्षाणिकलिसन्ध्याया भूतानि ४५३२ तथा गणितचूडामणौ' शकसंवत् १३५३ तथा १४३१ ई.भवति ।

[७८] पूर्ववत् पृ.३१ ।

### २.१.२९.९ पदार्थकौमुदी

नारायणचक्रवर्तिना लिखिता 'पदार्थकौमुदी' नामिका टीकास्ति। अस्यां टीकायां ६४ ग्रन्थानामुद्धरणानि सन्ति। अस्य परिचिता टीकास्तिस्र आसन् ,यथा सुभूतिचन्द्रस्य टीका, सर्वानन्दस्य टीका, रायमुकुटस्य टीका च। अस्य कालः षोडशशताब्दीति स्वयं लिखति टीकाकारः।[७९]

### २.१.२९.१० मुग्धबोधिनी

एषा टीका बङ्गदेशे भरतमल्लिकद्वारा विरचिता। एवं वोपदेवस्य व्याकरणानुसारेण व्याख्याताऽस्ति। अस्यां टीकायां पाठभेदा अपि दत्ताः सन्ति। अनेन द्विरूपध्वनिसंग्रहो नामकः कोशोऽपि विरचितः। अनेन मेघदूते, कुमारसंभवे, शिशुपालबधे च टीकाः कृताः। व्याकरणं वैद्यकञ्च ग्रन्थौ स्तः। अस्य कालोऽष्टादशशताब्दी मन्यते। स्वयं लिखति टीकाकारो मनुष्यवर्गे।[८०]

### २.१.२९.११ व्याख्यासुधा

व्याख्यासुधा भट्टोजिदीक्षितस्य पुत्रेण भानुजिदीक्षितेन लिखिताऽस्ति।टीकाकारानुसारेण नृपस्य कृतिसिंहस्येच्छानुसारेण लिखितास्ति। एषा महत्त्वपूर्णा टीका विभिन्नान्युदाहरणानि दत्वा पुष्टीकृता पाणिनीयव्याकरणस्य नियमान् परिपाल्य लिखिता। पूर्वटीकाकाराणां रायमुकुटस्य क्षीरस्वामिनश्च ग्रन्थेभ्य उद्धरणानि दत्तानि। रायमुकुटस्यालोचना कृतास्ति। एषा टीका विद्वत्त्वपूर्णा विस्तृता चास्ति। उद्धरणानि बहूनि सन्ति, जानन्त्येव विज्ञाः। भानुदीक्षितस्योपनाम रामाश्रमश्चासीत्। तस्मात् 'रामाश्रमी' टीका च कथ्यते। अस्य शिष्यो वत्सराजः (१६९८) रामाश्रमं स्वकीयग्रन्थे 'वाराणसीदर्पणम्' इत्याख्ये प्रणमति। यथा –

भट्टोजिदीक्षितं नत्वा रामाश्रमं गुरुं पुनः।
वत्सराजः करोत्येनां काशीदर्पणकाशिकाम् ॥

तस्मादस्य कालः सप्तदशशताब्द्याःपूर्वार्द्धं मन्यते।[८१]

### २.१.२९.१२ अमरकोशविवेकः

---

[७९]पूर्ववत् पृ.३२। 'इदानीं शकाब्दाः १५४०, ऊनविंशत्यधिकासप्तचत्वारिंशच्छतानि वर्षाणि कलिसंख्याभूतानि (४७१९)।

[८०]पूर्ववत् पृ.३३। मुग्धबोधिन्यां नृवर्गविवरणं समाप्तं, ग्रन्थकारस्य शुभमस्तु। शकाब्दः १५९९।

[८१]पूर्ववत् पृ.३४।

एषा 'अमरकोशविवेक:' नामाख्या टीका महेश्वरकृतास्ति ।महेश्वरो महाराष्ट्रिय आसीत् । स्वकीय इतिहासः कोऽपि नैव दत्तोऽनेन । रामाश्रमीटीकाया उद्धरणानि सन्ति तस्मात् पश्चाद्वर्ती मन्यते । महेश्वरेण कृता टीका शब्दविज्ञानानुसारेण महत्त्वपूर्णास्ति । अस्यां टीकायां समानार्थिनो मराठीशब्दा उद्धृताः सन्ति । इति प्रसिद्धम्, इति ख्यातम्, इति लौकिकमित्यादिशब्दैरर्थो दत्तोऽस्ति । अस्य कालोऽष्टादशशताब्द्याः पूर्वार्द्धं मन्यते ।

### २.१.२९.१३ अमरकोशपदविवृत्तिः

एषा टीका लिङ्गभट्टेन हस्तलिखितास्ति । टीकायां १७१ उद्धरणानि केवलं तृतीयकाण्डे सन्ति । एषा टीका दक्षिणभारते प्रसिद्धा । अस्य कालोऽष्टादशशताब्दी भवितुं शक्नोति । मल्लिनाथोऽपि लिङ्गभट्टस्योदाहरणं ददाति ।

### २.१.२९.१४ सारसुन्दरी

बङ्गदेशीयमथुरेशविद्यालङ्कारेण विरचिता टीका 'सारसुन्दरी' अस्ति ।एषा उपयोगिनी टीकास्ति तथाऽन्यासां टीकानामुद्धरणानि सन्ति । अस्य कालः शकः १५८८ तथा १६६६ ई.वर्तते । अनेन सुपद्ममतस्य व्याकरणस्यानुकरणं कृतम् ।[८२]

### २.१.२९.१५ शब्दार्थसंदीपिका

नारायणविद्याविनोदस्यामरकोशे 'शब्दार्थसंदीपिका' प्राप्यते । अस्यान्ये च व्याकरणग्रन्थाः सन्ति । यथा – गणप्रकाशः, प्राकृतवादः, भट्टिबोधिनी, व्याकरणदीपिका च ।अनेन क्रमदीश्वरद्वारा संस्थापितस्य जौमरसंप्रदायस्य व्याकरणस्य प्रशंसा कृता ।[८३]

### २.१.२९.१६ अमरोद्योतः

उच्यते पुरुषोत्तमतर्कालङ्कारेण लिखिता 'अमरोद्योतः' नामिका टीकाप्यस्ति ।एषा हस्तलिखिता तथा वैङ्गीयायां शैल्यां रचितास्ति ।

### २.१.२९.१७ शिशुबोधिनी

महाराष्ट्रियमहेश्वरसुकथणकरेण लिखिता 'शिशुबोधिनी' टीका । पूर्ववर्तिग्रन्थानामुद्धरणानि दत्वा मराठीशब्दाश्च प्रयुक्ताः सन्ति । अस्य कालो नैव ज्ञायते । अनुमीयते यत् सप्तदशशताब्द्या अन्ते भवितुं शक्नोति ।[८४]

---

[८२] पूर्ववत् पृ.३५ । रायमुकुटटीकादिकलापादिक्रिया यतः । सुपद्मप्रकिया तस्मान्मथुरेशेन तन्यते ॥

[८३] पूर्ववत् पृ.३६ । सन्ति यद्यपि भूयांसःशब्दलक्षणचक्षुषः । तथापि जौमराभ्यासविशेषादेव शिष्यते ॥

[८४] पूर्ववत् पृ.३७ ।

## २.१.३०.अमरकोशस्य टीकाकाराः

| | |
|---|---|
| १. व्याख्याप्रदीपः | अच्युतोपाध्यायः |
| २. काशिका | काशिनाथः |
| ३. अमरकोशोद्घाटनम् | क्षीरस्वामी |
| ४. कौमुदी | नयनानन्दः |
| ५. पदार्थकौमुदी | नारायणचक्रवर्ती |
| ६. शब्दार्थसन्दीपिका | नरायणविद्याविनोदः |
| ७. अमरपञ्जिका | नारायणवेदान्तवागीशः |
| ८. सुबोधिनी | नीलकण्ठः |
| ९. अमरचन्द्रिका | परमानन्दमैथिलः |
| १०. मुग्धबोधिनी | भरतमल्लिकः |
| ११. व्याख्यासुधा | रामाश्रमः |
| १२. शारदासुन्दरी | मधुरेशविद्यालङ्कारः |
| १३. विद्वन्मनोहरा | महादेववेदान्ती |
| १४. अमरविवेकः | महेश्वरः |
| १५. मधुमाधवी | माधवः |
| १६. पदचन्द्रिका | मुकुटः |
| १७. त्रिकाण्डचिन्तामणिः | रघुनाथचिन्तामणिः |
| १८. त्रिकाण्डविवेकः | रामनाथविद्यावाचस्पतिः |
| १९. प्रदीपमञ्जरी | रामेश्वरः |
| २०. पीयूषम् | रामकृष्णदीक्षितः |
| २१. वैषम्यकौमुदी | रामप्रसादतर्कालङ्कारः |
| २२. पदविवृतिः | लिङ्गयसूरिः |
| २३. पदमञ्जरी | लोकनाथः |
| २४. टीकासर्वस्वम् | सर्वानन्दः |
| २५. व्याख्यामृतम् | अज्ञातः |

२६. सन्देहभञ्जिका अज्ञातः[८५]

२७. स्वयंबोधिनी कुलचन्द्रगौतमः ( नेपालीभाषायाम् )

एतदतिरिक्ता अपि भूयस्यः टीकास्तत्तद्देशीयभाषासु ( सिंहल-ब्रह्म-महाराष्ट्र-तेलगु-तिब्बत-कर्णाटक-कश्मिरप्रभृतिषु ) दृष्टिपथं यान्ति ।

## २.१.३१.अमरकोशस्य नेपालीटीका

अस्माकं देशे नेपाले निघण्टुनिरुक्तकालानन्तरंकोशस्याध्ययनपरम्परासीत् । छात्राः पूर्वममरकोशस्य कण्ठस्थं कुर्वन्ति स्म । अधुना तस्याः परम्पराया ह्रासः प्रायो दृश्यते । तथापि पर्यायवाचिशब्दज्ञानाय परमावश्यकतास्तीति सर्वेऽनुभवं कुर्वन्ति । अधुना वर्णक्रमकोशस्य लोकप्रियतास्ति । कोशग्रन्थास्तु सन्ति तथापि तैः पर्याप्तं न भवति । अमरकोशस्य यादृशी रचनाशैल्यस्ति तादृशज्ञानमाधुनिककोशज्ञानेन न भवति । अमरकोशस्य चमत्कृत्यामरसिंहोऽमरोऽभूत् ।

अमरकोशस्य व्याख्याऽनेकेषु देशेष्वनेकासु भाषासु दरिदृश्यते । सिंहल-श्याम-ब्रह्मा-महाराष्ट्र-तेलगु-कर्णाटक-कश्मिर-तिब्बतप्रभृतिषु देशेषु दृष्टिपथं यान्ति । अनलेषु जलेषु च धर्मान्धतया बहवो ग्रन्थाः क्षिप्तास्तथापि स्वकीयभाषायामनुवादः कारितोऽमरकोशो मोहम्मदजातीयेन । अधुना 'खलिकवरी' इति नामधेयो ग्रन्थो भाषायामस्ति । अमरकोशस्त्वमर एव सञ्जातः । षष्ठशतके चीनदेशेऽपि गुणराजनामकेन विदुषा चीनीयभाषायामनुवादः कृतः । वेलायतदेशेऽपि मैक्समूलरेण लिखितोऽमरस्याऽनुवादो गौरवस्य विषयोऽयम् ।

शब्दज्ञानं (प्रतिपदपाठम्) बृहस्पतिरिन्द्राय दिव्यसहस्रवर्षं यावत् पाठितवान् तथापि नान्तं जगाम । इन्द्रादयोऽपि यस्यान्तं न ययुः शब्दवारिधेः । तस्मादधुना कथं स्वल्पकालेन समर्था भवेयुः । प्राचीनकालेतु मुनयो ब्रह्मोपासकाग्रन्थस्रष्टारो मन्त्रद्रष्टारश्चासन् । अधुना तु तादृशीं साधनां न कोऽपि कुरुते । यतो हि कोशस्यावश्यकताभूत् । तस्माद्रचितौ निघण्टु-निरुक्तौ । यद्यपि बहवः कोशग्रन्थाः सन्ति तथापि ते लघुतां यान्त्यमरकोशस्याग्रे । नामलिङ्गानुशासनमिति यथा नाम तथाकार्यमस्ति तस्मादद्वितीयोऽस्ति महिमामयश्चामरकोशः ।

अमरकोशस्य नेपालीटीकापि कुलचन्द्रगौतमेन 'स्वयंबोधिनी' नाम्नी नेपालीभाषायामावश्यकतामनुभूय प्रणीता । एषा टीका सर्वेषु छात्रवर्गेषु, शिक्षकेषु,

---

[८५] त्रिपाठी ब्रह्मानन्द, ***अमरकोशः*** (रत्नप्रभा टीका भूमिका ), वाराणसी : चौखम्बा सुरभारती प्रकाशन, सन् १९९६, पृ.६ ।

प्राध्यापकेषु च रुचिकरा सरला चास्ति। नेपालीभाषायामेषानन्यतमा टीका । लिङ्गनिर्देशनव्यवस्थया, आदर्शरूपावल्या, संस्कृतभाषायां नेपालीभाषायाञ्च वर्णक्रमानुसारेण शब्दस्थापनया च बालानां पठनशीलानां टीकोपकारिका। अत्र शब्दार्थप्रसङ्गेऽनेकाष्टिप्पण्यः सन्ति, याभिर्निश्चितार्थो ज्ञायते। तथैव समस्तशब्दनिर्माणविधयः,शब्दभेदाः, द्विरूपशब्दाः, बहुरूपशब्दाः, शब्दानामुदाहरणानि च सन्ति। यां टीकामङ्गीकृत्यानुवादसमये, रचनासमये, प्रवचनसमये च समस्यासागरं तर्तुं शक्नुवन्त्यभ्यासार्थिनः। शब्दानां लिङ्गज्ञाने, रूपज्ञाने, व्युत्पत्तिज्ञाने, अर्थज्ञाने चैषा टीकोपकारिका। तस्मात् शब्दोपासकानाममरकोशः पितृवत् रक्षति, स्वयंबोधिनीटीका मातृवत् पोषणं करोति च ।

अस्माकं पठनपाठनपरम्परायां बालानां सुखबोधाय सर्वप्रथमं गुरुजना अमरकोशं व्याकरणाष्टाध्यायीञ्च गुरुकुलादौ छात्रान् पाठयन्ति। ततः पदज्ञानारम्भं कारयन्ति च । उक्तञ्च –

'अष्टाध्यायी जगन्माताऽमरकोशो जगत्पिता ।'

यतो ह्यमरकोशस्य व्याकरणस्य च परस्परसम्बन्धो दृश्यते। तस्माच्छात्रैः सर्वदाऽनिवार्यत्वेनाऽध्ययनीयास्ति टीका ।

## २.२.विद्वच्छिरोमणिकुलचन्द्रगौतमस्य जीवनवृत्तम्

विद्वच्छिरोमणिः साहित्याचार्यः पण्डितः श्रीकुलचन्द्रगौतमोऽमरकोशस्य नेपालीभाषायां प्रथमटीकाकारोऽस्ति। अस्य जन्म काष्ठमण्डपात् पश्चिमे भागे धादिङ्मण्डलस्य जीवनपुरग्रामे विक्रमसंम्वत् १९३४ तमेऽभूत्। पितुर्नाम पण्डितः श्रीरमाकान्तगौतम आसीत्। मातुर्नाम सावित्री आसीत्। पिताष्टमवर्षवयसि बालकस्य व्रतबन्धं कारयित्वा विद्याऽध्ययनार्थं पुत्रं काशीं नीतवान्। तत्र काश्यां कुलचन्द्रगौतमस्तैलङ्गकुलभूषणमहामहोपाध्याय सी.आइ.इ. पदप्राप्तेन गङ्गाधरशास्त्रिणा सह तैलङ्गभूषणमहामहोपाध्यायनारायणशास्त्रिणा सह चाध्ययनं कृतवान्। श्रीरामनारायणखिस्तेः सतीर्थ्य आसीत्।

व्याकरणमध्यमामुत्तीर्य गुरोः पार्श्वे स्थित्वा भारतीनामिकां मासिकपत्रिकां पठन् पञ्च षड्वा श्लोकान् पठित्वाऽशुद्धोऽस्तीत्युच्चार्य भूमौ पातितवान्। सा पत्रिका गुरुणा संशोधिताऽऽसीत्। तस्यां पत्रिकायां द्व्यर्थकशब्दः 'भूभृत्त्वम्'लेखितव्यमासीत् किन्तु तत्र पत्रिकायां 'भूभृतत्त्वम्Ú लिखितमासीत्। गुरुः पुनरपि पठतु इत्युक्त्वा पाठयत्। छात्रेणाऽशुद्धशब्दो ज्ञात इति विचार्य गुरवः प्रसन्ना अभूवन्। कुलचन्द्रगौतमस्य धारणाशक्तिर्विलक्षणाऽऽसीत्। "नैषधमहाकाव्यम्" महाभारतस्य प्रथमोऽध्यायश्च

कण्ठस्थावास्ताम् । असौ वैयाकरणश्च परिभाषेन्दुशेखरप्रौढमनोरमादया व्याकरणग्रन्था अधीताः कुलचन्द्रेण । प्रथमश्रेण्यां साहित्याचार्य उत्तीर्णस्तस्मादाचार्यपदवी प्राप्ता । तस्मिन् समये काश्यां प्रथमश्रेण्यामाचार्यः, द्वितीयश्रेण्यामुपाध्यायः, तृतीयश्रेण्यामुत्तमः,इत्यादयः पदव्य आसन् । नैपालको जनः सर्वप्रथमं साहित्याचार्यपदवीं प्राप्तवान् ।

आचार्यपदवीं लब्ध्वा नेपालमागत्य श्री ५ पृथिवीवीरविक्रमशाहदेवाद्‌वृहत्संमानं प्राप्तवान् । तत्पश्चात् विद्वत्ता, प्रतिभा, शीलं, सौजन्यं, सौमनस्यमित्यादिगुणानवगत्यश्री ५ त्रिभुवनवीरविक्रमशाहदेवस्य स्वायत्तशासनकाले "विद्वच्छिरोमणिः" इत्युपाधिं त्रिशतरूप्यकञ्च जीवनवृत्तिं काशीवासार्थं पुरस्काररूपेण प्राप्तवान् । नेपालमातुः सुपुत्रः कुलचन्द्रगौतमो भारतीयोपमहाद्वीपस्य विशिष्टविद्वान् कविश्चासीत् । विद्याऽध्ययनात् पश्चात् काश्यामेव वाङ्मयसाधनायां समर्पितः कुलचन्द्रगौतमोऽतुलनीययोगदानकारणात् काशीविद्‌वन्मण्डलिनैकजाज्वल्यमानरत्नरूपोपाधौ स्थापितोऽभूत् । काशीविद्‌वत्परिषदा महाकविपदेनाऽभिनन्दितः साहित्याचार्यः साधारणहृदये काव्यरसपीयूषवर्षी चन्द्र इवोदित आसीत् । समालोचकैः क्षेमेन्द्रस्य पण्डितराजजगन्नाथस्य च समकक्षे स्थापितः कुलचन्द्रगौतमः । तेन साहित्यम्, व्याकरणम्, कोशः, कर्मकाण्डम्, आयुर्वेदः, दर्शनमित्यादिषु महत्त्वपूर्णविषयेषूच्चस्तरीयकृती रचयित्वा नेपालमातुः स्वरूपं प्रकाशितम् । कुलचन्द्रस्य ज्ञानस्य वैदुष्यस्य च परिचयेऽमरकोशस्य तत्कृतो नेपालीयोऽनुवाद एव पर्याप्तो वर्तते । कृष्णकर्णाभरणकाव्ये व्याकरणस्य लकारार्थप्रक्रियायाः सूत्राणामुदाहरणरूपेण कृष्णलीलाव्यञ्जकानि मधुराणि विप्रलम्भश्रृङ्गारादिरसानुप्राणितानि पद्यानि रचयित्वा निजाऽसाधारणी वैदुषी प्रमाणिता । श्री ५ महेन्द्रवीरविक्रमस्य शासनकाले विक्रमसम्वत् २०१५ तमे वर्षे मार्गशीर्षशुक्लपूर्णिमायां काशीस्थे रामघट्टे २२/२८ निवासे शिवसायुज्यं प्राप्तवान् । पौत्रस्य सुशीलचन्द्रगौतमस्य शिष्यस्य पण्डितबालकृष्णाचार्यस्य च हस्तैस्तस्यान्तिमसेवासंस्कारौ सम्पन्नौ ।

कुलचन्द्रगौतमस्य रचना श्लोकाश्च व्यासमनुकुर्वन्ति,"भागवतमञ्जरी" भावमञ्जरीवत् महाकविक्षेमेन्द्रमनुकरोति । नेपालीभाषायां तुलसीकृतरामायणस्य टीका लिखिताऽस्ति । धर्मानुरागिणा संस्कृतप्रेमिणा कुलचन्द्रगौतमेन कर्मकाण्डविषये गौरीशङ्करगुटका, विवाहपद्धतिसदृशाः कृतयः परिस्कृताः सन्ति । तेन कृताऽमरकोशस्य वैदुष्यपूर्णा "स्वयंबोधिनी" नेपालीटीका लोकप्रियाऽस्ति । संस्कृतनेपालीशब्दकोशश्च रचितः । नेपालीभाषायां लिखितौ "राघवालङ्कारः" "अलङ्कारचन्द्रोदयः" च सम्मानितौ स्तः । संस्कृते

लिखिता भागवत्मञ्जरी, कृष्णकर्णाभरणम्, गङ्गागौरवम्, प्रेमपञ्चाशिका, आदर्शदम्पतीसीतारामौ, प्रपञ्चचर्चा, रामायणवन्दना, वन्दनायुगलम्, शोकमहोर्मिः, गौतमवंशवृत्तम्, आदित्यार्यस्तुतिः, शिवस्तुतिनक्षत्रमाला, नवरत्नहारः, इत्यादयः सन्ति । अन्ये च स्वयं वैद्यः, आदर्शशब्दरूपावली, हरिवरिवस्या, आयुर्वेदीययोगकौमुदी, इत्यादयोऽप्रकाशिताः प्रकाशिताश्च ग्रन्थाः सन्ति ।

एकस्मिन् समये जर्मनदेशादेकसंस्कृतश्लोकस्यार्थं नावगम्य भारतेऽनेकेषु विद्वत्समाजेष्वर्थार्थमागतः श्लोक आसीत् । एका प्रतिलिपिर्विद्वच्छिरोमणिना कुलचन्द्रगौतमेन प्राप्ता । तेन श्लोकस्य रसं गुणान्, दोषान्, भङ्गश्लेषाभङ्गश्लेष-महाभङ्गश्लेषालङ्काराञ्चोद्घाट्य त्रयोदशार्थैः समलङ्कृत्य जर्मनदेशं श्लोकः प्रेषितः । जर्मनसर्वकारेण भारतमात्रस्य नहि किन्तु समस्तभूमण्डलस्य संस्कृतसाहित्यस्याद्वितीयविद्वानित्युपाधिना समलङ्कृतोऽसौ विद्वान् कुलचन्द्रगौतमः । तस्मात्केवलं नह्यसौ कुलचन्द्रः परन्तु समस्तभूमण्डलस्य चन्द्रः । अस्माकं देशस्य नेपालस्य गौरवोऽस्त्यसौ । संस्कृतभाषायाश्चर्चायां स्वकीयसमयस्य सर्वश्रेष्ठो विद्वानासीत् । नहि केवलं नेपालस्य विद्वांसः किन्तु भारतीयविद्वांसोऽपि मुक्तकण्ठैर्गायन्ति यशः । कुलचन्द्रस्य कुसाग्रीया बुद्धिरासीत् । असौ साहित्ये, व्याकरणे, दर्शने, धर्मशास्त्रे, कोशशास्त्रे,तथान्येषु च शास्त्रेषु सरस्वत्या वरदपुत्र आसीद् ।

### २.२.१.कुलचन्द्रगौतमस्य कृतीनां संक्षिप्तपरिचयः

विदुषा कुलचन्द्रगौतमेन साधनमये जीवने संस्कृतकृतीनां नेपालीकृतीनाञ्च प्रणयनं कृतम् । केषाञ्चन ग्रन्थानां टीकाप्रणयनं, केषाञ्चिद् ग्रन्थानां भाषानुवादश्च कृतः । कतिपयस्वरचितसंस्कृतकाव्यानां समच्छन्दसि नेपालीभाषायामनुवादो विहितः । शास्त्रीयविषयेष्वाधारिता ग्रन्थाः समाजकल्याणदृष्ट्या विरचिताः । लक्षणग्रन्थानां सारमादाय नेपालीभाषायां लक्षणशास्त्राण्यपि प्रणितानि । स्वान्तःसुखाय प्रणीतानां भगवद्भक्तिपराणां विकीर्णरचनानामपि भूयसी संख्यावर्तते । स्वरचितानां कृतीनां संस्कृते नेपालीभाषायाञ्च टीका विरचिता । कोशसम्बद्धा ग्रन्था अपि प्रणीता गौतमेन ।

तत्र भवतः कुलचन्द्रस्य विविधकृतीनां संक्षेपेण परिचयो दीयतेऽत्र प्रसङ्गतः । सर्वाषां कृतीनां केवलं ग्रन्थनाम लेखनसमयः प्रकाशनसमयश्च यथाप्राप्ता लिख्यन्ते मया । प्रत्येकं कृतीनामुदाहरणं दीयतेऽत्र स्थालीपुलाकन्यायेन ।

### २.२.२. श्रीकृष्णकर्णाभरणकाव्यम्

काव्यमिदं साहित्यव्याकरणसङ्गमरूपं कृष्णकर्णाभरणं व्याकरणस्य लक्ष्यप्राप्तये रचितं कुलचन्द्रेण । अत्र त्रयोदशोत्तरद्विशतं पद्यानि सन्ति । भट्टोजिदीक्षितप्रणीतायाः सिद्धान्तकौमुद्या लकारार्थप्रक्रियायाः षष्टिसूत्राणां प्रयोगभूमिरस्ति । तस्मान्न केवलं कुलचन्द्रः साहित्यिकः परन्तु वैयाकरणोऽपि । उदाहरणार्थमेकं पद्यम् –

क्षमाननाः समयखण्डनजातकोपा रक्षाकृतेऽनुसृतपाणिनिबद्धसूत्राः ।
आध्यानयोगबलकल्पितसन्निधानं प्रेयांसमेनमथ ता इति गोप्य उचुः ॥[८६]

### २.२.२.भागवतमञ्जरी

अस्यां भागवतमञ्जर्यां द्वादशस्कन्धाः सन्ति ।अत्र श्रीमद्भागवतस्यावश्यकं विषयमवलम्ब्य संक्षेपीकरणं कृतम् । भागवतेऽष्टादशसहस्रं श्लोकाः सन्ति परन्त्वत्र भागवतमञ्जर्यां संक्षिप्य केवलं ३१४० पद्यानि सन्ति । इदं भक्तिप्रधानं काव्यम् । स्वयं कथयति कुलचन्द्रः –

शुश्रूषमाणस्य सतस्तानेतान् पुण्यकर्मणः ।
मम प्रयत्नः स्यादेव प्रत्नविद्वज्जनप्रियः ॥[८७]

### २.२.३.गङ्गागौरवम्

हरिवरिवस्यायाः प्राभातिकोल्लासान्तर्गतेऽस्मिन् गङ्गागौरवाख्ये स्तवकाव्ये १११ संख्याकैः पद्यैर्भगवत्या गङ्गायाश्चरणयुग्मयोर्निजा भावधारा समर्पिता कुलचन्द्रेण । एकं पद्यमिह प्रस्तूयते–

नेह रसा नेह गुणा नेहालङ्काररीतयः सन्ति ।
इह हर्षः सुसरितः कीर्तनमात्रात् समुल्लसति ॥[८८]

अस्मिन् काव्ये कुलचन्द्रेण व्याकरणवैदुष्यं प्रदर्शितमस्ति –

प्रबोधाय प्राची प्रकृतिमुचितां प्रत्ययमथो,
यथा दृष्टं लोके घटयति समुद्भावितपदे ।
कृतार्थानां शब्दागम इव बुधानां बहुमते,
पतेयं त्वत्तोये सुरधुनि र कुतश्चिद्धुतभयः ॥[८९]

---

[८६] गौतमः नारायणः, **कुलचन्द्रगौतमस्य काव्यात्मकसंस्कृतकृतीनां विश्लेषणम्,** ने.सं.वि., नेपाल : शोधग्रन्थ, वि.सं.२०५७, पृ.५३ ।
[८७]पूर्ववत् पृ.८२।
[८८]पूर्ववत् पृ.१०० ।

**२.२.४.प्रपञ्चचर्चा**

अस्यां प्रपञ्चचर्चायां द्विषष्टिसंख्यकानि पद्यानि सन्ति। समाजे स्थितानां विविधविसङ्गतीनामत्र वर्णनमस्ति। व्याकरणात्मकाः श्लोका अपि प्राप्यन्तेऽत्र –

सकौमुदीकस्य कविः तमः कृतस्थितेः।

गलस्थमुक्तावलिकस्य याचतः॥

'अधित्य वृत्तीर्वत र विश्रुताः सतीः।'[९०]

**२.२.५.प्रेमपञ्चपञ्चाशिका**

अस्यां प्रेमपञ्चपञ्चाशिकायां पञ्चपञ्चाशच्छ्लोकाः सन्ति। अत्राप्रत्यक्षतया पत्न्या असामयिकविरहजन्येन शोकेनानुविद्धः कुलचन्द्रः प्रियाविरहपीडां प्रकटयति। उदाहरणार्थमेकं पद्यम् –

अपि यातवती यथोचितां सखितां किङ्करतां कलत्रताम्।

मृदुगात्रि ! कथं गुणैर्वशे मयि हा ! दर्शयसे कठोरताम्॥[९१]

व्याकरणात्मकञ्च पद्यं रचयति कुलचन्द्रो यथा –

पदशासनदक्षया त्वया जनितः प्रत्यय ईदृशो दृशः।

विधिना सकलापहारिणा लुलुपे क्विन्निव किन्नु सर्वतः॥[९२]

**२.२.६.रामायणवन्दना**

कुलचन्द्रेणप्रसिद्धं स्तवकाव्यं १९९३ तमे वैक्रमाब्दे प्रकाशितम्। इदं हरिवरिवस्याया वन्दनोल्लासे निहितमस्ति। अत्र रामायणसारभूते काव्येऽष्टोत्तरशतसंख्यकानि पद्यानि सन्ति। कुलचन्द्रो लिखति –

सर्वाघसंघपरिशोधनसाभिलासः सर्वोपचारपरिपूजनपूर्तिकामः।

आविर्भवत्पृथुलभीः कुलचन्द्रशर्मा वन्दे महापुरुष र ते चरणारविन्दम्॥[९३]

---

[८९] पूर्ववत् पृ.११४।

[९०] पूर्ववत् पृ.१२८।

[९१] पूर्ववत् पृ.१३२।

[९२] पूर्ववत् पृ.१४०।

[९३] पूर्ववत् पृ.१४७।

### २.२.७. भागवतवन्दना

अस्य काव्यस्य प्रकाशनसमयः २००५ वैक्रमाब्दोऽस्ति । हरिवरिवस्याग्रन्थस्यान्तर्गते निहिताऽस्ति भागवतवन्दना । अत्र शताधिकपञ्चविंशतिश्लोकाः सन्ति । कुलचन्द्रेण श्रीमद्भागवतस्य दशमस्कन्धस्यैकादशस्कन्धस्य च सारं गृहित्वा प्रणीता । तत्रत्यैकपद्यम् –

रूपं प्रदर्श्य धृतचक्रगदाब्जशङ्खमिन्दीवरद्युतिचतुर्भुजभावरम्यम् ।

वन्दीकृतौ कृतवतः पितरौ समोदौ वन्दे महापुरुष ! ते चरणारविन्दम् ॥ [९४]

### २.२.८. आदर्शदम्पती सीतारामौ

काव्यमिदं २०१२ वैक्रमाब्दे प्रकाशितमस्ति । अत्राष्टासप्ततिपद्यानि सन्ति । कुलचन्द्रः सीतारामयोः प्रगाढां भक्तिं दर्शयति –

तारा गुणैरुदारा यन्नाम्नोर्मध्यमध्यास्ते ।

निस्ताराय भवाब्धेः कृताञ्जलिस्तावुभौ नौमि ॥[९५]

### २.२.९. शोकमहोर्मिः

चम्पूकाव्यमिदं कुलचन्द्रेण तदानीन्तनभारतराज्ञ्या भिक्टोरियाया महाप्रयाणे जाते प्रियंवदसुदर्शशनयोः संवादव्याजेन करुणारसमवलम्ब्य प्रणीतम् । इदं निजगुरुचरणेभ्यः श्रीरामशास्त्रितैलङ्गाभिधानेभ्यः समर्पितम् । कुलचन्द्रः गुणगणयुतायां तस्यां दिवंगतायां भिक्टोर्यां सर्वं जगत् शोकमग्नं दृष्ट्वा प्रगाढं शोकं प्रकटयति –

मग्नं जगद्विपदि नाशमगात्प्रमोदं सौख्यं रसातलमयादुदितो विषादः ।

हा हा किमद्य कथयामि महेश्वरी सा याता पुरन्दरपुरीमपहाय भूमिम् ॥[९६]

### २.२.१०. काशिकराजकीयसंस्कृतमहाविद्यालयः

इदं काव्यं काशिकराजकीयसंस्कृतमहाविद्यलयो नामकं सारस्वतीसुषमायांपत्रिकायां १९४२ तमे वैक्रमाब्दे प्रकाशितम् । अत्र स्रग्धरावृत्ते अष्टौ पद्यानि शार्दूलविक्रीडितवृत्ते पञ्चदश पद्यानि सन्ति । महाविद्यालये प्राचार्यपदे स्थित्वा योगदानं कुर्वतां विदुषां विवरणं, प्राध्यापकानां वर्णनं, विद्यालयस्वरूपस्य मानसपटले चित्रयितुं समर्थमस्ति ।

---

[९४]पूर्ववत् पृ.१५७ ।

[९५]पूर्ववत् पृ.१६५ ।

[९६]पूर्ववत् पृ.१७९ ।

महाविद्यालयस्थापनायाः १५० वर्षेषु व्यतीतेषु जन्मजयन्त्युत्सवसमये तदीयं वैशिष्ट्यं प्रकाशयितुकामः कुलचन्द्रः कथयति धन्योऽयं महाविद्यालयः। यस्य प्रारम्भिकं नाम क्विन्सकलेज इत्यासीत्। तत्र श्रीमन्तो गुरवो महामहोपाध्यायो गङ्गाधरशास्त्रिणो विराजन्ते स्म। तेषां महोदयानां छात्रजनेषु या उपदेशपरिपाटी आसीत्तस्यैव कुलचन्द्रो वर्णनं करोति –

प्रातः पूरय नित्यकृत्यमखिलं निर्याहि शालां प्रति-

च्छात्रान् पाठय सिंहगर्जितजिता घोषेण सर्वानपि।

प्रत्यायाहि गृहान् पुनर्विविदिषून् आसायमध्यापय

ग्रन्थान् प्रस्तुतमुद्रणान् बहुगुणान् संप्रार्थितः शोधय॥ [९७]

## २.२.११. आदित्यार्यस्तुतिः

कुलचन्द्रेण १९९२ तमे वैक्रमाब्देऽमरभारतीपत्रिकायां प्रकाशितेयं स्तुतिर्द्वात्रिंशत्पद्यसमन्वितार्यवृत्तमण्डिताऽस्ति। अत्र सौरसम्प्रदायवर्णितं सूर्यस्वरूपं तैस्तैर्नामभिः प्रकाशितमस्ति। तत्रत्यैकं पद्यम् –

उदयाचलमौलिजुषे सकलजगच्चिन्तनविदुषे।

प्रसरत्तमोव्रजजुषे नमोऽस्तु नित्यं त्रयीवपुषे॥ [९८]

## २.२.१२. शिवस्तुतिनक्षत्रमाला

कुलचन्द्रेण १९९२ तमे वैक्रमाब्देऽमरभारतीपत्रिकाया आश्विनाङ्के प्रकाशितेयं शिवस्तवात्मिका स्तुतिः। अत्र वसन्ततिलकावृत्ते सप्तविंशति पद्यानि सन्ति। नक्षत्राणां संख्याभिरन्वितत्वादियं शिवस्तवात्मिका कृतिः शिवस्तुतिनक्षत्रमालानाम्ना प्रकाशितास्ति। यथैकं पद्यम् –

ईशान शङ्कर दिगम्बर चन्द्रमौले त्र्यक्ष प्रसन्न सुरवृक्ष भव प्रसन्नः।

चण्डीपते मथितमन्मथ दक्षयज्ञप्रध्वंसदक्ष भगवन् हर साध्वसं नः॥ [९९]

## २.२.१३. शीतवर्णनम्

---

[९७]पूर्ववत् पृ.१८३।

[९८]पूर्ववत् पृ.१८५।

[९९]पूर्ववत् पृ.१८६।

काशीगभर्नमेण्टसंस्कृतकलेज इत्याख्यायाः शिक्षणसंस्थाया मुखपत्रिकाया द्वितीयवर्षस्यैकादशाङ्के कुलचन्द्रेण शीतवर्णनं प्रकाशितम् । अस्मिन् काव्ये चत्वारिंशत् पद्यानि आर्यावृत्ते गुम्फितानि सन्ति । दरिद्राणां जीवनं चित्रयता कुलचन्द्रेणोक्तम् –

अगणितशीताः सततं निस्वाः कर्माणि कुर्वन्ति ।

हन्त ! निशेषादेषामेवान्तर्ज्वलति जाठरो ज्वलनः ॥[१००]

### २.२.१४. नवरत्नहारः

स्वर्गीयमहाराजाधिराजस्य श्री ५ महेन्द्रवीरविक्रमस्य शुभराज्याभिषेकसमये उनाशीतिवर्षीयेण कुलचन्द्रेण काशीमधिष्ठिताऽऽशीर्वादप्रधानं नवभिर्वसन्ततिलकावृत्तगुम्फितैः पद्यैरन्वितं नवरत्नहार इति नामकं लघुकाव्यं प्रणीतम् । पूर्वं नेपाल्यां पश्चात् संस्कृते च समच्छन्दसि भावानुवादो विहितः । नवानां पद्यरत्नानां हार इति नवरत्नहार इति व्युत्पत्त्या काव्याभिधानमपि सार्थकमस्ति ।

मूलम् –

श्रीसूर्यको कुल समुन्नतशील जानी
दिक्पालको प्रमुख अंश समेत राखी ।
सद्रक्षण-प्रणवता-पटुता दिएर
सर्कारलाई परमेश्वरले बनाए ॥ [१०१]

अनुवादः –

सूर्यान्ववायतिलकः किल दिक्पतीय
मात्रासमाश्रितवपुश्च भवान् महेन्द्र !
सद्रक्षणप्रणवतां पटुतां च दत्वा
धात्रा समाहितधिया प्रकटीकृतोऽसि ॥ [१०२]

### २.२.१५. भारतीवैभवशुभाशंसनम्

गोरक्षाभिजनेन पाल्पानिवासिना माधवप्रसाददेवकोटामहोदयेन लिखिते भारतीवैभवकाव्ये सम्मतिप्रदानसन्दर्भे २०१० तमे वैक्रमाब्दे कुलचन्द्रगौतमस्य

---

[१००]पूर्ववत् पृ.१८८ ।

[१०१]पूर्ववत् पृ.१८९ ।

[१०२]पूर्ववत् पृ.१९० ।

भारतीवैभवशुभाशंसनमिति सम्मतिः प्रकाशिता वर्तते । कुलचन्द्रस्य प्रतिभायाः प्रकाशकं, भारतीवैभवस्य रहस्योद्घाटकञ्चास्ति । अत्र कुलचन्द्रेण रचितानि शालिनीवृत्तगुम्फितानि षोडशपद्यरत्नानि सन्ति । तत्रैकम् –

इत्थं विदन् भारतीमर्चयन्तं जानीयुस्त्वां भारतीमेव शिष्टाः ।
नैवादेवो देवमभ्यर्चतीति वाणी येषां मानसे संनिविष्टा ॥ [१०३]

### २.२.१६. स्वर्णतुलादानम्

२००० तमे वैक्रमाब्दे श्री ३ युद्धशमशेरजङ्गबहादुरराणामहाभागेन स्वर्णतुलादानकर्मणि वृतः कुलचन्द्रः । तस्मिन्नेव समये कुलचन्द्रेण स्वर्णतुलादानाख्यं नेपालीभाषानुवादसहितमिदं काव्यं प्रकाशितमुपलभ्यते । अष्टाभिः शार्दूलविक्रीडितवृत्तनिबद्धैः पद्यैरन्वितमिदं काव्यं युद्धशमशेरस्य गुणगरिमप्रकाशनत्वात् प्रशस्तिकाव्यमस्ति । प्रस्तूयते पद्यमेकम् –

अस्मिन्नाकुलभूतलेऽपि समये बाधासहस्राश्रये
कुर्वन् स्वर्णतुलादिकानि शतधा दानानि सश्रद्धधीः ।
भूपालावलिलालिताङ्घ्रिरखिलत्राणाय रक्षन् व्रतं
रुद्धव्याधिरुदेतु युद्धशमशेर्राणा समानां शतम् ॥ [१०४]

### २.२.१७. योगकौमुदी

आयुर्वेदसंबद्धा विशिष्टा कृतिर्योगकौमुदी नेपालराजकीयप्रज्ञाप्रतिष्ठानेन २०५७ तमे वैक्रमाब्दे प्रकाशिता । कुलचन्द्रेणाऽसौ कृतिः १९९४ तमे वैक्रमाब्दे प्रणीता । वातपित्तकफजन्यानां रोगाणां लक्षणानि निर्दिश्य तेषान्निदानोपायाः सरलया शैल्या लिखिता कुलचन्द्रेण । अत्र ६७४ संख्याकानि पद्यानि सन्ति । यथैकं पद्यम् –

गुणगरिमविस्मयकरा निपुणभिषग्वर्गाविज्ञाताः ।
इति संकलय्य कतिचित् प्रदर्शिता योगाः ॥ [१०५]

### २.२.१८. वैद्यवल्लभः

अयं ग्रन्थो योगकौमुद्या साकं २०५७ तमे वैक्रमाब्दे प्रकाशितः । कुलचन्द्रगौतम आयुर्वेदस्य सार्वकालिकीमुपादेयतां महत्ताञ्चावगम्य व्यापकप्रचारप्रसारायाऽऽयुर्वेदसंबद्धान्

---

[१०३] पूर्ववत् पृ.१९१ ।
[१०४] पूर्ववत् पृ.१९२ ।
[१०५] पूर्ववत् पृ.१९४ ।

ग्रन्थान् संस्कृते नेपाल्याञ्च प्राणैषीत्। वैद्यवल्लभे १७२ संख्यकानि पद्यानि सन्ति। यथोक्तं कुलचन्द्रेण –

त्रैलोक्यविश्रुतिजुषश्चरकप्रधानान् लोकम्पृणप्रयतनान् विदुषः प्रणम्य।

सालस्य बालजनबोधविधानकारि ग्रथ्नामि किञ्चन कथञ्चन कौतुकेन ॥[१०६]

### २.२.१९. हरिवरिवस्या

कृतिरियं हरिवरिवस्या विशिष्टा तथाप्यप्रकाशिताऽस्ति। अस्मिन् काव्ये चत्वारो भागा एवोपलब्धाः सन्ति। तत्रत्यैकं पद्यम् –

गङ्गाधराय जगदर्चितजन्मजन्मप्रच्छन्नपातकविघातककीर्तनाय।

उत्तुङ्गशृङ्गहिमशैलतटाश्रयाय तापापहारिमहसे नम ईश्वराय ॥[१०७]

### २.२.२०. विष्णुसहस्रनामविवृतिः

कुलचन्द्रगौतमः २००९ तमे वैक्रमाब्दे वैशाखमासे विष्णुसहस्रनामकं सार्थाभिधानं ग्रन्थं प्राणैषीत्। अस्मिन् ग्रन्थे सहस्रपद्यानि सन्ति। 'विश्वं विष्णुर्वषट्कारः' इत्यत्र विश्वनाम्नो गौतम इत्थं विवृतिं कृतवान् –

समस्तवस्तुरूपाय विश्वस्मै हरये नमः।

विशोवाते (व्याप्नुवते) विश्वाय ब्रह्मणे नमः ॥ [१०८]

### २.२.२१. श्रीमद्भगवदवतारस्तवराजः

इदमपि कुलचन्द्रस्याप्रकाशितं स्तवकाव्यम्। अत्र त्रयस्त्रिंशत् पद्यानि सन्ति। पृथ्वीवृत्ते निबद्धमेतत् कुलचन्द्रेण २००९ तमे वैक्रमाब्दे प्रणीतम्। वाङ्मयीपूजाया अन्ते गौतमो लिखति –

भगवद्भक्तान् सकलान् धिनोतु नयनद्वयीं नीताः।

कुलचन्द्रगौतमकृता हरेरियं वाङ्मयी पूजा ॥ [१०९]

### २.२.२२. श्रीशक्तिस्तुतिकौमुदी

---

[१०६] पूर्ववत् पृ.१९५।

[१०७] पूर्ववत् पृ.१९९ ॥

[१०८] पूर्ववत् पृ.२०१।

[१०९] पूर्ववत् पृ.२०३।

कुलचन्द्रेण प्रणीतेयं स्तुतिकौमुदी स्वजीवनकाले शक्तिभक्तिं प्रदर्शयति। हरिणीवृत्तेऽष्टात्रिंशत् पद्यानि सन्ति। इयं स्तुतिकाव्यरूपा कविगृहे सुरक्षिताऽस्ति। उदाहरणार्थमेकं पद्यम् –

सुकृतिषु वससि त्वमेव श्रद्धाजननि ! न यामपरे जना लभन्ते ।

शिथिलितमृदुवाणि बद्धपाणिः प्रणतशिराः करवाणि वन्दनं ते ॥ [११०]

### २.२.२३. प्रातः स्मरणम्

अस्मिन् स्तोत्रकाव्ये कुलचन्द्रेणोनविंशतिसंख्यकानि पद्यानि रचितानि सन्ति। लघुकाव्ये शिष्टपरम्पराश्रितानां प्रातःस्मरणीयानां महापुरुषाणां क्रमेण युधिष्ठिरादीनां नामावल्यार्यावृत्ते प्राप्यते। नारदस्मरणविषयकमेकं पद्यम् –

असतां सङ्गात् विमुखश्चतुर्मुखोत्सङ्गसञ्जातः ।

हरिनामामृतवर्षी देवर्षिः श्रेयसे भवतु ॥ [१११]

### २.२.२४. श्रीवैष्णवषोडशनामावली

इयं श्रीवैष्णवषोडशनामावली कुलचन्द्रेण भुजङ्गप्रयातवृत्ते विष्णोर्नाम्नां वैशिष्ट्यविधायकानि षोडशपद्यानि रचितानि सन्ति। अधुना कविगृहे सुरक्षिताऽस्ति। एकं पद्यं दीयतेऽत्र –

निरालम्बताधायिनि व्यक्तबाधे प्रभूतप्रयासे प्रवासे प्रसक्तः ।

विहाय प्रमादं जगद्व्याप्तिभाजं त्रिपादं कृपालुं विराजं भजामि ॥ [११२]

### २.२.२५. गौतमवंशवृत्तम्

इदञ्च गौतमवंशवृत्तमप्रकाशितं वर्तते। अत्र नव परिच्छेदाः, ३८० संख्यकानि पद्यानि च सन्ति। अत्रिगोत्रीयाणां नेपाले गौतमोपाधिभाजां ब्राह्मणानां कान्यकुब्जान्नेपालागमनस्य, नेपाले वंशविस्तारस्य च वृत्तेन सहात्र कुलचन्द्रेण निजवंशपुरुषाणां प्रपितामह-पितामह-पितृपादादीनां यज्ञेश्वर-इच्छाराम-रामकान्तादीनां विस्तृता चर्चा विहिताऽस्ति। व्याकरणशास्त्रस्य च प्रयोगं करोति कुलचन्द्रोऽत्र वंशवृत्ते –

अश्नीतपिवताप्रीतचित्ता तेषां च गेहिनी ।

---

[११०] पूर्ववत् पृ.२०५ ।

[१११] पूर्ववत् पृ.२०६ ।

[११२] पूर्ववत् पृ.२०७ ।

अतन्द्रा वासरान् निन्ये स्वकीयैर्गृहकर्मभिः ॥

गृहान्तर्ववृते नित्यं मुदा पचतभृज्जता ॥ [११३]

### २.२.२६. अमरकोशपरिशेषः

कुलचन्द्रः कोशकाररूपेणापि परिचितोऽस्ति । अनेनामरकोशस्य विस्तृतव्याख्यावसरे समाजे प्रचलितानां व्यावहारिकाणां भाषाशब्दानां बहुप्रचलितेऽमरकोशे संस्कृतपर्यायशब्दाभावमनुभूय सर्वहिताय कोशगाम्भीर्याय च 'अमरकोशपरिशेषः' नामककोशो विरचितः । १९९३ तमे वैक्रमाब्दे प्रकाशितोऽस्ति । निर्माणप्रयोजनं व्याकुर्वन् स्वयं लिखति –

नामानि व्यवहार्याणां बोधयन् दिविषद्गिरा ।

छात्राणामुपयुक्तोऽयं परिशेषो विरच्यते ॥

इति लब्धान् समालोच्य निबन्धानाभिधानिकान् ।

निर्मितः परिशेषोऽयं स्याद् बुधानामपि प्रियः ॥

नाम्नां प्रसङ्गतः प्राप्तं तत्प्राचुर्याय दर्शितम् ।

क्वचित्क्वचिद्वर्तमानं पौनरुक्त्यं न दुष्यति ॥

वैक्रमेऽब्दे गुणाङ्काङ्कभू(१९९३)मिते नातिविस्तरः ।[११४]

### २.२.२७. अमरकोशः स्वयंबोधिनीव्याख्यासहितः

२०२६ तमे वैक्रमाब्दे प्रथमं नेपालराजकीयप्रज्ञाप्रतिष्ठानेन प्रकाशितोऽयं कोशः । अमरसिंहविरचितः कुलचन्द्रीयटीकासनाथितः कोशोऽयं महत्त्वपूर्णान् विषयान् धत्ते । गौतमो लिखति –

अलब्धोचिताध्यापकानां बटूनां धियः शुद्धिमाधातुमेषा प्रणीता ।

तृतीयेऽत्र काण्डे निबन्धेऽमरस्य स्वयंबोधिनी पूर्णभावं प्रपन्ना ॥[११५]

कुलचन्द्रगौतमस्यामरकोशस्य नेपालीटीका सर्वप्रथमं वि.सं.१९५८तमे वर्षे ढुण्डीराज-ऋषिकेशशर्मभ्यां हितचिन्तकमुद्रणालये काश्यां मुद्रिता प्राप्यते ।[११६] इयं टीका त्रिषु

---

[११३] पूर्ववत् पृ२१३ ।

[११४] पूर्ववत् पृ.२१९ ॥

[११५] पूर्ववत् पृ.२२५ ।

[११६] अधिकारी टीकारामः, **पं.कुलचन्द्रगौतम र उनको साहित्यसाधना** दाङ् नेपाल : महेन्द्रसंस्कृतविश्वविद्यालय, वि.सं.२०५६, पृ.१४२ ।

खण्डेषूपलब्धा । अस्याः पृष्ठसंख्या प्रथमखण्डस्य ११३, द्वितीयखण्डस्य २२३, तृतीयखण्डस्य १५७, पृष्ठानां योगः ४९३ वर्तते। एषा टीकादर्शधातुरूपावली सहितासीत्। आदर्शधातुरूपावली पृथक् च प्रकाशितासीत्।[११७]प्राध्यापकः अम्विकाप्रसाद अधिकारी च कुलचन्द्रस्यामरकोशस्य टीका वि.सं. १९५८ मनुते। २५वर्षे वयसि कुलचन्द्रेण स्वयं वैद्य, दत्तचर्यादयो ग्रन्थाः अमरकोशस्य टीका च लिखिताः। एतस्मादेव कुलचन्द्रः खलु सरस्वत्या वरदपुत्र एव। अस्यामरकोशस्य नेपालीटीकाद्वितीयैव। इयं स्वयंबोधिनीटीका तु शोधकर्तुर्मम शोधविषयोऽस्ति। अस्मिन् प्रबन्धे विस्तरेण दर्शयिष्यते।

**२.२.२८. संस्कृतनेपालीशब्दकोशः(लघुनामकोशः)**

नेपालीभाषाया भाषिकानाञ्च समृद्धये विदुषा कुलचन्द्रेण १९८३ तमे वैक्रमाब्दे लघुनामकोशनाम्ना नेपालीभाषात्मककोशग्रन्थः प्रणीतः। अयं २०५४ तमे वैक्रमाब्दे नेपालसंस्कृतविश्वविद्यालयेन प्रकाशितः। अस्मिन् कोशग्रन्थे ४०० पृष्ठानि सन्ति।[११८]

२.२.२९.शिवमहिम्नः स्तोत्रम् (नेपालीभाषानुवादटिप्पणीसहितम्)

पुष्पदन्तप्रणीतस्य शिवमहिम्नः स्तोत्रस्यानुवादः कुलचन्द्रेण कोमलकान्तपदावल्या कृतः। स्थले स्थले टिप्पणीरचनाञ्च विधाय कुलचन्द्रो नेपालीभाषाभाषिणां पाठकानां विदुषाञ्च परमुपकारं कृतवान्। यथा सर्वप्रथमश्लोकः –

महिम्नःपारं ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः।
अथाऽवाच्यः सर्वः स्वमतिपरिणामावधि गृणन्

---

[११७]पूर्ववत् पृ.१४३।

[११८]अन्वाहार्यम (न.) मासिक श्राद्ध

अपक्रिया (स्त्री.) १.अपकार, २.द्रोह

उल्ब (न) गर्भस्थानमा जमेको वीर्य र रजको नाम

नञ् (अव्यय) १.सादृश्य, २.अभाव, ३.अन्यत्व, ४.अल्पत्व, ५.अप्राशस्त्य, ६.विरोध। उदाहरणप्रधाना व्याख्या –

१.सादृश्य – "अब्राह्मण" ब्राह्मणसदृश क्षत्रिय हुनाले नञ्को अर्थ सादृश्य भयो।

२.अभाव – "न अस्ति" यहाँ नञ्को अर्थ अभाव भयो।

३.अन्यत्व – "अघट पट" यहाँ घट भिन्न पट बुझिनाले नञ्को अर्थ अन्यत्व भयो।

४.अल्पत्व – "अलवणा यवागूः" यहाँ नञ्को अर्थ (नून नभएको फाँडो अर्थ बुझाउन भन्दा नून नपुगेको जनिएकाले) अल्पत्व भयो।

५.अप्राशस्त्य – "अकाले अधीते" यहाँ नञ्को अर्थ (अकालमा पढ्छ) पढ्न नहुने समय बुझिनाले अप्रशंसनीयता बुझियो।

६.विरोध – "असुर" यहाँ नञ्को अर्थ सुर विरोधी दैत्य बुझिनाले विरोधी भयो।कुलचन्द्र गौतम, ***संस्कृत नेपाली शब्दकोश,*** दाङ् नेपाल : नेपाल संस्कृत विश्वविद्यालय, २०५४।

ममाप्येष स्तोत्रे हर र निरपवादः परिकरः ॥ [११९]

नेपालीव्याख्या कृतास्ति । –[१२०]

## २.२.३०. तुलसीदासकृतरामचरितमानस (नेपालीभाषानुवादसहितः)

जनकपुरस्थस्य मौनीबाबानाम्नो मुनेः प्रेरणया नेपालीभाषिणां सेवायै कुलचन्द्रेण विस्तृतया टीकया समलङ्कृत्य रामचरितमानसस्य भावबोधिनी नाम्नी टीका रचिता । अस्याः प्रकाशनं १९९६ तमे वैक्रमाब्दे काश्या ज्ञानमण्डलमुद्रणालयात् जातम् । यथा माहात्म्यम् –

वाल्मीकिस्तुलसीदासो भविष्यति कलौ युगे ।

---

[११९]पुष्पदन्त, **शिवमहिम्नः स्तोत्रम्,** गोरखपुर : गीताप्रेस, संस्करण ४४, वि.सं.२०६६ ।

[१२०] नेपालीव्याख्या –

हर = हे भक्तजनदुःखहारक, ते = हजूरका, महिम्नः = महिमाको–प्रभावको, परं पारम् = पल्लो पार कन, अविदुषः = न जान्ने मानिसको, स्तुतिः = स्तुति जो छ, यदि असदृशी = यदि अयोग्य छ, तत् = त्यसो भए ता, ब्रह्मादीनाम् अपि = ब्रह्मा आदि देवताका पनि, गिरः = वाणी जो छन् सो स्तुति वचन जो छन् सो, त्वयि = हजूरका हकमा, अवसन्नाः = खतम भएका छन् अर्थात् हजूरका स्तुतिमा ती वाणी लाग्न सक्दैनन्, अथ = यदि, स्वमतिपरिणामावधि = आफ्ना बुद्धिका डौडले भेटाएसम्म, गृणन् = स्तुति गर्न लागेको, सर्वः = सबै प्राणी, अवाच्यः = अनिन्दनीय छ, (तर्हि = त्यसो भए) मम अपि = मेरो पनि, स्तोत्रे = स्तुति गर्ने काममा, एष परिकरः = यो प्रयत्न, यो कम्मर कस्ने काम, निरपवादः = निन्दारहित छ, अनिन्द्य छ ।

भावार्थः –

स्तुति गरिने वस्तुका समस्त गुणको यथार्थ ज्ञान नभएका व्यक्तिले गरिएको स्तुति अनुचित हुन्छ । कसैले पनि अनुचितवादी हुनु हुँदैन । यही सिद्धान्त मानेका पक्षमा त ब्रह्माप्रभृति देवताका स्तुतिवाणी पनि अनुचित हुनाले (यथार्थतया हजूरका हकमा महिमाको पल्लो पार (इयत्ता) नजान्ने बोलेको हुनाले) हजूरका हकमा खतमै छन् । (निसाफ न भएका पक्षमा ब्रह्मा बृहस्पतिहरूले खामोश हुनु पर्दछ । स्तुति गर्न पाइदैन ।)

(ब्रह्माजस्ता प्रतिष्ठित पुरुषले अनुचित गर्न नहुने हुनाले चुपै लाग्नु पर्नेमा पनि यथाकथंचित् जो स्तुतिवाणी बोलेका छन् त्यताबाट)

आफ्ना आफ्ना बुद्धिका विकासको अनुसार स्तुति गर्दछ भने कुनै प्राणी निन्दनीय ठहरिदैन यस्तो नियम खडा गरेका पक्षमा त ब्रह्माजीको समकक्ष नभए पनि समानाधिकारतया तुल्यता पाउने हुनाले मैले पनि हजूरको स्तुति गर्नामा कम्मर कसें । मेरो यो प्रयत्न वास्तवमा अनुचित भए पनि सर्वदुःखहारी पुरारिका हजूरमा उचितै ठहरिएर मेरो उद्देश्य ( दुःखहरण) सिद्ध हुन आउला पहिलो सिद्धान्त सम्झेर त्यसै खुम्चिएँ भने प्रकारान्तरले मेरो उद्धार छैन ।

छायानुवादः –

प्रभावज्ञाता नै स्तुति विनतिमा योग्य छ भने

चुपै हूँला, भैगो, विधि ! गुरु खामोश गरियून् ।

यथाबुद्धि स्तोता जन पनि अनिन्द्यै छ त भने

कसें कम्मर शम्भो ! वचन सब निर्दोष दरियून् ॥नारायण गौतम, **कुलचन्द्रगौतमस्य काव्यात्मकसंस्कृतकृतीनां विश्लेषणम्,** ने.सं.वि., नेपाल : शोधग्रन्थ, वि.सं.२०५७, पृ.२३०–३१ ।

श्रीशङ्करकृतं ग्रन्थं पार्वतीं प्रतिबोधितुम् ॥
रामभक्तिप्रवाहार्थं स भाषायां करिष्यति
रामायणं मानसाख्यं तत्ते शङ्कां निवारयेत् ॥[१२१]

## २.२.३१. गौरीशङ्करगुटिका (सम्पादितो ग्रन्थः)

विदुषा कुलचन्द्रेण कर्मनिष्ठानां हिन्दूनां विशेषतो नेपालमूलानां कर्मकाण्डसम्पादनकर्मणि सौविध्याय कर्मकाण्डग्रन्थाः सम्पादिताः । तेषु गौरीशङ्करगुटिका नितरां लोकप्रिया जाता । इयं १९८४ तमे वैक्रमाब्दे प्रकाशिता । अस्मिन् ग्रन्थे सप्तत्रिंशत् शीर्षकानि सन्ति ।[१२२]

## २.२.३२. विवाहपद्धतिः

कुलचन्द्रेण साधनामये जीवनेऽनेकानि कार्याणि कृतानि । तेषु विवाहपद्धतिरेकाऽस्ति । अत्र समुचितमन्त्राणां शुद्धतया प्रयोगः सर्वोपकारकं विधिनिर्देशनं विवाहसंस्कार आवश्यकानां विषयाणां प्रतिपादनञ्चेति कार्याणि कृतानि सन्ति ।[१२३]

## २.२.३३. अलङ्कारचन्द्रोदयः

कुलचन्द्रगौतमेन नेपालीभाषायां प्रणीतोऽलङ्कारशास्त्रीयग्रन्थ एवालङ्कारचन्द्रोदयः । एषो ग्रन्थः १९७८ तमे वैक्रमाब्दे प्रकाशितः श्री ३ चन्द्रशमशेरस्य स्तुतिविषयककाव्यसमन्वितत्वाद् नेपालीभाषायाः स्तवकाव्यमपि वर्तते । प्रतिष्ठालाभाय कविनैषो ग्रन्थः प्रणीतःस्यात् । अत्र २६० पृष्ठानि सन्ति । तत्रत्यैकं पद्यम् –

धैर्यले भूमिको, तेजले सूर्यको, कान्तिले चन्द्रको, शान्तिले बुद्धको ।
श्रीमहाराजको तुल्यता देखियो, दानले कर्णको तुल्यता लेखियो ॥ [१२४]

---

[१२१]पूर्ववत् पृ.२३३ । भावबोधिनी –

वाल्मीकि नाम भएका (रामायणकर्ता) महामुनि कलियुगमा तुलसीदासकारूपले अवतार लिने छन् । पार्वतीजीलाई बुझाउनका निमित्त शिवजीले बनाएको ग्रन्थ (संस्कृतमानसरामायण) लाई रामभक्तिको अविछिन्न प्रवाह चलाउनका निमित्त तिनै तुलसीदास लौकिक भाषामा रचना गर्ने छन्, त्यही मानसरामायणले तिम्रो शङ्का हटाउला । तुलसीदास, ***रामायण*** ( माहात्म्य ६), वाराणसी : ज्ञानमण्डललिमिटेड, सन् १९६३, पृ.२६ ।

[१२२]पूर्ववत् पृ.२३५ ।

[१२३]पूर्ववत् पृ.२२६ ।

[१२४]नारायणः गौतमः, **कुलचन्द्रगौतमस्य काव्यात्मकसंस्कृतकृतीनां विश्लेषणम्,** ने.सं.वि., नेपाल : शोधग्रन्थ, वि.सं.२०५७, पृ.२३९ ।

धैर्येण भूम्याः, तेजसा सूर्यस्य, कान्त्या चन्द्रस्य, शान्त्या बुद्धस्य श्रीमहाराजस्य तुल्यता दृष्टा, दानेन कर्णस्य तुल्यता लिखिता ।

### २.२.३४. राघवालङ्कारः

कुलचन्द्रेण नेपालीभाषायां राघवालङ्कारनाम्नी कृतिः प्रणीताः । इयं कृतिः २०१५ तमे वैक्रमाब्दे प्रकाशिता च । नेपालीसाहित्यस्य समादरणीय आलङ्कारिकग्रन्थो वर्तते । अत्र २०० पृष्ठानि तथा १०३ संख्यका अलङ्काराः सन्ति । उदाहरणार्थं पद्यमेकम् –

करुणावतार ! भरताग्रज ! प्रभो !
हरिबक्सियो सकलभार भूमिको ।
गरिबक्सियो सुकृतको र वेदको
विपुल प्रचार कुलरीति नीतिको ॥ [१२५]

### २.२.३५. उन्मादः

कुलचन्द्रगौतमेनेदं 'उन्मादः' नामकं काव्यम् २०१० वैक्रमाब्दे प्रणीतम् । आर्यावृत्तेऽत्र सप्ततिसंख्यकानि पद्यानि सन्ति । उदाहरणमेकम् –

वटतरुदलपुटशायिन्र
अघटितघटनासहस्रसंघटक
भगवन् ! बालमुकुन्द !
प्रभुका पदमा म वन्दना गर्छु ॥ [१२६]

### २.२.३६. उपहारः (दुर्गे र पाहि माम्)

कुलचन्द्रगौतमेन १९९४ वैक्रमाब्दे प्रकाशितं दुर्गाभक्तिप्रधानं लघुकाव्यं भुजङ्गप्रयातवृत्ते नेपालीभाषायां रचितम् । तत्रैकं पद्यम् –

शरत्कालका चन्द्रका बिम्ब जस्तो
हजुर्को वदन् आज मन्मा उदायो ।
उदारा परब्रह्मकी ज्ञानधारा
अपारा हजुर्मा कहें हाल सारा ।[१२७]

---

[१२५] पूर्ववत् पृ.२४२ ।

[१२६] पूर्ववत् पृ.२४७ ।

[१२७] पूर्ववत् पृ.२५०।

अद्य मनसि भवत्याः शरत्कालचन्द्रबिम्बसदृशं वदनमुदितम् । भवती परब्रह्मण उदारा ज्ञानधारासि, भवत्यै संपूर्णं वृत्तं कथयामि ।

**२.२.३७. लोकशिक्षा (दत्तचर्या)**

इदं लोकशिक्षानामकं नेपालीकाव्यं श्रीमद्भागवतस्यैकादशस्कन्धे वर्णितानां दत्तात्रेयस्य चतुर्विंशतिसंख्यकानां गुरूणां वैशिष्ट्यं काव्यात्मकमार्गेण सरलतया सुन्दरीछन्दसि प्रणीतम् । १६ पृष्ठात्मकस्यास्य प्रकाशनसमयो न प्राप्यते। इयमेव कृतिर्दत्तचर्यापरनाम्ना विश्रुता चास्ति । यथा पृथिवीवैशिष्ट्यम् –

जति दिन्छ थिचो मिचो गरी जनले दुःख मलाई बेसरी
पृथिवी सरी धीरता धरी म रहन्छु सदा क्षमा गरी ॥
तृणले जलले र काष्ठले हितगर्ने धरणी सरी बनी
उपकार गरेर सर्वदा रहनू दुःख पराईको हरि ॥ [१२८]

जनो मां केनापि प्रकारेणातीव ताडयति, दुःखं ददाति । अहं पृथिवीवद्धैर्यं धृत्वा क्षमां कृत्वा यथा धरणी तृणेन, जलेन, काष्ठेन हितं करोति तद्वदहं सर्वदा परदुःखं हृत्वोपकरोमि ।

**२.२.३८. अलङ्कारसंग्रहः**

कुलचन्द्रेण चतुर्विंशतिसंख्यकानामलङ्काराणां परीक्षोपयोगिसंग्रहः कृतः । स एवालङ्कारसंग्रहो वर्तते । २०१५ तमे वैक्रमाब्दे वाराणस्यां प्रकाशितः । एतत्संख्यका अलङ्काराः राघवालङ्कारेऽन्तर्भूताः सन्ति । दृष्टान्तालङ्कारस्यैकमुदाहरणम् –

यो भूमण्डलमा प्रसिद्ध रहने राजा हजारौं थिए
यस्को इज्जत लोकपूज्यचरण-श्रीरामबाटै थियो ।
तारा मण्डल तेजिला गगनका सारा उदाई रहून्
त्यस्का इज्जतको समस्त गरिमा शीतांशुले नै लियो ॥[१२९]

अस्मिन् भूमण्डले सहस्रं राजान आसन् । अस्य संमानं लोकपूज्यचरणश्रीरामादभूत् । गगनस्योज्वलं तारामण्डलमुदयेत्तथापि शीतांशुरेव तस्य समस्तां ख्यातिं प्राप्नोति ।

**२.२.३९. सत्सङ्गमुक्तावली**

---

[१२८]पूर्ववत् पृ.२५१ ।

[१२९]पूर्ववत् पृ.२५२ ।

कुलचन्द्रपौत्रेण केशवचन्द्रगौतमेन पितामहस्य कृतिर्लोकहिताय २०१५ तमे वैक्रमाब्दे सत्सङ्गमुक्तावली प्रकाशिता । इयं राघवालङ्कारस्यैवांशभूताऽस्ति । पद्यमेकम् –

हे ऋद्धिसिद्धिप्रिय ! एकदन्त ! हेरम्ब ! लम्बोदर ! सिन्धुरास्य ! ।

हे पार्वतीनन्दन ! हे गणेश ! कृपाकटाक्ष प्रभुको म पाऊँ ॥ [१३०]

## २.२.४०. स्वयंवैद्यः

कुलचन्द्रेण नेपालीभाषायामायुर्वेदविषयको ग्रन्थो नेपालीभाषाभाषिजनानामुपकाराय १९७२ तमे वैक्रमाब्दे प्रणीय काश्यां प्रकाशितः । स्वयमाह –

प्रश्न –

वायु कुपित भएमा के हुन्छ ?

उत्तर –

वायु कुपित भएमा "कपाल कञ्चट-आँखिभौ-छाती-त्रिक, कम्मरको जोर्नी करङ्-जोर्नी २ का हाड्, कटि इन्मा दर्द हुन्छ । दिशा खलास हुँदैन, आङ् रुखा हुन्छ, निन्द्रा पर्दैन, पेट फुल्छ...............आदि ।"[१३१]

## २.२.४१. पुरुषार्थकल्पवल्ली

इदं काव्यं १९५६ तमे वैक्रमाब्दे प्रकाशितमिति घटराजभट्टराईसङ्कलितग्रन्थात् ज्ञायते । लघुपुस्तिकारूपेण प्रकाशितमधुना दुर्लभमस्ति । अस्य विषयवस्तु शीर्षकेन ज्ञायते ।[१३२]

## २.२.४२. तत्त्वबोधः

कृतिरियं पुस्तकरूपेण २०२७ तमे वैक्रमाब्दे प्रकाशिता लभ्यते । वेदान्तदर्शनस्य महत्त्वभाञ्जि तत्त्वान्यत्र सरलैः पद्यैः प्रकाशितानि सन्ति ।[१३३]

## २.२.४३. रामचरितमानससारः

इदं पुस्तकम् २०७१ तमे वैक्रमाब्दे तत्र भवतः कुलचन्द्रस्य परिवारेण प्रकाशितम् ।

## २.२.४४. दत्तचर्या (लोकशिक्षा)

इदं पुस्तकं लोकशिक्षायाः पर्यायवाचिनाम वर्तते चर्चितं पूर्वमेव ।

---

[१३०] पूर्ववत् पृ.२५२।

[१३१]पूर्ववत् पृ.२५४ ।

[१३२]पूर्ववत् पृ.२५५ ।

[१३३]पूर्ववत् ।

## २.२.४५ कोशसाहित्ये संस्कृतनेपालीभाषयोः प्रथमा कृतिः

विद्वच्छिरोमणिकुलचन्द्रगौतमेनामरकोशस्य नेपालीटीका सम्वत् १९५६ तमे वर्षे प्रकाशिता । नेपालीकोशस्येतिहासे नवीनकार्यारम्भोऽभूत् । अनेन संस्कृतनेपालीद्विभाषिककोशपरम्परा प्रचालिता । अत एषा कृतिः संस्कृतकोशपरम्परायामाधारिता महत्त्वपूर्णास्ति ।[१३४]

## २.३ कुलचन्द्रस्य वैयाकरणत्वम्

कुलचन्द्रगौतमो न केवलं साहित्यिकः परन्तु वैयाकरणोऽपि वर्तते । तस्य कृतौ सर्वत्रैव व्याकरणस्य प्रभावो दृश्यते । रचनां पठित्वा ज्ञायते सर्वैरसौ प्रतिभासम्पन्नो व्याकरणस्य चिन्तक आसीत् । यथा । –

प्रबोधाय प्राची प्रकृतिमुचितां प्रत्ययमथो, यथा दृष्टं लोके घटयति समुद्भावितपदे ।
कृतार्थानां शब्दागम इव बुधानां बहुमते, पतेयं त्वत्तोये सुरधुनि र कुतश्चिद्धुतभयः ॥[१३५]

गङ्गाजलं व्याकरणशास्त्रसदृशं वर्तत इति प्रतिपादयता कविना व्याकरणशास्त्रस्य शाब्दबोधार्थकः प्रबोधशब्दः, तिङ्घञादिप्रत्ययोत्पत्तिभूमिबोधकः प्रकृतिशब्दः,व्याकरणप्रसिद्धघञादिपदांशबोधकः प्रत्ययशब्दः, रामो भवतीत्यादिसुबन्ततिङन्तबोधकं समुद्भावितपदम्, व्याकरणशास्त्रबोधकश्च शब्दागमशब्दश्चात्र प्रयुक्ताः सन्ति । एतेन कवेर्व्याकरणवैदुषी विवृता भवति । अन्यच्च पद्यं यथा–

पदशासनदक्षया त्वया जनितः प्रत्यय ईदृशो दृशः ।
विधिना सकलापहारिणा लुलुपे क्विन्निव किन्नु सर्वतः ॥[१३६]

'त्यदादिषु दृशोऽनालोचने कञ्च' (पा.३।२।६०) इति सूत्रेण क्विन्प्रत्ययो भवति । 'वेरपृक्तस्य'( पा.६।१।६७)इति सूत्रेण तस्य लोपो विधीयते । इति व्याकरणनियमस्यानुभवं कुर्वता कविना लिखितः श्लोकोऽयम् ।

भाषाश्लेषः

---

[१३४] लंसाल रामचन्द्रः, ***कोशविज्ञान र नेपाली कोश,*** काठमाण्डौ : विद्यार्थी पुस्तक भण्डार, वि.सं. २०५७, पृ.२१२ ।

[१३५] गौतमः कुलचन्द्रः, गङ्गागौरवम्, ३५ ।

[१३६]पूर्ववत्, प्रपञ्चपञ्चासिका श्लो.२४ ।

तीव्र सन्ताप रहँदा अर्को रक्षक कोच्छ है ।

चन्द्र ! शीतल मेरा तिन् हर दुःख परम्परा ॥

इदं पद्यं नेपालीभाषायां संस्कृतभाषायाञ्च समानम्, परमर्थदृष्ट्या भिन्नम् ।

नेपालीभाषापरकोऽर्थो यथा–

भो चन्द्रशेखर र तीव्रसन्तापसमये भवन्तं विहायान्यो रक्षको नास्ति । मम दुःखत्रयं नाशयेति ।

संस्कृतभाषापरकोऽर्थो यथा–

कठोरसन्तापदाता सूर्यः सम्प्रति रक्षको भवितुं नार्हति, तस्मात् हे स्वभावशीतल ! विष्णुतनयरूप ! चन्द्र ! मम दुःखततीर्हर । अत्र कविः कुलचन्द्रोऽस्य पद्यस्य स्वयमित्थं व्याख्यानं कृतवान् – 'तीव्रस्य(कठोरस्य) संतापस्य (दुःखविशेषस्य) रहम् (अभावम्) द्यति ( खण्डयति) इति तीव्रसंतापरहदः, एतादृशः अर्कः (सूर्यः) अरक्षकः (अपालकोऽस्ति) माया ( लक्ष्म्याः) इराम् (रलयोरभेदादिरां नाम निवासभूमिभूतां विष्णुमूर्तिम्) अतति (गच्छति) नेत्ररूपेण प्राप्नोतीति मेराति, तत्सम्बुद्धौ हे मेरातिन् र अच्छः (प्रशन्नः) शीतल र हे चन्द्र र दुःखपरम्परा (क्लेशश्रेणी( हर (नाशय) इति संक्षेपार्थः ।

त्यागार्थकाद्रहतेर्घञर्थे कः, दोऽवखण्डन इत्यस्मात् कर्तरि विच् । अततेः सततगमनार्थकाण्णिनिः । वितर्कनार्कमार्तण्डेत्यादि, प्रसन्नोच्छ इति स्युः पाट् प्याट् अङ्ग है हे भो इति चामरः ।'

अनया व्याख्यया कविर्व्याकरणशास्त्रस्यापि विशिष्टो विद्वानासीदिति प्रमाणितं भवति । इत्थमेवानेका विशेषता अत्र ग्रन्थे सन्ति । केवलमिह दिग्दर्शनार्थं स्थालीपुलाकन्यायोऽङ्गी-कृतः।[१३७]

## २.४ कृष्णकर्णाभरणम्

कृष्णकर्णाभरणकाव्ये सिद्धान्तकौमुद्या लकारार्थप्रक्रियाया मूर्तमवतरणमस्ति । अत्र येषां पाणिनीयसूत्राणां कविना प्रयोगः परिकल्पितस्तानीमानि सन्ति –

क्रमाङ्काः सूत्राणि

१.अभिज्ञावचने लृट् (पा.३।२।११२)

२.न यदि (पा.३।२।११३)

---

[१३७]नारायणः गौतमः, **कुलचन्द्रगौतमस्य काव्यात्मकसंस्कृतकृतीनां विश्लेषणम्,** नेपाल : ने.सं.वि., शोधग्रन्थ, वि.सं.२०५७, पृ.२४० ।

३.विभाषा साकाङ्क्षे (पा.३।२।११४)

४.परोक्षे लिट्(पा.३।२।११५)

५.हशश्वतोर्लङ् च (पा.३।२।११६)

६.प्रश्ने चासन्नकाले (पा.३।२।११७)

७.लट् स्मे (पा.३।२।११८)

८.अपरोक्षे च (पा.३।२।११९)

९.ननौ पृष्टप्रतिवचने (पा.३।२।१२०)

१०.नन्वोर्विभाषा (पा.३।२।१२१)

११.पुरि लुङ् चास्मे (पा.३।२।१२२)

१२.यावत्पुरानिपातयोर्लट् (पा.३।३।४)

१३.विभाषा कदाकर्ह्योः (पा.३।३।५)

१४.किं वृत्ते लिप्सायाम् (पा.३।३।६)

१५.लिप्स्यमानसिद्धौ च (पा.३।३।७)

१६.लोडर्थलक्षणे च (पा.३।३।८)

१७.लिङ् चोर्ध्वमौहूर्तिके (पा.३।३।९)

१८.वर्तमानसामीप्ये वर्तमानवद्वा (पा.३।३।१३१)

१९.आशंसायां भूतवच्च (पा.३।३।१३२)

२०.क्षिप्रवचने लृट् (पा.३।३।१३३)

२१.आशंसावचने लिङ् (पा.३।३।१३४)

२२.नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोः (पा.३।३।१३५)

२३.भविष्यति मर्यादावचनेऽवरस्मिन् (पा.३।३।१३६)

२४.कालविभागे चानहोरात्राणाम् (पा.३।३।१३७)

२५.परस्मिन् विभाषा (पा.३।३।१३८)

२६.लिङ्निमित्ते लृङ् क्रियातिपत्तौ (पा.३।३।१४९)

२७.भूते च (पा.३।३।१४०)

२८.वोताप्योः (पा.३।३।१४१

२९.गर्हायां लडपिजात्वोः(पा.३।३।१४२)

३०.विभाषा कथमि लिङ् च (पा.३।३।१४३)

३१.किंवृत्ते लिङ्लृटौ (पा.३।३।१४४)

३२.अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि (पा.३।३।१४५)

३३.किङ्किलास्त्यर्थेषु लृट् (पा.३।३।१४६)

३४.जातुयदोर्लिङ् (पा.३।३।१४७)

३५.यच्चयत्रयोः (पा.३।३।१४८)

३६.गर्हायां च (पा.३।३।१४९)

३७.चित्रीकरणे च (पा.३।३।१५०)

३८.शेषे लृडयदौ (पा.३।३।१५१)

३९.उताप्योः समर्थयोर्लिङ्(पा.३।३।१५२)

४०.कामप्रवेदनेऽकच्चिति (पा.३।३।१५३)

४१.सम्भावनेऽलमिति चेत् सिद्धाप्रयोगे (पा.३।३।१५४)

४२.विभाषा धातौ सम्भावनवचनेऽयदि (पा.३।३।१५५)

४३.हेतुहेतुमतोर्लिङ् (पा.३।३।१५६)

४४.इच्छार्थेषु लिङ्लोटौ (पा.३।३।१५७)

४५.लिङ् च (पा.३।३।१५९)

४६.इच्छार्थेभ्यो विभाषा वर्तमाने (पा.३।३।१६०)

४७.विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् (पा.३।३।१६१)

४८.लोट् च (पा.३।३।१६२)

४९.प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च (पा.३।३।१६३)

५०.लिङ् चोर्ध्वमौहूर्तिके (पा.३।३।१६४)

५१.स्मे लोट् (पा.३।३।१६५)

५२.अधीष्टे च (पा.३।३।१६६)

५३.लिङ् यदि (पा.३।३।१६८)

५४.अर्हे कृत्यतृचश्च (पा.३।३।१६३)

५५.शकि लिङ् च (पा.३।३।१७२)

५६.धातुसम्बन्धे प्रत्ययाः (पा.३।४।१)

५७.क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः (पा.३।४।२)

५८.समुच्चयेऽन्यतरस्याम् (पा.३।४।३)

५९.यथाविध्यनुप्रयोगः पूर्वस्मिन् (पा.३।४।४)

६०.समुच्चये सामान्यवचनस्य (पा.३।४।५)

वार्तिकानि

१.अत्यन्तापह्नवे लिङ् वक्तव्यः (वा.) विभाषा साकाङ्क्षे (पा.३।२।११४)

२.यदाययोरुपसंख्यानम् (वा.) जातुयदोर्लिङ् (पा.३।३।१४७)

३.क्रियासमहारे द्वे वाच्ये (वा.) समुच्चये सामान्यवचनस्य (पा.३।४।५)

उदाहरणम्

उपसंहरसि स्म वैरिणः पितरौ मोचयसि स्म दुःखितौ ।
सफलीकुरुषे स्म वाञ्छितं परिपूर्णीकुरु तत्प्रतिश्रुतम् ॥

लट् स्मे(पा.३।२।११८) इति सूत्रस्योदाहरणं स्थालीपुलाकन्यायेनोद्धृतम् ।

व्याकरणशास्त्रीयलकारार्थप्रक्रियागतानां षष्टिसंख्याकसूत्राणामेकस्मिन् लघुखण्डकाव्ये समुचितानि शुद्धान्युदाहरणानि प्रदर्शयितुमित उत्कृष्टं विषयवस्तु नसंभवति । लकारविधायकानां पाणिनिसूत्राणां लक्ष्यभूतान्युदाहरणरूपाणि १९५ पद्यानि सन्ति ।'कुलचन्द्रः काव्यविषयाभिज्ञः कवितां रुचिरां रचयति परन्तु स व्याकरणं न जानाति' इति तदाक्षेपनिर्मूलनाय कविगौतमो लकारार्थप्रयोगप्रधानं काव्यमेतत् प्रणेतुमग्रेसरोऽभूदिति केचन अनुमिन्वन्ति । कविनास्मिन् काव्ये 'अभिज्ञावचने लृट्'(पा.३।२।११२)इत्यतः 'समुच्चये सामान्यवचनस्य' (पा.३।४।५) पर्यन्तं यानिसूत्राणि लडादिप्रत्ययविधायकानि सन्ति, तेषां मध्ये स्थितानि कृत्यप्रत्ययविधायकानि सूत्राणि विहाय षष्टिसूत्रैर्वार्तिकैश्च विहितानां लकाराणां प्रयोगाः श्लोकात्मकेषु सरसेषूदाहरणेषु प्रत्ताः सन्ति । कविना कुलचन्द्रेण वस्तुतः सिद्धान्तकौमुद्यधीता । सिद्धान्तकौमुद्यनुसारेण सर्वेषां सूत्राणामर्थाः प्रदर्शिताः । सूत्रविन्यासक्रमः पाणिनीयाष्टकक्रम एवास्ति ।

न्यूनमहत्त्वानि सूत्राणि विचार्य कविनेमानि सूत्राणि त्यक्तानि । यथा–

क्रमाङ्काः सूत्राणि

१.वर्तमाने लट् (पा.३।२।१२३)

२.लृट् शेषे च (पा.३।३।१३)

३.अनद्यतने लुट् (पा.३।३।१५)

४.लुङ् (पा.३।२।११०)

५.अनद्यतने लङ् (पा.३।२।१११)

६.आशिषि लिङ्लोटौ (पा.३।२।१७३)

७.माङि लुङ् (पा.३।३।१७५)

८.स्मोत्तरे लङ् च (पा.३।२।१७६)

कृष्णकर्णाभरणं काव्यं पाश्चात्याः समीक्षणशीलाः पठेयुस्तर्हि अष्टसूत्रपरित्यागं त्रुटिपूर्णं कथयेयुः। सिद्धान्तकौमुद्याः संस्कारस्य प्राबल्येनोद्बुद्धत्वादीदृशी त्रुटिन्यूनतासञ्जाता वेत्यवगम्यते। ईदृशं काव्यं नैपालकानां कवीनां काव्येषु एकमिदमेवास्ति। व्याकरणविषयकप्रेक्षायां ललितपदावलीयुतकाव्यरचनायां समानी प्रतिभा कुलचन्द्र एव समभवत् नान्येषु इति च सर्वैरवगन्तव्यम्।[१३८]

## २.५.स्वदेशप्रेम

स्वदेशस्य स्वजातेश्च गुणवर्णनं गौरवाय भवति। कोऽप्यन्यत्सर्वं विस्मरति तथापि स्वदेशं स्वजातिञ्च विस्मर्तुं न शक्नोति। यथा रामो लक्ष्मणं प्रति वदति 'अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते। जननी जन्मभूमिश्च स्वर्गादपि गरीयसी॥' तद्वत् कुलचन्द्रोऽपि स्वदेशस्य वीरतां प्रति सौहार्दं प्रकटयन् गर्वं कुर्वन् 'प्रायः' शब्दस्योदाहरणे गोरक्षदेशजा नराः प्रायेण शूरा ईक्ष्यन्त इति वाक्यं रचयति।

प्रायेण शूरा ईक्ष्यन्ते नरा गोरक्षदेशजाः।[१३९]

## २.६ स्वाभाविकं वर्णनम्

समाजे यत्र कुत्रापि व्यवहारा भवन्ति। तत्र स्वाभाविकं वर्णनं सुन्दरं भवति। अत्रापि व्याख्याकारः कुलचन्द्रः 'सकृत्' शब्दस्योदाहरणे नेपालीयसमाजस्य तात्कालिकीं स्थितिमनुकुर्वन् वदति यथा शिशवः कक्षविन्यस्तपुस्तका गच्छन्ति, राजानः सकृद्वदन्ति, कन्या सकृत्प्रदीयते।

सकृद्गच्छन्ति शिशवः कक्षविन्यस्तपुस्तकाः।

सकृज्जल्पन्ति राजानः सकृत्कन्या प्रदीयते॥[१४०]

## २.७.अध्ययनचिन्ता

---

[१३८] पूर्ववत् पृ.१३९।

[१३९] गौतमः कुलचन्द्रः, **अमरकोश** (स्वयंबोधिनी टीका), काठमाण्डौ : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६, पृ.२४५।

[१४०] आचार्यः नारायणः, ***सुभाषितरत्नभाण्डागारम्,*** दिल्ली : मुन्सीराम मनोहरलाल, सन् १९५२, पृ.३७७।

यदि स्वदेशे ज्ञानस्य विज्ञानस्य च ह्रासो भवेत्तर्हि सुकृतिजनश्चिन्तां करोत्येव। गौतमोऽपि प्रकटयत्येवं 'प्रति' शब्दस्योदाहरणे । सामान्याः पाश्चात्या अपि प्रकृतिं (विज्ञानम्) प्रत्यनुरागवन्तोऽभूवन्। भारतीयाः (पौरस्त्याः) अप्यधुना भारतीं (ज्ञानम्) प्रति संलग्ना नाभूवन्निति।

प्रकृता अपि पाश्चात्त्या अभूवन् प्रकृतिं प्रति।

भारतीया अपि पुनर्नाभूवन् भारतीं प्रति॥[१४१]

## २.८ सात्त्विकाहारः

लेखक आचारविषयेऽपि शास्त्रमनुसृत्य चिन्तां करोति । 'अपि' शब्दस्योदाहरणे कुलचन्द्रो लिखति –

अनयः ! त्रपिष्णुर्विप्रपुत्रो भवन् लशुनमपि ग्रसते।

लशुनमपि विप्रपुत्रोऽनय ! त्रपिष्णुर्भवन् ग्रसते।[१४२]

## २.९.स्वयंबोधिनीटीकाया उद्देश्यम्

कुलचन्द्रगौतमेन कृता स्वयंबोधिनीटीका छात्रवर्गस्य कृतेऽत्युपयोगिन्यस्ति। स्वयं बोधयतीति स्वयंबोधिनीति व्युत्पत्याऽन्वर्थेनैव ज्ञायतेऽर्थः, अथवा पाठकाः स्वयं जानन्ति नैवावश्यकं शिक्षकाणाम्। अस्यां टीकायां सरलतया शब्दानामर्था प्रत्ताः सन्ति। रामाश्रमीवत् विस्तृता नास्ति तथैवातीव संक्षिप्तापि नास्ति। एषा टीका नैपालकपाठकानां कृते हितकारिण्यस्ति। टीकाविषये स्वयं लिखति कुलचन्द्रो यथा–

अलब्धोचिताध्यापकानां शिशूनां धियः शुद्धिमाधातुमेषा प्रणीता।[१४३]

यदि कुशलशिक्षक उपलब्धो भवेत् तथा व्याकरणज्ञानं भवेत् तदा तु छात्रोऽमरकोशस्य स्वयं ज्ञानं प्राप्तुं शक्नोति सरलतया। यदि शिक्षकोऽपि न भवेत्, व्याकरणज्ञानमपि नभवेत् तदैषा स्वयंबोधिनीटीकोपकारिका भवति। अस्याष्टीकाया ज्ञानेन शास्त्रान्तरं ज्ञातुं तथा व्यवहारकाले च सहजरूपेण छात्रः कार्यं साधयितुं शक्नोति। कुलचन्द्रो विचार्य छात्रान् प्रति हार्दिकतया वदति यथा – आश्चर्यस्य विषयो नास्ति, इमममरकोशं

---

[१४१] गौतमः कुलचन्द्रः, **अमरकोश** (स्वयंबोधिनी टीका), काठमाण्डौ : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६, पृ.२६६।

[१४२] पूर्ववत् पृ.२६९।

[१४३] पूर्ववत् पृ.३१६।क्ष

जानिहि, कण्ठस्थं कुरु, विद्वान् भव, यदि कोशं विना भाष्यान्तरं पठसि तर्हि कोऽपि लेखं याचेत् तर्हि काठिन्येनैव लिखितुं शक्यते ।[144]

तथैव मङ्गलश्लोके लिखति कुलचन्द्रो यथा – पूर्वं शिष्टाचारपूर्वकं मङ्गलं कृत्वा गणेशस्य पित्रोर्भवानीशङ्करयोः प्रणामं कृत्वा वस्तुनिर्देशनात्मकं वाक्यं लिखति। बुधजनागाधश्रमध्वंसिनी तथैव मेधया दरिद्रबालानां बोधविषय एषा स्वयंबोधिनीटीका कुलचन्द्रेण निबध्यते यथा–

श्रीमन्मङ्गलवर्ष्मणो गणपतेर्गीर्देवताया गुरो-
श्चित्तान्तर्गतयोः प्रणम्य पदयोर्द्वन्द्वं दयापूर्णयोः ।
एषा कापि निबध्यते बुधजनागाधश्रमध्वंसिनी
मेधादुर्विधबालबोधविषये टीका स्वयंबोधिनी ॥[145]

एतैरुदाहरणैर्ज्ञायते यद्येषा टीका शिशूनां तथा छात्राणां बुद्धिदायिनी, शिक्षकाणां तथा विदुषांश्रमहारिणी व्यवहारकाले उपयोगिनी, शब्दसमस्यानां समाधायिनी चास्ति। नेपालीभाषायां सर्वप्रथमैषा टीका पाठकानां प्रियास्त्येव। नैपालकानां शिशूनां त्वेषा सर्वोपकारिकास्ति तथा चापरा टीकापि नास्त्येव। तस्मादेषा टीकोत्कृष्टाऽस्तीति स्वतः प्रमाणीभवति। प्रकाशनसमयादद्यतनं यावत् स्वयंबोधिनी टीका पाठकानां मनांसि रञ्जयति, बोधयति, प्रकाशयति च। अन्यच्चान्ते कथयति कुलचन्द्रः–

बुभुत्सूनुत्सुकान् बालान् बिधित्सुः सावलम्बनान् ।
टीकामेतां व्यरचयत् कुलचन्द्रः कृतश्रमः ॥[146]

## २.१० अध्यायनिष्कर्षः

वाङ्मये कोशसाहित्यस्य महत्त्वपूर्णा भूमिकास्ति। अर्थज्ञानार्थं कोशव्याकरणे साधने स्तः। तस्मात् कोशव्याकरणयोः साहचर्यमस्ति। यथा व्यवहारार्थं द्रव्यकोशस्यावश्यकता

---

[144] पूर्ववत् भूमिका पृ.ङ ।

हरे ! यत्ति न हो कोश बुझ कण्ठस्थ यो गर ।
अनि ग्रन्थान्तर पढ होउ विद्वान् सरासर ॥
यथार्थ यत्ति नबुझी भाष्यान्तर पढदा पनी ।
कसैले लेख मागेमा लेख्नु पर्छ कनीकनी ॥

[145] पूर्ववत् पृ.१।

[146] पूर्ववत् तृतीयकाण्डान्ते पृ.३१६ ।

वर्तते तथैवार्थज्ञानार्थं शब्दकोशस्यावश्यकतास्ति। सर्वप्रथमकोशो निघण्टुरासीत् ततस्तस्य व्याख्यानरूपेण यास्कस्य निरुक्तं जातम्। यथा सर्वेषु व्याकरणेषु पाणिनीयं व्याकरणं प्रसिद्धमधिवर्तते तथैव सर्वेषु कोशेष्वमरसिंहस्य नामलिङ्गानुशासनमधिवर्तते संस्कृतजगति। शताधिकं कोशाः कोशकाराश्च सन्ति तथाप्यमरकोशः सर्वोत्कृष्टोऽस्ति। अमरकोशस्यार्धशतं विविधाः टीकाः सन्ति। तासु टीकासु भानुजिप्रणीता सुधाटीका प्रसिद्धास्ति। नेपालीभाषायां कुलचन्द्रगौतमेन स्वयंबोधिनीनामिका टीका प्रणीतामरकोशस्य। सरस्वत्या वरदपुत्रेण कुलचन्द्रेण कुशाग्रीयया बुद्ध्यैषा टीका प्रणीता। कुलचन्द्रेणामरकोशं हस्तामलकवद् विचार्य सपरिश्रमेण प्रणीता टीका। साहित्यिककुलचन्द्रेण व्याकरणमप्यधीतमेव तस्य प्रमाणं कृष्णकर्णाभरणं व्याकरणपरको ग्रन्थो विद्यते। एषा स्वयंबोधिनीनाम्नी टीका पाठकानां हितकारिणी व्यावहारोपयोगिनी च वर्तते।

# तृतीयोऽध्यायः

# ३.अमरकोशस्य स्वयंबोधिनीटीकागतपदानां व्युत्पत्तिप्रदर्शनम्

## विषयप्रवेशः

अस्मिन्नध्याये स्वयंबोधिनीटीकायां स्थितानां टिप्पणीनां समस्तशब्दानाम - नेकरूपशब्दानामुदाहरणानाञ्च विशेषविमर्शनं क्रियते । अध्ययनक्रमे पूर्वं समस्तशब्दानां टिप्पणीस्थशब्दानां बहुरूपशब्दानां तथैवाव्ययशब्दानामुदाहरणानि प्रस्तूयन्ते ।

## ३.१.अमरकोशस्य स्वयंबोधिनीटीकायां स्थिताष्टिप्पण्यः

### शब्दार्थदृष्ट्या पर्यालोचनम्

सर्वेषु कोशेषु काश्चन टिप्पण्यः प्राप्यन्ते। टीकाकारैस्तु सर्वैः स्वकीयासु टीकासु टिप्पण्यः कृता एव। केचन विद्वांसः पाठटिप्पणीं, केचन विद्वांसः पादटिप्पणीं ददति। टिप्पण्याः कारणादेव प्राचीनलुप्तकोशानां संख्या गणयितुं शक्यते। अधुना कोशा लुप्तास्तथापि तेषां नामानि टिप्पण्यश्च प्राप्यन्ते। निर्णयकुशलो विद्वान् टीकाकारः शब्दानामर्थं निश्चित्य टिप्पणीं ददाति। अस्य कोशस्य टिप्पण्यां विशेषताऽस्त्येव। काश्चन टिप्पण्यो भानुजिदीक्षितप्रणीतायाः सुधाटीकाया उद्धृताः सन्ति। वनस्पतिवाचकशब्देषु तु प्रायो भावप्रकाशग्रन्थादुद्धृताः सन्ति। वनौषधिवर्गेषु स्वयमपि शब्दार्थविषये काठिन्यमनुभवति कुलचन्द्रः। स्वयं वनौषधिवर्गान्ते लिखति पद्यगिरा लोकभाषायां नेपाल्यां संस्कृतवाण्याञ्च। यथा–

अनैकमत्याच्चलिताच्चिरन्तनाद्वनौषधीनामधुनातनैर्जनैः ।
असाधनैः साधुतया प्रबोधनं न साध्यमस्तीत्यवधार्यते बुधैः ॥१॥
अलब्धसन्निबन्धानां मन्निबन्धोऽपि मञ्जुलः ।
इष्टो भवत्यभवतो भवन् काणोऽपि मातुलः ॥२॥[१४७]

---

[१४७]कुलचन्द गौतम, **अमरकोशः** (स्वयंबोधिनी टीका), कठमाण्डौ : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६, पृ.१०७

ऐकमत्य नमिल्दामा सत्य दुर्लभ नै थियो ।
तुल्यसंमतिबाहुल्य लिएर यहि लेखियो ॥१॥
अरु छैनन् यही टीका रटेमा काम बन्दछ ।
सद्दे-मामा नपायेमा कानू पनि पसन्द छ ॥२॥

अस्यां टिप्पण्यां कुत्रचित् शब्दानां परिभाषा कुत्रचित् शब्दानामर्थः कुत्रचित् शब्दानां भेदा दत्ताः सन्ति । प्रायः पादटिप्पण्यः काश्चन पाठटिप्पण्यश्च दृश्यन्ते । कासाञ्चित् टिप्पणीनां स्रोतो (ग्रन्थनाम) दत्तमस्ति, कासाञ्चित्तु मूलं न प्राप्यते स्रोतश्चिन्त्यमन्वेषणीयञ्चास्ति । मूलोक्तार्थस्य टिप्पणीगतार्थस्य च स्फुटतासम्पादनाय व्युत्पादनं क्रियते गौतमकृतानाम् । अस्मिन् विषये विवृतिपूर्वकं क्रियते विचारः । मूलोक्तार्थस्य टिप्पणीगतार्थस्य च स्फुटतासम्पादनाय मत्प्रबन्धे शब्दानां व्युत्पादनं क्रियते गौतमकृतानां टिप्पणीनाम् ।

### ३.१.१ स्वर्गवर्गः

स्वर्गवर्गात्-अप्सरस्-अष्टमूर्ति-ऐश्वर्य-काम-गन्धर्व-निधि-वायु-सप्तमातृका-सप्तार्चि-सुदर्शनशब्दानां टिप्पण्यः –

#### ३.१.१.१ अप्सरश्शब्दः । प्र.१०६, (१,१।५५) ।

अप्सरसः–अद्भ्यः सरन्तीति विग्रहे “सरतेरसुन्” (उ.२।३७) इति सूत्रेणाऽसुन्प्रत्यये “अप्सरसः” इति ।

अयं शब्दः ‘अप्सराः स्त्रियाम्’ (पा.लि.१५३) इति सूत्रेण स्त्रीलिङ्गे बहुवचने च वर्तते । तथापि कुत्रचिदेकवचनेऽपि दृश्यते । एकवचने भाष्यकारेण “अनचि च” (पा.८।४।४७) इति सूत्रे “अप्सराः” इति शब्दो दत्तोऽस्ति ।[१४८]महाकविना कालिदासेनापि शाकुन्तलनाटके “सानुमती नाम अप्सराः” इति प्रयुक्तमस्ति शब्दः ।[१४९] अप्सरसो नामानि यथा–

उर्वशी मेनका रम्भा घृताची च तिलोत्तमा ।
सुकेशी-मञ्जुघोषाद्याः कथ्यन्तेऽप्सरसो बुधैः ॥[१५०]

#### ३.१.१.२ अष्टमूर्तिशब्दः। प्र.६८, (१।१। श्लो. क्षेपकः) ।

अष्टमूर्तिः– अष्टौ मूर्तयो यस्य स इति विग्रहे बहुव्रीहिसमासः । अष्टमूतिर्महादेवस्य नाम । ‘देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि’ ( लिङ्गानुशासनम्

---

[१४८]पतञ्जलिः (सम्पा.दधिराम शर्मा), ***व्याकरणमहाभाष्यम्*** ( अनचि च’ (पा.सू.८।४।४७), वाराणसीः चौखम्बा संस्कृत प्रतिष्ठान, सन्२०००, पृ.२२९ ।
शरः खयः ॥ इति वक्तव्यम् । किमुदाहरणम् ? ॥ यदि ‘शर’ पञ्चमी ‘खय’ षष्ठी ‘स्थ्याली स्थ्यायते’ इत्युदाहरणम् । अथ ‘खय’ इति पञ्चमी ‘शर’ इति षष्ठी ‘वत्स्स(रः) क्ष्षीरम् अप्स्सरा इत्युदाहरणम् ।

[१४९] कालिदासः (सम्पा.कृपामणि तिवारी) ***अभिज्ञानशाकुन्तलम्*** (अङ्कः ६), वाराणसी : चौखम्बा संस्कृत प्रतिष्ठान, सन् २००६, पृ.२९२ ।
ततः प्रविशत्याकाशयानेन सानुमती नामाप्सराः ।

[१५०] आप्ट शिवरामः, ***संस्कृत हिन्दी कोश,***वाराणसी : भारतीय विद्याप्रकाशन, सन् २००१ ।
अप्सु निर्मथनादेव रसात्तस्माद्वरस्त्रियः । उत्पेतुर्मनुजश्रेष्ठ तस्मादप्सरसोऽभवन् ॥

४३ ) इति पुंलिङ्गत्वम् । 'पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुराः ।' ( अ.लि. ११ ) इति च पुंस्त्वम् । अष्टौ मूर्तयो यथा–

पृथिवी सलिलं तेजो वायुराकाशमेव च ।

सूर्यश्चद्रमसौ सोमयाजी चेत्यष्टमूर्तयः ॥[१५१]

**३.१.१.३ ऐश्वर्यशब्दः । प्र. ७१, (१।१।३८) ।** ऐश्वर्यम् – ईश्वरस्य भाव इति विग्रहे "गुणवचनब्राह्मणादिभ्यः कर्मणि च"इति ष्यञ्प्रत्ययेऽनुबन्धलोपे भत्वादकारलोप आदिवृद्धौ "ऐश्वर्यम्"'त्वष्यञौ तद्धितौ' (पा.लि. १२१ ) इति नपुंसकत्वम् । अष्टैश्वर्यस्य सिद्धीनां वा नामानि यथा–

अणिमा महिमा चैव गरिमा लघिमा तथा ।

प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टसिद्धयः ॥[१५२]

**३.१.१.४ कामशब्दः । प्र.४६, (१।१।२७) ।**

कामः – काम्यतेऽनेनेति विग्रहे "कमु कान्तौ, (भ्वा.प.से.४७३) इति धातोः "कमेर्णिङ्" ( पा.३।१।३०) इति सूत्रेण स्वार्थे णिङ्युपधादीर्घे कामीति जाते "पुंसि संज्ञायां घः प्रायेण" ( पा.३।३।११८) इति सूत्रेण घप्रत्ययेऽनुबन्धलोपे 'कामि अ' इति जाते 'णेरनिटि' (पा.६।४।५१) इति णिलोपे स्वादिकार्ये "कामः" इति । 'देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्त-स्तनभुजकण्ठखड्गशरपङ्काभिधानानि' ( लिङ्गानुशासनम् ४३ ) इति पुंलिङ्गत्वम् । 'घाजन्तश्च' ( पा.लि. ३७ ) इति च पुंस्त्वम् । 'पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुराः ।' ( अ.लि. ११ ) इति च पुंस्त्वम् । कामस्य सायकानां कर्मणाञ्च नामानि । यथा –

सायकाः – अरविन्दमशोकं च चूतं च नवमल्लिका ।

नीलोत्पलं च पञ्चैते पञ्चसायकसायकाः ॥[१५३]

कर्माणि– उन्मादनस्तापनं च शोषणःस्तम्भनस्तथा ।

संमोहनश्च कामस्य पञ्चबाणाः प्रकीर्तिताः ॥[१५४]

---

[१५१]तारानाथतर्कवाचस्पतिभट्टाचार्य, ***वाचस्पत्यम्,*** वाराणसी : संस्कृत सीरीज अफिस, वि.सं.२०२५, पृ.५२० । क्षितिर्जलं तथा तेजो वायुराकाशमेव च । यष्ट्यर्कश्च तथा चन्द्रः मूर्तयोऽष्टौ पिनाकिनः ॥

[१५२]superhuman powers
N . G . Sardesai , D . G . Padhye ***Amarakośa of Amarasingh,*** Varanasi : Chowkhmba Vidyabhwan , 2009, p. 5 .

[१५३] दीक्षितः भानुजि, ***अमरकोश*** (सुधाटीका १।१।२५) वाराणसी : चौखम्बा संस्कृत प्रतिष्ठान, सन् २०११, पृ.१२ ।

**३.१.१.५ गन्धर्वशब्दः । प्र.१०७, (१।१।५५) ।**

गन्धर्वः–गन्धं सौरभमर्वतीति विग्रहे "अर्व गतौ" (भ्वा.प.से.४४३) इति धातोः"कर्मण्यण्" ( पा.३।२।१) इत्यण्प्रत्यय उपपदसमासे "शकन्ध्वादिषु पररूपं वाच्यम्" इति वार्तिकेन पररूपे "गन्धर्वः" इति । 'देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि' ( पा.लि. ४३ ) इति पुंलिङ्गत्वम् । 'पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुराः ।' ( अ.लि. ११ ) इति च पुंस्त्वम् । गन्धर्वस्य भेदाः–

हाहा हूहूश्चित्ररथो हंसो विश्वावसुस्तथा ।

गोमायुस्तुम्बुरुर्नन्दिरेवमाद्याश्च ते स्मृताः ॥[१५५]

**३.१.१.६ निधिशब्दः । प्र. १४८, (१।१।७५) ।**

निधिः – नितरां धीयत इति विग्रहे "डुधाञ् धारणपोषणयोः,दाने च" (जु.प.अ.११६७) इति धातोः"दाधा घ्वदाप्" (पा.१।१।२०) इति घुसंज्ञायां "उपसर्गे घोः किः" (पा.३।३।९२) इति सूत्रेण किप्रत्ययेऽनुबन्धलोपे "आतो लोप इटि च" (पा.६।४।६४) इत्याकारलोपे "निधिः" इति । ' क्यन्तो घुः' ( पा.लि. ४१ ) इति पुंस्त्वम् । तस्य भेदाः –

महापद्मश्च पद्मश्च शङ्खो मकरकच्छपौ ।

मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नव ॥[१५६]

**३.१.१.७ वायुशब्दः । प्र. १३३, (१।१।६७) ।**

वायुः–वातीति विग्रहे "वा गतिगन्धनयोः" (अ.प.अ.११२६) इति धातोः "कृवापाजिमिस्वदिसाध्यशूभ्य उण्" (उ.१।१) इत्युण्प्रत्यये 'वा उ' इति जाते "आतो युक्चिण्कृतोः" (पा.७।३।३३) इति युगागमे "वायुः" इति । 'देवासुरात्मस्वर्गगिरिसमुद्रनख-केशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि' ( पा.लि. ४३ ) इति पुंलिङ्गत्वम् । 'पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुराः ।' ( अ.लि. ११ ) इति च पुंस्त्वम् । शरीरे वायोः स्थानानि यथा –

हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले ।

उदानः कण्ठदेशे स्याद् व्यानः सर्वशरीरगः ॥[१५७]

---

[१५४] पूर्ववत् पृ.१२ ।

[१५५] गौतमः कुलचन्द्रः, **अमरकोश** (स्वयंबोधिनी टीका), काठमाण्डौ : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६, पृ.१४ ।

[१५६] पूर्ववत् पृ.१८।

[१५७]व्यासः, ***गरुडपुराण*** (प्रेतकल्पअ.१५ श्लो.३७ ) कचौडीगली वाराणसी : जय नेपाल प्रकाशन, वि.सं.२०४०, पृ.१९४ ।

अन्नप्रवेशनं मूत्राद्युत्सर्गोऽन्नादिपाचनम् ।

भाषणादि-निमेषाश्च तद्व्यापाराः क्रमादमी ॥

**३.१.१.८ सप्तमातृकाशब्दः । प्र. ७०, (१।१।३७) ।**

मातरः – मान्यन्ते = पूज्यन्त इति विग्रहे “मान पूजायाम्”(चु.प.से. १९७६) इति धातोः “नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृदुहितृ” (उ.२।९५) इति सूत्रेण निपातनात् तृच्प्रत्यये “मातृ”इति जाते जसि “मातरः” इति । ‘ॠकारान्ता मातृदुहितृस्वसृननान्दरः’ ( पा.लि. २ ) इति स्त्रीत्वम् । सप्तमातॄणां नामानि यथा–

ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।

वाराही च तथेन्द्राणी चामुण्डा सप्तमातरः ॥[१५८]

**३.१.१.९ सप्तार्चिशब्दः । प्र. ११४, (१।१।५९) ।**

सप्तार्चिः–सप्त अर्चिषः (जिह्वाः) यस्येति विग्रहे “अनेकमन्यपदार्थे” (पा.२।२।२४) इति बहुव्रीहिसमासे सवर्णदीर्घे “सप्तार्चिः” इति अग्नेर्नाम । ‘अर्चिः स्त्रियां च’ ( पा.लि. १३५ ) इति नपुंसकत्वं स्त्रीत्वं च । समस्तशब्दस्याग्निवाचकस्य तु ‘देवासुरात्मस्वर्गगिरिसमुद्र-नखकेशदन्तस्तनभुजकण्ठखड्गशर-पङ्काभिधानानि’ ( पा.लि. ४३ ) इति पुंलिङ्गत्वम् । ‘पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुराः ।’ ( अ.लि. ११ ) इति च पुंस्त्वम् । अर्चिषो भेदाः – काली-कराली-मनोजवा-सुलोहिता-सुधूम्रवर्णी-स्फूलिङ्गिनी-विश्वदाशाख्याः सप्त वह्नेर्जिह्वाः ।

**३.१.१.१० सुदर्शनशब्दः । प्र. ५१, (१।१।२९) ।**

सुदर्शनम् – शोभनं दर्शनमस्येति विग्रहे “दृशिर् प्रेक्षणे” (भ्वा.प.अ.१०५७) इति धातोः“भाषायां शाासियुधिदृशिधृषिमृषिभ्यो युज्वाच्यः (वा.३।३।१२८) इति वार्तिकेन युच्प्रत्ययेऽनादेशे “अनेकमन्यपदार्थे” (पा.२.२.२४) इति सूत्रेण बहुव्रीहिसमासे स्वादिकार्ये “सुदर्शनम्” इति । एतत् विष्णुचक्रस्य नाम, नपुंसकत्वेऽपि पुलिङ्गेऽपि दृश्यत इति लिखति कुलचन्द्रः । यथा–

तस्य नेष्यति वपुः कबन्धतां बन्धुरेष जगतां सुदर्शनः । इति माघकाव्ये प्रयोगः ।

## ३.१.२.दिग्वर्गः

दिग्वर्गात्-नक्षत्र-परिवेष-पारिपार्श्विक-सप्तर्षिशब्दानां टिप्पण्यः –

**३.१.२.१ नक्षत्रशब्दः । प्र.१९९, (१।३।२१) ।**

---

[१५८]अमरसिंहः (सम्पा.ब्रह्मानन्द त्रिपाठी), ***अमरकोशः*** (स्व.व.,क्षे.श्लो.), वाराणसी : चौखम्बा सुरभारती प्रकाशन, सन् १९९६, पृ.१० ।

नक्षत्रम् – न क्षदते = न हिनस्तीति विग्रहे "क्षदि सौत्रो धातुः शकलीकरणे भक्षणे च " ( उ.२१५५) इति सौत्रो धातुर्हिंसार्थे च आत्मनेपदी "सर्वधातुभ्यः ष्ट्रन्" (उ.४।१५९) इति सूत्रेण ष्ट्रन्प्रत्यये क्षत्रम्। न क्षत्रमित्यवस्थायां "नञ्" (पा.२।२।६) इति नञ्समासे "नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या" (पा.६।३।७५) इति नञः प्रकृतिभावे "नक्षत्रम्" इति। 'द्वाराग्रस्फारतक्रवक्रवप्रक्षिप्रक्षुद्रनारतीरदुरकृच्छ्र-रन्ध्राश्रश्वभ्रभीरगभीरक्रुरविचित्रकेयूरकेदारोदराजस्रशरीरकन्दरमन्दारपञ्चराजरजठराजिरवैरचामरपुष्करगह्वरकुहरकुटीरकुलीरचत्वरकाश्मीरनीराम्बरशिशिरतन्त्रयन्त्रनक्षत्रमित्रकलत्रचित्रमूत्रसूत्रवक्त्रनेत्रगोत्राङ्गुलित्रभलत्रशस्त्रशास्त्रवस्त्रपत्रपात्रच्छत्राणि नपुंसके' ( पा.लि.९० ) इति नपुंसकत्वम्। नक्षत्राणां नामानि यथा –

अश्विनी १, भरणी २, कृत्तिका ३, रोहिणी ४, मृगशिरा ५, आर्द्रा ६, पुनर्वसु ७, पुष्य ८, अश्लेषा ९, मघा १०, पूर्वफाल्गुनी ११, उत्तरफाल्गुनी १२, हस्त १३, चित्रा १४, स्वाति १५, विशाखा १६, अनुराधा १७, ज्येष्ठा १८, मूल १९, पूर्वषाढा २०, उत्तरषाढा२१, श्रवण२२, धनिष्ठा २३, शतभिषा २४, पूर्वभाद्र २५, उत्तरभाद्र २६, रेवती २७।

**३.१.२.२ परिवेषशब्दः। प्र.२२५, (१।३।३२)।**

परिवेषः – परितो विष्यतेऽनेनति विग्रहे "विष्लृ व्याप्तौ" (जु.उ.प.११७०) इति धातोः "भावे" (पा.३।३।१८) इति सूत्रेण घञ्प्रत्यये "परिवेषः" इति। सूर्यस्य परिधेर्नाम। 'षोपधः' ( पा.लि. ९३ ) इति पुंस्त्वम्। चन्द्रस्य च परिधिर्यथोक्तो हर्षेण नैषधमहाकाव्ये। यथा–

तदोजसस्तद्यशसः स्थिताविमौ वृथेति चित्ते कुरुते यदा यदा।
तनोति भानोः परिवेषकैतवान् तदा विधिः कुण्डलतां विधोरपि ॥[१५९]

**३.१.२.३ पारिपार्श्विकशब्दः। प्र.२२३, (१।३।३१)।**

पारिपार्श्विकः – "पार्श्वे इति" इति विग्रहे विभक्त्यर्थेऽव्ययीभावसमासे 'परिपार्श्वम्। परिपार्श्वे वर्तत इति विग्रहे "परिमुखं च" (पा.४।४।२९) इति चकारपाठात् ठक्प्रत्यये "पारिपार्श्विकः" इति। 'कोपधः' ( पा.लि.६१ ) इति पुंस्त्वम्। सूर्यस्य पारिपार्श्विकानां नामानि यथा–

शक्रोऽस्य वामपार्श्वे तु दण्डाख्यो दण्डनायकः।
वह्निस्तु दक्षिणे पार्श्वे पिङ्गलो वामनश्च सः ॥
यमोऽपि दक्षिणे पार्श्वे भवेन्माठरसंज्ञया।[१६०]

---

[१५९]श्रीहर्षः, **नैषधीयचरितम्,** ( प्रथमसर्गः श्लोकः१४) वाराणसी : चौखम्बा संस्कृत प्रतिष्ठान, षष्ठसंस्करण १९९१।

**३.१.२.४ सप्तर्षिशब्दः । प्र.२१०, दि.व.(१।३।२७) ।**

सप्तर्षयः – सप्त च ते ऋषयश्चेति विग्रहे "दिक्संख्ये संज्ञायाम्" (पा.२।१।५०) इति सूत्रेण द्विगुसमासे गुणे सप्तर्षि, जसि "सप्तर्षयः" इति । एष शब्दो नित्यबहुवचनान्तः पुंलिङ्गश्च । चित्रः शिखण्डश्चूडाविशेषोऽस्त्येषामिति व्युत्पत्या प्रत्येकं सप्तापि "चित्रशिखण्डिनः" इति । तेषां सप्त नामानि यथा–

मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः ।

ऋषयोऽमी वसिष्ठश्च ज्ञेयाश्चित्रशिखण्डिनः ॥[१६१]

## ३.१.३ कालवर्गः

कालवर्गात् - ऋतु-कल्प-काल-पाप-पुष्पवन्त-मन्वन्तरशब्दानां टिप्पण्यः –

**३.१.३.१ ऋतुशब्दः ।** प्र.२७३, (१।४।२०) ।

ऋतुः–ऋच्छतीति विग्रहे "ऋ गतिप्रापणयोः" (भ्वा.प.से.१००२) इति धातोः "अर्तेश्च तुः"( उ.१।७२) इति सूत्रेण तुप्रत्यये चात् कित्त्वे "ऋतुः" इति । 'रुत्वन्तः' ( पा.लि. ५७ ) इति पुंस्त्वम् । ऋतोर्भेदास्तस्य चक्रञ्च । यथा–

वैदिक-ऋतुचक्रम् (तालिका ३.१.३.१)

| ऋतुनामानि | हेमन्तः | शिशिरः | वसन्तः | ग्रीष्मः | वर्षा | शरत् |
|---|---|---|---|---|---|---|
| मासनामानि | मार्गशीर्षः<br>पौषः | माघः<br>फाल्गुनः | चैत्रः<br>वैशाखः | ज्येष्ठः<br>आषाढः | श्रावणः<br>भाद्रः | आश्विनः<br>कार्तिकः |

आयुर्वेदीय-ऋतुचक्रम् (तालिका ३.१.३.२)

| ऋतुनामानि | वर्षा | शरत् | हेमन्तः | वसन्तः | ग्रीष्मः | प्रावृट् |
|---|---|---|---|---|---|---|
| मासनामानि | भाद्रः<br>आश्विनः | कार्तिकः<br>मार्गशीर्षः | पौषः<br>माघः | फाल्गुनः<br>चैत्रः | वैशाखः<br>ज्येष्ठः | आषाढः<br>श्रावणः |

वैदिकर्तुक्रमे मधुमाधवौ (चैत्रवैशाखौ) वासन्तिकौ स्तः वेदवचनात् । एतेष्वृतुषु शास्त्रोक्ताग्निहोत्रग्रहणोपनयनसङ्कल्पादीनि कर्माणि क्रियन्ते । पुण्यकर्मणि वैदिकक्रमो गृह्यते ।

---

[१६०] गौतमः कुलचन्द्रः, **अमरकोश** (स्वयंबोधिनी टीका), काठमाण्डौ : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६, पृ.२७ ।

[१६१] अमरसिंहः (सम्पा.ब्रह्मानन्द त्रिपाठी), **अमरकोशः** (दि.व.,क्षे.श्लो.), वाराणसी : चौखम्बा सुरभारती प्रकाशन, सन् १९९६, पृ.१९ ।

शारीरकस्वास्थ्यार्थं तु वर्षा-शरद्-हेमन्त-वसन्त-ग्रीष्म-प्रावृषः षड्तवो भवन्ति । दोषोपचयप्रकोपोपशमनिमित्तम्....तद्यथा–भाद्रपदाश्वयुजौ वर्षा,कार्तिकमार्गशीर्षौ शरत्, पौषमाघौ हेमन्तः, फाल्गुनचैत्रौ वसन्तः, वैशाखज्येष्ठौ ग्रीष्मः,आषाढश्रावणौ प्रावृडिति ।[१६२]

**३.१.३.२ कल्पशब्दः । प्र.२७६, (१।४।२१) ।**

कल्पः–कल्प्यन्ते विरुद्धलक्षणेन क्षीयन्तेऽत्रेति विग्रहे "कृपू सामर्थे" (भ्वा.आ.से.८११) इति धातोः "पुंसि संज्ञायां घः प्रायेण"(पा.३।३।११८) इति घप्रत्यये "कल्पः" इति । 'घाजन्तश्च' ( पा.लि. ३७ ) इति पुंस्त्वम् । ब्रह्मणो दिनस्य नाम । तस्य नामानि यथा–

कल्पपरिचयचक्रम्

(ब्रह्मणः शुक्लपक्षः) (तालिका ३.१.३.३)

| | | |
|---|---|---|
| १.श्वेतकल्पः | ६.प्राणकल्पः | ११.व्यानकल्पः |
| २.नीललोहितकल्पः | ७.बृहत्कल्पः | १२.सारस्वतकल्पः |
| ३.वामदेवकल्पः | ८.कन्दर्पकल्पः | १३.उदानकल्पः |
| ४.रथन्तरकल्पः | ९.सद्यकल्पः | १४.गारुडकल्पः |
| ५.रौरवकल्पः | १०.ईशानकल्पः | १५.कौर्मकल्पः |

(ब्रह्मणः कृष्णपक्षः)

| | | |
|---|---|---|
| १.नारसिंहकल्पः | ६.तत्पुमान्कल्पः | ११.वाराहकल्पः |
| २.समानकल्पः | ७.वैकुण्ठकल्पः | १२.वैराजकल्पः |
| ३.आग्नेयकल्पः | ८.लक्ष्मीकल्पः | १३.गौरीकल्पः |
| ४.सोमकल्पः | ९.सावित्रीकल्पः | १४.माहेश्वरकल्पः |
| ५ | १०.घोरकल्पः | ३०.पितृकल्पः[१६३] |

पूर्वस्य पञ्चदशकल्पा ब्रह्मणः पञ्चदशदिवसा भवन्त्यथवैकपक्षो भवति । पञ्चदश कौर्मकल्पो ब्रह्मणः पूर्णिमा तिथिरस्ति । पश्चाद्वर्तिनः पञ्चदशकल्पाः ब्रहमणः कृष्णपक्षस्य दिनानि सन्ति । पितृकल्पो ब्रह्मणोऽमावास्या तिथिरस्ति । ब्रह्मणः शतवर्षवयसि पूर्णे महाप्रलयो भवति । अधुना ब्रह्मैकपञ्चाशत्वयसि प्रविष्टोऽस्ति ।

**३.१.३.३ कालशब्दः । प्र.२५३, (१।४।११) ।**

---

[१६२] शर्मा पि.भि, ***सुश्रुतसंहिता,*** वाराणसी : चौखम्बा विश्वभारती सन् १९९८, पृ.७८ ।

[१६३]मत्स्यपुराणम् । तारानाथतर्कवाचस्पतिभट्टाचार्य, ***वाचस्पत्यम्,*** वाराणसी : संस्कृत सीरीज अफिस, वि.सं.२०२५, पृ.१८१९ । वहादुर राधाकान्तदेवः, ***शब्दकल्पद्रुम,*** वाराणसी : चौखम्वा संस्कृत सिरीज आफिस, सम्वत्२०२४, पृ.६४ ।

कालः – "कल्यते" इति विग्रहे "कल संख्याने शब्दे च" (भ्वा.आ.से.५२१) इति धातोः "अकर्तरि च कारके संज्ञायाम्" (पा.३।३।१९) इति सूत्रेण कर्मणि घञ्प्रत्यय उपधावृद्धौ "कालः"इति । 'घञवन्तः' ( पा.लि. ३६ ) इति पुंस्त्वम् । जगतामाश्रयो जन्यानां जनकः कालः कथ्यते ।[१६४]कालस्य भेदा यथा–

कालपरिचयचक्रम् (तालिका ३.१.३.४)

| | |
|---|---|
| (१) परमाणुद्वयमणुः । | (१२)त्रिंशत् मुहूर्तानि दिनम् । |
| (२) अणुद्वयं त्रसरेणुः । | (१३)पञ्चदश दिनानि पक्षः । |
| (३) त्रसरेणुत्रयं त्रुटिः । | (१४) पक्षौ मासः । |
| (४) त्रुटिशतं वेधः । | (१५) मासावृतुः । |
| (५) वेधत्रयं लवः । | (१६) ऋतुत्रयमयनम् । |
| (६) लवत्रयं निमेषः । | (१७) अयने वर्षम् । |
| (७) निमेषत्रयं क्षणम् । | (१८)षष्ठ्युत्तरशतत्रयं वर्षाणि दिव्यवर्षम् |
| (८)पञ्च क्षणानि काष्ठा । | (१९) द्वादशसहस्रं दिव्यवर्षाणि चतुर्युगाः । |
| (९)पञ्चदश काष्ठा लघुः । | (२०)चत्वारो मानुषयुगा दिव्ययुगः । |
| (१०)पञ्चदश लघवो नाडी । | (२१)७१ दिव्ययुगा मन्वन्तरम् । |
| (११) नाडीद्वयं मुहूर्तम् । | (२२) द्विसहस्रं दिव्ययुगा ब्राह्मदिनम् । |

**३.१.३.४ पापशब्दः । प्र.२७९, (१।४।२३) ।**

पापम् – पान्त्यस्मादात्मानमिति विग्रहे "पा रक्षणे" (अ.प.अ.११३२) इति धातोः "पानीविषिभ्यः पः"(उ.३।२३) इति सूत्रेण पप्रत्यये पापमिति । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥' ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । 'पापं किल्विषकल्मषम्' इति क्लीबनिर्देशः । पाति = पिबति कर्तारमिति वा रक्षति यस्माद् दुष्कर्मण आत्मानमिति वा पापं भवति । तद्भेदा यथा –

कायिकपापम्–अदत्तानामुपादानं हिंसा चैवाऽविधानतः ।
परदारोपसेवा च शारीरं त्रिविधं स्मृतम् ॥[१६५]

वाचिकपापम्–पारुष्यमनृतं चैव पैशून्यं चापि सर्वशः ।

---

[१६४] भट्टाचायः विश्वनाथपञ्चाननः, ***कारिकावली*** (प्रत्यक्षखण्डः४५), वाराणसी : हरिकृष्णनिबन्धभवनम्, वि.सं.२०५३, पृ.१०३ जन्यनां जनकः कालो जगतामाश्रयो मतः।

[१६५] भट्टः कुल्लूकः,***मनुस्मृतिः*** (अ.१२, श्लोक.७), वाराणसी : चौखम्बा संस्कृत भवन, वि.सं.२०७१, पृ.६३२ ।

असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् ॥[१६६]

मानसिकपापम्–परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम् ।

वितथाभिनिवेशश्च त्रिविधं कर्म मानसम् ॥[१६७]

### ३.१.३.५ पुष्पवन्तशब्दः । प्र.२५२, (१।४।१०) ।

पुष्पवन्तौ – "पुष्प विकसने" (दि.प.से.११९७) इति धातोः "भावे" (पा.३।३।१८) इति भावे घञ्प्रत्यये पुष्पः । पुष्पो विकासः प्रकाशश्च तद्वन्तौ "तदस्यास्त्यस्मिन्निति मतुप्" ( पा.५।२।९४) इति सूत्रेण मतुप्प्रत्यये "पुष्पवत्" इति । एकयोक्त्या दिवाकरनिशाकरौ पुष्पवन्तौ कथ्येते । 'देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि' ( पा.लि. ४३ ) इति पुंलिङ्गत्वम् । 'पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुराः ।' ( अ.लि. ११ ) इति च पुंस्त्वम् । अयं शब्दो नित्यं द्विवचनेऽस्ति । यथामरभारत्यां शीतवर्णनम्–

समगुणतां प्रतिपन्नौ समानशोभावभिन्ननामानौ ।

प्रणयेन पुष्पवन्तौ प्रणम्य शीतस्य वर्णनं क्रियते ॥[१६८]

### ३.१.३.६ मन्वन्तरशब्दः । प्र.२७७,.(१।४।२२) ।

मन्वन्तरम् –मनोरन्तरमवकाशः मन्वन्तरमिति विग्रहः । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥' ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । चतुर्दशमनोर्नामानि यथा–

(तालिका ३.१.३.५)

| | |
|---|---|
| १.स्वायंभुवः | ८.सावर्णिः |
| २.स्वारोचिषः | ९.दक्षसावर्णिः |
| ३.उत्तमः | १०.मेरुसावर्णिः |
| ४.तामसः | ११.सूर्यसावर्णिः |
| ५.रैवतः | १२.चन्द्रसावर्णिः |
| ६.चाक्षुषः | १३.रुद्रसावर्णिः |

[१६६]पूर्ववत् श्लोक ६ ।

[१६७] पूर्ववत् श्लोक ५ ।

[१६८] गौतमः कुलचन्द्रः, **अमरकोश** (स्वयंबोधिनी टीका), काठमाण्डौ : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६, पृ.३१ ।

| ७.वैवस्वतः | १४.विष्णुसावर्णिः |
|---|---|

## ३.१.४ धीवर्गः

धीवर्गात्-इन्द्रिय-मेधा-मोक्षशब्दानां टिप्पण्यः –

**३.१.४.१ इन्द्रियशब्दस्य प्रसङ्गः । प्र.३१५, (१।५।८) ।**

इन्द्रियम् – इन्द्रस्यात्मनो लिङ्गमित्यर्थे इन्द्रशब्दात् “इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्र-जुष्टमिन्द्रदत्तमिति वा” (पा.५।२।९३) इति सूत्रेण घञ्निपातितः “इन्द्रियम्” इति । इन्द्रः = आत्मा, तस्य लिङ्गकरणेन कर्तुरनुमानात् । ‘किसलयहृदयेन्द्रियोत्तरीयाणि नपुंसके’ - पाणिनिलि. ८७ ) इति क्लीबत्वम् ।

इन्द्रियपरिचयचक्रम् (तालिका ३.१.४.१)

| ज्ञानेन्द्रियाणि | श्रोत्रम् | त्वक् | चक्षुः | रसना | घ्राणम् | संकल्पविकल्पकार्यम् “मनः” उभयात्मकम् प्रवर्तनादि-कार्यम् |
|---|---|---|---|---|---|---|
| विषयाः | शब्दज्ञानम् | स्पर्शज्ञानम् | रूपज्ञानम् | रसज्ञानम् | गन्धज्ञानम् | |
| | | | | | | |
| कर्मेन्द्रियाणि | वाक् | पाणी | पादौ | उपस्थः | पायुः | |
| विषयाः | वचनम् | आदानम् | गमनम् | प्रश्नवणं कामानन्दश्च | उत्सर्जनम् | |

बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि ।
वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाण्याहुः ॥२६॥
शब्दादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः ।
वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम्॥२८॥
उभयात्मकमत्र मनः सङ्कल्पकमिन्द्रियं च साधर्म्यात् ।[१६९]

३.१.४.२ **मेधाशब्दः ।** प्र.३००, .(१।५। श्लो.क्षेपकः) ।

---

[१६९] ईश्वरकृष्णः (सम्पा.श्रीकृष्णमणि त्रिपाठी), ***सांख्यकारिका*** (श्लो.२६–२८) वाराणसी : चौखम्बा सुरभारती प्रकाशन, सन् १९७७, पृ.५० ।

मेधा – मेधते = संगच्छते सर्वस्मादिति विग्रहे “मेधृ संगमे” (भ्वा.उ.से.९३४) इति धातोः “गुरोश्च हलः”(पा.३।३।१०६) इति सूत्रेणाऽकारप्रत्यये टापि “मेधा” इति । ‘ऊङाबन्तश्च ’ ( पा.लि. ११ ) इति स्त्रीत्वम् । धारणाशक्तियुक्ताधीरित्यर्थः ।तस्या गुणाः–

शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा ।

ऊहापोहोऽर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः ॥[१७०]

**३.१.४.३ मोक्षशब्दः । प्र.३१२, (१।५।७) ।**

मोक्षः – मोक्षणमिति विग्रहे “मोक्ष अवसाने” ( चु.उ.से.अयं धातुः सिद्धान्तकौमुद्यां नास्ति) इति धातोः “भावे” (पा.३।३।१८) इति सूत्रेण घञ्प्रत्यये “मोक्षः” इति । ‘घञबन्तः’ ( पा.लि. ३६ ) इति पुंस्त्वम् । मोक्षस्य भेदाः–

| | | | |
|---|---|---|---|
| १.सालोक्यम् । | २.सामीप्यम् । | ३.सारूप्यम् । | ४.कैवल्यम् । |

भागवते तु मोक्षस्य पञ्चविधत्वं लिखितं व्यासेन । कपिलो मातरं प्रति कथयति ।[१७१]

## ३.१.५ शब्दादिवर्गः

शब्दादिवर्गात्-अङ्ग-अबद्ध-आहत-क्लिष्ट-ग्रस्त-ग्राम्य-पुराण-प्रलाप-प्रहेलिका-यशःकीर्ति-समस्या-स्मृति-शब्दानां टिप्पण्यः –

**३.१.५.१ अङ्गशब्दः । प्र. ३४०, (१।६।४) ।**

श्रुतेरङ्गानि – श्रुतेः = वेदस्य, अङ्गचते = ज्ञायतेऽनेनति विग्रहे “अगि गतौ” (भ्वा.प.से.१५०) इति धातोः “हलश्च”(पा.३।३।१२१) इति सूत्रेण घञ्प्रत्यये “अङ्गम्” इति । ‘गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥’ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । ‘शिक्षेत्यादिश्रुतेरङ्गम्’ इति क्लीबनिर्देशः । श्रुतेरङ्गानि यथा–

शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः ।

छन्दोविचितिरित्येषः षडङ्गो वेद उच्यते ॥[१७२]

---

[१७०] गौतमः कुलचन्द्रः, **अमरकोश** (स्वयंबोधिनी टीका), काठमाण्डौ : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६, पृ.३८ ।

[१७१]व्यासः, श्रीमद्भागवतम्, (३।२९।१३)गोरखपुर : गीताप्रेस, वि.सं.२०५४, पृ.३०१ ।
सालोक्यसार्ष्टिसामीप्यसारुप्यैकत्वमप्युत । दीयमानं न गृणन्ति विना मत्सेवनं जनाः ॥

**३.१.५.२ अबद्धशब्दः । प्र.३७५, (१।६।२०) ।**

अबद्धम् – न बध्यते स्मेति विग्रहे 'बन्ध बन्धने' (क्र्या.प.अ.१६५५) इति धातोः 'निष्ठा' ( पा.३।२।१०२) इति सूत्रेण क्तप्रत्यये 'अनिदितां हल उपधायाः क्ङिति' (पा.६।४।२४) इतिसूत्रेण नकारलोपे 'झषस्तथोर्धोऽधः' (पा.८।२।४०) इति सूत्रेण धत्वे, जश्त्वे 'अबद्धम्' इति । 'निष्ठा च ' ( पा.लि. १२० ) इति क्लीबत्वम् । समुदायार्थशून्यस्य वचनस्योदाहरणं यथा–

जरद्गवः कम्बलपादुकाभ्यां द्वारि स्थितो गायति मङ्गलानि ।

तं ब्राह्मणी पृच्छति पुत्रकामा राजन् रुमायां लशुनस्य कोऽर्घः ॥ [१७३]

**३.१.५.३ आहतशब्दः । प्र.३७६, (१।६।२१) ।**

आहतम् – आहन्यते स्मेति विग्रहे "हन हिंसागत्योः" (अ.प.अ.१०८२) इति धातोः 'निष्ठा' ( पा.३।२।१०२) इति सूत्रेण क्तप्रत्यये नलोपे 'आहतम्' इति । 'निष्ठा च ' ( पा.लि.१२० ) इति क्लीबत्वम् । व्याघातस्य लक्षणं यथा–

उत्कर्षो वाऽपकर्षो वा प्राग्यस्यैव निवेद्यते ।

तस्यैवाथ तदन्यत्वे व्याहतोऽर्थस्तदोच्यते ॥ [१७४]

उदाहरणं नास्ति भवितव्यमासीत् । आहतम्, व्याघातम्, व्याहतमेते पर्यायवाचिनः शब्दाः सन्ति ।

**३.१.५.४ क्लिष्टशब्दः । प्र.३७३, (१।६।१९) ।**

क्लिष्टम् – क्लिश्यते स्मेति विग्रहे 'क्लिशू विबाधने' (क्र्या.प.से.१६२३) इति धातोः 'निष्ठा' ( पा.३।२।१०२) इति सूत्रेण क्तप्रत्यये 'क्लिशः क्त्वानिष्ठयोः' (पा.७।२।५०) इति वेट्कत्वान्नेटि क्लिष्टमिति । 'निष्ठा च ' ( लि. १२० ) इति क्लीबत्वम् । क्लिष्टस्य = विरुद्धार्थस्य वचनस्योदाहरणं यथा–

---

[१७२] पाणिनिः, ***पाणिनीयशिक्षा*** (श्लो.४१-४२), (सम्पा.गोस्वामी प्रह्लाद गिरि), वाराणसी : चौखम्बा संस्कृत सीरिज आफिस, वि.सं.२०४०, पृ.२० ।

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥

[१७३]भोजनरेन्द्रः, ***सरस्वतीकण्ठाभरणम्*** (प्रथमपरिच्छेदः श्लो.१), काशी : प्रकाशक भैरव शर्मा जैनप्रभाकरनाम्नि मुद्रणालये, वि.सं.१९४९, पृ.३७ ।

[१७४]विश्वनाथः, ***साहित्यदर्पण*** ( प्रदीपटीका श्लोकः११), वाराणसी : चौखम्बा संस्कृतप्रतिष्ठान, सप्तमसंस्करण १९८८ ।

यावज्जीवमहं मौनी ब्रह्मचारी च मे पिता ।

माता च मम बन्ध्याऽस्ति स्मराभोऽनुपमो भवान् ॥[१७५]

**३.१.५.५ ग्रस्तशब्दः । प्र.३७४, (१।६।२०) ।**

ग्रस्तम् – ग्रस्यते स्मेति विग्रहे 'ग्रसु अदने' (भ्वा.आ.से.६७१) इति धातोः 'निष्ठा'( पा.३।२।१०२) इति सूत्रेण क्तप्रत्यये ग्रस्तमिति ।'निष्ठा च ' ( पा.लि. १२० ) इति क्लीबत्वम् । ग्रस्तवर्णस्योदाहरणं यथा–

ए नालायक ! ए पाजी ! यो वृत्तान्त तँ जान्दछस् ? ।

प्रभू ! म जान्न ए स्वाँठ ! के-सोधेको तँ ठान्दछस् ? ॥[१७६]

ग्रस्तपदस्योदाहरणम्–

खुम्चिएर भइँमा छ लिपिक्क हेर हेर्दछ कसोरि पुलुक्क ।

लौ न लौ न अव ता चाँडो छी छिटो गर चलाउ खुरुक्क ॥

अत्र टाँसिएको, हान, वेला भयो, गोली चत्वारि पदानि लुप्तानि सन्ति ।[१७७]

अहो पश्य पृथिव्यामाकुञ्चनशरीरोऽस्मान् समीपतः पश्यति, ओ ओ ओ अतःपरं शीघ्रं शीघ्रं निश्चित्य चालय ।

**३.१.५.६ ग्राम्यशब्दः । प्र.३७२, (१।६।१९) ।**

ग्राम्यम् – ग्रामे जातं भवं वेति विग्रहे 'ग्रामाद्यखञौ' (पा.४।२।९४) इति सूत्रेण यत्प्रत्यये ग्राम्यमिति । 'अणाद्यन्तास्तेन रक्ताद्यर्थे नानार्थभेदकाः' (अ.लि.४५) विशेष्यनिघ्नत्वेऽपि 'निष्ठुरं परुषं ग्राम्यम्' इति निर्देशात् क्लीवत्वम् । उदाहरणं यथा लोकभाषायां ग्राम्यवाण्याः –

नाथे ! मुख्याञ्जी लौ भन् त जे भनिस् घरमा घुसी ।

एरात्तै ! कति डुग्रन्छस् के गर्छस् ? गर्न लौ छुसी ॥[१७८]

भो जाल्म र सम्मुखं गृहं प्रविश्य मां प्रति किमुक्तं कथय । हे रक्तक र किं भर्त्सयसे भर्त्सयस्व वराकः किं करोषि ? कुरु ।

**३.१.५.७ पुराणशब्दः । प्र. ३४३, (१।६।५) ।**

---

[१७५] कुलचन्द्र गौतम, **अमरकोश** (स्वयंबोधिनी टीका), काठमाण्डौ : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६, पृ.२६६ ।

[१७६] पूर्ववत्

[१७७] कुलचन्द्रगौतमः, **अमरकोश** (स्वयंबोधिनीटीका प्रत्येककाण्डस्यान्ते), काठमाण्डौ : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६ पृ.१६६ ।

[१७८] पूर्ववत्

पुराणम् – पुरा भवमिति विग्रहे“सायञ्चिरम्प्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च” ( पा.४।३।२३) इति ट्युट्युलौ प्रत्ययौ “पूर्वकालैकसर्वजरत्पुराणनवकेवलाःसमानाधिकरणेन”( पा.२।१।४९) इति सूत्रेण निपातनात्तुडभावेऽनादेशे पुराणमिति ।‘अणाद्यन्तास्तेन रक्ताद्यर्थे नानार्थभेदकाः’ (अ.लि.४५) विशेष्यनिघ्नत्वेऽपि ‘पुराणं पञ्चलक्षणम्’ इति निर्देशात् क्लीवत्वम् । निरुक्ते तु पुरा नवं पुराणमिति । पुराणलक्षणं यथा–

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।

वंशानुचरितं चैव पुराणं पञ्चलक्षणम् ॥[१७९]

### ३.१.५.८ प्रलापशब्दः । प्र.३६३, (१।६।१५) ।

प्रलापः – प्रलपनमिति विग्रहे ‘लप व्यक्तायां वाचि’ (भ्वा.प.से.४३०) इति धातोः ‘भावे’ (पा.३।३।१८) इति घञ्प्रत्यये ‘प्रलापः’ इति । ‘घञबन्तः’ ( पा.लि. ३६ ) इति पुंस्त्वम् । प्रयोजनशून्यस्योन्मत्तादिवचनस्य नाम । उदाहरणं यथा–

भुक्ता मया हि गिरयः स्नातोऽहं वह्निना पिबामि वियत् ।

हरिहरहिरण्यगर्भा मत्पुत्रास्तेन नृत्यामि ।[१८०]

### ३.१.५.९ प्रहेलिकाशब्दः । प्र.३४४,.(१।६।६) ।

---

[१७९] कूर्मपुराण पूर्वार्द्ध अ. १, श्लोकः १२ ।

अष्टादशपुराणानि

ब्राह्मं पाद्मं वैष्णवं च शैवं लैङ्गं सगारुडम् ।
नारदीयं भागवतमाग्नेयं स्कान्दसंज्ञितम् ॥
भविष्यं ब्रह्मवैवर्तं मार्कण्डेयं सवामनम् ।
वाराहं मात्स्यं कौर्मं च ब्रह्माण्डाख्यमिति त्रिषट् ॥ श्रीमद्भागवत् १२ । ७ । २३-२४

अथवा

मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम् ।
अनापलिङ्गकुस्कानि पुराणानि पृथक् पृथक् ॥ व्यासः(सम्पा.वेणीमाधव ढकाल) देवीभागवत(१।३।२) काठमाण्डौ : विद्यमर्थी पुस्तक भण्डार, वि.सं.२०७३, पृ.९।

अष्टादशोपपुराणानि

आद्यं सनत्कुमारोक्तं नारसिंहमतः परम् ।
तृतीयं स्कान्दमुद्दिष्टं कुमारेण तु भाषितम् ॥
चतुर्थं शिवधर्माख्यं साक्षान्नन्दीशभाषितम् ।
दुर्वाससोक्तमाश्चर्यं नारदोक्तमतः परम् ॥
कापिलं मानवं चैव तथैवोशनसेरितम् ।
ब्रह्माण्डं वरुणं चाथ कापिलाह्वयमेव च ॥
माहेश्वरं तथा साम्वं सौरं सर्वार्थसंचयम् ।
पराशरोक्तमपरं मारीचं भार्गवाह्वयम् ॥ कूर्मुराणम् पूर्वार्द्ध अ.१, श्लो. १७-२० ।

[१८०]कुलचन्द्र गौतम, **अमरकोश** (स्वयंबोधिनी टीका), काठमाण्डौ : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६, पृ.४७ ।

प्रहेलिका – प्रहेलयति = अभिप्रायं सूचयतीति विग्रहे "हिल भावकरणे" (तु.प.से.१४४९) इति धातोः ण्यन्तात् "ण्वुल्तृचौ" (पा.३।१।१३३) इति सूत्रेण ण्वुल्प्रत्ययेऽकादेशे "प्रहेलक" इति जाते टापि 'प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः' (पा.७।३।४४) इति कात्पूर्वस्याकारस्येत्वे "प्रहेलिका" इति । 'ऊङाबन्तश्च ' (पा.लि. ११ ) इति स्त्रीत्वम् ।

लक्षणम्

व्यक्तीकृत्य कमप्यर्थं स्वरूपार्थस्य गोपनात् ।

यत्र बाह्यार्थसम्बन्धः कथ्यते सा प्रहेलिका ॥[१८१]

उदाहरणानि

जीवितेशविरहाकुलान्तरा क्षौममेत्य किल गातुमुत्सुका ।

काऽपि पाणिधृतवल्लकी विधुं वीक्ष्य मौनमभजत् कुतो वद ?[१८२]

उत्तर–निष्कलङ्क चन्द्रमाले झन् बढ्ता ताप गर्ला भन्ने डरले ।

'सानु सानु प्याङ् , प्याङ् भरि दाम्' क्या हो ? उत्तर– 'खुर्सानी'

अर्थः – लघु लघु पात्रं मुद्रापूरितं पात्रं किम् ? उत्तरम् – कटुवीरा ।

'तरुणीले समातेर कटिमाथि चढाउँदा । समाजका अगाडिमा को कराउँछ लौ भन ?' उत्तर– आधा पानी भएको गाग्रो । यो आर्थप्रहेलिका हो ।

अर्थः – तरुणी गृहित्वा कट्यां स्थापयन्ती समाजसमक्षे कः कोलाहलं करोति ? कथय । उत्तरम् – अर्धजलपूरितो घटः । इयमार्थप्रहेलिका ।

एक्का पछीको भन वस्तु के हो ? चोरी हुँदा के भन खोजिने हो ?

अशुद्ध यौटा दिन लौ बताऊ ? चलाक बन्ने पदवी कमाऊ ॥[१८३]

उत्तर–'दुवा-दसी' । यो शाब्दप्रहेलिका हो ।

अर्थः – एकपश्चात् किं वस्तु भवति ?चोरितसमये किमन्विष्यते ? एकमशुद्धं दिनं कथय ? चतुरपदवीमर्जय । उत्तरम् – द्वादशी । इयं शाब्दप्रहेलिका ।

**३.१.५.१० यशःकीर्त्योर्भेदः । प्र.३५५, (१।६।११) ।**

---

[१८१]पूर्ववत् पृ.४४ ।

[१८२]पूर्ववत्

[१८३]कुलचन्द्रगौतमः, **अमरकोश** (स्वयंबोधिनीटीका प्रत्येककाण्डस्यान्ते), काठमाण्डौ : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६, पृ.४४ ।

यशः–अश्नुते = व्याप्नोतीति विग्रहे 'अशू व्याप्तौ संघाते च' (स्वा.आ.से.१३४६) इति धातोः 'अशेर्देवने युट् च' (उ.४।१९१) इति सूत्रेणाऽसुन्प्रत्यये धातोर्युडागमे च 'यशः' इति । 'असन्तो द्वचच्कः' ( पा.लि. १५२ ) इति नपुंसकत्वम् ।

कीर्तिः – कीर्त्यत इति विग्रहे 'कृत संशब्दने' (चु.प.से.) इति धातोः 'ऊतियूतिजूतिसातिहेतिकीर्तयश्च' (पा.३।३।९७) इति सूत्रेण क्तिन्प्रत्यये निपातिते 'कीर्तिः' इति । 'क्तिन्नन्तः' ( पा.लि. ९ ) इति स्त्रीत्वम् ।

यद्यप्यत्र यशःकीर्तिशब्दौ पर्यायवाचिनौ तथापि स्मृतिग्रन्थे 'प्रज्ञां यशश्च कीर्तिं च ब्रह्मवर्चसमेव च' इत्युक्तमस्ति । तस्मात्पुनरुक्तिर्न भवति यथा–

'दानादिप्रभवा कीर्तिः शौर्यादिप्रभवं यशः'इत्यादिदर्शनात् ।[१८४]

**३.१.५.११ समस्याशब्दः । प्र.३४६,.(१।६।७) ।**

समस्या – समसनमिति विग्रहे संपूर्वात् 'असु क्षेपणे' (दि.प.से.१२८६) इति धातोः 'ऋहलोर्ण्यत्' (पा.३।१।१२४) इति ण्यत्प्रत्यये संज्ञापूर्वकत्वाद्वृद्धयभावः, स्त्रीत्वविवक्षायां टापि 'समस्या' इति । 'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । उदाहरणं संस्कृतवाण्यां नेपालीभाषायां च यथा –

समस्या–'मृगात् सिंहः पलायते ' ।

समस्यापूर्तिः–

तावद्बली बली, यावद् बलीयान् नावलोक्यते ।

सिंहात् अष्टापदोऽभ्येति मृगात् सिंहः पलायते ॥[१८५]

समस्या–'म नाथका साथ मिलाप गर्छु ।'

समस्यापूर्तिः–

'रु.मा अलग् एक म तङ्ग वासमा रहेर हे राम ! विलाप गर्दछु ।

छर्दैछु सुग्रीव समान सर्वथा म नाथका साथ मिलाप गर्दछु' ॥[१८६]

समस्या– अहं नाथेन सह सन्धिं करोमि ।

समस्यापूर्तिः – हे राम रुमासहितोऽहं सक्लिष्टं गृहे स्थित्वा विलापं करोमि सर्वथा सुग्रीवसमानोऽहं नाथेन सह सन्धिं करोमि ।

---

[१८४]पूर्ववत् पृ ४६

[१८५]पूर्ववत्  पृ.४५।

[१८६] गौतमः कुलचन्द्र, **अमरकोश** (स्वयंबोधिनीटीका प्रत्येककाण्डस्यान्ते), काठमाण्डौ : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६, ४६ ।

**३.१.५.१२ स्मृतिशब्दः । प्र.३४५, (१।६।६) ।**

स्मृतिः–"स्मृ चिन्तायाम्" (भ्वा.प.अ.९९९) इति धातोः "स्त्रियाः क्तिन्" (पा.३।३।९४) इति सूत्रेण क्तिन्प्रत्यये "स्मृतिः" इति । वेदार्थस्मरणपूर्वकं रचितत्वात् स्मृतिः । 'क्तिन्नन्तः' ( पा.लि. ९ ) इति स्त्रीत्वम् । स्मृतिकाराणां नामानि यथा–

मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः ।

यमापस्तम्वसंवर्ताः कात्यायनवृहस्पती ॥

पराशरव्यासशङ्खलिखिता दक्षगौतमौ ।

शातातपो वसिष्ठश्च धर्मशास्त्रप्रवर्तकाः ॥[१८७]

## ३.१.६ नाट्यवर्गः

नाट्यवर्गात्-आङ्गिक-उत्कण्ठा-कुतुहल-भाव-रस-ललित-लीला-विहसित-विभ्रम-विलास -विव्वोक-सात्विक-स्मित-स्वर-हाव-हेलाशब्दानां टिप्पण्यः –

**३.१.६.१ आङ्गिकशब्दः । प्र.४२०, (१।७।१६) ।**

आङ्गिकम्–अङ्गेन निर्वृत्तमिति विग्रहे 'निर्वृत्तेऽक्षद्यूतादिभ्यः' (पा.४।४।१९) इति सूत्रेण ठक्प्रत्यये 'आङ्गिकम्' इति । 'अणाद्यन्तास्तेन रक्ताद्यर्थे नानार्थभेदकाः' (अ.लि.४५) इति विशेष्यनिघ्नत्वेऽपि 'निर्वृत्ते त्वङ्गसत्वाभ्यां द्वे त्रिष्वाङ्गिकसात्विके' इति निर्देशात् क्लीवत्वम् । भ्रुविक्षेपादिभावहावहेलास्तिस्र आङ्गिकालङ्काराः । लक्षणं यथा–

१.निर्विकारात्मके चित्ते भावः प्रथमविक्रिया ।

२.भ्रुनेत्रादिविकारैस्तु संभोगेच्छाप्रकाशकः ।

भाव एवाल्पसंलक्ष्यविकारो हाव उच्यते ॥

३.हेलात्यन्तसमालक्ष्यविकारः स्यात् स एव सः ।[१८८]

**३.१.६.२ उत्कण्ठाशब्दः । प्र.४४६, (१।७।२९) ।**

उत्कण्ठा–उत्कण्ठनमिति विग्रहे 'कठि शोके' (भ्वा.आ.से.२७२) इति धातोः 'इदितो नुम् धातोः' (पा.७।१।५८) इति नुमागमे 'गुरोश्च हलः' (पा.३।३।१०३) इति सूत्रेण अप्रत्यये टापि 'उत्कण्ठा' इति । 'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । लक्षणं यथा–

सर्वेन्द्रियसुखास्वादो यत्रास्तीत्यभिमन्यते ।

---

[१८७] याज्ञवल्क्यः (सम्पा.कपिलदेव गिरि), ***याज्ञवल्क्यस्मृतिः*** ( श्लो.५) वाराणसी : चौखम्बा संस्कृत संस्थान, वि.सं.२०३९, पृ.३ ।

[१८८] विश्वनाथः, ***साहित्यदर्पण,*** ( ३।९३,९४,९५), वाराणसी : चौखम्बा संस्कृत संस्थान, वि.सं.२०५८, पृ.१३६ ।

तत्प्राप्तीच्छां ससंकल्पामुत्कण्ठां कवयो विदुः ॥[१८९]

**३.१.६.३ कुतूहलशब्दः । प्र.४५०, (१।७।३१) ।**

कुतूहलम् – कुतूं = चर्मनिर्मितस्नेहपात्रं हलतीति विग्रहे 'हल विलेखने' (भ्वा.प.से.८९५) इति धातोः 'कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम्' (वा.३।२।५) इति वार्तिकेन कप्रत्यये कुतूहलमिति । 'लोपधः' ( पा.लि. १४१) इति क्लीबत्वम् । तस्य लक्षणं यथा–

रम्यवस्तुसमालोके लोलता स्यात् कुतूहलम् ।[१९०]

**३.१.६.४ भावशब्दः । प्र.४३०, (१।७।२१) ।**

भावः – भावयति = करोति रसानिति विग्रहे 'भू सत्तायाम्' (भ्वा.प.से.१) इति धातोर्ण्यन्तात् 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इति सूत्रेणाऽच्प्रत्यये णिलोपे 'भावः' इति । 'घाजन्तश्च' (पा.लि. ३७ ) इति पुंस्त्वम् । मनोविकारस्य नाम । भावस्य लक्षणं यथा–

निर्विकारात्मके चित्ते भावः प्रथमविक्रिया । [१९१]

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।

जुगुप्सा विस्मयश्चैव स्थायिभावाः प्रकीर्तिताः ॥[१९२]

**३.१.६.५ रसस्य संक्षिप्तपरिचयः । १९३टि.(ना) यथा –**

चक्रम् (तालिका ३.१.६.५)

| रसाः | शृङ्गारः | वीरः | करुणः | अद्भुतः | हास्यम् | भयानकः | वीभत्सः | रौद्रः |
|---|---|---|---|---|---|---|---|---|
| स्थायीभावाः | रतिः(वासनारूपेण स्थिता प्रीतिः) | सूक्ष्मरूपेण अन्तःकरणे स्थित उत्साहः | वासना रूपेण स्थितः शोकः | वासना रूपेण स्थितो विस्मयः | अन्तःकरणर्वात हासः | अन्तःकरणवर्ति भयम् | अन्तःकरणावर्तिनी जुगुप्सा | सूक्ष्मरूपेण स्थितः क्रोधः |
| आल | नायक | प्रतिस्पर्धि | मृतपरिवा | विचित्र | हास्यजनक | भयङ्कर | घृणाजनक | शत्रुप्रभृति |

---

[१८९] गौतमः कुलचन्द्रः, **अमरकोश** (स्वयंबोधिनी टीका), काठमाण्डौ : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६, पृ.५८ ।

[१९०]विश्वनाथः, ***साहित्यदर्पण,*** ( ३।१०९), वाराणसी : चौखम्बा संस्कृत संस्थान, वि.सं.२०५८, पृ.१४९ ।

[१९१]पूर्ववत् (३।९३) पृ.१३६ ।

[१९२]पूर्ववत् (३।१७५), पृ.१८२ ।

[१९३] रस्यते = आस्वाद्यते रसः । 'रस आस्वादने' (चु.प.से.) 'एरच्' (पा.३।३।५६) इत्यच् रसः । 'घाजन्तश्च' ( लिङ्गानुशासनम् ३७ ) इति पुंस्त्वम् ।

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| म्बन विभावाः | नायिके | जनः | रादयः | वस्तु | वस्तु | वस्तु | वस्तु | प्राणी |
| उद्दीपन विभावाः | परस्पर चेष्टा, चन्द्रोदयः, उपवनम्, एकान्तः, वसन्तऋतु,इत्यादि सुन्दर वस्तु | प्रतिस्पर्धिना कृतोऽन्यायः, स्वकीय बलस्याधिकता, समयस्यानुकूलतेत्यादयः | मृतजनस्योत्तमगुणा प्रभृतिः | विचित्र वस्तुन आश्चर्यजनक कार्यम् | हास्यजनक पुरुषप्रभृतीनां मनोरञ्जनम् | भयङ्कर वस्तुन उग्रोग्र चेष्टा | दुर्गन्धविस्तरः , चञ्चलकीटदर्शनमीत्यादिः | शत्रुणाकृतोऽन्यायः |
| अनुभावाः | भ्रूविक्षेप कटाक्ष स्मित इत्यादिः | सहायान्वेषणम्, अस्त्रशस्त्र सैन्यसज्जीकरणमीत्यादि | आलाप विलापाहार त्यागादिः | अवश्चर्यभवनम्, विस्मितभवनमित्यादिः | कपोलकण्ठविस्तरः, अश्रुपातनमित्यादिः | हृदयकम्पनम्, पलायनमित्यादिः | नासिकासंकोचनम्, ष्ठीवनमित्यादिः | उच्चस्वरेणात्मप्रशंसा, शत्रुनिन्दा च |
| संचारिभावाः | चिन्ता , स्मृति, व्रीडा, चपल | हर्ष, धैर्य, गर्व, अमर्ष, वितर्क इत्यादिः | चिन्ता, दैन्य, ग्लानि, जडता, उन्माद | हर्ष, वितर्क, औत्सुक्य इत्यादिः | श्रम, हर्ष, औत्सुक्य इत्यादिः | जडता, त्रास इत्यादिः | ग्लानि, दैन्य, आवेग इत्यादिः | उग्रता, गर्व, अमर्ष, मद इत्यादिः |

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| | ता, जडता, औत्सुक्य, शङ्का, निर्वेद इत्यादिः | | इत्यादिः | | | | | |

**३.१.६.६ ललितशब्दः । प्र.४५१, (१।७३१) ।**

ललितम्–लडनमिति विग्रहे 'लड विलासे' (भ्वा.प.से.३८२) इति धातोः लडयोरभेदत्वात् 'नपुंसके भावे क्तः' (पा.३।३।११४) इति सूत्रेण क्तप्रत्यये ललितमिति । 'निष्ठा च ' ( पा.लि. १२० ) इति क्लीबत्वम् । ललितस्य लक्षणं यथा–

**सुकुमारतयाङ्गानां विन्यासो ललितं भवेत् ।**[१९४]

**३.१.६.७ लीलाशब्दः । प्र.४५२, (१।७३२) ।**

लीला – लयनमिति विगहे 'लीङ् श्लेषणे' (दि.आ.अ.१२१४) इति धातोः 'सम्पदादिभ्यः क्विप्' (वा.३।३।९४) इति वार्तिकेन क्विप् । पुनर्लियं लातीति विग्रहे 'ला आदाने' (अ.प.अ.) इति धातोः 'आतोऽनुपसर्गे कः'(पा.३।२।३) इति कप्रत्यये लीलेति । 'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । लीलाया लक्षणं यथा–

अङ्गैर्वेशैरलङ्कारैः प्रेमनिर्वचनैरपि ।

प्रीतिप्रयोजितैर्लीलां प्रियस्यानुकृतिं विदुः ॥[१९५]

**३.१.६.८ विहसितशब्दः । प्र.४५८, (१।७३५) ।**

---

[१९४] [१९४] विश्वनाथः, ***साहित्यदर्पण,*** ( ३।१०५), वाराणसी : चौखम्बा संस्कृत संस्थान, वि.सं.२०५८, पृ.१४५ ।

[१९५]पूर्ववत् पृ.१४१ ।

विहसितम् – विशिष्टं हसनमिति विग्रहे 'हसे हसने' (भ्वा.प.से.७६७) इति धातोः 'भावे' ( पा.३।३।११४) इति सूत्रेण क्तप्रत्यये विहसितमिति। 'निष्ठा च' ( पा.लि.१२० ) इति नपुंसकत्वम्। मध्यमहासस्य नाम। यद्यप्यत्र द्वौ भेदौ तथाप्यन्ये भेदाः सन्ति हासस्य यथा–

स्मितमिह विकासिनयनं किञ्चिल्लक्ष्यद्विजं तु हसितं स्यात्।
मधुरस्वरं विहसितं सशिरःकम्पमिदमुपहसितम् ॥
अपहसितं साक्षं विक्षिप्ताङ्गं भवत्यतिहसितम्।
द्वे द्वे हसिते चैषां ज्येष्ठे मध्ये क्रमादधमे ॥[196]

**३.१.६.९ विभ्रमशब्दः। प्र.४५१, (१।७।३१)।**

विभ्रमः – विभ्रमणमिति विग्रहे 'भ्रमु अनवस्थाने' (दि.प.से.१२८२) इति धातोः 'भावे' ( पा.३।३।१८) इति सूत्रेण घञ्प्रत्यये 'नोदात्तोपदेशस्य मान्तस्यानाचमेः' (पा.७।३।३४) इति वृद्धिनिषेधे 'विभ्रमः' इति। 'घञबन्तः' ( लिङ्गानुशासनम् ३६ ) इति 'मोपधः' ( पा.लि. ८३ ) इत्यनेन च पुंस्त्वम्। विभ्रमस्य लक्षणं यथा –

त्वरया हर्षरागादेर्दयितागमनादिषु।
अस्थाने भूषणादीनां विन्यासो विभ्रमो मतः ॥[197]

**३.१.६.१० विलासशब्दः। प्र.४५१,(१।७।३१)।**

विलासः – विलसनमिति विग्रहे 'लस श्लेषणक्रीडनयोः' (भ्वा.प.से.७६०) इति धातोः 'भावे' ( पा.३।३।१८) इति घञ्प्रत्यये 'विलासः' इति। 'घञबन्तः' ( पा.लि. ३६ ) इति पुंस्त्वम्। तस्य लक्षणम् –

यानस्थानासनादीनां मुखनेत्रादिकर्मणाम्।
विशेषस्तु विलासः स्यादिष्टसन्दर्शनादिना ॥[198]

**३.१.६.११ विव्वोकशब्दः। प्र.४५१, (१।७।३१)।**

---

[196] धनञ्जयः, **दशरूपकम्** (चतुर्थप्रकाशः श्लोकः ७६-७७), वाराणसी : चौखम्बा अमरभारती प्रकाशन, वि.सं.२०४३, पृ.७३९।

आकुञ्चितकपोलाक्ष्यं सस्वनं निःस्वनं तथा।
प्रस्तावोत्थं सानुरागमाहुर्विहसनं बुधाः ॥
ईषद्विकसितैर्दन्तैः कटाक्षैः सौष्ठवान्वितैः।
अलक्षितद्विजद्वारमुत्तमानां स्मितं भवेत् ॥ भानुजिदीक्षितः, ***अमरकोशः*** (सुधाटीका १.७.३५), वाराणसी : चौखम्बा विद्याभवन, सन्.२०११, पृ.८५।

[197] विश्वनाथः, ***साहित्यदर्पण,*** ( ३।१०४), वाराणसी : चौखम्बा संस्कृत संस्थान, वि.सं.२०५८, पृ.१४४।

[198] पूर्ववत्.(३। ९९), पृ.१४२।

विव्वोकः – विवुर्गतिविशेषः । ‘उच समवाये’ (दि.प.से.१३०३) इति धातोः ‘हलश्च’ ( पा.३।३।१२१) इति सूत्रेण घञ्प्रत्यये गुणे ‘ओकः’ इति । ततो विवोः ओकः = स्थानम् ‘विव्वोकः’ इति । ‘घञबन्तः’ ( पा.लि. ३६ ) पुंस्त्वम् । विव्वोकस्य लक्षणं यथा –

विव्वोकस्त्वतिगर्वेण वस्तुनिष्ठेऽप्यनादरः ।[199]

**३.१.६.१२ सात्त्विकशब्दः । प्र.४२०, (१।७।१६) ।**

सात्त्विकम् – सत्त्वेन मनोवृत्या निर्वृत्तमिति विग्रहे ‘निर्वृत्तेऽक्षद्युतादिभ्यः’ (पा.४।४।१९) इति ठक्प्रत्यये सात्त्विकमिति । ‘अणाद्यन्तास्तेन रक्ताद्यर्थे नानार्थभेदकाः’ (अ.लि.४५) इति विशेष्यनिघ्नत्वेऽपि ‘निर्वृत्ते त्वङ्गसत्वाभ्यां द्वे त्रिष्वाङ्गिकसात्विके’ इति निर्देशात् क्लीबत्वम् । सात्त्विकविकाराः –

स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः ।
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विका गुणाः ॥ [200]

सात्त्विकालङ्काराः–

यौवने सत्त्वजाः स्त्रीणामष्टाविंशतिसंख्यकाः ।
अलङ्कारस्तत्र भावहावहेलास्त्रयोऽङ्गजाः ॥
शोभा कान्तिश्च दीप्तिश्च माधुर्यं च प्रगल्भता ।
औदार्यं धैर्यमित्येते सप्तैव स्युरयत्नजाः ॥
लीला विलासो विच्छित्तिर्विव्वोकः किलकिञ्चितम् ।
मोट्टायितं कुट्टमितं विभ्रमो ललितं मदः ॥
विकृतं तपनं मौग्ध्यं विक्षेपश्च कुतूहलम् ।
हसितं चकितं केलिरित्यष्टादशसंख्यकाः ॥[201]

**३.१.६.१३ स्मितशब्दः । प्र.४५७, (१।७।३५) ।**

स्मितम् – ‘स्मिङ् ईषद्धसने’ (भ्वा.आ.अ.अयं धातुः सिद्धान्तकौमुद्यां नास्ति) इति धातोः ‘भावे’ (पा.३।३।११४) इति सूत्रेण क्तप्रत्यये स्मितमिति । ‘निष्ठा च ’ ( पा.लि. १२० ) इति क्लीबत्वम् । ईषद्धासस्य नाम ।

**३.१.६.१४ स्वरशब्दः ।** प्र.३९०, (१।७।१) ।

---

[199] पूर्ववत् (३।१००), पृ.१४३ ।

[200] पूर्ववत् (३ः१३५, पृ.१५८ ।

[201] विश्वनाथः, ***साहित्यदर्पण,*** ( ३।१०४), वाराणसी : चौखम्बा संस्कृत संस्थान, वि.सं.२०५८, पृ.१३६ ।

स्वराः – स्वरन्ति = शब्दायन्त इति विग्रहे ‘स्वृ शब्दोपतापयोः’ (भ्वा.प.अ.९९८) इति धातोः ‘नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः’ (पा.३।१।१३४) इति सूत्रेणाऽच्प्रत्यये बहुवचने ‘स्वराः’ इति । ‘घाजन्तश्च’ ( पा.लि. ३७ ) इति पुंस्त्वम् । सप्तस्वराणां नामानि यथा –

षड्जं रौति मयूरस्तु गावो नर्दन्ति चर्षभम् ।
अजाविकौ तु गान्धारं क्रौन्चो नर्दति मध्यमम् ॥
पुष्पसाधारणे काले कोकिलो रौति पञ्चमम् ।
अश्वस्तु रैवतं रौति निषादं रौति कुन्जरः ॥[२०२]

**३.१.६.१५ हावशब्दः । प्र.४५२, (१।७।३२) ।**

हावाः – हवनमिति विग्रहे ‘हु दानादानयोः’ (जु.प.अ.११५८) इति धातोः ‘भावे’ ( पा.३।३।१८)इति सूत्रेण घञ्प्रत्यये बहुत्वविवक्षायां ‘हावाः’ इति । ‘घञबन्तः’ ( पा.लि. ३६ ) इति पुंस्त्वम् । पूर्वोक्ताः षट् हावाः । हावस्य व्यञ्जकानि च –

भ्रुनेत्रादिविकारैस्तु संभोगेच्छाप्रकाशकः ।
भाव एवाल्पसंलक्ष्यविकारो हाव उच्यते ॥[२०३]

**३.१.६.१६ हेलाशब्दः । प्र.४५२, (१।७।३२) ।**

हेला–हेलनमिति विग्रहे ‘हिल भावकरणे’ (तु.प.से.१४४९) इति धातोः‘भावे’ (पा.३।३।१८) इति सूत्रेण भावे घञ्प्रत्यये टापि हेलेति ।‘ऊङाबन्तश्च ’ ( पा.लि. ११ ) इति स्त्रीत्वम् । हेलाया लक्षणं यथा–

प्रौढेच्छा सुरते हेला ।[२०४]

## ३.१.७ पातालभोगिवर्गः

पातालभोगिवर्गात्-आशिस्-पातालशब्दयोष्टिप्पण्यौ –

**३.१.७.१ आशिःशब्दः । प्र.४८४, (१।८।श्लो.क्षेपकः१) ।**

आशीः–आङ्पूर्वकात् ‘शासु अनुशिष्टौ’ (अ.प.से.१११५) इति धातोः ‘क्विप्च’ (पा.३।२।७६) इति सूत्रेण क्विप्प्रत्यये ‘शास इदङ्हलोः’ (६।४।३४) इतीत्वे आशीरिति । ‘आशीर्धूःपूर्गीर्द्वारः ’ (

---

[२०२]याज्ञवल्क्यः, ***याज्ञवल्क्यशिक्षा*** , (श्लो.८–९) वाराणसी : चौखम्बा ओरिइण्टलिया, सन् १९८९, पृ.४ ।

[२०३]विश्वनाथः, ***साहित्यदर्पण,*** ( ३।९४), वाराणसी : चौखम्बा संस्कृत संस्थान, वि.सं.२०५८, पृ.१३७ ।

[२०४]विश्वनाथः, ***साहित्यदर्पण,*** ( ३।१०४), वाराणसी : चौखम्बा संस्कृत संस्थान, वि.सं.२०५८, पृ. । हेलात्यन्तसमालक्ष्यविकारः स्यात् स एव तु ।

पा.लि. २८ ) इति स्त्रीत्वम् । पृषोदरादित्वाद्दीर्घसकारलोपे 'आशी' इत्यप्यस्ति । सर्पदन्तस्य नाम । यथोक्तं च–

आशीस्तालुगता दंष्ट्रा तया विद्धो न जीवति ।[२०५]

**३.१.७.२ . पातालशब्दः । प्र.४६६,(१।८।१) ।**

पातालम् – पतन्त्यत्र पापादिति विग्रहे 'पत्लृ गतौ' (भ्वा.प.से.९०३) इति धातोः 'पतिचण्डिभ्यामालञ्' (उ.१।११७) इति सूत्रेणालञ्प्रत्यये पातालमिति । 'लोपधः' ( पा.लि. १४१) इति क्लीबत्वम् । अधोलोका अन्येऽपि सन्ति यथा सप्तलोकानां नामानि –[२०६]

सप्तलोकाः (तालिका ३.१.७.२)

| | | | | | | |
|---|---|---|---|---|---|---|
| १.अतलम् | २.वितलम् | ३.सुतलम् | ४.तलातलम् | ५.महातलम् | ६.रसातलम् | ७.पातालम् |

## ३.१.८ नरकवर्गः

नरकवर्गात्-नरकशब्दस्य टिप्पणी –

**३.१.८.१ नरकशब्दः । प्र.४९१, (१।९।१) ।**

नरकः – नरतीति विग्रहे 'नृ नये' (भ्वा.प.से.८६२) इति धातोः 'कृञादिभ्यः संज्ञायां वुन्' ( उ.५।३५) इति वुन्प्रत्ययेऽकादेशे गुणे 'नरकः' । 'कोपधः' ( पा.लि.६१) इति पुंस्त्वम् ।

**नरकस्य भेदाः– (तालिका ३.१.८.१)**

| **क्रम संख्या** | **नरकस्य नामानि** | **क्रम संख्या** | **नरकस्य नामानि** |
|---|---|---|---|
| **१** | तामिश्रः | **१५** | पूयोदः |
| **२** | अन्धतामिश्रः | **१६** | प्राणरोधः |
| **३** | रौरवः | **१७** | विशसनम् |
| **४** | महारौरवः | **१८** | लालाभक्षः |
| **५** | कुम्भीपाकः | **१९** | सामेयादनम् |
| **६** | कालसूत्रम् | **२०** | अवीचिः |

[२०५] दीक्षितः भानुजि, ***अमरकोशः*** (सुधाटीका १.८.७), वाराणसी : चौखम्बा विद्याभवन, सन्.२०११, पृ.८९ ।

[२०६] व्यासः, ***श्रीमद्भागवतमहापुराणम्*** (स्कन्धः ५, अध्यायः २४, श्लोकः७) गोरखपुर : गीताप्रेस, वि.सं.२०५४, पृ.५५० ।

| | | | |
|---|---|---|---|
| ७ | असिपत्रवनम् | २१ | अयःपानम् |
| ८ | सूकरमुखम् | २२ | क्षारकर्दमः |
| ९ | अन्धकूपः | २३ | रक्षोगणभोजनः |
| १० | कृमिभोजनः | २४ | शूलप्रोतः |
| ११ | सन्दंशः | २५ | दन्दशूकः |
| १२ | तप्तसूर्मिः | २६ | अवटनिरोधनः |
| १३ | वज्रकण्टकशाल्मली | २७ | पर्यावर्तनः |
| १४ | वैतरणी | २८ | सूचीमुखम् |

स्वयंबोधिन्याष्टिप्पण्यां चत्वारि नामानि नैव सन्ति ।[२०७]

## ३.१.९.वारिवर्गः

वारिवर्गात्-तिमि-पृषतशब्दयोष्टिप्पण्यौ –

### ३.१.९.१ तिमिशब्दः । प्र.५३५, (१।१०।१९) ।

तिमिः – ताम्यतीति विग्रहे 'तमु काङ्क्षायाम्' (दि.प.से.१२८९) इति धातोः 'ऋमितमिशतिस्तम्भामत इच्च' (उ.४।१२२) इति सूत्रेणेन्प्रत्ययेऽकारस्येत्वे तिमिरिति । 'मोपधः' ( पा.लि. ८३) इति पुंस्त्वम् । उदाहरणं यथा–

अस्ति मत्स्यस्तिमिर्नाम शतयोजनमायतः ।

तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघवः ॥ [२०८]

### ३.१.९.२ पृषतशब्दः । प्र. ५०९, (१।१०।६) ।

पृषतः – पर्षन्तीति विग्रहे 'पृषु सेचने' (भ्वा.प.से.७५१) इति धातोः 'पृषिरञ्जिभ्यां कित्' ( उ.३।१११) इत्यतच्प्रत्यये 'पृषतः' इति । पक्षेऽस्मादेव धातोः वर्तमाने 'पृषद्बृहन्महज्जगच्छतृवच्च' (उ.२।८४) इति शतृवद्भावे पृषदिति । जलकणस्य नाम । अनेकटीकानामनुरोधेन पृषद्शब्दः क्लीवलिङ्गो लिखितोऽस्ति । अस्मिन् कोशे

---

[२०७] व्यासः, **श्रीमद्भागवतमहापुराणम्** (स्कन्धः ५, अध्यायः २६, श्लोकः७) गोरखपुर : गीताप्रेस, वि.सं.२०५४, पृ.५५८ ।

[२०८] भट्टाचार्यः तारानाथतर्कवाचस्पतिः, ***वाचस्पत्यम्,*** वाराणसी : संस्कृत सीरीज अफिस, वि.सं.२०२५, पृ.३३०१ । वहादुर राधाकान्तदेवः, ***शब्दकल्पद्रुम,*** वाराणसी : चौखम्बा संस्कृत सिरीज आफिस, सम्वत्२०२४, पृ.६१८ ।

विन्दुपृषत्शब्दयोर्विन्दुपृषतौ, एतादृशं द्वन्द्वसमासं विहाय बहुवचननिर्देशात् पृषन्तिः, पृषतः, पृषच्च त्रयः पदानि सन्त्युदाहरणं यथा पाणिनिना जाम्बवतीविजये –

पयः पृषन्तिभिः पृष्टा वान्ति वाताः शनैः शनैः ।[२०९]

एतादृशदर्शनादिकारान्तपृषन्तिशब्दोऽप्यस्ति । 'पृषदपरुषविषाणाग्रेण लुठति' । एतस्य भागवतस्य[२१०] प्रयोगानुसारेण पृषत्शब्दोऽपि मन्तव्य एव ।

## ३.१.१० भूमिवर्गः

भूमिवर्गात्-अनूपशब्दस्य टिप्पणी –

### ३.१.१०.१ अनूपशब्दः । प्र.६०४, (२।१।१०) ।

अनूपम् – अनुगत आपोऽत्रेति विग्रहे बहुव्रीहिसमासे 'ऋक्पूरब्धूःपथामानक्षे' (पा.५।४।७४) इत्यप्रत्यये 'अनु अप् अ' इति जाते 'ऊदनोर्देशे' (६।३।९८) इत्यनोः परस्याप ऊदादेशे 'अनु ऊप् अ' इति जाते सवर्णदीर्घे वर्णमेलने 'अनूपम्' इति । 'बहुव्रीहिरदिङ्नाम्नामुन्नेयं तदुदाहृतम्' (अ.लि.४४ ) इति विशेष्यनिघ्नत्वेऽपि 'जलप्रायमनूपं स्यात्' इति निर्देशात् क्लीबत्वम् । जलाधिकदेशस्य नाम । तस्य बोधकं ददाति टीकाकारो यथा –

नानाद्रुमलतागुल्मनिर्झरप्रान्तशीतलैः ।

वनैर्व्याप्तमनूपं तत् सस्यैर्व्रीहियवादिभिः ॥[२११]

## ३.१.११ पुरवर्गः

पुरवर्गात्-एडूक-विच्छन्दशब्दयोष्टिप्पण्यौ –

### ३.१.११.१ एडूकशब्दः । प्र.६२९,.(२।२।४) ।

एडूकम् – यत् कुड्यं मध्यन्यस्तास्थि तत् ईडचते 'ईड स्तुतौ' (अ.आ.से.१०८९) इति धातोः 'उलूकादयश्च' (उ.४।४१) इति सूत्रेण साधु 'एडूकम्' इति । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥' ( अ.लि.४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । 'एडुकं यदन्तर्न्यस्तकीकसम्' इति क्लीबनिर्देशः । अस्थ्यादिमयकुडचस्य नाम । बौद्धधर्मावलम्बिनो मृतास्थि भूमौ स्थापयित्वा मण्डलाकारं शिखरयुतं मन्दिरं निर्मान्ति,

---

[२०९] गौतमः कुलचन्दः, **अमरकोश** (स्वयंबोधिनी टीका), काठमाण्डौ : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६, पृ.६५ ।

[२१०]व्यासः, ***श्रीमद्भागवतमहापुराणम्***(स्कन्ध ५, अध्याय ८, श्लोकः२१) गोरखपुर : गीताप्रेस, वि.सं.२०५४, पृ.४९१ ।

[२११] गौतमः, कुलचन्दः, **अमरकोश** (स्वयंबोधिनी टीका), काठमाण्डौ : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६, पृ.७४ ।

स्तूपं कथयन्ति, तदेवैडूकं भवेत्। अन्तर्न्यस्तानि कीकसानि दाढर्यार्थं यत्र तत् कीकसं कठिनद्रव्यस्योपलक्षणम्। यथा महाभारते –

एडूकान् पूजयिष्यन्ति वर्जयिष्यन्ति देवताः।
एडूकचिह्ना पृथिवी न देवगृहभूषिता ॥[२१२]

**३.१.११.२ विच्छन्दकशब्दः। प्र.६४४, (२।२।११)।**

विच्छन्दकम् – विशिष्टाञ्छन्दयतीति विग्रहे 'छदि संवरणे' (चु.उ.से.१६९४) इति धातोः 'क्वुन्शिल्पिसंज्ञयोरपूर्वस्यापि' (उ.२।३२) इति सूत्रेण क्वुन्प्रत्ययेऽकादेशे विच्छन्दक इति। 'कोपधः' ( पा.लि.६१ ) इति पुंस्त्वम्। ईश्वरगृहस्य नाम मन्दिरमिति वा यथा –

उपर्युपरि यद्गेहं तद्विच्छन्दकनामकम्।[२१३]

## ३.१.१२ शैलवर्गः

शैलवर्गात्-धातु-पर्वतशब्दयोष्टिप्पण्यौ –

**३.१.१२.१ धातुशब्दः। प्र.६७९, (२।३।८)।**

धातुः – दधाति शोभामिति विग्रहे 'डुधाञ् धारणपोषणयोः' (जु.उ.अ.११६७) इति धातोः 'सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन्' (उ.१।६९) इति सूत्रेण तुन्प्रत्यये 'धातुः' इति। 'रुत्वन्तः' ( पा.लि. ५७ ) इति पुंस्त्वम्। धातोर्भेदाः –

सुवर्णरौप्यताम्राणि हरितालं मनःशिला।
गैरिकाञ्जनकासीसलोहवङ्गाः सहिङ्गुलाः।
गन्धकोऽभ्रकमित्याद्या धातवो गिरिसम्भवाः। [२१४]

**३.१.१२.२ पर्वतशब्दः। प्र.६६९, (२।३।३)।**

पर्वतः – पर्वाणि सन्त्यत्रेति विग्रहे "पर्व गतौ" (भ्वा.प.से.४४४) इति धातोः 'तप् पर्वमरुद्भ्याम्' (वा.५।२।१२२) इति वार्तिकेन तप्प्रत्यये 'पर्वतः' इति।

---

[२१२]व्यासः (सम्पा. रामचन्द्र शास्त्री) ***महाभारतम्*** (वनपर्व अध्याय १९०, श्लोकः ६५, ६७), दिल्ली : ओरियण्टल बुक्स रीप्रिण्ट कारपोरेशन, सन्१९७९, पृ.३११ ।विपरितश्च लोकोऽयं भविष्यत्यधरोत्तरम्।
एडूकान् पूजयिष्यन्ति वर्जयिष्यन्ति देवताः ॥६५॥
देवस्थानेषु चैत्येषु नागानामालयेषु च  एडूकचिह्ना पृथिवी न देवगृहभूषिता ॥६७॥

[२१३] वहादुर राधाकान्तदेवः ***शब्दकल्पद्रुम,*** वाराणसी : चौखम्वा संस्कृत सिरीज आफिस, सम्वत्२०२४, पृ.३७९।

[२१४] मिश्रः भावः, ***भावप्रकाशनिघण्टुः*** (धात्वादिवर्गः) वाराणसी : चौखम्वा भारती अकादमी, सन् २०१३, पृ.५९०। पाठभेदोऽस्ति यथा- स्वर्णं रुप्यञ्च ताम्रं च रङ्गं यशदमेव च। शीसं लोहञ्च सप्तैते धातवो गिरिसम्भवाः ॥

‘देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि’ ( पा.लि. ४३ ) इति पुंस्त्वम् । ‘हेमकूटादयो नगाः ।’ इत्यत्रादिपदेन पर्वतस्य भेदा यथा–

महेन्द्रो मलयः सह्यः शुक्तिमान् ऋक्षपर्वतः ।
विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः ॥
सुमेरुः शिखरः पूर्वो मरुद् विन्ध्यो हिमालयः ।
वैराटः शारदश्चैव कथिता अष्टपर्वताः ॥[२१५]

## ३.१.१३ वनौषधिवर्गः

वनौषधिवर्गात्-अम्लवेतस-ऋद्धि-ऋषभ-जीवक-वर्वरी/वर्वरा-शाकशब्दानां टिप्पण्यः –

### ३.१.१३.१ अम्लवेतसशब्दः । प्र.९६१, (२।४।१४१) ।

अम्लवेतसः – अम्लश्चासौ वेतसश्चेति विग्रहे ‘विशेषणं विशेष्येण बहुलम्’ (पा.२।१।५७) इति सूत्रेण कर्मधारयसमासे ‘अम्लवेतसः’ इति । ‘सोपधः’ ( पा.लि. ९६ ) इति पुंस्त्वम् । नम्रत्वादम्लवेतसस्य नाम । ‘पदम्चाल्नु’इत्याख्यातो लोकभाषायाम् । निघण्टौ **‘**भोटदेशे प्रसिद्धः’ इति लिखितमस्ति ।[२१६]

### ३.१.१३.२ ऋद्धिशब्दः । प्र.९०४, (२।४।११२) ।

ऋद्धिः – ऋध्नोतीति विग्रहे ‘ऋधु वृद्धौ’ (स्वा.प.से.१३५३) इति धातोः ‘क्तिच्क्तौ च संज्ञायाम्’ (पा.३।३।१७४) इति क्तिच्प्रत्यये धत्वे जस्त्वे ‘ऋद्धिः’ इति । ‘गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥’ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । ‘योग्यमृद्धिः सिद्धिलक्ष्म्यौ’ इति स्त्रीत्वनिर्देशः । ‘पातेभुलो’ इति भाषायाम् । ऋद्धेर्लक्षणम्–

श्वेतलोमान्वितः कन्दो लताजातः सरन्ध्रकः ।
स एव ऋद्धिर्वृद्धिश्च भेदमप्येतयोर्ब्रुवे ॥
तूलग्रन्थिसमा ऋद्धिर्वामावर्तफला च सा ।

---

[२१५] गौतमः कुलचन्द्रः, **अमरकोश** (स्वयंबोधिनी टीका), काठमाण्डौ : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६, पृ.८० ।

[२१६] Sardesai N . G . ; Padhye D . G .; ***Amarakośa of Amarasingh***Varanasi : Chowkhmba Vidyabhwan , 2009, p. 45 सरेल (sorrel) .

वृद्धिस्तु दक्षिणावर्तफला प्रोक्ता महर्षिभिः ॥[२१७]

**३.१.१३.३ ऋषभशब्दः । प्र.९१२, (२।४।११६) ।**

ऋषभः – ऋषतीति विग्रहे 'ऋषी गतौ' (तु.प.से.१३७१) इति धातोः 'ऋषिवृषिभ्यां कित्' ( उ.३।१२३) इति सूत्रेणाऽभच्प्रत्यये 'ऋषभः' इति । 'भोपधः' ( पा.लि. ८०) इति पुंस्त्वम् । ऋषभाख्यौषधेर्नाम । 'गुनाभा' इति भाषायाम् । लक्षणं यथा–

जीवकर्षभकौ ज्ञेयौ हिमाद्रिशिखरोद्भवौ ।

रसोनकन्दवत्कन्दौ निःसारो सूक्ष्मपत्रकौ ॥

जीवकः कूर्चकाकार ऋषभो वृषशृङ्गवत् ।[२१८]

**३.१.१३.४ जीवकशब्दः । प्र.९६४, (२।४।१४२) ।**

जीवकः – जीवयतीति विग्रहे 'जीव प्राणधारणे' (भ्वा.प.से.६०२) इति धातोः 'ण्वुल्तृचौ' ( पा.३।१।१३३) इति ण्वुल्प्रत्ययेऽकादेशे 'जीवकः) इति । 'कोपधः' ( पा.लि. ६१) इति पुंस्त्वम् । लोकभाषायां 'गुनाभा' इति ख्यातस्याष्टवर्गान्तर्गतजीवकस्य नाम । भावप्रकाशस्योद्धरणं करोति कुलचन्द्रो यथा–

जीवकर्षभकौ ज्ञेयौ हिमाद्रिशिखरोद्भवौ ।

रसोनकन्दवत्कन्दौ निःसारौ सूक्ष्मपत्रकौ ॥

जीवकः कूर्चकाकार ऋषभो वृषशृङ्गवत् ॥[२१९]

**३.१.१३.५ वर्वरी/वर्वराशब्दः । प्र.९५८, (२।४।१३९) ।**

वर्वरी/वर्वरा – वृणोतीति विग्रहे 'वृञ् वरणे' (स्वा. उ.से.१३३४) इति धातोः 'कृगृशृवृञ्चतिभ्यः ष्वरच्' (उ.२।१२१) इति ष्वरच्प्रत्यये षित्वात् ङीषि 'वर्वरी' इति । अनित्यः षितां ङीष् तस्माट्टाप् 'वर्वरा' इति । 'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । 'वावरी' इति भाषायां ख्याताया नाम । अत्र सामान्यतयोक्ते विशिष्टानि नामान्यपि सन्ति । यथा–

वर्वरी कवरी तुङ्गी खरपुष्पाऽजगन्धिका ।

पर्णासस्तत्र कृष्णे तु कठिञ्जरकठेरकौ ॥

---

[२१७] मिश्रः भावः, ***भावप्रकाशनिघण्टुः*** (हरितक्यादिवर्गःश्लो.१३८-१४०, ) वाराणसी : चौखम्बा भारती अकादमी, सन् २०१३, पृ.६० ।

[२१८] पूर्ववत् श्लो.१२३-१२४, पृ.५८ ।

[२१९] पूर्ववत् श्लो.१२३-१२४, पृ.५५८ ।

तत्र शुक्लेऽर्जकः प्रोक्तो वटपत्रस्ततोऽपरः ।[२२०]

**३.१.१३.६ शाकशब्दः । प्र.९५१, (२।४।१३६) ।**

शाकम् – शक्यते भोक्तुमिति विग्रहे 'शक्लृ शक्तौ' (स्वा.प.अ.१३४३) इति धातोः 'अकर्तरि च कारके संज्ञायाम्' (पा.३।३।१९) इति घञ्प्रत्यये 'शाकम्' इति । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥' ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । 'शाकाख्यं पत्रपुष्पादि' इति क्लीबनिर्देशः । शाकस्य भेदाः–

पत्रं पुष्पं फलं नालं कन्दं संस्वेदजं तथा ।

शाकं षड्विधमुद्दिष्टं गुरुं विद्याद्यथोत्तरम् ॥[२२१]

पत्र (पात, वेथु, मेथी, प्रभृतिको) पुष्प (फूल, कोइरालाको, वडहर प्रभृतिको) फल (फर्सी, घिरौला प्रभृतिको) नाल (डाँठ कमल प्रभृतिको) कन्द (मूला प्रभृति) संस्वेदज (च्याउ) यती ६ शाकका भेद छन् ।[२२२]

## ३.१.१४ मनुष्यवर्गः

मनुष्यवर्गात्-गौरी-ग्रहणी-पुँश्चली-प्ता-प्रवाहिका-बाल्य-मेखला-वरवर्णिनीशब्दानां टिप्पण्यः –

**३.१.१४.१ गौरीशब्दः । प्र.११२५, (२।६।८) ।**

गौरी – गूयत इति विग्रहे 'गुङ् शब्दे (भ्वा.आ.से.१०२२) इति धातोः 'ऋज्रेन्द्राग्रवज्रविप्रकुब्रचुब्रक्षुरखुरभद्रोग्रभेरभेलशक्रशुक्लगौरवन्रेरामालाः' (उ.२।२।२८) इति निपातनात् रन्प्रत्यये वृद्धौ च गौरादित्वात् ङीषि 'गौरी' इति । 'ङ्याबूङन्तं चलं स्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम् । अदृष्टरजस्काया नाम ।

अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी ।

दशवर्षा भवेत् कन्या तत ऊर्ध्वं रजस्वला ॥[२२३]

---

[२२०] पूर्ववत् पुष्पवर्ग श्लो.६९-६०, पृ.४९९ ।

[२२१] पूर्ववत् शाकवर्ग पृ.६५० ।

[२२२] मूलपत्रकरीराग्रफलकाण्डादिरूढकम् ।
त्वक् पुष्पं कवकं चैव शाकं दशविधं स्मृतम् ॥

मूलं = मूलकादेः, पत्रं = वास्तुकादेः, करीरं = वंशाङ्कुरम्, अग्रं = वेत्रादेः, फलं = कुष्माण्डादेः, काण्डं = उत्पलादेर्नालम्, अधिरूढकं = तालवीजाङ्कुरास्थिमज्जादेः, त्वक् = मातुलुङ्गादेः, पुष्पं = तिन्तिडीकोविदादेः, कवकं = छत्राकमिति मुकुटः । भानुजी ।

[२२३] गौतमः कुलचन्द्रः, **अमरकोश** (स्वयंबोधिनी टीका), काठमाण्डौ : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६, पृ.११२५ ।

अस्य वचनस्य तथैव 'दशमे नग्निका वा स्यात्' अस्य वचनस्य चानुसन्धानं विहाय सामान्यरूपेण लिखिताः पर्यायवाचिनः शब्दाः । शिवपत्न्या नामापिगौरीति ।

**३.१.१४.२ ग्रहणीशब्दः । प्र.१२२०, (२।६।५५) ।**

ग्रहणी – गृह्णाति जठराग्निमिति विग्रहे 'ग्रह उपादाने' (क्र्या.उ.से.१६३६) इति धातोः 'कृत्यल्युटो बहुलम्' (पा.३।३।११३) इति सूत्रेण ल्युट्प्रत्ययेऽनादेशे ङीपि ग्रहणीति ।'ङ्याबूङन्तं चलं सस्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम् ।

**३.१.१४.३ पुँश्चलीशब्दः । प्र.११३०, (२।६।१०) ।**

पुँश्चली – पुंसो भर्तुः सकासाच्चलति पुरुषान्तरं गच्छतीति विग्रहे 'चल कम्पने' ( भ्वा.प.से.८९०) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इति सूत्रेणाच्प्रत्यये 'षिद्गौरादिभ्यश्च' (४।१।४१) इति सूत्रेण ङीषि स्वादिकार्ये पुंश्चलीति । 'ङ्याबूङन्तं चलं स्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम् । यद्यप्यत्र पतिगृहगतानां स्त्रीणां सामान्यतयोक्तेऽपि भेदोऽस्ति । तस्मात्कुलचन्द्रो ब्रह्मवैवर्तपुराणस्य श्लोकमुद्धरति यथा–

पतिव्रता चैकपत्नी द्वितीये कुलटा स्मृता ।
तृतीये वृषली ज्ञेया चतुर्थे पुंश्चली स्मृता ॥
वेश्या च पञ्चमे षष्ठे युङ्गी च सप्तमेऽष्टमे ।
अत ऊर्ध्वं महावेश्या साऽस्पृश्या सर्वजातिषु ॥[२२४]

**३.१.१४.४ प्ताशब्दः । प्र.१३०७, (२।६।९७) ।**

सटा – सटतीति विग्रहे 'षट अवयवे' (भ्वा.प.से.३२२) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इत्यच्प्रत्यये टापि सटेति । 'ऊङाबन्तश्च ' ( लिङ्गानु. ११ ) इति स्त्रीत्वम् ।

जटा–जटतीति विग्रहे 'जट संघाते' (भ्वा.प.से.३१४) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इत्यच्प्रत्यये टापि जटेति । 'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् ।

द्वौ शब्दौ व्रतिनः शिखायाः पर्यायवाचिनौ तथापि 'व्रतिनः प्ता-सटा-जटाः' एतादृशपाठोऽपि प्रमाणिकोऽस्ति । तस्मिन्पक्षे प्ता, जटा, सटेति जटायाः पर्याया अपि भवन्ति । वाणेन महाकविना 'सुप्तोऽपि प्रबुद्धः' इत्युक्त्वा कादम्वर्यां श्लेषो वा विरोधाभासो दर्शितः ।[२२५]

---

[२२४] पूर्वत् पृ.११५ ।

### ३.१.१४.५ प्रवाहिकाशब्दः । प्र.१२२०, (२।६।५५) ।

प्रवाहिका – प्रवहतीत्यर्थे प्रपूर्वकात् 'वह प्रापणे' (भ्वा.उ.अ.१०७३) इति धातोः 'ण्वुल्तृचौ' ( पा.३।१।१३३) इति ण्वुल्प्रत्ययेऽकादेशे टापि 'प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः' (पा.७।३।४४) इति सूत्रेण कात्पूर्वस्याकारस्येत्वे स्वादिकार्ये प्रवाहिकेति । 'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् ।

यद्यप्यमरसिंहो ग्रहणीप्रवाहिकयोः शब्दयोः सामान्यतयैकस्या रुजः पर्याये स्थापयति तथापि कुलचन्द्र उभयोः शब्दयोः पार्थक्यं दर्शयन्नुद्धरति । यथा ग्रहण्या लक्षणम्–

अग्न्यधिष्ठानमन्नस्य ग्रहणात् ग्रहणी मता ।
नाभेरुपरि सा ह्यग्निर्बलोपष्टम्भबृंहिता ॥
अपक्वं धारयत्यन्नं पक्वं सृजति चाप्यधः ।[२२६]

प्रवाहिकाया लक्षणम्–

वायुः प्रवृद्धो निचितं बलासं नुदत्यधस्तादहिताशनस्य ।
प्रवाहतोऽल्पं बहुशो मलाक्तं प्रवाहिकां तां प्रवदन्ति तज्ज्ञाः ॥[२२७]

उभयोः रुजोः प्रायः पुनः पुनर्मलं जहाति तस्मात् कोशकारेण सामान्यतयोक्तं भवेदिति ।[२२८]

### ३.१.१४.६ बाल्यशब्दः । प्र.११९०, (२।६।४०) ।

बाल्यम् – बालस्य भाव इति विग्रहे 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' (पा.५।१।१२४) इति सूत्रेण ष्यञ्प्रत्यये बाल्यमिति । 'त्वष्यञौ तद्धितौ' ( पा.लि. १२१ ) इति नपुंसकत्वम् । बाल्यावस्थाया अन्येऽपि भेदाः सन्ति । व्याख्याकारगौतमः श्रीधरस्वामिनो वचनमुद्धरति यथा–

कौमारमापञ्चमाब्दं पौगण्डं दशमावधिः ।
कैशोरमापञ्चदशात् यौवनं च ततः परम् ॥[२२९]

---

[२२५] भट्टः: बाणः, ***कादम्बरी***(पूर्वार्धः) वाराणसी : चौखम्बा सुरभारती प्रकाशन, पञ्चमसंस्करण सन् १९८१, पृ.११६ ।

[२२६]चरकः (विद्याधर शुक्ल रविदत्त शास्त्री), ***चरकसंहिता***(अ.१५, श्लो.५६-५७), वाराणसी : चौखम्बा संस्कृत प्रतिष्ठान, सन् २०१२, पृ.२३६ ।

[२२७] माधवकविः (सं.यदुनन्दनोपाध्याय),***माधवनिधानम्*** (अतिसारनिदानम् श्लो.२१), वाराणसी : चौखम्बा प्रकाशन, वि.सं.२०७१, पृ.१७५ ।

[२२८]डायरिया (Diarrhoea) इत्याङ्लभाषायामधुना । Sardesa N . G ., Padhye D . G . , ***Amarakośa of Amarasingh***(2.6.55), Varanasi : Chowkhmba Vidyabhwan, 2009 , p.57.

**३.१.१४.७ मेखलाशब्दः । प्र.१३२९, (२।६।१०८) ।**

मेखला – मखं गतिं लातीति विग्रहे 'ला आदाने दाने च' (अ.प.अ.११३४) इति धातोः 'आतोऽनुपसर्गे कः' (पा.३।२।३) इति सूत्रेण कप्रत्यये उपपदसमासादिकार्ये 'पृषोदरादीनि यथोपदिष्टम्' (पा.६।३।१०९) इति सूत्रेणैत्वे टापि मेखलेति । 'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । अत्र मेखलायाश्चत्वारः पर्यायाः सन्ति । भेदविवक्षायां तु लिखति कुलचन्द्र –

एकयष्टिर्भवेत्काञ्ची मेखला त्वष्टयष्टिका ।
राजयष्टिश्च रसना तत्त्वयष्टिः कलापकः ॥[२३०]

**३.१.१४.८ वरवर्णिनीशब्दः । प्र.१११८, (२।६।४) ।**

वरवर्णिनी - वरवर्णोऽस्त्यस्या इति विग्रहे 'अत इनिठनौ' (पा.५।२।११५) इति सूत्रेणेनिप्रत्यये ङीपि 'वरवर्णिनी' इति । 'ङ्याबूङन्तं चलं सस्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम् । उत्तमस्त्रिया नाम, लक्षणं यथा –

शीतकाले भवेदुष्णा योष्णकाले च शीतला ।
वटच्छायासमाना सा विज्ञेया वरवर्णिनी ॥[२३१]

## ३.१.१५ ब्रह्मवर्गः

ब्रह्मवर्गात्-अभिवादन-इष्ट-नियम-पूर्त-ब्रह्मचारि-भिक्षु-मुनि-यमशब्दानां

टिप्पण्यः –

**३.१.१५.१ अभिवादनशब्दः । प्र.१४८३, (२।७।४१) ।**

अभिवादनम् – अभिमुखीकरणार्थं वादनमिति विग्रहे 'वद संदेशवचने' (चु.उ.से.१९८४) इति धातोः'ल्युट् च' (पा.३।३।११५) इति सूत्रेण ल्युट्प्रत्ययेऽनादेशेऽभिवादनमिति । 'भावे ल्युडन्तः' ( पा.लि.११९ ) इति क्लीबत्वम् । 'अमुकगोत्रोऽमुकशर्माऽहं भवन्तमभिवादये' इत्यादिविधिपूर्वकपादग्रहणमभिवादनमुच्यते । अष्टाङ्गप्रणामस्य लक्षणं यथा–

पद्भ्यां कराभ्यां जानुभ्यां वक्षसा शिरसा दृशा ।
वचसा मनसा चैव प्रणामोऽष्टाङ्ग ईरितः ॥[२३२]

---

[२२९]श्रीधरस्वामी । आषोडशाद् भवेद्बालः । तारानाथतर्कवाचस्पतिभट्टाचार्य, ***वाचस्पत्यम्,*** वाराणसी : संस्कृत सीरीज अफिस, वि.सं.२०२५, पृ.४५७३ । राधाकान्तदेव वहादुर, ***शब्दकल्पद्रुम,***वाराणसी : चौखम्वा संस्कृत सिरीज आफिस, सम्वत्२०२४, पृ.४२९ ।

[२३०] गौतमः, कुलचन्द्रः, **अमरकोश** (स्वयंबोधिनी टीका), काठमाण्डौ : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६, पृ.१३० ।

[२३१] दीक्षितः भानुजि, ***अमरकोशः*** (सुधाटीका २.६.४), वाराणसी : चौखम्बा विद्याभवन, सन्.२०११, पृ.२०४ ।
शीते सुखोष्णसर्वाङ्गी ग्रीष्मे या सुखशीतला ।
भर्तृभक्ता च या नारी सा भवेद्वरवर्णिनी ॥

सम्मिलितः प्रणामः साष्टाङ्गप्रणामोऽपि कथ्यते । पञ्चरात्रे न प्राप्यते ।

**३.१.१५.२ इष्टशब्दः । प्र.१४५१, (२।७।२८) ।**

इष्टम् – यजनमित्यर्थे 'यज देवपूजासङ्गतिकरणदानेषु' (भ्वा.उ.अ.१०७१) इति धातोः 'नपुंसके भावे क्तः' (पा.३।३।११४) इति सूत्रेण क्तप्रत्यये 'यज् त' इति जाते 'वचिस्वपियजादीनां किति' (पा.६।१।१५) इति सूत्रेण संप्रसारणे 'इ अ ज् त' इति जाते 'संप्रसारणाच्च' (पा.६।१।१०८) इति पूर्वरूपे 'इज् त' इति जाते 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' (पा.८।२।३६)इतिसूत्रेण षत्वे 'इष् त' इति जाते 'ष्टुना ष्टुः' (पा.८।४।४१) इति सूत्रेण ष्टुत्वे इष्टमिति निष्ठा च' ( पा.लि. १२० ) इति क्लीबत्वम् । इष्टम् = यज्ञं परिचायति टिप्पणीकारः–

इष्टिभिः पशुबन्धैश्च चातुर्मास्यैर्यजेत्तु यः ।
अग्निष्टोमादिभिर्यज्ञैर्यजेत च स इष्टवान् ॥
अग्निहोत्रं तपः सत्यं वेदानां चैव पालनम् ।
आतिथ्यं वैश्वदेवं च इष्टमित्यभिधीयते ॥[२३३]

**३.१.१५.३ नियमशब्दः । प्र.१४९९, (२।७।४९) ।**

नियमः – निपूर्वकात् 'यम उपरमे' (भ्वा.प.अ.१०४३) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिनयचः' (पा.३।१।३४) इत्यच्प्रत्यये 'नियमः' इति । नित्यमयति वा नियमः । 'घाजन्तश्च' ( पा.लि. ३७ ) इति पुंस्त्वम् । नियमस्य लक्षणं यथा–

शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः ।[२३४]

**३.१.१५.४ पूर्तशब्दः । प्र.१४५१, (२।७।२८) ।**

पूर्तम् – पूरणमित्यर्थे 'पृ पालनपूरणयोः' (जु.प.से.११६१) इति धातोः 'नपुंसके भावे क्तः' ( पा.३।३।११४) इति सूत्रेण क्तप्रत्यये 'पृ त' इति जाते 'श्र्युकः किति' (पा.७।२।११) इति सूत्रेण इण्निषेधे 'उदोष्ठ्यपूर्वस्य' (पा.७।१।१०२) इत्युत्वे पुर्तेति जाते 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' (पा.८।२।४२) इति सूत्रेण प्राप्तस्य नत्वस्य 'न ध्याख्यापॄमूर्छिमदाम्' (पा.८।२।५७) इति

---

[२३२]तुलसीराम आचार्य, ***एकादशीमाहत्म्यम*** (भविष्योत्तरपुराण आषाढ शुक्ल श्लो.१३१), कचौडी गली वाराणसी : बम्बइ पुस्तक भण्डार, पृ.१४९ पञ्चरात्रे न प्राप्यते । उरसा सिरसा दृष्ट्या मनसा वचसा तथा । पद्भ्यां कराभ्यां जानुभ्यां प्रणामोऽष्टाङ्ग उच्यते ॥ राधाकान्तदेव वहादुर, ***शब्दकल्पद्रुम,*** वाराणसी : चौखम्वा संस्कृत सिरीज आफिस, सम्वत्२०२४, पृ.२५१ । तारानाथतर्कवाचस्पतिभट्टाचार्य, ***वाचस्पत्यम,*** वाराणसी : संस्कृत सीरीज अफिस, वि.सं.२०२५, पृ.४४३५ ।

[२३३]कुलचन्द्र गौतम, **अमरकोश** (स्वयंबोधिनी टीका), काठमाण्डौ : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६, पृ.१३९ ।

[२३४] पूर्ववत् सू.३२, पृ.२७३ ।

निषधे 'हलि च' (पा.८।२।७७) इति दीर्घे पूर्तमिति । 'निष्ठा च ' ( पा.लि. १२० ) इति क्लीबत्वम् । पूर्तकर्मणो लक्षणं यथा–

पुष्करिण्यस्तथा वाप्यो देवतायतनानि च ।[२३५]
अन्नदानमथाऽऽरामाः पूर्तमित्यभिधीयते ।
रोगिणां परिचर्या च पूर्तमित्यभिनिर्दिशेत् ।[२३६]

इष्टकर्मणो मेलनमिष्टापूर्तमिति च कथ्यते ।

**३.१.१५.५ ब्रह्मचारिशब्दः । प्र.१४८६, (२।७४३) ।**

ब्रह्मचारी – ब्रह्म = वेदाध्ययनं व्रतं चरति तच्छीलो वेति विग्रहे 'चर गतौ'( भ्वा.आ.से.५१२) इति धातोः 'व्रते' (पा.३।२।८०)इति सूत्रेण णिनिप्रत्यये ब्रह्मचारीति । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥' ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । 'वर्णिनो ब्रह्मचारिणः' इति पुंस्त्वनिर्देशः । कुलचन्द्रस्त्वष्टाङ्गमैथुनरहितं ब्रहमचारीत्युल्लिखति । मैथुनस्य लक्षणं यथा–

दर्शनं स्पर्शनं केली रहस्यं गुह्यभाषणम् ।
संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च ॥
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः । [२३७]

मिथुनस्य (स्त्रीपुंसयोः) कर्म (कार्यम्) मैथुनम् । 'प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ्' ( पा.५।१।१२९)इत्यञ् । मिथुनादागतं वा ।

**३.१.१५.६ भिक्षुशब्दः । प्र.१४८४, (२।७४२) ।**

भिक्षुः – भिक्षणशील इत्यर्थे 'भिक्ष भिक्षायामलाभे लाभे च' (भ्वा.आ.से.४४६) इति धातोः 'सनाशंसभिक्ष उः' (पा.३।२।१६८) इति सूत्रेणोप्रत्यये स्वादिकार्ये भिक्षुरिति । 'उकारान्तः' ( पा.लि. ५१ ) इति पुंस्त्वम् ।

---

[२३५]पूर्ववत् ।

[२३६] भट्टाचार्यः तारानाथतर्कवाचस्पतिः, ***वाचस्पत्यम्,*** वाराणसी : संस्कृत सीरीज अफिस, वि.सं.२०२५, पृ.४४०५ । पुष्करिण्यः सभा वापी देवतायतनानि च । आरामश्च विशेषेण पूर्तं कर्म विनिर्दिशेत् ॥ राधाकान्तदेव वहादुर, ***शब्दकल्पद्रुम,***वाराणसी : चौखम्वा संस्कृत सिरीज आफिस, सम्वत्२०२४, पृ.२२१ ।

व्यासः । हेमाद्रि. दा. ख. । वापिकूपतडागादिदेवतायतनानि च । अन्नप्रदानमारामः पूर्तमित्यभिधीयते ॥

[२३७] भट्टाचार्यः तारानाथतर्कवाचस्पतिः, ***वाचस्पत्यम्,*** वाराणसी : संस्कृत सीरीज अफिस, वि.सं.२०२५, पृ.५२४ ।

यद्यपि भिक्षुपर्यायाः 'परिव्राट्, कर्मन्दी, पारासरी, मस्करी' एते चत्वारः सन्ति तथापि भिक्षुशब्दस्य प्रयोगः सद्योगिनां मिथ्याचारिणं (पाखण्डियोगिनम्) च क्रियते। अन्ये चत्वारः शब्दाः केवलं चतुर्थाश्रमिणां सद्योगिनां वा प्रयुज्यन्ते।

**३.१.१५.७ मुनिशब्दः। प्र.१४८५, (२।७४२)।**

मुनिः – मन्यत इति विग्रहे वेदतत्त्वार्थावगन्तेत्यर्थे 'मन ज्ञाने' (दि.आ.अ.१२५३) इति धातोः 'मनेरुच्च' (उ.४।१२३) इतिसूत्रेण कर्तरीन्प्रत्ययेऽकारस्योकारादेशे मुनिरिति। 'गुणद्रव्यक्रिया-योगोपाधिभिः परगामिनः। कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि॥' ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम्। 'वाचंयमो मुनिः' इति पुंस्त्वनिर्देशः। मुनेर्लक्षणं यथा –

निर्वृत्तः सर्वतत्त्वज्ञः कामक्रोधविवर्जितः।
ध्यानस्थो निष्क्रियो दान्तस्तुल्यमृत्काञ्चनो मुनिः॥[२३८]

**३.१.१५.८ यमशब्दः। प्र.१४९८, (२।७४९)।**

यमः – यच्छतीति विग्रहे 'यम उपरमे' (भ्वा.प.अ.१०४३) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।३४) इत्यच्प्रत्यये 'यमः' इति। 'घाजन्तश्च' ( पा.लि. ३७ ) इति पुंस्त्वम्।

**अहिंसासत्याऽस्त्येयब्रह्मचर्याऽपरिग्रहा यमाः।**[२३९]

## ३.१.१६ क्षत्रियवर्गः

क्षत्रियवर्गात्-अक्षौहिणी-भिन्दिपाल-मत्त-राज्याङ्गशब्दानां टिप्पण्यः –

**३.१.१६.१ अक्षौहिणीशब्दः। प्र.१६८६, (२।८।८१)।**

अक्षौहिणी – दशानीकिन्योऽक्षौहिणी। ऊहः समूहोऽस्त्यस्या इति विग्रहे 'अत इनिठनौ' ( पा.५।२।११५) इतिसूत्रेणेनिप्रत्यय 'ऋन्नेभ्यो ङीप्' (पा.४।१।५) इति ङीपि 'ऊहिनी' इति। अक्षाणामूहिनीति विग्रहे षष्ठीतत्पुरुषसमासे सुपो लुकि 'पूर्वपदात्संज्ञायामगः' (पा.४।८।३) इति णत्वेऽक्ष + ऊहिणीत्यवस्थायां 'अक्षादूहिन्यामुपसंख्यानाम्' (वा.६।१।८९) इति वृद्धौ 'अक्षौहिणी' इति। 'ङ्याबूङन्तं चलं स्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम्।

अक्षौहिणीसैन्यपरिचयचक्रमिदं दर्शयति कुलचन्द्रः – (तालिका ३.१.१६.१)

| सैन्यनाम | पत्तिः | सेनामु. | गुल्ममु. | गणः | वाहिनी | पृतना | चमूः | अनीकिनी | अक्षौहिणी |
|---|---|---|---|---|---|---|---|---|---|

[२३८] गौतमः कुलचन्द्रः, **अमरकोश** (स्वयंबोधिनी टीका), काठमाण्डौ : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६, पृ.१४२।
[२३९] पतञ्जलिः (सम्पा.सुरेन्द्र श्रीवास्तव), (इ.सं.१९८८) ***पातञ्जलयोगदर्शनम्*** (सू.३०), वाराणसी : चौखम्बा संस्कृत प्रतिष्ठान, पृ.२६६।

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| हस्तिनः | १ | ३ | ९ | २७ | ८१ | २४३ | ७२९ | २१८७ | २१८७० |
| रथाः | १ | ३ | ९ | २७ | ८१ | २४३ | ७२९ | २१८७ | २१८७० |
| अश्वाः | ३ | ९ | २७ | ८१ | २४३ | ७२९ | २१८७ | ६५६१ | ६५६१० |
| पदातयः | ५ | १५ | ४५ | १३५ | ४०५ | १२१५ | ३६४५ | १०९३५ | १०९३५० |

### ३.१.१६.२ भिन्दिपालशब्दः । प्र.१७०६, (२।८।९१) ।

भिन्दिपालः – भिन्दतीति विग्रहे 'भिदि अवयवे' (भ्वा.प.से.६३) इति धातोः 'सर्वधातुभ्य इन्' (उ.४।११८) इतीन्प्रत्यये 'भिन्दि' इति जाते भिन्दिं पालयतीति विग्रहे 'कर्मण्यण्' (पा.३।२।१) इत्यण्प्रत्यय उपपदसमासे 'भिन्दिपालः' इति । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥' ( अ.लि.: ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । 'भिन्दिपालः सृगस्तुल्यौ' इति पुंस्त्वनिर्देशः । भिन्दिपालस्य लक्षणं यथा–

भिन्दिपालस्तु वक्राङ्गो नम्रशीर्षो वृहच्छिराः ।
हस्तमात्रोत्सेधयुक्तः करसंमितमण्डलः ॥[२४०]

### ३.१.१६.३ मत्तशब्दः । प्र.१५९५, (२।८।३६) ।

मत्तः – माद्यतीति विग्रहे 'मदी हर्षे' (दि.प.से.१२८५) इति धातोरकर्मकत्वात् 'गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च' (पा.३।२।७२) इति सूत्रेण क्तप्रत्यये 'मत्तः' इति । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥' ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । 'प्रभिन्नो गर्जितो मत्तः' इति पुंस्त्वनिर्देशः । सामान्यतया मत्त इति मत्तहस्तिनामास्ति । अतिमत्तस्य नाम तु गम्भीरवेद्यस्ति । यथा–

चिरकालेन यो वेत्ति शिक्षां परिचितामपि ।
गम्भीरवेदी विज्ञेयः स गजो गजवेदिभिः ॥
त्वग्भेदाच्छोणितस्नावान् मांसस्य क्रथनादपि ।
आत्मानं यो न जानाति स स्याद् गम्भीरवेदिता ॥[२४१]

### ३.१.१६.४ राज्याङ्गशब्दः । प्र.१५५९, (२।८।१८) ।

[२४०]गौतमः कुलचन्द्रः, **अमरकोश** (स्वयंबोधिनी टीका), काठमाण्डौ : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६, पृ.१५९ ।
[२४१] पूर्ववत् पृ.१५१ ।

राज्याङ्गानि – राज्यस्याङ्गानीति विग्रहे 'षष्ठी' (पा.२।२।८) इति सूत्रेण षष्ठीतत्पुरुषसमासे राज्याङ्गानीति । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥' ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । 'राज्याङ्गानि प्रकृतयः' इति क्लीबनिर्देशः । उद्धरति कुलचन्द्रो यथा–

स्वाम्यमात्यौ पुरं राष्ट्रं कोशदण्डौ सुहृत् तथा ।

सप्तप्रकृतयो ह्येताः सप्ताङ्गं राज्यमुच्यते ॥[२४२]

सप्तराज्याङ्गानि (तालिका ३.१.१६.४)

| राज्याङ्गानि– | स्वामी | अमात्यः | पुरम् | राष्ट्रम् | कोषः | दण्डम् | सुहृत् |
|---|---|---|---|---|---|---|---|
| अर्थः– | राजा | मन्त्री | दुर्गः | देशः | द्रव्यम् | सैन्यम् | मित्रम् |

### ३.१.१७ वैश्यवर्गः

वैश्यवर्गात्-ऋत-कृषर-धान्यव्रीहि-पङ्क्ति-फेला-रसाञ्जन-रसाला-लाज-लोह-वेवसारशब्दानां टिप्पण्यः –

**३.१.१७.१ ऋतशब्दः । प्र.१७६७, (२।९।२) ।**

(क) ऋतम् – अर्यत इति विग्रहे 'ऋ गतिप्रापणयोः' (भ्वा.प.से.१००२) इति धातोः 'निष्ठा' ( पा.३।२।१०२) इति सूत्रेण क्तप्रत्यये 'ऋतम्' इति । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥' ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । 'कृषिरुच्छशिलं त्वृतम्' इति निर्देशात् क्लीबत्वम् ।

(ख) उञ्छः – उञ्छनमिति विग्रहे 'उछि उञ्छे' (तु.प.से.२२३) इति धातोः 'भावे' (पा.३।३।१८) इति सूत्रेण घञ्प्रत्यये 'उञ्छः' इति । 'घञबन्तः' (पा.लि.३६) इति पुंस्त्वम् ।

(ग) शिलम् – 'शिल उञ्छे' (तु.प.से.१४५०) इति धातोः 'घञर्थे कविधानम्' (वा.३।३।५८) इति वार्तिकेन कप्रत्यये शिलमिति । 'लोपधः' (पा.लि.१४१) इति क्लीबत्वम् ।

यद्यप्येतानि त्रीणि पदानि पर्यायवाचीनि तथापि त्रिषु परस्परं भेदोऽस्त्येव । तदेव लिखत्याचार्यष्टिप्पण्याम् । क्षेत्रे पतितानामन्नानां कणश अर्जनमुञ्छः, एकैककणश आदानं शिलम्,[२४३]उभयोर्नाम 'ऋतम्' इति कथ्यते ।

**३.१.१७.२ कृषरशब्दः । प्र.१८६४, (२।९। श्लो. क्षेपकः २) ।**

---

[२४२] भट्टः कुल्लूकः, **मनुस्मृतिः** ( अ.९, श्लोक.२९४), वाराणसी : चौखम्बा संस्कृत भवन, वि.सं.२०७१, पृ.५२५ ।

[२४३] दीक्षितः भानुजि, ***अमरकोशः*** (सुधाटीका २.९.४४), वाराणसी : चौखम्बा विद्याभवन, सन्.२०११, पृ.३०३ । उञ्छः कणश आदाने कणिशाद्यार्जने शिलम् ।

(१) कृसरः - करोतीति विग्रहे डुकृञ् करणे (त.उ.अ.१५६६) इति धातोः कृधूमदिभ्यः कित् ( उ.सू.३।७३) इति सूत्रेण सरप्रत्यये कित्वात् गुणाभावे बाहुलकाद् षत्वाभावे स्वादिकार्ये कृसर इति सम्पन्नम् । 'रोपधः' ( पा.लि. ८६ ) इति पुंस्त्वम् ।

(२) कृषरः – करोतीति विग्रहे डुकृञ् करणे (त.उ.अ.१५६६) इति धातोः कृधूमदिभ्यः कित् ( उ.सू.३।७३) इति सूत्रेण सरप्रत्यये कित्वात् गुणाभावे षत्वे स्वादिकार्ये कृसर इति । 'रोपधः' ( पा.लि. ८६ ) इति पुंस्त्वम् । कृशरः शब्दोऽप्यस्ति पाठभेदेन ।

यद्यपि क्षेपकेण श्लोकेन तिलोदनपाकः कृसर उक्तस्तथापि मुद्गप्रभृतीनां पाकोऽपि कृसर इति व्यवहारो लोके दृश्यते ।[२४४]

**३.१.१७.३ धान्यव्रीहिशब्दौ । प्र.१८०६, (२१९।२१) ।**

(क)धान्यम् – धाने =पोषणे साधुरिति विग्रहे 'तत्र साधुः' (पा.४।४।९८) इति सूत्रेण यत्प्रत्यये धान्यमिति ।'अणाद्यन्तास्तेन रक्ताद्यर्थे नानार्थभेदकाः' (अ.लि.४५) इति विशेष्यनिघ्नत्वेऽपि 'धान्यं व्रीहिः स्तम्बकरिः' इति निर्देशात् क्लीबत्वम् ।

(ख)व्रीहिः – व्रीणातीति विग्रहे 'व्री वरणे' (क्र्या.प.से.१६०४) इति धातोः 'व्रीहिशाल्योर्ढक्' ( पा.५।२।२।) इति ज्ञापकात् हिक्प्रत्यये 'व्रीहिः' इति । 'अणाद्यन्तास्तेन रक्ताद्यर्थे नानार्थभेदकाः' (अ.लि.४५) इति विशेष्यनिघ्नत्वेऽपि 'धान्यं व्रीहिः स्तम्बकरिः' इति निर्देशात् पुंस्त्वम् । धान्यव्रीहिशब्दौ सामान्याऽन्नविशेषधान्ययोर्वाचकौ ।

**३.१.१७.४ पङ्क्तिशब्दः । प्र.१९३३, (२१९।८४) ।**

पङ्क्तिः – द्वौ पञ्चताविति विग्रहे 'पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीति-नवतिशतम्' (पा.५।१।५९)इति सूत्रेण निपातनात्सिद्धम् । "पचि विस्तावचने" ( चु.उ.से.१७७६) इति धातोः "स्त्रियाः क्तिन्" (पा.३।३।९४) इति सूत्रेण क्तिन्प्रत्यये "पङ्क्तिः" इति । पङ्क्तिः = दश । पङ्क्तेर्दशगुणोत्तरं क्रमात् शतसहस्रादि ज्ञेयम् । यथा दश पङ्क्तयः = शतम्, दश शतादि सहस्राण्ययुतमित्यादि,शतपङ्क्तिः शहस्रपङ्क्तिरित्यादि वा ज्ञेयम् ।

संख्याचक्रम्(तालिका ३.१.१७.३)

| | | | | | |
|---|---|---|---|---|---|
| १ | एकम् | १ | १० | वृन्दम्(अब्जम्) | १000000000 |
| २ | दश | १० | ११ | खर्वः | १0000000000 |

[२४४]भट्टाचार्यः, ***शब्दस्तोममहानिधिः;***वाराणसी : चौखम्बा संस्कृत सिरिज, तृ.सं.१९६७ । तिलतण्डुलसंपाकः कृषरःपरिकीर्तितः ।इत्युक्ते तिलमिश्रिते पक्वे तण्डुलाद्यन्ने ॥

| | | | | | |
|---|---|---|---|---|---|
| ३ | शतम् | १०० | १२ | निखर्वः | १०००००००००००० |
| ४ | सहस्रम् | १००० | १३ | शङ्खः(महापद्मः) | १००००००००००००० |
| ५ | अयुतम् | १०००० | १४ | पद्मः(शङ्कुः) | १०००००००००००००० |
| ६ | लक्षम् | १००००० | १५ | सागरः | १००००००००००००००० |
| ७ | प्र(नि)युतम् | १०००००० | १६ | अन्त्यम् | १०००००००००००००००० |
| ८ | कोटिः | १००००००० | १७ | मध्यम् | १००००००००००००००००० |
| ९ | अर्वुदम् | १०००००००० | १८ | परार्धम् | १०००००००००००००००००० |

एकदशशतसहस्रायुतलक्षप्रयुतकोटयः क्रमशः ।
अर्वुदमब्जं खर्वनिखर्वमहापद्मशङ्कवस्तस्मात् ।
जलधिश्चान्त्यं मध्यं परार्धमितिदशगुणोत्तरं संज्ञा ।[२४५]

**३.१.१७.५ फेलाशब्दः । प्र.१८७७, (२।९।५६) ।**

फेला–फेल्यत इति विग्रहे 'फेलृ गतौ' (भ्वा.प.से.५८१) इति धातोः 'गुरोश्च हलः' ( पा.३।३।१०४) इत्यप्रत्यये टापि 'फेला' इति । 'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । भुक्तशेषस्य नाम न तु वमितं यथा–

फेलाभुक् प्रतिकूलः क्रुरमनाः सामयः क्षुधाक्रान्तः ।
न स्यात् समीपवर्ती भोजनकाले विनिन्द्यश्च ॥[२४६]

भोजनसमय उच्छिष्टभोजी, विरोधी, क्रुरः, रोगी, बुभुक्षाग्रस्तः, निन्दित एते समीपवर्तिनो न भवेयुः । एतस्मादेवकारणात् 'फेला'इत्यस्यार्थ उच्छिष्टमन्नं भवति, न तु वमनकृतमिति । 'पुरा' इति लोकभाषायाम् ।

**३.१.१७.६ रसाञ्जनशब्दः । प्र.१९६७, (२।९।१०१) ।**

रसाञ्जनम् – रसजमञ्जनमिति विग्रहे 'शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम्' (वा.२।१।६०) इति वार्तिकेन कर्मधारयसमासे रसाञ्जनमिति । 'करणाधिकरणयोर्ल्युट् च' ( पा.लि.१८९) इति विशेष्यनिघ्नत्वम् । पाठे निर्देशात् क्लीबत्वम् । रसाञ्जननिर्माणविधिः

दार्वीक्वाथरसं क्षीरं पादं पक्त्वा यथा घनम् ।
तदा रसाञ्जनं नाम नेत्रयोः परमं हितम् ॥[२४७] इति

---

[२४५]भास्कराचार्यः, ***लीलावती***( अभिन्नपरिकर्माष्टकम् श्लो.२-३), वाराणसी : चौखम्वा विद्याभवन, वि.सं.२००१, पृ.९ ।
[२४६] गौतमः कुलचन्दः, **अमरकोश** (स्वयंबोधिनी टीका), काठमाण्डौ : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६, पृ.१७२।

### ३.१.१७.७ रसालाशब्दः । प्र.१८५१, (२९।४४) ।

रसाला – रसानालातीति विग्रहे 'ला आदाने दाने च' (अ.प.अ.११३४) इति धातोः 'कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम्' (वा.३।२।५) इति वार्तिकेन कप्रत्यये 'रस आला अ' इति जाते, आलोपे सवर्णदीर्घे 'रसाला' इति । 'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । भाषायां सिकर्नी शिखरिणी वा कथ्यते । दधिमधुशर्करामरीच्यार्द्रादीन् मेलयित्वा सम्पद्यते पानरमण्युच्च्यते रसाला । रसालासम्पादनाय बहूनां वस्तूनामाश्यकता भवति । उक्तञ्च भाषायां यथा कुलचन्द्रेण–

रसालानिर्माणविधिः

असल् मीठो आठमाना दहीको पोको पारी पानि जम्मै निथारी ।
चोखा चीनी सेर भर्, चारतोला मक्खन् खारी साफ पारी मिलाऊ ।
घर्मौरीको चोर संपत्ति ल्याऊ मक्खनजत्ति त्यै दहिमा लुकाऊ ॥
अस्सल् छोटी लायची दालचीनि चोखा केसर, सौंठ मरिच्, ई जुटाऊ ।
कूटी छानी तौल वेग्लै र हाल डब्बल(२) तोला डाडुले खूब फाऊ ॥
खुश्वूवाला पात्रमा राख ढाकी तयार् भो लौ भीमसेनी रसाला ।
ख्वाऊ खाऊ इष्टमित्रादि डाकी यस्कोतर्कीव् को न सोधेर जाला ॥[२४८]
आरी माथि त्यो चुहाउन् निचोरी सप्फा सुघ्घर् कोहि छोरी बुहारी ॥

अर्धाढकं स्वच्छं स्वादिष्टं दध्येकत्रीकृत्य वस्त्रेण जलं पृथक् कृत्वा स्वच्छां शर्करां, नवनीतोद्भवं घृतं पलं, मधु पलं शुण्ठ्यादिकमेकत्रीकृत्य पिष्ठीकृत्य स्थापय । कयापि पुत्र्या वध्वा वालोडिता पात्रे स्थापिता भीमशेनी रसाला भवेत् । रसालां भुङ्क्ष्व भोजयस्व । कः प्रशंसां न कुर्यात् ?

### ३.१.१७.८ लाजशब्दः । प्र. १८५७, (२९।४७) ।

लाजाः – लज्यन्त इति विग्रहे 'लज भर्जने' (भ्वा.प.से.२४६) इति धातोः 'अकर्तरि च कारके संज्ञायाम्' (पा.३।३।१९) इति सूत्रेण घञ्प्रत्यये 'दाराक्षतलाजासूनां बहुत्वं च' (पा.लि. १०६)

---

[२४७]माधवोपाध्यायः, ***आयुर्वेदप्रकाशः*** ( द्वितीयोऽध्याय श्लो.२३४), वाराणसी : चौखम्बा भारती अकादमी, सन्२०१४, पृ.३१६ पाठभेदोऽस्ति यथा– दार्वीक्वाथमजाक्षीरपादपक्वं यथा घनम् । तदा रसाञ्जनं नाम नेत्रयोः परमं हितम् ॥ तर्क्ष्यजं तार्क्ष्यशैलं च रसगर्भं रसाञ्जनम् । दार्वीक्वाथम् = दारुहरिद्राकषायम् ।

[२४८] दीक्षितः भानुजि, ***अमरकोशः*** (सुधाटीका २.९.४४), वाराणसी : चौखम्बा विद्याभवन, सन्.२०११, पृ.३१७ ।
अर्धाढकः सुचिरपर्युषितस्य दध्नः खण्डस्य षोडश पलानि शशिप्रभस्य ।
सर्पिः पलं मधु पलं मरिचं द्विकर्षं शुण्ठ्याः पलार्धमपि चार्धपलं चतुर्ण्णाम् ।।
सूक्ष्मे पटे ललनया मृदुपाणिघृष्टा कपूरधूलिसुरभीकृतपात्रसंस्था ।
एषा वृकोदरकृता सरसा रसाला या स्वादिता भगवता मधुसूदनेन ॥

इति पुंसि बहुत्वे 'लाजाः' इति । केचन लाजाक्षतशब्दौ पर्यायवाचिनौ कथयन्ति । भृष्टानि सर्वाण्यन्नानि लाजाःकथ्यन्ते । धान्यस्य लाजान् बोधयितुं तु धान्यलाजा इति कथनीयम् । धान्यलाजानामेव प्राचुर्येण लोके प्रयोगो दृश्यते ।

**३.१.१७.९ लोहशब्दः । प्र.१९६२, (२९।९९) ।**

लोहम् – लूयतेऽनेनेति विग्रहे 'लूञ् छेदने' (क्र्या.उ.से.१५८१) इति धातोः बाहुलकात् हप्रत्यये गुणे लोहमिति । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥' ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । 'सर्वं च तैजसं लोहम्' इति निर्देशात् क्लीबत्वम् । लोहस्य भेदाः–

सुवर्णं रजतं ताम्रं रीतिः कास्यं तथा त्रपु ।
सीसं कालायसं चैवमष्टौ लोहानि चक्षते ॥[२४९]

**३.१.१७.१० वेसवारशब्दः । प्र.१८३३, (२९।३५) ।**

वेसवारः – वेसनमिति विग्रहे 'विस प्रेरणे' (दि.प.से.१२९६) इति धातोः 'भावे' (पा.३।३।१८) इति सूत्रेण घञ्प्रत्यये 'वेसः' इति । वेसं = प्रेरणां वारयति = वृणोति वेत्यर्थे 'वृञ् वरणे' ( स्वा.उ.से.३३४) इति धातोः 'कर्मण्यण्' (पा.३।२।१) इत्यण्प्रत्यय उपपदसमासे 'वेसवारः' इति ।'रोपधः' ( पा.लि. ८९) इति पुंस्त्वम् । हिङ्गु, आर्द्रकम्, मरिचम्, जीरम्,हरिद्राम्, धान्यकं च क्रमेण द्विगुणीकृत्य संमर्दितो वेसवारः संपद्यते । यथा–

हिंग्वार्द्रमरिचं जीरं हरिद्रां धान्यकं तथा ।
क्रमेण द्विगुणं सर्वं वेसवारमिदं शुभम् ॥[२५०]

अस्य वेसवारस्याभावे हरिद्राचूर्णाय लोकभाषायां 'वेसारः' इति भवेदधुना । वेसवारशब्दस्य 'विष्लृ व्याप्तौ' (जु.अ.अ.) इति धातोः 'विश प्रवेशने' (तु.प.अ.) इति धातोश्चसकारभेदात् वेसवारः, वेशवारः, वेषवारश्चेति त्रीणि रूपाणि भवन्ति ।[२५१]

---

[२४९] भट्टाचार्यः तारानाथतर्कवाचस्पतिः, ***वाचस्पत्यम्,*** वाराणसी : संस्कृत सीरीज अफिस, वि.सं.२०२५, पृ.५२०
सुवर्णं रजतं ताम्रं सीसकं कान्तिकं तथा । वङ्गं लौहं तीक्ष्णलौहं लौहान्यष्टौ इमानि तु ॥

[२५०]जी.प्रभाकर राव, ***भैषज्यकल्पनाविज्ञान*** ( पथ्यकल्पना श्लो.३६९–३७०), नई दिल्ली : चौखम्बा पब्लिकेशन, सन्२००९, पृ.३६९ । (सुश्रुतसंहिता सूत्रस्थान ४७)अन्यच्च यथा– मांसं निरस्थि सुस्विन्नं पुनर्दृषदि पेषितम् ।
पिप्पलीशुण्ठिमरिचगुडसर्पिसमन्वितम् ॥
ऐकव्यं पाचयेत् सम्यक् वेसवार इति स्मृतः । वेसवारो गुरुः स्निग्धो बल्या वातरुजापहः ॥

[२५१] दीक्षितः भानुजि, ***अमरकोशः*** (सुधाटीका २.९.३५), वाराणसी : चौखम्बा विद्याभवन, सन्.२०११, पृ.३१४ ।
हिङ्गुजीरकहरिद्राधान्यकशुण्ठीसर्षपादेः' इति मुकुटः । चित्रकं पिप्पलीमूलं पिप्पलीचव्यनागरम् । धान्यकं रजनीश्वेततण्डुलाश्च समांसकाः । वेसवार इति ख्यातः शाकादिषु नियोजयेत् । इत्यात्रेयसंहिता । विंशतिः पलानि हरिद्रायाः, दशपलानि धान्यकस्य,

### ३.१.१८ शूद्रवर्गः

शूद्रवर्गात्-म्लेच्छशब्दस्य टिप्पणी –

**३.१.१८.१ म्लेच्छशब्दः । प्र.२०२७, (२।१०।२०) ।**

म्लेच्छः – म्लेच्छतीति विग्रहे 'म्लेच्छ अव्यक्ते शब्दे' (भ्वा.प.से.२१३) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इति सूत्रेणाऽच्प्रत्यये 'म्लेच्छः' इति । 'घाजन्तश्च' ( पा.लि. ३७ ) इति पुंस्त्वम् । म्लेच्छस्य लक्षणम्–

गोमांसभक्षको यस्तु लोकबाह्यं च भाषते ।
सर्वाचारविहीनोऽसौ म्लेच्छ इत्यभिधीयते ॥[२५२]

### ३.१.१९ विशेष्यनिघ्नवर्गः

विशेष्यनिघ्नवर्गात्-आततायि-कदर्य-फाण्टशब्दानां टिप्पणी –

**३.१.१९.१ आततायिशब्दः । प्र.२१६४, (३।१।४४) ।**

आततायी – आततं = यथा तथायितुं शीलमस्येति विग्रहे 'अय गतौ' (भ्वा.आ.से.५०८) इति धातोः 'सुप्यजातौ णिनिस्ताच्छील्ये' (पा.३।२।७८)इति सूत्रेण णिनिप्रत्यये 'आततायी' इति । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥' ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । 'आततायी वधोद्यते' इति निर्देशात् पुंस्त्वम् । तल्लक्षणं यथा–

अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः ।
क्षेत्रदारहरश्चैव षडेते त्वाततायिनः ॥[२५३]

**३.१.१९.२ कदर्यशब्दः । प्र.२१७२, (३।१।४८) ।**

कदर्यः – कुत्सितोऽर्यः = स्वामीति विग्रहे 'कुगतिप्रादयः' (पा.२।२।१८)इति सूत्रेण समासे 'कोः कत्तत्पुरुषेऽचि' (पा.६।३।१०१) इति कदादेशे 'कदर्यः' इति । 'योपधः' ( पा.लि. ८६ ) इति पुंस्त्वम् । कदर्यस्य परिचायकमिदं पद्यम् –

आत्मानं धर्मकृत्यं च पुत्रदारांश्च पीडयन् ।

---

पञ्चपलानि शुद्धजीरकस्य, पलसार्धद्वयं मेथिकायाः । एतच्चतुष्टयं भर्जितमेव ग्राह्यम् । त्रीणि पलानि मरीचस्य, अर्धपलं रामठस्य, एतत्सर्वमेकत्र संयोज्य संमर्दितं 'वेसवारः' इत्युच्यते ।

[२५२] दीक्षितः भानुजि, ***अमरकोशः*** (सुधाटीका २.९.४४), वाराणसी : चौखम्बा विद्याभवन, सन्.२०११, पृ.३४५ ।
ब्राह्मण्यां वैश्यतो जातः क्षत्ता भवति नामतः ।
अस्यामनेन चौर्येण म्लेच्छो विप्रात्प्रजायते ॥

[२५३] भट्टः कुल्लूकः, ***मनुस्मृतिः*** (८।३५१), वाराणसी : चौखम्बा संस्कृत संस्थान, सन् २००१, पृ.४४० ।

यो लोभात् संचिनोत्यर्थान् स कदर्य इति स्मृतः ॥[२५४]

**३.१.१९.३ फाण्टशब्दः । प्र.२२६४, (३।१।९४) ।**

फाण्टम् – फण्यते इति विग्रहे 'फण गतौ' (भ्वा.प.से.८७९) इति धातोः 'निष्ठा' ( पा.३।२।१०२) इति सूत्रेण क्तप्रत्यये 'फण् त' इति जाते 'क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमः सक्ताविस्पष्टस्वरानायासभृशेषु' (पा.७।२।१८)इतिसूत्रेण निपातनात्कार्यान्तरे साधुः । इडभावः, निष्ठातस्य टत्वं च निपात्यते । 'अनुनासिकस्य क्विझलोः क्ङिति' (पा.६।४।१५) इति दीर्घे फाण्टमिति । 'निष्ठा च ' ( पा.लि. १२० ) इति क्लीबत्वम् । अनायाससाध्यः कषायविशेषः । माधवस्तु नवनीतभावात्प्रागवस्थापन्नं द्रव्यं (दधि) फाण्टमिति वेदभाष्ये आह ।तस्मादस्य द्वावर्थौ । फाण्टस्य लक्षणमेकं बोधयति श्लोकोऽयम् –

अष्टावशेषितेऽत्युष्णजले क्वाथपलं क्षिपेत् ।

विमृश्य पटपूतं तज्जलं फाण्ट इति स्मृतः, कुडवं च जलम्.....।[२५५]

## ३.१.२० संकीर्णवर्गः

संकीर्णवर्गात्-प्रवारण-संयमनशब्दानां टिप्पणी –

**३.१.२०.१ प्रवारणशब्दः । प्र.२३०७, (३।२।३) ।**

प्रवारणम् – प्रव्रियते इति विग्रहे 'वृञ् आवरणे' (चु.उ.से.१९५२)इति धातोः 'ल्युट् च' ( पा.३।३।११५) इति सूत्रेण ण्यान्ताल्ल्युट्प्रत्ययेऽनादेशे प्रवारणमिति । 'भावे ल्युडन्तः' ( पा.लि. ११९ ) इति क्लीबत्वम् । यद्यप्यत्रास्यार्थः काम्यदानमस्ति तथापि गतानुगतिकः । महाभारते तु वास्तविकोऽर्थः 'चयनम्' अस्ति । कृष्णोऽर्जुनं प्रति कथयति यथा–

प्रवारणं तु बालानां पूर्वं कार्यमिति श्रुतिः ।

तद्वणीतां भवानग्रे प्रवार्यस्त्वं हि धर्मतः ॥[२५६]

३.१.२०.२ **संयमशब्दः ।** प्र.२३३७, (३।२।१८) ।

---

[२५४] गौतमः कुलचन्दः, **अमरकोश** (स्वयंबोधिनी टीका), काठमाण्डौ : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६, पृ.१९८ ।

[२५५] गुप्तः गोपीनाथः, ***भारतभैषज्यरत्नाकरः*** (प्रथमभाग कषायव्याख्या), नई दिल्ली : बी.जैन पब्लिशर्स प्रा.लि., सन्२०१२, पृ.७

पाठभेदोऽस्ति यथा– क्षुण्णे द्रव्यपले सम्यक् जलमुष्णं विनिःक्षिपेत् । मृत्पात्रे कुडपोन्मानं ततस्तु स्रावयेत् पटात् ॥
सः स्याच्चूर्णद्रवः फाण्टस्तन्मानं द्विपलोमितम् ॥

[२५६]व्यासः, ***महाभारतम्*** (उद्योगपर्वः अध्यायः ७ श्लो.१७-२०), गोरखपुर : गीताप्रेस, वि.सं. २०४४, पृ.२०५१ ।

संयमः – संयमनमिति विग्रहे संपूर्वकात् 'यम उपरमे' (भ्वा.प.अ.१०४३)इति धातोः 'यमः समुपनिविषु च' (पा.३।३।६३) इति सूत्रेणाऽप्प्रत्यये 'संयमः' इति । 'घञबन्तः' ( पा.लि. ३६ ) इति 'मोपधः' ( लिङ्गानुशासनम् ८३ ) इत्यनेन च पुंस्त्वम् । 'धारणा-ध्यान- समाधयः' इतिं संयमशब्देन कथ्यते ।

त्रयमेकत्र संयमः ।[२५७]

## ३.१.२१ नानार्थवर्गः

नानार्थवर्गात्-ईति-कच्छपी-केतु-खेटक-ब्रह्मबन्धु-भग-व्यसन-सुवर्ण-सूनाशब्दानां टिप्पण्यः –

### ३.१.२१.१ ईतिशब्दः । प्र.२५३५, (३।३।६८) ।

ईतिः – ईयतेऽनयेति विग्रहे 'ईङ् गतौ' (दि.आ.से.१२१८) इति धातोः 'स्त्रियां क्तिन्' ( पा.३।३।९४) इति सूत्रेण क्तिन्प्रत्यये ईतिः । 'क्तिन्नन्तः ' ( पा.लि. ९ ) इति स्त्रीत्वम् । देशोपद्रवस्य नाम । ईतिशब्दस्यार्थाः षट् सन्ति । यथा–

अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः ।
अत्यासन्नाश्च राजानः षडेता ईतयस्मृताः ॥[२५८]

### ३.१.२१.२ कच्छपीशब्दः । प्र.२६६३, (३।३।१३२) ।

कच्छपी – कच्छेन पिबतीति विग्रहे 'पा पाने' (भ्वा.प.अ.९९१) इति धातोः 'सुपि स्थः' ( पा.३।२।४) इति कप्रत्ययेऽनुबन्धलोपे कच्छेन पा अ इति जाते 'आतो लोप इटि च' ( पा.६।४।६४) इत्याकारलोपे 'कच्छेन प' इति जाते 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः'इति परिभाषया सुबुत्पत्तेः प्राक् 'उपपदमतिङ्' (पा.२।२।१९) इति सूत्रेण समासे सुब्लुकि 'जातेरस्त्रीविषयादयोपधात्' (पा.४।१।६३)इति ङीषि 'कच्छपी' इति । 'ङ्याबूङन्तं चलं सस्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम् । सरस्वत्या वीणाया नामोक्तं यथा–

विश्वावसोस्तु वृहती तुम्वुरोस्तु कलावती ।
महती नारदस्याऽथ सरस्वत्यास्तु कच्छपी ॥[२५९]

### ३.१.२१.३ केतुशब्दः । प्र.२५१९, (३।३।६०) ।

[२५७] पतञ्जलिः (हरिहरानन्द आरण्यः), ***पातञ्जलयोगदर्शनम्***(विभूतिपादः श्लो.४, वाराणसी : मोतीलाल बनारसी दास, सन् २००३, पृ.२९५ ।
[२५८] गौतमः कुलचन्द्रः, **अमरकोश** (स्वयंबोधिनी टीका), काठमाण्डौ : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६, पृ.२३१ ।
[२५९]पूर्ववत् पृ.२४१।

केतुः – चाय्यतेऽनेनेति विग्रहे 'चायृ पूजानिशामनयोः' (भ्वा.उ.से.९४४) इति धातोः 'चाय किः' (उ.१।७४) इति सूत्रेण तुप्रत्यये प्रकृतेः क्यादेशे गुणे च केतुरिति रूपम् । 'रुत्वन्तः' ( पा.लि. ५७ ) इति पुंस्त्वम् । अस्यार्थौ ग्रहध्वजौ । तथापि केतवो बहवः सन्ति । यथा–

शतमेकाधिकमेके सहस्रमपरे वदन्ति केतूनाम् ।

बहुरूपमेकमेव प्राह मुनिर्नारदः केतुम् ॥[260]

**३.१.२१.४ खेटकशब्दः । प्र.२४२६, (३।३।३) ।**

खेटकः – खेऽटतीति विग्रहे 'अट गतौ' (भ्वा.प.से.३०४) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।३४) इत्यच्प्रत्यये 'खेट' इति जाते ततः स्वार्थे कन् 'खेटकः' इति । 'कोपधः' ( पा.लि. ६१ ) इति पुंस्त्वम् । ग्रामविशेषस्य नाम । यथार्थस्तु कृषियोग्या भूमिः खेटः कथ्यते । यथा–

खेटाश्च कर्षकग्रामाः ।

**३.१.२१.५ ब्रह्मबन्धुशब्दः । प्र.२६०७, (३।३।१०४) ।**

ब्रह्मबन्धुः – ब्रह्मैव ब्राह्मणजातिः बन्धुरस्येति विग्रहे'अनेकमन्यपदार्थे' (पा.२।२।२४) इति बहुव्रीहिसमासे ब्रह्मबन्धुरिति । जातिमात्रब्राह्मणाय ब्रह्मबन्धुरुच्यते । 'उकारान्तः' ( पा.लि. ५१ ) इति पुंस्त्वम् ।'काठो' इति भाषायां प्रयुज्यते । कठशाखाध्ययिनोऽपि काठाः संपद्यते । यथा भागवते –

यद्ब्रह्मबन्धोः शिर आततायिनः,गाण्डिवमुक्तैर्विशिखैरुपाहरे ।[261]

तथैव निन्दायां क्षत्रियोऽपि क्षत्रबन्धुः कथ्यते ।

किं नु स्यात् क्षत्रबन्धुभिः ।[262]

---

[260]वराहमिहिरः, बृहत्संहिता (केतुचाराध्यायः अ.११, श्लो.५) वाराणसी : चमैखम्वा विद्याभवन, सन् १९७७, पृ.९७ ।

[261]व्यासः, ***श्रीमद्भागवतमहापुराणम्*** (स्क.१, अ.७, श्लो.१६), गोरखपुर : गीताप्रेस, एकत्रिंशत् संस्करण वि.सं.२०५४, पृ६८ ।

तदा शुचस्ते प्रमृजामि भद्रे यद्ब्रह्मबन्धोः शिर आततायिनः ।
गाण्डीवमुक्तैर्विशिखैरुपाहरे त्वाऽऽक्रम्य यत्स्नास्यसि दग्धपुत्रा ॥
मैनं पार्थार्हसि त्रातुं ब्रह्मबन्धुमिमं जहि । योऽसावनागसः सुप्तानवधीन्निशि बालकान् ॥ पूर्ववत् श्लो.३५, पृ.७० ।
ब्रह्मबन्धुर्न हन्तव्य आततायी वधार्हणः । मयैवोभयमाम्नातं परिपाह्यनुशासनम् ॥ पूर्ववत् श्लो.५३, पृ.७१ ।
वपनं द्रविणादानं स्थानान्निर्यापणं तथा । एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिकः ॥ पूर्ववत् श्लो.५७, पृ.७२ ।

[262]पूर्ववत् अ.१६, श्लो.२२, पृ.११२ ।

किं क्षत्रबन्धून् कलिनोपसृष्टान् राष्ट्राणि वा तैरवरोपितानि ।
इतस्ततो वाशनपानवासः स्नानव्यवायोन्मुखजीवलोकम् ॥
एष किं निभृताशेषकरणो मीलितेक्षणः। मृषा समाधिराहोस्वित्किं नु स्यात्क्षत्रबन्धुभिः ॥ पूर्ववत् अ.१८, श्लो.३१, पृ.१२१ ।

### ३.१.२१.६ भगशब्दः । प्र.२४४८, (३।३।२६) ।

भगः – भज्यत इति विग्रहे 'भज सेवायाम्' (भ्वा.प.अ.१०६७) इति धातोः 'पुंसि संज्ञायां घः प्रायेण' (पा.३।३।११८) इति घप्रत्यये कुत्वे भग इति । 'घाजन्तश्च' ( पा.लि. ३७ ) इति पुंस्त्वम् । भगशब्दोऽन्यस्मिन्नर्थे नपुंसकोऽप्यस्ति यथा-'भगं श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु ।' (अमरः नानार्थवर्गः २६) अस्यार्थविशेषस्तु यथा–

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥[२६३]

### ३.१.२१.७ व्यसनशब्दः । प्र.२६४०, (३।३।१२०) ।

व्यसनम् – 'असु क्षेपणे' (दि.प.से.१२८६) इति धातोः 'ल्युट् च' (पा.३।३।११५)इति ल्युट्प्रत्ययेऽनादेशे व्यसनमिति । 'भावे ल्युडन्तः' ( पा.लि. ११९ ) इति क्लीबत्वम् । व्यसनशब्दस्य विपत्, भ्रंशः, कामजदोषः, क्रोधजदोषश्चत्वारोऽर्थाः सन्ति । दोषविषये कुलचन्द्र उद्धरति यथा–

कामजदोषाः

मृगयाक्षोदिवास्वप्नः परिवादः स्त्रियो मदः ।
तौर्यत्रिकं वृथाट्या च कामजो दशको गणः ॥[२६४]

क्रोधजदोषाः

पैशुन्यं साहसं द्रोह ईर्ष्याऽसूयाऽर्थदूषणम् ।
वाग्दण्डजं च पारुष्यंक्रोधजोऽपि गणोऽष्टकः ॥[२६५]

### ३.१.२१.८ सुवर्णशब्दः । प्र.२४१२, (३।३।१३) ।

सुवर्णम् – शोभनो वर्णः स्तुतिर्वा यस्येति विग्रहे 'अनेकमन्यपदार्थे' (पा.२।२।२४)इति सूत्रेण बहुव्रीहिसमासे सुवर्णमिति । 'बहुव्रीहिरदिङ्नाम्नामुन्नेयं तदुदाहृतम्' (अ.लि.४४ ) इति विशेष्यनिघ्नत्वेऽपि क्लीबत्वम् । सुवर्णमित्यस्य भाषायां 'तोला' इति कथ्यते ।

---

[२६३]व्यासः, ***विष्णुपुराणम्*** (६।५।७४), गोरखपुर : गीताप्रेस, सस्करण १९, वि.सं.२०६१, पृ.४४१ ।
मेदिनीकरः, ***मेदिनीकोशः***(३।१२), वाराणसी : चौखम्वा संस्कृत सिरिज अफिस, २०२४, पृ.२२ ।
भगं श्रीयोनिवीर्येच्छाज्ञानवैराज्ञकीर्तिषु ।
माहात्म्यैश्वर्ययत्नेषु धर्मे मोक्षेऽथ ना रवौ ।

[२६४]भट्टः कुल्लूकः, ***मनुस्मृतिः*** (अ.७, श्लोक.४७), वाराणसी : चौखम्बा संस्कृत भवन, वि.सं.२०७१, पृ.३१६ ।
[२६५]पूर्ववत् श्लो.४८ ।

कर्षं सुवर्णस्य सुवर्णसंज्ञम् ।[२६६]

### ३.१.२१.९ .सूनाशब्दः । प्र.२६२५, (३।३।११३) ।

सूना – सवनमिति विग्रहे 'षूङ् प्राणिगर्भविमोचने' (अ.आ.से.११०५) इति धातोः'नपुंसके भावे क्तः' (पा.३।३।११४) इति सूत्रेण क्तप्रत्यये 'स्वादय ओदितः'(दि.ग.) इति ओदित्त्वात् 'ओदितश्च' (पा.८।२।४५) इति तस्य नत्वे टापि 'सूना' इति। 'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । वधस्थानस्य नाम । तस्य भेदाः–

पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः ।

कण्डनी चोदकुम्भश्च वध्यते यास्तु वाहयन् ॥[२६७]

## ३.१.२२ लिङ्गादिसंग्रहवर्गः

लिङ्गादिसंग्रहवर्गात्-भाष्यशब्दस्य टिप्पणी –

### ३.१.२२. भाष्यशब्दः । प्र.३०२४, (३।५।३१) ।

भाष्यते सूत्रार्थो येनेति विग्रहे 'भाष व्यक्तायां वाचि' ( भ्वा.आ.से.६५२) इति धातोः 'कृत्यल्युटो बहुलम्' ( ३।३।११३ ) इति बाहुलकात् करणे ण्यत्प्रत्यये भाष्यमिति। 'कृत्याश्च' ( पा.लि.१८८) इत्यविशिष्टे प्राप्ते 'माणिक्यं भाष्यसिन्दूरचीरचीवरपिञ्जरम्' (अ.लि.३१) इति क्लीबत्वम् । तस्य लक्षणं –

सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः ।

स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥ [२६८]

अन्यानि सर्वाणि रामानुजशाङ्करादीनि भाष्याणि, व्याकरणस्य तु महाभाष्यमित्युच्यते कथमिति जिज्ञासोदेत्येव । अन्यानधीनत्वेन तस्य महत्त्वमिति महाभाष्यं तत् । सूत्रवार्तिकाधीनं न स्वीकरोतीदं भाष्यम् । अत एव कतिपयानि सूत्राणि वार्तिकानि च खण्डयति महाभाष्यकारः पतञ्जलिः । खण्डनस्य चेदं तात्पर्यं पतञ्जलेः प्रयोगसिद्धिरूपफलस्याभावेऽपि पारायणजपुण्यप्रदत्वं खण्डितेषु सूत्रेष्वस्तीति न तत्तत्सूत्रकरणवैयर्थ्यम् ।

## ३.२. स्वयंबोधिनीटीकायां टीकाकारेण निर्दिष्टाः समस्तशब्दाः

---

[२६६] भास्कराचार्यः, ***लीलावती***(परिभाषाप्रकरणम् श्लो.४), वाराणसी : चौखम्बा विद्याभवन, वि.सं.२००१, पृ.२ ।

[२६७] भट्टः कुल्लूकः, *मनुस्मृतिः* (अ.३, श्लोक.६८), वाराणसी : चौखम्बा संस्कृत भवन, वि.सं.२०७१, पृ.११७ ।

[२६८]भानुजिदीक्षितः, ***अमरकोशः*** (सुधाटीका ३.५.३१), वाराणसी : चौखम्बा विद्याभवन, सन्.२०११, पृ.४५९ ।

## समासदृष्ट्या पर्यालोचनम्

व्याकरणशास्त्रं खलु पदव्युत्पादकं भवति ।कृतां तद्धितानामिव समासानामपि पदव्युत्पादकत्वं संस्कृतवाङ्मये बहुलं दृश्यते । समासश्च लाघवत्वात् बह्वर्थबोधकत्वाच्च गद्ये पद्ये चम्पूकाव्यादिषु च स्वीक्रियते । कृतो धातुभ्यो जायन्ते तद्धितास्तु प्रातिपदिकात् सुबन्ताद्वा ।तिङश्च धातुभ्य एव भवन्ति । तेन भवति, एधते, वर्धत इत्यादीनि क्रियापदानि भवन्ति । एवञ्च तिङोऽपि पदव्युत्पादका एव । एवमेव समासोऽपि पदव्युत्पादकः । समासश्चानेकेषां पदानामेकीभवनम् । पाणिन्यादिसङ्केतसम्बन्धेन समासपदव्युत्पादकत्वरूपम् । एकार्थीभावापन्नपदसमुदायविशेषत्वं वा तत्त्वम् । समासप्रक्रिययाऽप्यनेकानि पदान्येकपदीभवन्ति । यथा – राजपुरुषः, देवलोकः, देवराजः, अदितिपुत्रः, नीलकमलं, आचारभ्रष्टः, अक्षशौण्ड इत्यनेकेषां पदानां मेलनेनैकपदं भवति । स एव चार्थविशेषबोधनाय प्रयुज्यते । स्वयंबोधिनीटीकाकारोऽप्यमरकोशेऽप्रयुक्तानामनुल्लिखितानां वाशब्दानां संग्रहमुल्लेखं वा करोतिकविभ्यो चिकीर्षुभ्यश्च । एतादृशानां पदानामत्यावश्यकत्वात्तद्विवृतिर्व्युत्पत्तिर्वा शोधाङ्गत्वेन विधीयते ।

अमरकोशस्य स्वयंबोधिनीटीकायाः प्रणेत्रा कुलचन्द्रगौतमेन स्वकीयायांटीकायां मूलमनुसृत्य नवशब्दानां निर्देशनं कृतमस्ति । इमे शब्दाः शब्दव्युत्पत्तिक्रमे पथप्रदर्शकाः सन्ति । प्रायः समस्ताः शब्दा एव दृश्यन्ते । कुत्रचित् षष्ठीतत्पुरुषसमासः कुत्रचित् बहुव्रीहिसमासोऽधिकोऽस्ति । उपपदसमासश्च कुत्रचित् दृश्यते । कृदन्तप्रसङ्गे ‘ल्यु, णिनि, अच्, कि, क्विप्, इन्, क्त’ इत्यादिप्रत्ययान्ताः शब्दाःप्रयुक्ताः सन्ति । अस्याध्ययनं कृत्वा पाठकानां पदव्युत्पत्तिर्वर्धत एव । शब्दव्युत्पत्तौ पुराणेतिहासयोराधारो बाहुल्येनदृश्यते । टीकायामेतादृशाः शब्दा बहवः सन्ति । शब्दनिर्माणकर्तॄणामपि क्षमतावृद्धिर्जायत एव ।तस्मादधष्टीकायां निर्दिष्टाः शब्दा व्युत्पाद्यन्ते । यथा –

### ३.२.१ स्वर्गवर्गः

स्वर्गवर्गात्-इन्द्र-कामदेव-कुमार-कुवेर-गणेश-गरुड-देव-दैत्य-बलभद्र-ब्रह्म-पार्वती-महादेव-लक्ष्मी-विष्णु-स्वर्गवाचकाः शब्दाः –

#### ३.२.१.१ इन्द्रवाचकाः शब्दाः प्र.९१, (१|१|४७) ।

पाक-वृत्र-बल-जम्भ-नमुचिशब्देभ्यः परे शत्रुवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृतेऽथवा बहुव्रीहिसमासे कृते इन्द्रस्य नामानि भवन्ति । यथा–पाकस्य अरिः वा पाकः अरिः यस्य सः = पाकारिः, वृत्रस्य शत्रुः वा वृत्रः शत्रुः यस्य सः = वृत्रशत्रुः,

बलस्य रिपुः वा बलः रिपुः यस्य सः = बलरिपुः, जम्भस्य वैरी वा जम्भ वैरी यस्य सः = जम्भवैरी, नमुचेः  परिपन्थी वा नमुचिः परिपन्थी यस्य सः = नमुचिपरिपन्थीत्यादयः ।

देवता-इन्द्राणी-स्वर्गवाचकशब्देभ्यः परे स्वामिवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते इन्द्रस्य नामानि भवन्ति । यथा–त्रिदशानां पतिः = त्रिदशपतिः, देवानां राजा = देवराजः, शच्याः दयितः = शचीदयितः, पौलोम्याः वल्लभः = पौलोमीवल्लभ, नाकस्य नायकः = नाकनायकः, त्रिदिवस्य पतिः = त्रिदिवपतिरित्यादयः ।

सहस्रशब्दात् परे नेत्रवाचकं शब्दं स्थापयित्वा बहुव्रीहिसमासे कृते इन्द्रस्य नामानि भवन्ति । यथा – सहस्रं नेत्राणि यस्य सः = सहस्रनेत्रः, सहस्रं लोचनानि यस्य सः = सहस्रलोचन इत्यादयः ।

.मेघवाचकशब्दात् परे वाहनवाचकं शब्दं स्थापयित्वा बहुव्रीहिसमासे कृते इन्द्रस्य नामानि भवन्ति । यथा–घनः वाहनं यस्य सः = घनवाहनः, वारिदः वाहनं यस्य सः = वारिदवाहन इत्यादयः ।

वज्रवाचकशब्दात् परे हस्तवाचकं शब्दं स्थापयित्वा व्यधिकरणबहुव्रीहिसमासे कृते[२६९] इन्द्रस्य नामानि भवन्ति । यथा – वज्रः पाणौ यस्य सः.= वज्रपाणिः, कुलिशं पाणौ यस्य सः = कुलिशपाणिरित्यादयः ।

**३.२.१.२ कामदेववाचकाः शब्दाः  प्र.४६, (१।१।२७) ।**

मत्स्यवाचकशब्दात् परे ध्वजवाचकं शब्दं स्थापयित्वा बहुव्रीहिसमासे कृते कामदेवस्य नामानि भवन्ति । यथा–मीनः केतुः यस्य सः = मीनकेतुः, झषः केतुः यस्य सः = झषकेतुरित्यादयः ।

पुष्पवाचकशब्दात् परे प्रहरणवाचकं शब्दं स्थापयित्वा बहुव्रीहिसमासे कृते कामदेवस्य नामानि भवन्ति । यथा – पुष्पं आयुधं यस्य सः = पुष्पायुधः, प्रसूनं शरं यस्य सः = प्रसूनशर इत्यादयः ।

पञ्चन्शब्दात् परे बाणवाचकं शब्दं स्थापयित्वा बहुव्रीहिसमासे  कृते कामदेवस्य नामानि भवन्ति । यथा – पञ्च सायकाः यस्य सः = पञ्चसायकः, पञ्च बाणाः यस्य सः = पञ्चबाण इत्यादयः ।

---

[२६९] "अनेकमन्यपदार्थे" (पा.२।२।२४) "सप्तमीविशेषणे बहव्रीहौ" (पा.२।२।३५) अत एव ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः ॥

विसमवाचकात् शब्दात् परे बाणवाचकं शब्दं स्थापयित्वा बहुव्रीहिसमासे कृते कामदेवस्य नामानि भवन्ति । यथा – विसमः इषुः यस्य सः = विसमेषुः, असमाः सायकाः यस्य सः = असमसायक इत्यादयः ।

**३.२.१.३ कुमारवाचकाः शब्दाः प्र.८१, .(१।१।४३)**

तारकशब्दात् परे शत्रुवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृतेऽथवा बहुव्रीहिसमासे कृते कुमारस्य नामानि भवन्ति । यथा – तारकस्य अरिः वा तारकः अरिः यस्य सः = तारकारिः, तारकस्य रिपुः वा तारकः रिपुः यस्य सः = तारकरिपुः, तारकस्य वैरी तारको वैरी यस्य स इति वा = तारकवैरीत्यादयः ।

मयूरवाचकशब्दात् परे वाहनवाचकं शब्दं स्थापयित्वा बहुव्रीहिसमासे कृते कुमारस्य नामानि भवन्ति । यथा – बर्ही वाहनं यस्य सः = बर्हिवाहनः, मयूरः वाहनं यस्य सः = मयूरवाहनः, बर्हिणः धोरणं यस्य सः = बर्हिणधोरण इत्यादयः ।

षट्शब्दात् परे मुखवाचकं शब्दं स्थापयित्वा बहुव्रीहिसमासे कृते कुमारस्य नामानि भवन्ति । यथा – षट् मुखानि यस्य सः = षण्मुखः, षट् आस्यानि यस्य सः = षडास्यः, षट् वक्त्राणि यस्य सः = षड्वक्त्र इत्यादयः ।

**३.२.१४ कुवेरवाचकाः शब्दाः प्र.१४४, (१।१।७३) ।**

शिववाचकशब्दात् परे मित्रवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषेऽथवा बहुव्रीहिसमासे कृते कुवेरस्य नामानि भवन्ति । यथा – शिवस्य सखा अथवा शिवः सखा यस्य सः = शिवसखः,[२७०] शम्भोः सुहृदथवा शम्भुः सुहृद्यस्य सः = शम्भुसुहृत्, कपर्दिनः मित्रमथवा कपर्दी मित्रं यस्य सः = कपर्दिमित्र इत्यादयः ।

धन-निधि-यक्ष-किन्नर-गुहचकवाचकशब्देभ्योऽअलकाशब्दाच्च परे स्वामिवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते कुवेरस्य नामानि भवन्ति । यथा – धनस्य पतिः = धनपतिः, निधीनां पतिः = निधिपतिः, यक्षाणां पतिः = यक्षपतिः, किन्नराणां पतिः = किन्नरपतिः, गुह्यकानां पतिः = गुह्यकपतिः, अलकायाः पतिः = अलकापतिरित्यादयः ।

**३.२.१.५ गणेशवाचकाः शब्दाः प्र.७७, (१।१।४१) ।**

---

[२७०] "षष्ठी" (पा.२।२।८) "राजाहःसखिभ्यष्टच्" (पा.५।४।९१)

विघ्नवाचकशब्दात् परे राजवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते गणेशस्य नामानि भवन्ति। यथा–विघ्नस्य राजा = विघ्नराजः,[२७१] अन्तरायस्य पतिः = अन्तरायपतिः, प्रत्यूहस्य अधिनाथः = प्रत्यूहाधिनाथ इत्यादयः।

गणवाचकशब्दात् परे स्वामिवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुष–समासे कृते गणेशस्य नामानि भवन्ति। यथा–गणस्य पतिः = गणपतिः, गणस्य ईशः = गणेशः, गणस्य नाथः = गणनाथ इत्यादयः।

गजवाचकशब्दात् परे मुखवाचकं शब्दं स्थापयित्वोपमानबहुव्रीहिसमासे कृते[२७२] गणेशस्य नामानि भवन्ति। यथा – दन्तिनः वदनं इव वदनं यस्य सः = दन्तिवदनः, वारणस्य आननं इव आननं यस्य सः = वारणाननः, कुञ्जरस्य मुखं इव मुखं यस्य सः = कुञ्जरमुख इत्यादयः।

मूषकवाचकशब्दात् परे वाहनवाचकं शब्दं स्थापयित्वा बहुव्रीहिसमासे कृते[२७३] गणेशस्य नामानि भवन्ति। यथा – आखुः वाहनं यस्य सः = आखुवाहनः, उन्दुरुः यानं यस्य सः = उन्दुरुयानः, मूषकः धोरणं यस्य सः = मूषकधोरण इत्यादयः।

**३.२.१.६ गरुडवाचकाः शब्दाः प्र.५७, (१।१।३१)।**

विनतावाचकशब्दात् परे पुत्रवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते गरुडस्य नामानि भवन्ति। यथा–विनतायाः तनयः=विनतातनयः, विनतायाः नन्दनः = विनतानन्दनः, विनतायाः सूनुः = विनतासूनुरित्यादयः।

पक्षिवाचकशब्दात् परे स्वामिवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते गरुडस्य नामानि भवन्ति। यथा – विहगानां पतिः = विहगपतिः, पतत्त्रिणां राजा = पतत्त्रिराजः, विहङ्गमानां अधीशः = विहङ्गमाधीश इत्यादयः।

सर्पवाचकशब्दात् परे शत्रुवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृतेऽथवा बहुव्रीहिसमासे कृते गरुडस्य नामानि भवन्ति। यथा – उरगस्य अरि = उरगारिः, पन्नगस्य अरिः = पन्नगारिः, पन्नगस्य रिपुः = पन्नगरिपुः, व्यालस्य वैरी = व्यालवैरीत्यादयः। तथैव

[२७१] राजाहःसखिभ्यष्टच् (पा.५।४।९१ )।

[२७२] “सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च”(वा) (२।२।२४)

[२७३] “अनेकमन्यपदार्थे” (पा. २।२।२४)

उरग अरिर्यस्य सः = उरगारिः, पन्नग अरिर्यस्य सः = पन्नगारिः, पन्नगो रिपुर्यस्य सः = पन्नगरिपुः, व्यालो वैरी यस्य सः = व्यालवैरीत्यादयः ।

नागवाचकशब्दात् परे शत्रुवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृतेऽथवा बहुव्रीहिसमासे कृते गरुडस्य नामानि भवन्ति । यथा – नागस्य रिपुः=नागरिपुः, नागस्य आरातिः = नागारातिः, नागस्य वैरी = नागवैरीत्यादयो गरुडवाचकाः शब्दा भवन्ति । तथैव नागो रिपुर्यस्य सः = नागरिपुः, नाग आरातिर्यस्य सः = नागारातिः, नागो वैरी यस्य सः = नागवैरीत्यादयो गरुडवाचकाः शब्दा भवन्ति ।

**३.२.१.७ देववाचकाः शब्दाः प्र.८, (१।१।९) ।**

स्वर्गवाचकशब्दात् परे गृहवाचकं शब्दं स्थापयित्वा बहुव्रीहिसमासे कृते[२७४] (देवाः स्वर्गे वसन्ति तस्मात्) स शब्दो देववाचको भवति । यथा – नाको निकेतनं यस्य सः = नाकनिकेतनः, त्रिदिवः सदनं यस्य स = त्रिदिवसदनः, त्रिविष्टपं निकेतनं यस्य सः = त्रिविष्टपनिकेतनः ।

अदितिशब्दात् परे पुत्रवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते[२७५] (अदित्याः पुत्रत्वात्) स शब्दो देववाचको भवति । यथा – अदित्याः तनयः = अदितितनयः, अदित्याः तनूजः = अदितितनूजः, अदित्याः सूनुः = अदितिसूनुरित्यादयः शब्दा भवन्ति ।

दैत्यवाचकशब्दात् परे शत्रुवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते बहुव्रीहिसमासे वा कृते[२७६] स शब्दो देववाचको भवति । यथा–असुरस्य अरिः=असुरारिः, दैत्यस्य आरातिः = दैत्यारातिः, दनुजस्य रिपुः = दनुजरिपुः, अथवा असुरः अरिः यस्य सः = असुरारिः, दैत्यः आरातिः यस्य सः = दैत्यारातिः, दनुजः रिपुः यस्य सः = दनुजरिपुरित्यादयः ।

अमृतवाचकशब्दात् परे भोजनार्थकधातोः कर्त्र्यर्थकप्रत्ययान्तं रूपं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते[२७७] (अमृतस्य भोक्तृत्वात्) स शब्दो देववाचको भवति । यथा– पीयूषस्य आशी = पीयूषाशी, सुधायाः अशनः = सुधाशनः, अमृतस्य अदः = अमृताद इत्यादयः । अमृतमत्तीति वामृतादो भवति ।

---

२७४ "अनेकमन्यपदार्थे" (पा. २।२।२४)

२७५ "षष्ठी"(पा. २।२।८)

२७६"षष्ठी"(पा. २।२।८)/ "अनेकमन्यपदार्थे" (पा. २।२।२४)

२७७ "षष्ठी"(पा. २।२।८)

**३.२.१.८ दैत्यवाचकाः शब्दाः  प्र.१४, स्व.व.(११११२) ।**

दितिशब्दात् परे पुत्रवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते [२७८] दैत्यवाचकाः शब्दा भवन्ति । यथा–दित्याः नन्दनः = दितिनन्दनः, दित्याः तनयः=दितितनयः, दित्याः तनूजः = दितितनूज इत्यादयः ।

देववाचकशब्दात् परे शत्रुवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृतेऽथवा बहुव्रीहिसमासे कृते[२७९] दैत्यवाचकाःशब्दा भवन्ति । यथा – सुरस्य अरिः = सुरारिः, देवस्य रिपुः = देवरिपुः, त्रिदशस्य वैरी = त्रिदशवैरी, अथवा सुरः अरिः यस्य सः = सुरारिः, देवःरिपुः यस्य सः = देवरिपुः, त्रिदशः वैरी यस्य सः = त्रिदशवैरीत्यादयः ।

**३.२.१.९ बलभद्रवाचकाः शब्दाः  प्र.४२, (११।२५) ।**

प्रलम्बशब्दात् परे शत्रुवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते बलभद्रस्य नामानि भवन्ति। यथा – प्रलम्बस्य अरिः=प्रलम्बारिः, प्रलम्बस्य रिपुः = प्रलम्बरिपुरित्यादयः ।

रेवतीशब्दात् परे पतिवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते बलभद्रस्य नामानि भवन्ति । यथा – रेवत्याः दयितः=रेवतीदयितः, रेवत्याः पतिः=रेवतीपतिरित्यादयः ।

हलमुसलसीरशब्देभ्यः परे मत्वर्थीयस्य इन्प्रत्ययस्य प्रयोगे कृते[२८०] बलभद्रवाचकाः शब्दा भवन्ति । यथा–हलमस्यास्ति = हली, मुसलमस्यास्ति = मुसली, सीरमस्यास्ति = सीरीत्यादयः ।

रोहिणीशब्दात् परे पुत्रवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते बलभद्रस्य नामानि भवन्ति । यथा–रोहिण्याः सूनुः = रोहिणीसूनुः, रोहिण्याः पुत्रः = रोहिणीपुत्र इत्यादयः शब्दा भवन्ति ।

**३.२.१.१०  ब्रह्मवाचकाः शब्दाः प्र.२६, (११।श्लो.छेपकः १) ।**

चतुःशब्दात् परे मुखवाचकं  शब्दं स्थापयित्वा बहुव्रीहिसमासे कृते ब्रह्मवाचकाः शब्दा भवन्ति । यथा – चत्वारि वदनानि यस्य सः = चतुर्वदनः, चत्वारि आस्यानि यस्य सः = चतुरास्य इत्यादयः । चत्वारि मुखानि यस्य सः = चतुर्मुख इत्यपि वा ।

---

[२७८] "षष्ठी"(पा.२।२।८)

[२७९] "षष्ठी"(पा.२।२।८)/ "अनेकमन्यपदार्थे" (पा.२।२।२४)

[२८०] "अत इनिठनौ" (पा.५।२।११५)

कमलवाचकशब्दात् परे आसनवाचकं शब्दं स्थापयित्वा बहुव्रीहिसमासे कृते ब्रह्मवाचकाः शब्दा भवन्ति । यथा – पद्ममासनं यस्य सः = पद्मासनः, जलजं विष्टरं यस्य सः = जलजविष्टर इत्यादयः ।

हंसवाचकशब्दात् परे वाहनवाचकं शब्दं स्थापयित्वा बहुव्रीहिसमासे कृते ब्रह्मवाचकाः शब्दा भवन्ति । यथा – हंसो यानं यस्य सः=हंसयानः, मरालो वाहनं यस्य सः = मरालवाहन इत्यादयः ।

कमलवाचकशब्दात् परे उत्पत्तिवाचकं शब्दं स्थापयित्वोपपदसमासे कृते[२८१] ब्रह्मवाचकाः शब्दा भवन्ति । यथा–कमले जायते=कमलजः,पद्मे भवति=पद्मभूरित्यादयः ।

**३.२.१.११ पार्वतीवाचकाः शब्दाः प्र.७५, (१।१।४०) ।**

पर्वतवाचकशब्दात् परे पुत्रीवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते पार्वत्या नामानि भवन्ति । यथा – गिरेस्तनया=गिरितनया, महीधरस्य नन्दिनी = महीधरनन्दिनी, अचलस्य किशोरी = अचलकिशोरीत्यादयः ।

शिववाचकशब्दात् परे पत्नीवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते पार्वत्या नामानि भवन्ति । यथा – स्मरारेः दयिता = स्मरारिदयिता, पुरारेः सुन्दरी = पुरारिसुन्दरी, कपर्दिनः प्रेयसी = कपर्दिप्रेयसीत्यादयः ।

मेनकावाचकशब्दात् परे पुत्रीवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते पार्वत्या नामानि भवन्ति । यथा – मेनकायाः कन्यका = मेनकाकन्यका, मेनकायाः दुहिता = मेनकादुहिता, मेनकायाः तनया = मेनकातनयेत्यादयः ।

**३.२.१.१२ महादेववाचकाः शब्दाः प्र.६८, (१।१।३७) ।**

.त्रिपुरशब्दात्, अन्धकशब्दात्, कामदेवशब्दाच्च परे शत्रुवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते महादेवस्य नामानि भवन्ति । यथा – त्रिपुरस्य अरिः=त्रिपुरारिः, अन्धकस्य अरिः = अन्धकारिः, स्मरस्य अरिः = स्मरारिरित्यादयः ।

प्रमथशब्दात्, पार्वतीशब्दाच्च परे स्वामिवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते महादेवस्य नामानि भवन्ति । यथा – प्रमथस्य नाथः=प्रमथनाथः, गौर्याः पतिः = गौरीपतिरित्यादयः ।

**३.२.१.१३ लक्ष्मीवाचकाः शब्दाः प्र.५०, (१।१।२९) ।**

---

[२८१] "उपपदमतिङ्" (पा.२।२।१९)

विष्णुवाचकशब्दात् परे पत्नीवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते लक्ष्म्या नामानि भवन्ति। यथा – विश्वम्भरस्य सुन्दरी = विश्वम्भरसुन्दरी, मुरारेः दयिता = मुरारिदयिता, मुरारेः सहधर्मिणी = मुरारिसहधर्मिणीत्यादयः ।

समुद्रवाचकशब्दात् परे पुत्रीवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते लक्ष्म्या नामानि भवन्ति। यथा–सागरस्य सुता = सागरसुता, सिन्धोः तनया=सिन्धुतनया, पयोधेः पुत्री = पयोधिपुत्रीत्यादयः ।

**३.२.१.१४ विष्णुवाचकाः शब्दाः प्र.३७, (१।१।२३) ।**

दैत्य-मधु-कंस-कैटभ-नरक-मुरशब्देभ्यः परे शत्रुवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते विष्णुवाचकाः शब्दा भवन्ति। यथा–दैत्यस्य रिपुः = दैत्यरिपुः, मधोः वैरी = मधुवैरी, कंसस्य अरिः = कंसारिः, कैटभस्य द्विट् = कैटभद्विट्, नरकस्य रिपुः = नरकरिपुः, मुरस्य अरिः = मुरारिरित्यादयः ।

लक्ष्मीवाचकशब्दात् परे पतिवाचकं शब्दं स्थापयित्वा षष्ठीसमासे कृते विष्णोर्नामानि भवन्ति। यथा - रमायाः वल्लभः=रमावल्लभ इत्यादयः ।

चतुश्शब्दात् परे बाहुवाचकं शब्दं स्थापयित्वा बहुव्रीहिसमासे कृते विष्णोर्नामानि भवन्ति। यथा – चत्वारो बाहवो यस्य सः = चतुर्बाहुः, चत्वारः कराः यस्य सः = चतुष्कर इत्यादयः ।

चक्रशब्दात् परे बाहुवाचकं शब्दं स्थापयित्वा व्यधिकरणबहुव्रीहिसमासे कृते विष्णोर्नामानि भवन्ति। यथा- चक्रं करे यस्य सः = चक्रकरः, रथाङ्गं पाणौ यस्य सः = रथाङ्गपाणिरित्यादयः ।

देवकीवाचकशब्दात् परे पुत्रवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुष–समासे कृते विष्णोर्नामानि भवन्ति। यथा – देवक्याः तनयः = देवकीतनयः, देवक्याः सूनुः = देवकीसूनुरित्यादयः ।

**३.२.१.१५ स्वर्गवाचकाः शब्दाः प्र.२, .(१।१।६) ।**

देववाचकशब्दात् परे लोकवाचकं, गृहवाचकं, देशवाचकञ्च शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते[२८२] सर्वे शब्दाः स्वर्गवाचका भवन्ति। यथा – देवानां लोकः =

---

[२८२] “षष्ठी”(पा.२।२।८)

देवलोकः, सुराणां सद्म = सुरसद्म, अमराणां भवनम् = अमरभवनम्, देवानां देशः = देवदेशः, त्रिदशानां देशः = त्रिदशदेश इत्यादयः शब्दा भवन्ति

## ३.२.२ व्योमवर्गः

व्योमवर्गात्-आकाशवाचकशब्दः

**३.२.२.१ आकाशवाचकाः शब्दाः प्र.१५३, (१।२।श्लो.क्षेपकः)।**

देववाचकशब्दात् परे मार्गवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते देवानां मार्गत्वादाकाशस्य नामानि भवन्ति । यथा – गीर्वाणानां मार्गः = गीर्वाणमार्गः, सुपर्वणां वर्त्म = सुपर्ववर्त्म, विबुधानां अध्वा = विबुधाध्वेत्यादयः ।

३.२.१६.२. नक्षत्रवाचकशब्दात् परे मार्गवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते नक्षत्राणां मार्गत्वादाकाशस्य नामानि भवन्ति । यथा – नक्षत्राणां वर्त्म = नक्षत्रवर्त्म, भानां मार्गः = भमार्गः, ऋक्षाणां अध्वा =ऋक्षाध्वेत्यादयः ।

मेघवाचकशब्दात् परे मार्गवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते मेघस्य मार्गत्वादाकाशस्य नामानि भवन्ति । यथा – जीमूतस्य मार्गः = जीमूतमार्गः, पाथोदस्य पन्था = पाथोदपथः, बलाहकस्य वर्त्म = बलाहकवर्त्म इत्यादयः ।

## ३.२.३ दिग्वर्गः

दिग्वर्गात्-चन्द्र-बृहस्पति-मेघ-सूर्यशब्दाः –

**३.२.३.१ चन्द्रवाचकाः शब्दाः प्र.१८६, (१।३।१५)।**

अमृतवाचकशब्दात् परे किरणवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुष-समासे कृते चन्द्रमसो नामानि भवन्ति । यथा – पीयूषयुक्ता मयूखा यस्य सः = पीयूषमयूखः, सुधायुक्ताः करा यस्य सः = सुधाकरः, अमृतयुक्ताः किरणाः यस्य सः = अमृतकिरण इत्यादयः ।

श्वेतवाचकशब्दात् परे किरणवाचकं शब्दं स्थापयित्वा बहुव्रीहिसमासे कृते चन्द्रमसो नामानि भवन्ति । यथा – धवलाः अंशवः यस्य सः = धवलांशुः, सिताः किरणा यस्य सः = सितकिरणः, अवदाता दीधितयः यस्य सः = अवदातदीधितिरित्यादयः ।

शीतवाचकशब्दात् परे किरणवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते चन्द्रमसो नामानि भवन्ति । यथा – हिमस्य करः = हिमकरः, शीतस्य अंशुः = शीतांशुः, शिशिरस्य रश्मिः = शिशिररश्मिरित्यादयः ।

रात्रिवाचकशब्दात् परे स्वामिवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते चन्द्रमसो नामानि भवन्ति। यथा–निशाया नाथः= निशानाथः, निशीथिन्या दयितः = निशीथिनीदयितः, रजन्याः पतिः = रजनीपतिरित्यादयः।

नक्षत्रवाचकशब्दात् परे स्वामिवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते चन्द्रमसो नामानि भवन्ति। यथा–ताराणामधीशः = ताराधीशः, नक्षत्राणां पतिः = नक्षत्रपतिः, ऋक्षाणां पतिः = ऋक्षपतिः, उडूनां नाथः = उडुनाथ इत्यादयः।

**३.२.३.२ बृहस्पतिवाचकाः शब्दाः प्र.२०४, (१।३।२४)।**

वचनवाचकशब्दात् परे पतिवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते बृहस्पतेर्नामानि भवन्ति। यथा–वाचः पतिः = वाक्पतिः, वाण्याः पतिः = वाणीपतिः, भारत्याः पतिः = भारतीपतिरित्यादयः।

देवतावाचकशब्दात् परे गुरुवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते बृहस्पतेर्नामानि भवन्ति। यथा–त्रिदशानां देशिकः = त्रिदशदेशिकः, अमराणां गुरुः = अमरगुरुः, विबुधानां गुरुः = विबुधगुरुरित्यादयः।

**३.२.३.३ मेघवाचकाः शब्दाः प्र.१७१, (१।३।८)।**

जलवाचकशब्दात् परे कप्रत्ययान्तदानार्थकदाधातुं "द" इति रूपं स्थापयित्वोपपदसमासे कृते[२८३] मेघस्य नामानि भवन्ति। यथा–तोयं ददाति = तोयदः, जलं ददाति = जलदः, अम्बु ददाति = अम्बुद इत्यादयः।

जलवाचकशब्दात् परे अण्प्रत्ययान्तप्रापणार्थकवह्धातुं "वाह" इति रूपं स्थापयित्वोपपदसमासे कृते[२८४]मेघस्य नामानि भवन्ति। यथा - तोयं वहति = तोयवाहः, जलं वहति = जलवाहः, अम्बु वहति = अम्बुवाह इत्यादयः।

जलवाचकशब्दात् परे क्विप्प्रत्ययान्तमोचनार्थकमुग्धातुं'मुक्'[२८५]इति स्थापयित्वोपपदसमासे कृते मेघस्य नामानि भवन्ति। यथा–तोयं मुञ्चति = तोयमुक्, अम्बु मुञ्चति = अम्बुमुक्, पयो मुञ्चति = पयोमुगित्यादयः।

**३.२.३.४ सूर्यवाचकाः शब्दाः प्र.२२२, (१।३।श्लो.क्षेपकः२)।**

---

२८३ "आतोऽनुपसर्गे कः" (पा.३।२।३) "तत्रोपपदं सप्तमीस्थम्" (पा.३।१।९२) "उपपदमतिङ्" (पा.२।२।१९)

२८४ "कर्मण्यण्" (पा.३।२।१) "तत्रोपपदं सप्तमीस्थम्" (पा.३।१।९२) "उपपदमतिङ्" (पा.२।२।१९)

२८५ "क्विप् च" (पा.३।२।७६)

.दिनवाचकशब्दात् परे मणिशब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते सूर्यस्य नामानि भवन्ति । यथा - वासराणां मणिः = वासरमणिः, अह्नां मणिः = अहर्मणिरित्यादयः ।[२८६]

दिनवाचकशब्दात् परे पतिवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते सूर्यस्य नामानि भवन्ति । यथा–दिनानां पतिः = दिनपतिः, वासराणां पतिः = वासरपतिरित्यादयः ।

कमलिनीवाचकशब्दात् परे पतिवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते सूर्यस्य नामानि भवन्ति । यथा – सरोजिन्याः पतिः = सरोजिनीपतिः, सरोजिन्या दयितः = सरोजिनीदयितः, कमलिन्या वल्लभः = कमलिनीवल्लभ इत्यादयः ।

ग्रहशब्दात् परे पतिवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते सूर्यस्य नामानि भवन्ति । यथा– ग्रहाणामधीशः = ग्रहाधीशः, ग्रहाणां परिवृढः = ग्रहपरिवृढ इत्यादयः ।

छायाशब्दात् परे पतिवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते सूर्यस्य नामानि भवन्ति । यथा– छायायाः पतिः = छायापतिः, छायाया नायकः = छायानायक इत्यादयः ।

संज्ञाशब्दात् परे पतिवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते सूर्यस्य नामानि भवन्ति । यथा–संज्ञाया वल्लभः = संज्ञावल्लभः, संज्ञाया धवः = संज्ञाधव इत्यादयः ।

सहस्रशब्दात् परे किरणवाचकं शब्दं स्थापयित्वा बहुव्रीहिसमासे कृते सूर्यस्य नामानि भवन्ति । यथा–सहस्रं किरणा यस्य सः = सहस्रकिरणः, सहस्रं मयूखा यस्य सः = सहस्रमयूख इत्यादयः ।

सप्तशब्दात् परे अश्ववाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते सूर्यस्य नामानि भवन्ति । यथा–सप्त सप्ततयो यस्य सः = सप्तसप्तिरित्यादयः ।

## ३.२.४ .वारिवर्गः

वारिवर्गात्-कमल-भागिरथी-यमुना-समुद्रवाचकाः शब्दाः –

### ३.२.४.१ कमलवाचकाः शब्दाः प्र.५७९, (१।१०।४१) ।

जलवाचकशब्दात् परे उत्पत्तिवाचकं जन्धातोः कर्तृप्रत्ययान्तं 'ज' इति रूपं (जं, जातमिति शब्दं वा)स्थापयित्वोपपदसमासे कृते[२८७] कमलस्यानेकानि नामानि भवन्ति । यथा– जले जायते = जलजम्, वारिणि जायते = वारिजमित्यादयः ।

---

[२८६] "रोऽसुपि" (८।२।६९)

[२८७] "सप्तम्यां जनेर्डः" (पा.३।२।९७) "उपपदमतिङ्" (पा.२।२।१९)

सरोवरवाचकशब्दात् परे जन्धातोः उत्पत्तिवाचकं कर्तृप्रत्ययान्तं'ज' इति रूपं (जं, जातमिति शब्दं वा) स्थापयित्वोपपदसमासे कृते कमलस्य नामानि भवन्ति। यथा–सरसि जायते = सरोजम्/सरसिजमित्यादयः।[२८८]

पङ्कवाचकशब्दात् परे जन्धातोरुत्पत्तिवाचकं कर्तृप्रत्ययान्तं 'ज' इतिरूपं (जं, जातमिति) शब्दं स्थापयित्वोपपदसमासे कृते कमलस्य नामानि भवन्ति। यथा–पङ्के जायते = पङ्कजम्/पङ्कजातमित्यादयः।[२८९]

### ३.२.४.२ भागिरथीवाचकाः शब्दाः प्र.५६०, (१।१०।३१)।

जह्नुशब्दात् परे कन्यावाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते भागिरथ्या नामानि भवन्ति। यथा–जह्नोः नन्दिनी = जह्नुनन्दिनी, जह्नोः दुहिता = जह्नुदुहिता, जह्नोरपत्यं (स्त्री) जाह्नवीत्यादयः।

भगीरथशब्दात् परे कन्यावाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते भागिरथ्या नामानि भवन्ति। यथा–भगीरथस्य नन्दिनी = भगीरथनन्दिनी, भगीरथस्य तनया = भगीरथतनया, भगीरथस्य दुहिता = भगीरथदुहितेत्यादयः।

देवतावाचकशब्दात् परे नदीवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुष-समासे कृते भागिरथ्या नामानि भवन्ति। यथा–सुराणां धुनी = सुरधुनी, गीर्वाणानां तरङ्गिणी = गीर्वाणतरङ्गिणी, त्रिदशानां तटिनी = त्रिदशतटिनीत्यादयः।

भीष्मशब्दात् परे मातृवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते गङ्गाया नामानि भवन्ति। यथा–भीष्मस्य जननी = भीष्मजननी, भीष्मस्य प्रसूः = भीष्मप्रसूः, भीष्मस्य अम्बा = भीष्माम्बेत्यादयः।

### ३.२.४.३ यमुनावाचकाः शब्दाः प्र.५६१, (१।१०।३२)।

सूर्यवाचकशब्दात् परे कन्यावाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुष-समासे कृते यमुनाया नामानि भवन्ति। यथा–तपनस्य तनया = तपनतनया, हेलेः दुहिता = हेलिदुहितेत्यादयः।

---

२८८ "ततपुरुषे कृति बहुलम्" (पा.६।३।१४)

२८९ "गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च" (पा.३।४।७२)

यमराजवाचकशब्दात् परे भगिनीवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुष-समासे कृते यमुनाया नामानि भवन्ति। यथा– यमस्य अनुजा = यमानुजा, शमनस्य भगिनी = शमनभगिनीत्यादयः ।

**३.२.४.४ समुद्रवाचकाः शब्दाः प्र.५००, (१।१०।१) ।**

नदीवाचकशब्दात् परे पतिवाचकं शब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते समुद्रस्य नामानि भवन्ति। यथा–नदीनां पतिः = नदीपतिः, कल्लोलिनीनां वल्लभः = कल्लोलिनीवल्लभः, तरङ्गिणीनां रमणः = तरङ्गिणीरमण इत्यादयः ।

जलवाचकशब्दात् परे निधिशब्दं स्थापयित्वा षष्ठीतत्पुरुषसमासे कृते समुद्रस्य नामानि भवन्ति। यथा–पयसां निधिः = पयोनिधिः, तोयस्य निधिः = तोयनिधिः, अम्बूनां निधिः = अम्बुनिधिरित्यादयः ।

जलवाचकशब्दात् परे अधिकरणार्थककिप्रत्ययान्तधाधातोर्धिरूपं स्थापयित्वोपपदसमासे कृते[२९०]समुद्रवाचकाः शब्दा भवन्ति। यथा–जलानि धीयन्तेऽस्मिन्निति = जलधिः, पयांसि धीयन्तेऽस्मिन्निति =पयोधिरित्यादयः ।

## ३.३.स्वयंबोधिनीटीकायां स्थिता अनेकरूपशब्दाः

## ( वैकल्पिकदृष्ट्या पर्यालोचनम् )

संसारे सर्वेषां वस्तूनां यथा परिवर्तनं भवति तथैव भाषायामपि परिवर्तनं दृश्यते। भाषाया ध्वनिषु, रूपप्रक्रियासु, शब्दराशौ, वाक्यविन्यासे तथार्थेषु परिवर्तनं भवति। संस्कृतभाषायामपि परिवर्तनं जातं यथा वैदिकलौकिकादिभाषासु। लौकिकभाषास्वपि समये समये परिवर्तनं जातम् ।

### स्वरेषु परिवर्तनम्

वैदिकभाषायामकारो विवृतोऽस्ति ।लौकिकभाषायां 'अ अः' (पा.८।४।६७) इति सूत्रेण संवृतस्तस्माद् लौकिकभाषायां सन्धिर्भवति ।यथा – अ+इ = ए। अ+उ =ओ। वैदिके प्रउग, तितउःइति। लौकिके तितउः एकमुदाहरणमवशिष्टमस्ति सन्धिरहितम् ।'चालनी तितउः पुमान्' (अमरः २।९।२६) ।

-अ/आ – अमावस्या/अमावास्या, 'अमावस्यदन्यतरस्याम्' (पा.३।१।१२२) (अमरः १।४।८)

-इ/ई – गाण्डिवम्/गाण्डीवम्,'कृदिकारादक्तिनः'(ग.४।१।४५) (अमरः २।८।८४)

---

[२९०]"कर्मण्यधिकरणे च" (पा.३.३.९३ "उपपदमतिङ्" (पा.२।२।१९)

-उ/ऊ – दिधिषुः/दिधिषूः,'अन्दूदृन्भूजम्बूकफेलूकर्कन्धूदिधिषूः' (उ.१।९३) (अमरः २।६।२३)

-ए/ऐ – शेवालम्/शैवलः, 'शीङो धुक्-लक्-वलञ्-वालनः' (उं४।३८) (अमरः१।१०।३८)

**व्यञ्जने परिवर्तनम्**

-द्/ज् – दम्पती/जम्पती,'राजदन्तादिषु परम्' (२।२।३१) इत्यत्र गणे निपातितौ ।( अमरः२।६।३८)

-क्/ग् – कन्दुकः/गेन्दुकः,'कं सुखं ददातीति कन्दुः स्वार्थे कन्/गे गगने इन्दुरिव गेन्दुः स्वार्थे कन् (अमरः२।६।१३८)

-द्/ल् –उदूखलम्/उलूखलम् , ऊर्ध्वखं लाति 'आतोऽनुपसर्गे कः' (पा.३।२।४)'पृषोदरादीनि यथोपदिष्टम्' (६।३।१०९) (अमरः२।९।२५)

-ड्/ल् – इडा/इला, डलयोरेकत्वस्मरणात्, (अमरः३।१।१३५)

-र ल – करभः/कलभः, रलयोरेकत्वस्मरणात्, (अमरः२।६।८१)

-" " – श्रीरः/श्रीलः/श्लीलः (वैदिकशब्दाः)

**मध्यमस्वरलोपद्विरूपता**

-नव एव, नूतनः/नूत्नः, 'नवस्य नूरादेशस्त्नप्तनप्खाश्च प्रत्ययाः' (वा.५।४।३०) ( अमरः३।१।७७)

-पूरा भवम्, प्रतनः/प्रत्नः, 'नश्च पुराणे प्रात्' (वा.५।२।३०) (अमरः३।१।७७)

**अनुनासिकसन्निवेशजन्यद्विरूपता**

-गभीरम्/गम्भीरम्, 'गभीरादयश्च' (उ. ४।३५) (अमरः१।१०।१५)

-तुरगः/तुरङ्गः, 'गमेश्च' (३।२।४७) इति खच्, 'खच्च वा डित्' (वा.३।२।३८)(अमरः२।८।४३)

यथामरकोशे द्विरूपता प्राप्यते तथैवामरकोशस्य स्वयंबोधिनीटीकायामपि कुलचन्द्रेणातीव परिश्रमेण विचार्य द्विरूपशब्दा बहुरूपशब्दाश्च दत्ताः सन्ति ।कुत्रचिद्धातुभेदेन कुत्रचित् प्रत्ययभेदेन कुत्रचिद्विकल्पेन बहवः शब्दा दर्शिताः सन्ति कोष्ठके । तेषां शब्दानां विवृतिपूर्वकं प्रदर्शनं क्रियते ।

## ३.३.१ स्वर्गवर्गः

स्वर्गवर्गात्-अग्नि-अमृत-इन्द्र-कुवेर-गन्धर्व-पार्वती-ब्रह्मन्-राक्षस -वज्र-विष्णु-शिव-स्वर्गाणां नामानि –

**३.३.१.१ अग्नेर्नामनी प्र.११०, (१।१।५७) बर्हिस्१,शुष्मन्१/बर्हिःशुष्मन्१ ।**

बर्हिः, शुष्मा–"शुक्रो वैश्वानरो बह्निर्बर्हिःशुष्मा तनूनपात् ।इति शब्दार्णवात् "बर्हिःशुष्मा" इति व्यस्तं समस्तं नाम इति क्वचित् ।

बर्हिःशुष्मा–अत्र समस्तपक्षे बर्हिः=कुशः, शुष्म=बलमस्य इति विग्रहोऽस्ति । बर्हिः सान्तः, शुष्मा नकारान्तश्च ।

### ३.३.१.२ अमृतस्य नामनी प्र.९९, (१।१।५१) पीयूष३/पेयूष१ ।

पीयूषम्–पीय्यते इति विग्रहे "पीय" इति सौत्रधातुः पीडनेऽर्थे (उ.२१५८) "पीयेरूषन्" (उ.४।७६) इति सूत्रेण ऊषन्प्रत्यये स्वादिकार्ये "पीयूषम्" इति ।

पेयूषः/पेयूषम् – अत्र पक्षे उणादौ बहुलग्रहणात् गुणे स्वादिकार्ये द्वे रूपे सिद्धे ।[२९१]

### ३.३.१.३ इन्द्रस्य नामनी प्र.८४, (१।१।४४) मघवन्१/मघवत्१ ।

मघवान्–मह्यते=पूज्यते इति विग्रहे "मह पूजायाम्" (भ्वा.प.से.७७६, चु. उ. से.२०१०)इति धातुभ्याम्"श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्धन्मज्जन्नर्यमन्विश्वप्सन्परिज्मन्मातरिश्वन्मघ-वन्निति" (उ.१।१५९) इति सूत्रेण कनिन्प्रत्यये ह्रस्य घादेशे वुकागमे च कृते निपातनात् मघवन्निति जाते स्वादिकार्ये "मघवान्" इति ।

मघवा–"मघवा बहुलम्" (पा.६।४।१२८) इति सूत्रेण त्रादेशपक्षे तु स्वादिकार्ये "मघवा" इति रूपम् ।

**विडौजस्१/विडोजस्१ –**

विडौजाः–विडतीति विग्रहे "विड भेदने"(तु.प.से.अयं धातुः सिद्धान्तकौमुद्यां नास्ति) इति धातोः "इगुपधज्ञाप्रीकिरः कः"(पा.३।१।१३५) इति सूत्रेण कप्रत्यये "विड" इति जाते विडं=भेदकमोजोऽस्येति विग्रहे बहुव्रीहिसमासे "वृद्धिरेचि" (पा.६।१।८८) इति सूत्रेण वृद्धौ च "विडौजस्" इति जाते स्वादिकार्ये "विडौजाः" इति ।

विडोजाः–विट्सु=प्रजासु=मनुष्येषु वा ओजोऽस्येति विग्रहे बहुव्रीहिसमासे वर्णमेलने स्वादिकार्ये "विडोजाः" इति ।

**शुनासीर१/सुनासीर१/शुनाशीर१ –**

शुनासीरः – "शु" इत्यव्ययस्य पूजार्थत्वात् शु नासीरं=सेनामुखं यस्य स इति विग्रहे बहुव्रीहिसमासे स्वादिकार्ये "शुनासीरः" इति ।

---

[२९१] स्यात्पेयूषं च पीयूषं नवक्षीरेऽमृतेऽपि च ॥ भानुजिदीक्षितः, ***अमरकोशः*** (सुधाटीका १.१.४८), वाराणसी : चौखम्वा विद्याभवन, सन्.२०११, पृ.२१।

सुनासीरः–सुष्ठु नासीरं= सेनामुखं यस्य स इति विग्रहे बहुव्रीहिसमासे स्वादिकार्ये "सुनासीरः" इति ।

शुनाशीरः–शुनः=वायुः शीरः=सूर्यस्तावस्य स्त इति विग्रहे "अर्श आदिभ्योऽच्" (पा.५।२।१२७) इति सूत्रेणाच्प्रत्यये "अन्येषामपि दृश्यते" (पा.६।३।१३७) इत्यकारस्य दीर्घे स्वादिकार्ये "शुनाशीरः" इति सिद्धम् ।

**३.३.१.४ कुवेरस्य नामानि प्र.१४४, (१।१।७३) ऐलविल१/ऐडविल१/ऐडविड१ ।**

ऐलविलः–इलविला=पुलस्तिभार्या तस्या अपत्यमिति विग्रहे "अवृद्धाभ्यो नदीमानुषी-भ्यस्तन्नामिकाभ्यः" (पा.४।१।११३) इत्यणि "ऐलविलः" इति ।

ऐडविलः/ऐडविडः–डलयोरेकत्वस्मरणात् "ऐडविलः/ऐडविडश्च" इति द्वे रूपे सिद्धे ।

**३.३.१.५ गन्धर्वाणां नामानि प्र.१०७, (१।१।५५) हाहा१/हूहू१/हहा१/हुहु१ ।**

हाहाः–हा इति शोकव्यञ्जकशब्दं जहातीति विग्रहे "ओहाक् त्यागे" (जु.प.अ.११६५) इति धातोः "अन्येभ्योऽपि दृश्यते" (पा.३।२।१७८) इति क्विप्प्रत्यये स्वादिकार्ये "हाहाः" इति ।

हूहूः–हू इति ह्वयति इति विग्रहे "ह्वेञ् स्पर्धायां शब्दे च" (भ्वा.उ.से.१०७७) इति धातोः "अन्येभ्योऽपि दृश्यते" (पा.३।२।१७८) इति क्विपि "वचिस्वपियजादीनां किति" (पा.६।१।१५)इति सम्प्रसारणे "संप्रसारणाच्च" (पा.६।१।१०८)इति पूर्वरूपे "हलः" पा.६।४।२) इति दीर्घे स्वादिकार्ये "हूहूः" इति ।

हहा/हुहु–भोजस्तु हाहाहुहुशब्दयोरव्ययत्वमाह । "हहा"इत्यादिह्रस्वः, "हुहु"इत्युभय-पदह्रस्वश्च ।[२९२]

**३.३.१.६ पार्वत्या नामनी प्र.७२, (१।१।३८) ईश्वरी२/ईश्वरा२ ।**

ईश्वरी–"अश्नुते" इति विग्रहे "अशू व्याप्तौ" (स्वा.आ.से.१३४६) इति धातोः "अश्नोतेराशुकर्मणि वरट् ई चोपधायाः" (उ.५।५७) इति सूत्रेण वरट्प्रत्यये उपधाया ईत्वे टित्त्वात् ङीपि "ईश्वरी" इति ।

ईश्वरा–ईश्वरा तु वोपालितकोशपाठात् स्वीकृतः शब्दः ।

ईश्वरः शङ्करेऽधीशे तत्पत्न्यामीश्वरीश्वरा ॥[२९३]

**३.३.१.७ ब्रह्मणो नामनी प्र.२३, (१।१।१७) विरिञ्चि१/विरञ्चि१ ।**

---

[२९२] दीक्षितः भानुजि, ***अमरकोशः*** (सुधाटीका १.१.४८), वाराणसी : चौखम्बा विद्याभवन, सन्.२०११, पृ.२२ ।

[२९३] पूर्ववत् (१.१.३६) पृ.१६ ।

विरिञ्चिः–विरचयतीति विग्रहे “रच प्रतियत्ने” (चु.उ.से.२००७) इति धातोः स्वार्थण्यन्तात् “अच इः” (उ.४।१३९)इति सूत्रेण इप्रत्यये “पृषोदरादीनि यथोपदिष्टम्” (पा.६।३।१०९) इति सूत्रेणाकारस्येत्वे नुमागमे च “विरिञ्चिः” इति सिद्ध्यति ।

३.३.२.२. विरञ्चिः–क्वचिदित्वाभावे “विरञ्चिः” इत्यपि भवति ।[२९४]

**३.३.१.८ राक्षसस्य नामनी प्र.१२३, (१।१।६२) अस्रप१/अश्रप१ ।**

अस्रपः–अस्रं=रक्तं पिबतीति विग्रहे “पा पाने” (भ्वा.प.अ.९९१) इति धातोः “आतोऽनुपसर्गे कः” (पा.३।२।३)इति कप्रत्यये स्वादिकार्ये “अस्रपः” इति दन्त्यसकारवान् भवति ।

अश्रपः–न श्रपयति क्रव्यादत्वादिति विग्रहे “श्रा पाके” (भ्वा.प.अ.८६३) इति धातोर्ण्यन्तात् पचाद्यचि (पा.३।१।१३४) “अश्रपः” इति तालव्यशकारवान् भवति ।

**आशर१/आशिर१ –**

आशरः–आशृणातीति विग्रहे “शॄ हिंसायाम्” (क्र्या.प.से.१५८६) इति धातोः “नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः” (पा.३।१।१३४) इत्यच्प्रत्यये “आशरः” इति ।

आशिरः–“अश भोजने” (क्र्या.प.से.१६२४) इति धातोरश्नातीति विग्रहे “अशेर्णित्” ( उ.१।५२)इति किरच्प्रत्यये णिद्वद्भावे च “आशिरः” इति सिद्ध्यति, संसारार्णवपाठाच्च ।[२९५]

**कर्बुर१/कर्बर१ –**

कर्बुरः–कर्बतीति विग्रहे “कर्ब गतौ (हिंसायाम्)” (भ्वा.प.से.४४८) इति धातोः “मद्गुरादयश्च” (उ.१।४१) इति उरच्प्रत्यये “कर्बुरः” इति ।

कर्वरः–कृणातीति विग्रहे “कॄ हिंसायाम्” (क्र्या.प.से.१५९६) इति धातोः “कॄगॄशॄवृञ्चतिभ्यः ष्वरच्” (उ.२।१२१) इति ष्वरच्प्रत्यये “कर्वरः” इति ।

**यातुधान१/जातुधान१ –**

यातुधानः–यातूनि=रक्षांसि दधाति=पुष्णाति स्वजातिपरकत्वादिति विग्रहे “डुधाञ् धारण-पोषणयोः” (जु.उ.अ.११६७) इति धातोः “बहुलमन्यत्रापि” (उ.२।७८) इति युचि “यातुधानः” इत्यन्तस्थादिसिद्धम् ।

---

[२९४] पूर्ववत् (१.१.१७) पृ.८ ।

[२९५]“आशिरो धनुषः शङ्कुः क्व्यादोऽश्रप आशरः ॥ भानुजिदीक्षितः, ***अमरकोशः*** (सुधाटीका १.१.४८), वाराणसी : चौखम्बा विद्याभवन, सन्.२०११, पृ.२५।

जातुधानः–जातु=कदाचित् धानं=संनिधानमस्येति विग्रहे बहुव्रीहिसमासे "जातुधानः" इति चवर्गादिरपि सिद्धम् ।

**३.३.१.९ वज्रस्य नामनी प्र.९६, (१।१।५०) भिदुर३/भिदिर३ ।**

भिदुरम्–भिनत्तीति विग्रहे "भिदिर् विदारणे" (रु. उ. अ.१५३३) इति धातोः "विदिभिदिच्छिदेः कुरच्) (पा.३।२।१६२) इति सूत्रेण कुरच्प्रत्यये स्वादिकार्ये "भिदुरम्" इति ।

भिदिरम् – भिद्धातोः भिनत्तीति विग्रहे "इषिमदिमुदिखिदिछिदिभिदि–मन्दिचन्दितिमिमिहि-मुहिमुचिरुचिरुधिबन्धिशुषिभ्यः किरच्" (उ.१।५१) इति सूत्रेण किरच्प्रत्यये स्वादिकार्ये भिदिरमिति ।

**शम्ब१/सम्ब१ –**

शम्बः–शम्बयति=संबध्नाति शत्रून्निति विग्रहे "शम्ब संबन्धने" (चु.प.से.१६६५) इति धातोः "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" (पा.३।१।१३४) इत्यच्–प्रत्यये स्वादिकार्ये "शम्बः" इति ।

३.३.१०.२. सम्बः– "षम्ब सम्बन्धने" (चु.उ.से.१६६४) इति धातोः पचाद्यचि स्वादिकार्ये "सम्बः" इति सिद्धम् । ऊष्मविवेकपाठाच्च तालव्यादिः ।[२९६]

**३.३.१.१० विष्णोर्नामनी प्र.३०, (१।१।१९) विष्वक्सेन१/विश्वक्सेन१ ।**

विष्वक्सेनः–विषुशब्दो नानार्थो निपातः । विषु=नाना अञ्चतीति विग्रहे "ऋत्विग्दधृक्स्रग्-दिगुष्णिगञ्चुयुजिक्रुञ्चां च" (पा.३।२।५९) इति सूत्रेण क्विन्प्रत्यये "उगितश्च" (४।१।६) इति ङीप् । विषुची सेना यस्य इति विग्रहे बहुव्रीहिसमासे विष्वक्सेनः, गकारपरत्वात् "एति संज्ञायामगात्" (पा.८।३।९९) इति न षत्वम्, चर्त्वस्यासिद्धत्वात् ।

विश्वक्सेनः–विश्वक्सेन इति तु द्विरूपकोशात् तालव्यमध्योऽपि ।[२९७]

**३.३.१.११ शिवस्य नामनी प्र.५९, (१।१।३२) शर्व१/सर्व१ ।**

शर्वः–शृणातीति विग्रहे "शॄ हिंसायाम्" (क्र्या.प.से.१५८६) इति धातोः "कॄगॄशॄदॄभ्यो वः" ( उ.१।१५५)इति सूत्रेण वप्रत्यये गुणे "शर्वः" इति सिद्धम् ।

सर्वः–"षर्ब गतौ"(भ्वा.प.से.४५२) इति धातोरथवा "षर्व हिंसायाम्" (भ्वा.प.से.६२६)इति धातोः "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" (३।१।१३४) इत्यच्प्रत्यये कृते बवयोरभेदाच्च"सर्वः"इति सिद्धम् ।

---

[२९६] तालव्या अपि दन्त्याश्च सम्बसूकरपांसवः ॥ पूर्ववत् (१.१.४७) पृ.२० ।

[२९७] विष्वक् विश्वक् स्मृतो विज्ञैर्विषुवं विषुवं तथा ॥ (द्विरूपकोशः, श्लोकः ५)

**३.३.१.१२ स्वर्गस्य नामनी प्र.२, (१।१।६) त्रिपिष्टप३/त्रिविष्टप३ ।**

त्रिविष्टपम्– विशन्त्यस्मिन् सुकृतिन इति विग्रहे ("विश प्रवेशने" तु.प.अ.१२१८) इति धातोः "विटप-विष्टप- विशिपोलपाः" (उ.३।१४५)इति सूत्रेण कपन्प्रत्यये तस्य च तुडागमे "व्रश्चभ्रस्जसृजमृज-यजराजभ्राजच्छशां षः" (पा.८।२।३६)इति षत्वे ष्टुत्वे च कृते तृतीयं विष्टपं त्रिविष्टपमिति सिद्धम् ।

त्रिपिष्टपम्–केचित्तु 'पिष्टप'इति सूत्रं पठित्वा विशतेरादेः पो निपात्यत इत्याहुः। अयं पुंस्यपि । "पिष्टपो विष्टपोऽप्यस्त्री भुवनं च नपुंसकम् ।" इति अमरमालायाम् । (भानुजी)

## ३.३.२ दिग्वर्गः

दिग्वर्गात्-अगस्त्य-किरण-बृहस्पति-राहु-वातप्रछिप्तकण-विद्युत्-शनैश्चर-सूर्य-हिमानां नामानि –

**३.३.२.१ अगस्त्यस्य नामनी प्र.१९६, (१।३२०) अगस्त्य१/अगस्ति१ ।**

अगस्त्यः–अगं =विन्ध्यं स्त्यायति=स्तभ्नोतीति विग्रहे "स्त्यै शब्दसंघातयोः (भ्वा.प.अ.९७६) इति धातोरात्वे "आतोऽनुपसर्गे कः" (पा.३।२।३) इति कप्रत्यये आकारलोपे वर्णमेलने स्वादिकार्ये "अगस्त्यः" इति ।

अगस्तिः–अगमस्यतीति विग्रहे अगोपपदात् "असु क्षेपणे" (दि.प.से.१२८६) इति धातोः "क्तिच्क्तौ च संज्ञायाम्" (पा.३।३।१७४) इति सूत्रेण बाहुलकादगतिकगतित्वात् क्तिच्प्रत्यये "शकन्ध्वादिषु पररूपं वाच्यम्" (वा.६।१।९४) इति वार्तिकेन पररूपे "अगस्तिः" इति ।

**३.३.२.२ किरणस्य नामानि प्र.२२६, (१।३।३३) रश्मि१/वृष्णि१/धृष्णि१/पृश्नि१ ।**

रश्मिः–अश्नुते इति विग्रहे "अशू व्याप्तौ संघाते च" (स्वा.आ.से.१३४६) इति धातोः "अश्नोते रश्च" (उ.४।४६) इति मिप्रत्यये रश्चादेशे "रश्मिः" इति ।

वृष्णिः–वर्षतीति विग्रहे "वृषु सेचने" (भ्वा.प.से.७५२) इति धातोः "सृवृषिभ्यां कित्" ( उ.४।४९) इति निप्रत्यये कित्वे "वृष्णिः" इति ।

धृष्णिः–धृष्णोतीति विग्रहे "ञिधृषा प्रागल्भ्ये" (स्वा.प.से.१३५१) इति धातोः बाहुलकात् निप्रत्यये गुणाभावे "धृष्णिः" इति ।[२९८]

---

[२९८] "किरणोस्रमयुखांशुगभस्तिघृणिधृष्णयः ।" दीक्षितः भानुजि, ***अमरकोशः*** (सुधाटीका १.३.३३), वाराणसी : चौखम्बा विद्याभवन, सन्.२०११, पृ.४२ ।

पृश्निः – स्पृशतीति विग्रहे “स्पृश संस्पर्शने” (तु.प.अ.१५१६) इति धातोः “घृणिपृष्निपार्ष्णिचूर्णिभूर्णि” (उ.४।५२) इति सूत्रेण निप्रत्यये सलोपे गुणाभावे च निपातिते “पृश्निः) सिद्धम् ।

**३.३.२.३ बृहस्पतेर्नामानि प्र.२०४, (१।३।२४) गीर्पति१/गी)(पति१/गीःपति१ ।**

गीर्पतिः – गिरां पतिरिति विग्रहे षष्ठीतत्पुरुषसमासे “अहरादीनां पत्यादिषु वा रेफः:” ( वा.८।२।६९) इति वार्तिकेन विकल्पेन रेफे “गीर्पतिः” इति ।

गी)(पतिः – अत्र “कुप्वोः )(क)( पौ च” (पा.८।३।३७) इत्युपध्मानीयविसर्गे “गी)(पतिः” इति ।

गीःपतिः – अत्रोपध्मानीयविसर्गाभावे “खरवसानयोर्विसर्जनीयः” (पा.८।३।१५) इति सूत्रेण विसर्गे “गीःपतिः” इति ।

कस्कादित्वात् “कस्कादिषु च” (८।२।४८) इति सूत्रेण षत्वे कृते “गीष्पतिः” इति रूपं केचित् तन्नोचितम् ।[२९९]

**३.३.२४ राहोर्नामनी प्र.२०९, (१।३।२६) तमस्३/तम१ ।**

तमः–ताम्यतीति विग्रहे “तमु ग्लानौ”(दि.प.से.१२७९) इति धातोः “सर्वधातुभ्योऽसुन्) ( उ.४।१८९) इति सूत्रेणासुन्प्रत्यये तमसिति जाते स्वादिकार्ये “तमः” इति ।

तमः–ताम्यतीति विग्रहे “तमु ग्लानौ”(दि.प.से.१२७९)इति धातोः “नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः”(पा.३।१।१३४) इत्यच्प्रत्यये “तमः” इत्यदन्तः, पुंलिङ्गोऽपि वर्तते ।

**३.३.२.५ वातप्रक्षिप्तजलकणस्य नामनी, प्र.१७९, (१।३।११) शीकर१/सीकर१ ।**

शीकरः–सृता वायुना इतस्ततः प्रेरिता अम्बुकणाः शीकराः तालव्यादिः । “शीकृ सेचने” ( भ्वा.आ.से.७७) इति धातोः “ऋच्छेररः” (उ.३।१३१) इति बाहुलकादरप्रत्यये “शीकरः” इति ।

सीकरः–दन्त्यादिरयमिति धनपालादयः ।[३००] □ब्राछिटो” इति भाषायाम्

**३.३.२.६ विद्युतो नामनी प्र.१७५, (१।३।९) सौदामनी२/सौदामिनी२ ।**

सौदामनी–सुदाम्नाद्रिणैकदिगिति विग्रहे “तेनैकदिक्” (पा.४।३।११२) इति सूत्रेणाण्प्रत्यये “अन्” (६।४।१६४) इति प्रकृतिभावे आदिवृद्धौ स्त्रीत्वविवक्षायां ङीपि “सौदामनी” इति ।

---

[२९९] केचिदित्यनेन स्वामिचान्द्रोक्तेऽरुचिः सूचिता । गीष्पतिरित्यसाधुरिति मुकुटः । अत एव भाष्ये गीर्पतिः, गी)(पतिः, गीःपतिरिति रूपत्रयमेवोदाहृतम् । एतेन कस्कादिषु पाठकल्पनमपि निरस्तम् । दीक्षितः भानुजि, ***अमरकोशः*** (सुधाटीका १.१.४८), वाराणसी : चौखम्बा विद्याभवन, सन्.२०११, पृ.(१.३.२४) पृ.३९ ।

[३००] पूर्ववत् (१३.११) पृ.३३ ।

सौदामिनी – इति त्वपपाठ इति भानुजिदीक्षितोऽलिखत् ।[३०१]

**३.३.२.७ शनैश्चरस्य नामानि  प्र.२०८, (१।३।२६)शौरि१/सौरि१/शौर१/सौर१/-शनि१ ।**

शौरिः – शूरस्य =अर्कस्यापत्यमिति विग्रहे “अत इञ्” (पा.४।१।९४) इतीञ्प्रत्यये आदिवृद्धौ “शौरिः” इति रूपं सिद्धम् ।

सौरिः – सूरस्य =अर्कस्यापत्यमिति विग्रहे “अत इञ्” (पा.४।१।९४) इतीञ्प्रत्यये आदिवृद्धौ “सौरिः” इति रूपं पूर्ववत् ।

शौरः – शूरस्यायमिति विग्रहे “तस्येदम्” (पा.४।३।१२०) इत्यण्प्रत्यये “शौरः” इति ।

सौरः – सूरस्यायमिति विग्रहे “तस्येदम्” (पा.४।३।१२०) इत्यण्प्रत्यये “सौरः” इति पूर्ववत् ।

शनिः – अत्र “शनिसौरशनैश्चराः” इति रभसपाठाच्छनिरपि । शो अनि किच्च ।[३०२]

**३.३.२.८  सूर्यस्य नामनी प्र.२१२, (१।३।२८) सूर१/शूर१ ।**

सूरः – सुवति =प्रेरयति कर्मणि लोकमिति विग्रहे “षू प्रेरणे” (तु.प.से.१५०२) इति धातोः “सुसूधागृधिभ्यः क्रन्” (उ.२।२४) इति क्रनि “सूरः” दन्त्यादिः ।

शूरः – शवतीति विग्रहे “शु गतौ” (उ.२१५४) इति (सौत्रः) धातोः “शुसिचिमीनां दीर्घश्च” ( उ.२।२५) इति क्रनि दीर्घे च “शूरः” इति तालव्यादिः ।

**मार्तण्ड१/मार्ताण्ड१ –**

मार्तण्डः–मृतेऽण्डे भव इति विग्रहे “तत्र भवः”(पा.४।३।५३) इति सूत्रेणाण्प्रत्यये मार्त+अण्ड इति जाते “शकन्ध्वादिषु पररूपं वाच्यम्” (वा.६।९।९४) इति वार्तिकेन पररूपे “मार्तण्डः” इति ।

मार्ताण्डः–“पुनर्मार्ताण्डमारभत्” इत्यादिमन्त्राद्दीर्घोऽपि ।“मार्ताण्डः क्रोडसूर्ययोः” इति मेदिनीकोशः। (४३।३५) ।[३०३]

**तपन१/तापन१ –**

तपनः – तपतीति विग्रहे “तप सन्तापे” (भ्वा.प.अ.१०५४) इति धातोः “नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः” (पा.३।१।१३४) इति ल्युप्रत्ययेऽनादेशे “तपनः” इति ।

---

[३०१] पूर्ववत् (१.३.९) पृ.३२ ।

[३०२] पूर्ववत् (१.३.९) पृ.४०।

[३०३] पूर्ववत् (१.३.२९) पृ.४० ।

तापनः – तपन एवेति विग्रहे “प्रज्ञादिभ्यश्च” (पा.५।४।३७) इति स्वार्थेऽण्प्रत्यये “तापनः”इति । तापयतीत्यर्थेऽपि ण्यन्ते ल्युप्रत्यये “तापनः” सिध्यति । “तपनस्तापनो रविः” इति ।[३०४]

**३.३.२.९ हिमस्य नामनी प्र.१९३, (१।३।१८) मिहिका२/महिका२ ।**

मिहिका–“मिह सेचने” (भ्वा.प.अ.१०६१) इति धातोः “क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापि” (उ.२।३२) इति सूत्रेण क्वुन्प्रत्यये टापि कात्पूर्वस्येत्वे “मिहिका” इति ।

महिका– मह पूजायाम्” (भ्वा.प.से.७७६) इति धातोः “क्वुन्शिल्पिसंज्ञयोरपूर्वस्यापि” (उ.२।३२) इति सूत्रेण क्वुन्प्रत्यये टापि कात्पूर्वस्येत्वे “महिका” इति ।

## ३.३.३ कालवर्गः

कालवर्गात्-अमवास्या-पर्वन्-प्रातःकाल-रात्रि-सायंकालानां नामानि –

३.३.३.**१ अमावस्याया नामनी**प्र.२४८, (१।४।८) **अमावस्या२/अमा२ ।**

अमावस्या – अमा = सह वसतोऽस्यां चन्द्रार्काविति विग्रहे ‘अमावस्यदन्यतरस्याम्’ (पा.३।१।१२२) इति सूत्रेण ण्यत्प्रत्यये पक्षे वृद्ध्यभावश्च निपात्यते टापि स्वादिकार्ये ‘अमावस्या’ इति ।

अमा – नामैकदेशे नामग्रहणात् ‘अमा’ इति रूपं सिद्धम् । सत्यभामेत्यस्य सत्या, भामेति, देवदत्तस्य च देवः, दत्त इतिवत् ।

**३.३.३.२ पर्वणो नामनी प्र.२४२, (१।४।७) पर्वन्३/पर्वसन्धि१ ।**

पर्व – ‘पर्व पूरणे’ (भ्वा.प.से.६१७) इति धातोः बाहुलकात् कनिन्प्रत्यये स्वादिकार्ये ‘पर्व’ इति । ‘पर्व क्लीबं महे ग्रन्थौ प्रस्तावे लक्षणान्तरे । दर्शप्रतिपदोः संधौ विषुवत्प्रभृतिष्वपि ॥[३०५]

.पर्वसन्धिः – पर्वणः सन्धिः = पर्वसन्धिरिति प्राञ्चः ।[३०६]

**३.३.३.३ प्रातःकालस्य नामनीप्र.२३५, (१।४।२) कल्य३/काल्य३ ।**

कल्यम्–कलयति चेष्टामिति विग्रहे “कल गतौ संख्याने च” (चु.उ.से.२००८) इति धातोः“अघ्न्यादयश्च” (उ.४।११२) इति यक्प्रत्यये “कल्यम्” इति ।

---

३०४ पूर्ववत् (१.३.३१) ४० ।

३०५ मेदिनीकरः, ***मेदिनीकोशः***(२०८८), वाराणसी : चौखम्बा संस्कृत सिरिज अफिस, वि.सं.२०२४, पृ.८९ ।

३०६ दीक्षितः भानुजि, (ई.२०११) **अमरकोषः** (सुधा (रामाश्रमी व्याख्या), वाराणसी : चौखम्बा विद्याभवन पृ.१८३ ।

काल्यम्–कल्यमेवेति विग्रहे "प्रज्ञादिभ्यश्च" (पा.५।४।३८) इति स्वार्थेऽण्प्रत्यये आदिवृद्धौ "काल्यम्" अपि सिद्धम् ।

**उष१/उषस्/उषा८/प्रत्युषस्३/ऊष१/ प्रत्यूषस्३ –**

उषः–ओषत्यन्धकारमिति विग्रहे "उष दाहे" (भ्वा.प.से.७४२) इति धातोः "इगुपधज्ञाप्रीकिरः कः" (पा.३।१।१३५) इति कप्रत्यये "उषः" इति ।

उषः–ओषत्यन्धकारमिति विग्रहे "उष दाहे" (भ्वा.प.से.७४२) इति धातोः "उषः किच्च" (उ.४.१३४) इत्यसिप्रत्यये"उषः" इति ।

उषा – ओषत्यन्धकारमिति विग्रहे "उष दाहे" (भ्वा.प.से.७४२) इति धातोः "इगुपधज्ञाप्रिकिरः कः" (पा.३।१।१३५) इति कप्रत्यये टापि "उषा" इति सिद्धम् । अव्ययशब्दोऽयम् ।

प्रत्युषः – ओषत्यन्धकारमिति विग्रहे "उष दाहे" (भ्वा.प.से.७४२)इति धातोः "उषः किच्च" (उ.४.१३४) इत्यसिप्रत्ययेऽन्योपसर्गनिवृत्तये प्रत्युपसर्गप्रयोगे "प्रत्युषः" इति ।

ऊषः – ऊषति =रुजति कामुकानिति विग्रहे "ऊष रुजायाम्" (भ्वा.प.से.७२९) इति धातोः "इगुपधज्ञाप्रीकिरः कः" (पा.३।१।१३५) इति कप्रत्यये "ऊषः" इति

प्रत्यूषः – ओषत्यन्धकारमिति विग्रहे "ऊष दाहे"(भ्वा.प.से.७२९ इति धातोः "इगुपधज्ञाप्रीकिरः कः" (पा.३।१।१३५) इति कप्रत्ययेऽन्योपसर्गनिवृत्तये प्रत्युपसर्गप्रयोगे "प्रत्यूषः" इति । सान्तस्तु न संपद्यते ।

**३.३.३.४ रात्रेर्नामनी प्र.२३९, (१।४।४) रात्रि२/रात्री२ ।**

.रात्रिः – राति सुखमिति विग्रहे 'रा दाने' (अ.प.से.११३३) इति धातोः 'राशदिभ्यां त्रिप्' (उ.४।६७) इति सूत्रेण त्रिप्प्रत्यये स्वादिकार्ये 'रात्रिः' इति ।

रात्री – रात्रिशब्दात् 'कृदिकारादक्तिनः' (ग.सू.४।१।४५) इति गणसूत्रेण ङीषि स्वादिकार्ये 'रात्री' इति । 'रात्री रात्रिस्तमस्विनी' इति शब्दार्णवः ।[३०७]

**रजनी२/रजनि२ –**

रजनी – रजन्त्यनुरक्ता भवन्ति रागिणोऽस्यामिति विग्रहे 'रञ्ज रागे' (भ्वा.उ.अ.१०६८.) इति धातोः 'क्षिपे किच्च' (उ.२।१०७) इति चकारादनिप्रत्यये कित्त्वात् 'अनिदितां हल उपधायाः

[३०७] पूर्ववत्(१.४.४), पृ.४४॥

क्ङिति' (पा.६।४।२४)इति नलोपे 'बह्वादिभ्यश्च' (पा.४।१।४५) इति सूत्रणे विकल्पेन ङीषि 'रजनी' इति ।[308]

रजनिः – रजनिशब्दात् 'बह्वादिभ्यश्च' (पा.४।१।४५) इति सूत्रेण विकल्पेन ङीष् भवति, ङीषभावपक्षे तु 'रजनिः' इति ।

**तमी२/तमि२/तमा२ –**

तमी – ताम्यन्त्यस्यामिति विग्रहे 'तमु काङ्क्षायाम्' (दि.प.से.१२७९) इति धातोः 'सर्वधातुभ्य इन्' (उ.४।११८) इति सूत्रेणेन्प्रत्यये 'तमि' इति जाते 'कृदिकारादक्तिनः' (वा.४।१।४५) इति विकल्पेन ङीषि 'तमी' इति ।

तमिः – 'कृदिकारादक्तिनः' (वा.४।१।४५) इति ङीषभावपक्षे 'तमिः' इति ।

.तमा – 'तमु काङ्क्षायाम्' (दि.प.से.१२७९) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' ( पा.३।१।१३४) इत्यच्प्रत्यये 'अजाद्यतष्टाप्' (पा.४।१।४) इति टापि 'तमा' इति ।

**३.३.३.५ सायंकालस्य नामनीप्र.२३७, (१।४।३) साय१/सायम्८ ।**

सायः – स्यति = समापयति दिनमिति विग्रहे 'षोऽन्तकर्मणि' (दि.प.अ.१२२२) इति धातोः 'धात्वादेः षः सः' (पा.६।१।६४) इति सत्वे 'श्याद्व्यधास्रुसंस्वृतीणवसावह्लिहश्लिषश्वसश्च' ( पा.३.१.१४१) इति सूत्रेण णप्रत्ययेऽनुबन्धलोपे सो अ इति जाते 'आदेच उपदेशेऽशिति' ( पा.६।१।४५) इत्यात्वे सा अ इति जाते 'आतो युक्चिण्कृतोः' (पा.७ ३।३३) इति युगागमे स्वादिकार्ये 'सायः' इति ।

सायम् – स्यति = समापयति दिनमिति विग्रहे 'षोऽन्तकर्मणि' (दि.प.अ.११२२२) इति धातोः 'धात्वादेः षः सः' (पा.६।१।६४) इति सत्वेऽम्प्रत्यये आत्वे युगागमे 'कृन्मेजन्तः' (पा.१।१।३९) इत्यव्ययसंज्ञायां सुप्रत्यये 'अव्ययादाप्सुपः'(पा.२।४।८२)इति सुपो लुकि 'सायम्' इति ।

## ३.३.४ .धीवर्गः

धीवर्गात्-कषायरस-श्वेतवर्ण-मोक्षाणां नामानि –

**३.३.४.१ कषायरसस्य नामनी प्र.३१६, (१।५।९) तुवर५/तूवर५ ।**

तुवरः – तु सौत्रो धातुः, हिंसार्थः (अ.प.अ.११०९) तस्मात् 'छित्वरछत्वरधीवरपीवर-चीवरतीवरनी-वरगह्वरकट्वरसंयद्वराः' (उ.३।१) इति बाहुलकात् ष्वरच्प्रत्यये स्वादिकार्ये 'तुवरः' इति ।

---

[308] पूर्ववत्(१.४.४), पृ.४४ ।

तूवरः – कोशे पाठाद्दीर्घादिरपि यथा– 'नरेऽश्मश्रुणि श्रृङ्गाभ्यां रहिते गवि तूवरः । काले प्राप्ते कषाये च रसे पुं व्यञ्जने च्युते ॥ इत्युत्पलिनी ।[३०९]

**३.३.४.२ श्वेतवर्णस्य श्वेतवस्तुनो वा नामनी प्र.३२४, (१।५।१३) वलक्ष१/७/- अवलक्ष१/७ ।**

अवलक्षः – अवलक्ष्यत इति विग्रह अवपूर्वात् 'लक्ष आलोचने' (चु.आ.से.१८३०) इति धातोः 'अकर्तरि च कारके संज्ञायाम्' (पा.३।३।१९) इति घञ्प्रत्यये 'अवलक्षः' इति ।

वलक्षः – अवलक्ष इत्यस्य 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः । आपं चैव हलन्तानां यथा वाचा निशा दिशा ॥ निर्देशनादल्लोपः 'वलक्षः' इति । [३१०]

**३.३.४.३ मोक्षस्य नामनी प्र.३११, (१।५।६) निःश्रेयस३/निश्रेयस३ ।**

.निःश्रेयसम् – नितरां श्रेय इति विग्रहे 'अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मन-साक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः' (पा.५।४।७७) इति सूत्रेण समासान्ताच्निपातिते स्वादिकार्ये 'निःश्रेयसम्' इति रूपं सिद्धम् ।

निश्रेयसम् – 'नि' इत्युपसर्गात्तु विसर्गरहितं 'निश्रेयसमिति ।

## ३.३.५ शब्दादिवर्गः

शब्दादिवर्गात्-कीर्ति-निन्दयोर्नामानि –

**३.३.५.१ कीर्तेर्नामानि प्र. ३५५, (१।६।११) समज्ञा२/समज्या२/समाज्ञा२ ।**

समज्ञा – समैः = सर्वैर्ज्ञायत इति विग्रहे 'ज्ञा अवबोधने' (क्र्या.प.से.१६०७) इति धातोः 'घञर्थे कविधानम्' (वा.३।३।५८) इति वार्तिकेन कप्रत्यये'आतो लोप इटि च' (पा.६।४।६४) इत्याकारलोपे स्त्रीत्वविवक्षायां टापि 'समज्ञा' इति ।

समाज्ञा – समाङ्पूर्वात् 'ज्ञा अवबोधने' (क्र्या.प.से.१६०७) इति धातोः 'आतश्चोपसर्गे' पा.३।३।१०६) इत्यङ्प्रत्यये 'आतो लोप इटि च' (पा.६।४।६४) इत्याकारलोपे स्त्रीत्वविवक्षायांटापि 'समाज्ञा' इति ।

---

[३०९] पूर्ववत्(१.४.४), पृ.५८

[३१०] पूर्ववत्(१.४.४), पृ.९३।

समज्या – सम्पूर्वकात् 'अज गतिक्षेपणयोः' (भ्वा.प.से.२३८) इति धातोः 'संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः' (पा.३।३।९९) इति क्यप्प्रत्यये 'क्यपि प्रतिषेधः'( वा.२।४।५६) इति वीत्वाभावे स्त्रीत्वविवक्षायां टापि 'समज्या' इति ।

**३.३.५.२ निन्दाया नामनी प्र.३५८, (१।६।१३) परिवाद १/परीवाद १ ।**

.परिवादः – परिपूर्वात् 'वद व्यक्तायां वाचि' (भ्वा.प.से.१०७८) इति धातोः 'भावे' ( पा.३।३।१८) इति सूत्रेण घञ्प्रत्यये 'अत उपधायाः' (पा.७।३।११६) इत्युपधावृद्धौ स्वादिकार्ये 'परिवादः' इति ।

परीवादः – परिपूर्वात् 'वद व्यक्तायां वाचि' (भ्वा.प.से.१०७८) इति धातोः 'भावे' ( पा.३।३।१८) इति सूत्रेण घञ्प्रत्यये 'अत उपधायाः' (पा.७।३।११६) इत्युपधावृद्धौ 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' (पा.६।३।१२२) इति बहुलतया दीर्घे स्वादिकार्ये 'परीवादः' इति ।

**गर्हण ३/गर्हणा २ –**

गर्हणम् – 'गर्ह कुत्सायाम्' (भ्वा.आ.से.६७७) इति धातोः 'ल्युट् च' (पा.३।३।११५) इति ल्युट्प्रत्यये 'युवोरनाकौ' (पा.७।१।१) इत्यनादेशे स्वादिकार्ये 'गर्हणम्' इति ।

गर्हणा – 'गर्ह कुत्सायाम्' (भ्वा.आ.से.६७७) इति धातोः 'ल्युट् च' (पा.३।३।११५) इति ल्युट्प्रत्यये 'युवोरनाकौ' (पा.७।१।१) इत्यनादशे स्त्रीत्वविवक्षायां टापि स्वादिकार्ये 'गर्हणा' इति ।

## ३.३.६ नाट्यवर्गः

नाट्यवर्गात्-आकारगुप्ति-इच्छा-क्रीडा-ज्येष्ठभगिनी-तन्द्रा-दुन्दुभि-भ्रुकुटी-मधुराणां नामानि –

**३.३.६.१ आकारगुप्तेर्नामनी प्र.४५६, (१।७।३४) अवहित्था२/अवहित्थ३ ।**

अवहित्था – अवहिः स्थितिरिति विग्रहे "ष्ठा गतिनिवृत्तौ" (भ्वा.प.अ.९९४) इति धातोः 'सुपि स्थः' (पा.३।२।४)इत्यत्र स्थ इति योगविभगात् कप्रत्यये 'पृषोदरादीनि यथोपदिष्टम्' ( पा.६।३।१०९) इति सकारस्य तकारे स्वादिकार्ये अवहित्थेति ।

अवहित्थम् – लोकाश्रयत्वात् नपुंसकत्वम् ।

**३.३.६२ इच्छाया नामनी प्र.४४३, (१।७।२७) काङ्क्षा२/आकाङ्क्षा२ ।**

काङ्क्षा – 'काङ्क्षि वाङ्क्षि काङ्क्षायाम्' (भ्वा.प.से.७१३) इति धातोः 'इदितो नुम् धातोः' (पा.७।१।५८) इति नुम्यनुस्वारे परसवर्णे 'गुरोश्च हलः' (पा.३।३।१०३) इत्यप्रत्यये स्त्रीत्वविवक्षायां टापि स्वादिकार्ये काङ्क्षेति रूपं सिद्धम् ।

आकाङ्क्षा – आ = समन्तात् काङ्क्षेति विग्रहे 'कुगतिप्रादयः' (पा.२।२।१८)इति समासे स्वादिकार्ये आकाङ्क्षेति रूपं सिद्धम् ।

**अभिलाष१/अभिलाषा२ –**

अभिलाषः – अभिलषणमिति विग्रहे 'लष कान्तौ' (भ्वा.उ.से.९५०) इति धातोः 'भावे' (पा.३।३।१८) इति घञ्प्रत्यये स्वादिकार्येऽभिलाष इति ।

अभिलाषा – अभिलाषशब्दाट्टापि सिद्धम् ।[३११]

**३.३.६.३ क्रीडाया नामानि प्र.४५३, (१।७३२) केलि१/केलि२/केली२ ।**

केलिः – 'किल श्वैत्यक्रीडनयोः' (तु.प.से.१४४१) इति धातोः 'सर्वधातुभ्य इन्' (उ.४.११८) इतीन्प्रत्यये केलिरिति सिद्धम् ।

केलिः/केली – पूर्ववत्, स्त्रियामपि 'कलिषु तद्वानगुणान्निपीय' इति नैषधात् ।

**परीहास१/परिहास१ –**

परीहासः – परिहसनमिति विग्रहे 'हसे हसने' (भ्वा.प.से.७६७) इति धातोः 'भावे' (पा.३।३।११८) इति घञ्प्रत्यय उपधावृद्धौ 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' (पा.६।३।१२२) इति दीर्घे स्वादिकार्ये परीहास इति सिद्धम् ।

परिहासः – पूर्ववत् दीर्घाभावे रूपम् ।

**३.३.६.४ ज्येष्ठभगिन्या नामनी प्र.४१७, (१।७१५) अत्तिका२/अन्तिका२ ।**

अत्तिका – अत्ता =माता, सैवेति विग्रहे 'संज्ञायां कन्' (पा.४।३।१४७) इति कन्प्रत्यये स्त्रीत्व-विवक्षायां टापि 'प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः' (पा.७.३.४४) इतीत्वे स्वादिकार्ये अत्तिकेति ।

अन्तिका – इति रूपं तु द्विरुक्तकोशात् सिद्धम् । एतौ शब्दौ नाट्य एव प्रयुज्येते ।[३१२]

**३.३.६.५ तन्द्राया नामानि प्र.४६२, (१।७३७) तन्द्री२/तन्द्रि२/तन्द्रा२ ।**

---

[३११] अभिलाषा/सा (स्त्री.) इच्छा, चाहना । पूर्ववत्(१.४.४), पृ.४४ । पाण्डेय फणिन्द्रप्रसादः, ***संस्कृत नेपाली बृहद् शब्दकोश,*** दाङ : नेपाल संस्कृत विश्वविद्यालय, (वि.सं.२०५७ ।

[३१२] दीक्षितः भानुजि,***अमरकोश :*** (सुधा/रामाश्रमी व्याख्या (१.७.१५), वाराणसी : चौखम्बा सुरभारती प्रकाशन, सन् २०११, पृ.७६ ।

तन्द्री – तत्पूर्वात् 'द्रा कुत्सायां गतौ' (अ.प.अ.११३०) इति धातोः 'स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्' (पा.३।२।१५८)इतिनिपातनात् तदो दस्य नकारे तन्द्रेति जाते तन्द्रायाः करणमिति विग्रहे 'तत्करोति तदाचष्टे' (वा.३।१।२६)इति ण्यन्तात् 'अच इः' (उ.४।१३९) इतीप्रत्यये तन्द्रीति जाते 'कृदिकारादक्तिनः' (ग.सू.४।२।४५)इति ङीषि तन्द्रीति ।

तन्द्रिः – पूर्ववत् ङीषभावे रूपम् ।

तन्द्रा – णिजभावे रूपम् ।

**३.३.६.६ दुन्दुभेर्नामनी प्र.३९९, (१।७६) भेरी२/भेरि२ ।**

भेरी – विभेत्यस्य रवादिति विग्रहे 'ञिभी भये' (जु.प.अ.११५९) इति धातोः 'ऋज्रेन्द्राग्र-वज्रविप्रकुब्रचुब्रक्षुरखुरभद्रोग्रभेरभेलशुक्रशुक्लगौरवन्नेरामाला' (उ.२।२८) इति रन्प्रत्यये गुणे भेर इति जाते गौरादित्वात् 'षिद्गौरादिभ्यश्च' (पा.४।१।४१) इति ङीषि भेरीति ।

भेरिः – विभेत्यस्य रवादिति विग्रहे 'ञिभी भये' (जु.प.अ.११५९) इति धातोः 'वङ्क्र्यादयश्च' (उ.४.६६) इति बाहुलकाद्रिप्रत्यये स्वादिकार्ये भेरिरिति ।

**३.३.६.७ भ्रुकुट्या नामानि प्र.४६२, (१।७३७) भ्रकुटी२/भ्रुकुटी२/भ्रूकुटी२/-भृकुटि२/भृकुटी२ ।१।**

भ्रकुटी – 'कुट कौटिल्ये' (तु.प.से.१४५४) इति धातोः 'इगुपधात्कित्' (उ.४।१२०) इतीन्प्रत्यये कुटिस्ततः 'कृदिकारादक्तिनः' (ग.सू.४।२।४५) इति ङीषि कुटी, भ्रूवोः कुटीति विग्रहे तत्पुरुषसमासे भ्रूकटी, 'अभ्रुकुंसादीनामिति वक्तव्यम्' (वा.६.३.६१)इत्यत्र 'अकारोऽनेन विधीयते' इति व्याख्यान्तरेऽत्वे स्वादिकार्ये भ्रकुटीति सिद्धम् ।

भ्रुकुटी – 'इको ह्रस्वोऽङ्यो गालवस्य' (पा.६।३।६१) इति ह्रस्वपक्षे भ्रुकुटीति सिद्धम् ।

भ्रूकुटी – 'इयङुवङ्भाविनामव्ययानां च नेति वाच्यम्' (वा.६।३।६१) इति ह्रस्वाभावपक्षे भ्रूकुटीति रूपं सिद्धम् ।

भृकुटिः – 'पृषोदरादीनि यथोपदिष्टम्' (पा.६।३।१०९) इति ऋकारादेशे ङीषभावे भृकुटिरिति सिद्धम् ।

भृकुटी – 'पृषोदरादीनि यथोपदिष्टम्' (पा.६।३।१०९) इति ऋकारादेशे ङीषि रूपम् ।

**३.३.६.८ मधुरस्वरस्य नामनी प्र.३९१, (१।७२)काकली२/काकलि२ ।**

काकली–कलत इति विग्रहे 'कल शब्दसंख्यानयोः' (भ्वा.आ.से.) इति धातोः घञ्प्रत्यये वृद्ध्यभावे कलः । ईषत्कल इति विग्रहे 'ईषदर्थे ' (पा.६।३।१०५) इति कोः कादेशे गौरादित्वात् 'षिद्गौरादिभ्यश्च' (पा.४।१।४१) इति ङीषि स्वादिकार्ये काकलीति ।

काकलिः–कलत इति विग्रहे 'कल शब्दसंख्यानयोः' (भ्वा.आ.से.) इति धातोः 'सर्वधातुभ्य इन्' (उ.४।११८) इतीन्प्रत्यये कलिः । ईषत्कलिरिति विग्रहे 'ईषदर्थे ' (पा.६।३।१०५) इति कोः कादेशेकाकलिरिति ।

## ३.३.७ पातालभोगिवर्गः

पातालभोगिवर्गात् -सर्पग्राहिणो नामनी –

**३.३.७.१ सर्पग्राहिणो नामनी प्र.४९०, (१।८।११) आहितुण्डिक१/अहितुण्डिक१ ।**

आहितुण्डिकः – अहेस्तुण्डम् = अहितुण्डम्, अहितुण्डेन दीव्यतीति विग्रहे 'तेन दीव्यति खनति जयति जितम्' (पा.४।४।२)इति ठक्प्रत्यय इकादेश आदिवृद्धौ 'आहितुण्डिकः' इति ।

अहितुण्डिकः – संज्ञापूर्वको विधिरनित्यत्वाद्वृद्ध्यभावे 'अहितुण्डिकः' इति । 'गारुडी, सपेरा' इति भाषायाम् ।

## ३.३.८ वारिवर्गः

वारिवर्गात्-कमल-कर्कट-तडाग-नाली-पद्मकन्द-मृणाली-शैवालानां नामानि –

**३.३.८.१ कमलसमूहस्य नामनी प्र.५८२, (।१०।४२)षण्ड५/खण्ड५ ।**

षण्डम् – सनोतीति विग्रहे 'षणु दाने' (त.उ.से.१५५८) इति धातोः 'ञमन्ताड्डः' (उ.१।१११) इति डप्रत्यये बाहुलकात्सत्वाभावे षण्डमिति ।

खण्डः – खनतीति विग्रहे 'खनु अवदारणे' (भ्वा.प.से.९४२) इति धातोः 'ञमन्ताड्डः' ( उ.१।१११) इति डप्रत्यये बाहुलकात् 'चुटू' (१।३।७) इतीत्संज्ञा न खण्डः सिद्धम् ।

**३.३.८.२ कर्कटस्य नामनी प्र.५३८, (१।१०।२१) कर्कट१/कर्कटक१ ।**

कर्कटः – कृणातीति विग्रहे 'कॄ हिंसायाम्' (क्र्या.प.से.१५९६) इति धातोः 'अन्येभ्योऽपिदृश्यते' (पा.३।२।७२) इति विच्प्रत्यये सर्वापहारलोपे गुणे करिति । कटतीति विग्रहे 'कटे वर्षावरणयोः' (भ्वा.प.से.२०२) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इत्यच्प्रत्यये कटेति । ततः कर् चासौ कटश्चेति विग्रहे 'विशेषणं विशेष्येण बहुलम्' (पा.२।१।५७) इति कर्मधारयसमासे 'अहरादीनां पत्यादिषुवा रेफः' (वा.८।२।७०)इति विकल्पेन रेफादेशे स्वादिकार्ये कर्कट इति ।

कर्कटकः – कुत्सितः कर्कट इति विग्रहे 'कुत्सिते' (पा.५।३।७४) इति स्वार्थे कप्रत्यये 'कर्कटकः' इति रूपं सिद्धम् ।

**३.३.८.३ तडागस्य नामानि प्र.५५२, (१।१०।२८) तडाग५/तडाक५-/तटाक५/तटाग५ ।**

तडागः –ताड्यत इति विग्रहे 'तड आघाते' )चु.प.से.१६९६) इति धातोः 'तडागादयश्च'इति निपातितः । 'तडागस्तु जलधारविशेषे यन्त्रकूपके' इति । [घज्ञघ]

तडाकः – 'तड आघाते' )चु.प.से.१६९६) इति धातोः 'पिनाकादयश्च' (उ.४।१५) इत्याकप्रत्यये 'तडाकः' इति रूपं सिद्धम् ।

तटाकः – तटमकतीति विग्रहे 'अक अग कुटिलायां गतौ' (भ्वा.प.से.८४४) इति धातोः 'कर्मण्यण्' (पा.३।२।१)इत्यण्प्रत्यये समासे तटाक इति ।

तटागः – तटमगतीति विग्रहे 'अक अग कुटिलायां गतौ' (भ्वा.प.से.८४५) इति धातोः 'कर्मण्यण्' (पा.३।२।१) इत्यण्प्रत्यये समासे तटाग इति ।

**३.३.८.४ नाल्या नामानिप्र.५८१, (१।१०।४२) नाल३/नाला२/नाली२ ।**

नालम् – नलतीति विग्रहे 'णल गन्धे बन्धने च ' (भ्वा.प.से.८९६) इति धातोः 'णो नः' ( पा.६।१।६५) इति णस्य नत्वे 'ज्वलितिकसन्तेभ्यो णः' (पा.३।१।१४०) इति णप्रत्यय उपधावृद्धौ नालमिति ।

नाला – टापि रूपमन्यस्मिन् पुस्तकेऽपि दृश्यते ।[३१४]

नाली – नालशब्दादपचयविवक्षायां 'षिद्गौरादिभ्यश्च' (पा.४.१.४१) इति ङीषि रूपमन्यत्र पूर्ववत् ।

**३.३.८.५ पद्मकन्दस्य नामानिप्र. ५८३, (१।१०।४३) शिफाकन्द१/-शिफा२/कन्द१ ।**

शिफाकन्दः – शिफामूलतरुप्ररोहः, तत्सहितः कन्दो मूलम् ।

शिफा – शिफेति कन्दमिति च पृथक् नामनी । [३१५]

कन्दः – कनतीति विग्रहे 'कनी दीप्तिकान्तिगतिषु' (भ्वा.प.से.४९३) इति धातोः 'अब्दादयश्च' (उ.४।९९) इति दन्प्रत्यये कन्द इति ।

**३.३.८.६ मृणाल्या नामनी प्र.५८२, (१।१०।४२) मृणाल५/मृणाली२ ।**

---

[३१३]मेदिनीकरः, ***मेदिनीकोशः*** (३.३४), वारायासी : चौखम्बा संस्कृत सिरिज, वि.सं.२०३४, पृ.२४ ।

[३१४] दीक्षितः भानुजि,***अमरकोश :*** (सुधा/रामाश्रमी व्याख्या (१.१०.४२), वाराणसी : चौखम्बा सुरभारती प्रकाशन, सन् २०११, पृ.१०८ ।

[३१५]पूर्ववत् (१.१०.४३.) पृ.१०८ ।

मृणालम् – मृण्यत इति विग्रहे 'मृण हिंसायाम्' (तु.प.से.१४१८) इति धातोः 'तमिविशिविडिमृणिकुलिकपिपलिपञ्चिभ्यः कालन्' (उ.१।१०८) इति कालन्प्रत्यये मृणलमिति ।

मृणाली – मृणालशब्दादपचयविवक्षायां 'षिद्गौरादिभ्यश्च' (पा.४.१.४१) इति ङीषि मृणालमिति रूपं सिद्धम् ।

**३.३.८.७ शैवालस्य नामनीप्र.५७४, (१।१०।३८) शैवाल३/शेवाल३ ।**

शैवालम् – जले शेते =तिष्ठतीति विग्रहे "शीङ् स्वप्ने" (अ.आ.से.११०६) इति धातोः'शीङो धुक्लक्वलञ्वालनः' (उ.४.३८) इति वलञ्प्रत्यये शी वल, 'अचो ञ्णिति' (पा.७।२।११५) इति वृद्धौ शैवालं सिद्धम् ।

शेवालः – पूर्वोक्तसूत्रेणैव वालन्प्रत्यये गुणे शेवालं सिद्धम् ।

## ३.३.९ भूमिवर्गः

भूमिवर्गात्-दुर्मार्ग-पृथिवी-भूतल-मार्ग-सेतूनां नामानि –

**३.३.९.१ दुर्मार्गस्य नामनी प्र.६१६, (२।१।१६) कापथ१/कुपथ१ ।**

कापथः – कुत्सितः पथ इति विग्रहे 'कुगतिप्रादयः'(पा.२।२।१८) इति समासे 'ईषदर्थे' (पा.६.३.१५) इति कादेशे 'कापथः' इति ।

कुपथः – कुत्सितार्थकुशब्दस्य पथशब्देन समासे तु कुपथः सिद्धम् ।

**३.३.९.२ पृथिव्या नामनी प्र.५८६, (२।१।२) धरणि२/धरणी२ ।**

धरणिः – धरति विश्वमिति विग्रहे 'धृञ् धारणे' (भ्वा.उ.अ.९६६) इति धातोः 'अर्तिसृधृधम्यम्यश्यवितृभ्योऽनिः' (उ.२।१०२)इत्यनिप्रत्यये स्वादिकार्ये 'धरणिः' इति ।

धरणी – धरणिशब्दात् 'कृदिकारादक्तिनः' (ग.सू.४।१।४२)इति ङीषिधरणीति ।

**पृथिवी२/पृथवी२ -**

पृथिवी – प्रथत इति विग्रहे 'प्रथ प्रख्याने' (भ्वा.आ.८१४) इति धातोः 'प्रथेः षिवन् संप्रसारणं च' (उं१।१४८) इति षिवन्प्रत्यये संप्रसारणे षित्वात् 'षिद्गौरादिभ्यश्च' (पा.४।१।४१) इति ङीषिपृथिवीति ।

पृथवी – पूर्ववत् पक्षे षवन्प्रत्यये पृथवी [३१६] ।

**अवनि२/अवनी२ –**

[३१६] 'पृथिवी पृथवी पृथ्वी' इति शब्दार्णवः। पूर्ववत् पृ.१२० ।

अवनिः – अवतीति विग्रहे 'अव रक्षण-गति-कान्ति-प्रीति-तृप्त्यवगम-प्रवेश-श्रवण-स्वाम्यर्थ-याचन-क्रियेच्छा-दीप्त्यव्याप्त्यालिङ्गन-हिंसा-दान-भाग-वृद्धिषु' (भ्वा.प.से.६४०) इति धातोः 'अर्तिसृधृधम्यम्यश्य-वितृभ्योऽनिः' (उ.२।१०२)इत्यनिप्रत्ययेऽवनिः सिद्धम् ।

अवनी – अवनिशब्दात् 'कृदिकारादक्तिनः' (ग.सू.४।१।४२)इति ङीषि 'अवनी' इति ।

**महि२/मही२ –**

महिः – मह्यत इति विग्रहे 'मह पूजायाम्' (चु.उ.से.२०१०) इति धातोर्ण्यन्तात् 'अच इः' (उ.४।१३९) इति 'इ' प्रत्यये 'महिः' इति ।

मही – महिशब्दात् 'कृदिकारादक्तिनः' (ग.सू.४।१।४२)इति ङीषि महीति ।

**३.३.९.३ भूतलस्य नामनी प्र.५९५, (२।१।६) विष्टप३/पिष्टप३ ।**

विष्टपम् – विशन्त्यत्रेति विग्रहे 'विश प्रवेशने' (तु.प.अ.१२१८) इति धातोः 'विटपविष्टप-विशिपोलपाः' (उ.३।१४५) इति निपातनात् कपन्प्रत्यये षत्वे विष्टपमिति ।

पिष्टपम् – सूत्रे पादिपाठे तु पिष्यत इति विग्रहे 'पिष्लृ संचूर्णने' (रु.प.अ.१५४६) इति धातोः 'विटपपिष्टपविशिपोलपाः' (उ.३।१४५) इति निपातनात् कपन्प्रत्यये पिष्टपमिति ।

**३.३.९.४ मार्गस्य नामनी प्र.६१३, (२।१।१५) पदवी२/पदवि२ ।**

पदवी – पद्यतेऽनयेति विग्रहे "पद गतौ" (दि.आ.अ.१२४५) इति धातोः 'पद्यमटिभ्यामविः (सूत्रपाठे नास्ति) इत्यविप्रत्यये (भानुजी) 'कृदिकारादक्तिनः' (ग.सू.४।१।४२)इति ङीषि पदवीति सिद्धम् ।[३१७]

पदविः – 'कृदिकारादक्तिनः' (ग.सू.४।१।४२)इति ङीषभावपक्षे रूपम् ।

**सरणि२/शरणि२ –**

सरणिः – सरन्त्यनयेति विग्रहे 'सृ गतौ' (भ्वा.प.अ.११७४) इति धातोः 'अर्तिसृधृधम्यम्यश्यवितृभ्योऽनिः' (उ.२।१०२)इत्यनिप्रत्यये गुणे णत्वे स्वादिकार्ये 'सरणिः' इति ।

शरणिः – 'शॄ हिंसायाम्' (क्र्या.प.से.१५८६) इति धातोः बाहुलकादनिप्रत्यये शरणिः सिद्धम् ।

**वर्तनी२/वर्तनि१/वर्त्मनि१ –**

[३१७] पूर्ववत् पृ.११५।

वर्तनी – वर्तन्तेऽनयेति विग्रहे 'वृतु वर्तने' भ्वा.आ.से.८०७) इति धातोः 'वृतेश्च' (उ.२।१०६)इत्यनिप्रत्यये 'कृदिकारादक्तिनः' (ग.४।१।४२)इति ङीषि वर्तनीति ।

वर्त्मनिः –'वृतेश्च' (उ.२।१०६)इति सूत्रस्थचकारेण मुडिति पक्षे 'वर्त्मनिः' इति ।

वर्तनिः – 'कृदिकारादक्तिनः' (ग.सू.४।१।४२)इति ङीषभावपक्षे 'वर्तनिः' सिद्धम् ।

**३.३.९.५ सेतोर्नामनी प्र.६११, (२।१।१४) आलि२/आली ।**

आलिः – आ =समन्तादलत्यम्भः, इति विग्रहे 'अल भूषणपर्याप्तिवारणेषु' (भ्वा.प.से.५५३) इति धातोः 'सर्वधातुभ्य इन्' (उ.४.११८) इतीन्प्रत्यये सवर्णदीर्घे 'आलिः' इति ।

आली – आलिशब्दात् 'कृदिकारादक्तिनः' (ग.सू.४।१।४२)इति ङीषि 'आली' इति । 'पुल' इति भाषायाम् ।

## ३.३.१० पुरवर्गः

पुरवर्गात्-अलिन्द-आभीरपल्ली-ईश्वरगृहविशेष-एडूक-कपाट-गृह-निःश्रेणि-पानीयशाला-वलभी-विपणी-शाल-संकर-सूतिकागृहाणां नामानि –

**३.३.१०.१ अलिन्दस्य नामनी प्र.६४७, (२।२।१२) अलिन्द१/आलिन्द१ ।**

अलिन्दः– अल्यत इति विग्रहे 'अल भूषणपर्याप्तिवारणेषु' (भ्वा.प.से.५५३) इति धातोः 'कुणिपुल्योः किन्दच्' (उ.४.८६) इति बाहुलकात्किन्दच्प्रत्यये स्वादिकार्ये 'अलिन्दः' इति ।[३१८]

आलिन्दः – अलिन्द एवेति विग्रहे 'प्रज्ञादिभ्यश्च' (पा.५।४।३८) इत्यण्प्रत्यये रूपं सिद्धम् ।

**३.३.१०.२ आभीरपल्ल्या नामनी प्र.६६३, (२।२।२०) आभीरपल्ली२/आभीरपल्लि२ ।**

आभीरपल्ली – आभीराणां पल्लिरिति विग्रहे 'षष्ठी' (पा.२।२।८)इति षष्ठीतत्पुरुषसमासे 'कृदिकारादक्तिनः' (ग.सूं४।१।४२)इति ङीषि 'आभीरपल्ली' इति ।

आभीरपल्लिः – 'कृदिकारादक्तिनः' (ग.सूं४।१।४२)इति ङीषभावे 'आभीरपल्लिः' इति ।

**३.३.१०.३ ईश्वरगृहविशेषस्य नामनी प्र.६४४ (२।२।११)विच्छन्दक१/विच्छर्दक१ ।**

विच्छन्दकः – विशिष्टच्छन्दोऽत्रेति विग्रहे 'छदि संवरणे' (चु.उ.से.१६९४) इति धातोः 'ण्वुल्तृचौ' (पा.३।१।१३३) इति ण्वुल्प्रत्यये 'युवोरनाकौ' (पा.७।१।१) इत्यकादेशे विच्छन्दक इति ।

विच्छर्दकः – 'उच्छृदिर् दीप्तिवेदनयोः' (रु.उ.से.१५३९) इति धातोः 'ण्वुल्तृचौ' (पा.३।१।१३३) इति ण्वुल्प्रत्यये 'युवोरनाकौ' (पा.७।१।१) इत्यकादेश उपधागुणे विच्छर्दकः सिद्धम् ।

---

[३१८]। भानुजिदीक्षितः, ***अमरकोशः*** (सुधाटीका २.२.१२), वाराणसी : चौखम्बा विद्याभवन, सन्.२०११, पृ.१२० ।

**३.३.१०.४ एडूकस्य नामनी  प्र.६२९, (२।२।४) एडूक३/एडोक३ ।**

एडूकम् – 'ईड स्तुतौ' (अ.आ.से.१०८९) इति धातोः 'ऊलूकादयश्च' (उ.४।१८०) इति बाहुलकादूकप्रत्यये 'एडूकम्' इति ।

एडोकम् – 'भवेदेडोकमेडूकमेडुकं च' इति द्विरूपकोशः ।[319]

**३.३.१०.५ कपाटस्य नामनी  प्र.६५७, (२।२।१७) कपाट७/कवाट७ ।**

कपाटः – कम् = वातम्, पाटयतीति विग्रहे 'पट गतौ' (भ्वा.प.से.३०५) इति धातोः 'कर्मण्यण्' (पा.३।२।१)इत्यण्प्रत्यये 'उपपदमतिङ्' (पा.२।२।१९)इत्युपपदसमास उपधावृद्धौ 'कपाटः' इति ।

कवाटः – कम् = वातम्, वटतीति विग्रहे 'वट वेष्टने' (भ्वा.प.से.३०९) इति धातोः 'कर्मण्यण्' (पा.३।२।१)इत्यण्प्रत्यये 'उपपदमतिङ्' (पा.२।२।१९)इत्युपपदसमास उपधावृद्धौ 'कवाटः' इति ।

**३.३.१०.६ गृहस्य नामनी प्र.६२१, (२।२।५) पस्त्य३/वस्त्य३ ।**

पस्त्यम् – अप स्त्यायतीति विग्रहे 'स्त्यै ष्ट्यै शब्दसंघातयोः' (भ्वा.प.अ.९७६) इति धातोः 'आदेच उपदेशेऽशिति' (पा.६।१।४५) इत्यात्वे 'आतश्चोपसर्गे' (पा.३।१।१३६) इति कप्रत्यये 'पृषोदरादीनि यथोपदिष्टम्' (पा.६।३।१०९) इत्यलोपे पस्त्यमिति ।

वस्त्यम् – वसनमिति विग्रहे 'वस निवासे' (भ्वा.प.अ.१०७४) इति धातोः 'वसेस्तिः' ( उ.४।१८०) इति बाहुलकात्तिप्रत्यये वस्तौ साधुरिति विग्रहे 'तत्र साधुः' (पा.४।४।९८) इति यत्प्रत्यये वस्त्यमिति ।

**सदन३/सादन३ –**

सदनम् – सीदन्त्यत्रेति विग्रहे 'षद्लृ विशरणगत्यवसादनेषु' (भ्वा.प.अ.९१२) इति धातोः 'बहुलमन्यत्रापि'(उ.२।७८)इति युच्प्रत्ययेऽनादेशे सदनमिति ।

सादनम् – स्वार्थण्यन्ताद्युचि सादनमपि सिद्धम्, द्विरूपकोशः ।[320]

**अगार३/आगार३ –**

अगारम् –अगानृच्छतीति विग्रहे 'ऋ गतिप्राण्नयोः' (भ्वा.प.से.१००२) इति धातोः 'कर्मण्यण्'( पा.३।२।१)इत्यण्प्रत्यये 'उपपदमतिङ्' (पा.२।२।१९) इत्युपपसमास उपधावृद्धौ 'अगारम्' इति ।

---

[319] पूर्ववत्(२.२.४), पृ.११७ ।

[320] पूर्ववत् पृ.११८।

आगारम् – आ= समन्तात्, अग्यत इति विग्रह् 'अग कुटिलायां गतौ' (भ्वा.प.से.८४५) इति धातोः 'अकर्तरि च कारके संज्ञायाम्' (पा.३।३।१९) इति कर्मणि घञ्प्रत्यय उपधावृद्धौ सवर्णदीर्घे 'आगारम्' इति ।

**कुटी४/कुटि४ –**

कुटी – कुटतीति विग्रहे 'कुट कौटिल्ये' (तु.प.से.१४५४) 'इगुपधात्कित्' (उ.४।११२)इतीन्प्रत्यये कित्त्वे 'कृदिकारादक्तिनः' (ग.सू.४।१।४२)इति ङीषि कुटीति ।

कुटिः – 'कृदिकारादक्तिनः' (ग.सू.४।१।४२)इति ङीषभावे रूपम् ।

**३.३.१०.७ निश्रेण्या नामनी प्र.६५८, (२।२।१८) निश्रेणि२/निःश्रेणि२ ।**

निश्रेणिः – नियता श्रेणिरिति विग्रहे 'प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः' (वा.२।२।२४)इति समास उत्तरपदलोपे च 'निश्रेणिः' इति ।

निःश्रेणिः –निश्चिता श्रेणिरत्र सविसर्गपाठोऽपि ।

**३.३.१०.८ पानीयशालाया नामनी प्र.६३६,(२।२।७)पानीयशालिका/पानीयशाला ।**

पानीयशालिका – पानीयस्य शालेति विग्रहे 'षष्ठी' (पा.२।२।८)इति तत्पुरुषसमासे 'संज्ञायां कन्' (पा.५।३।७५) इति स्वार्थे कन्प्रत्यये टापि 'प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः' (पा.७।३।४४) इतीत्वे पानीयशालिकेति ।

पानीयशाला – 'संज्ञायां कन्' (पा.५।३।७५) इति स्वार्थे कन्नभावे पानीयशालेति ।

**३.३.१०.९ वलभ्या नामनी प्र.६५२, (२।२।१५) वलभी२/वलभि२ ।**

वलभी – वल्यते= आच्छाद्यत इति विग्रहे 'वल संवरणे संचरणे च' (भ्वा.प.से.१५२५) इति धातोः कृशॄशलिकलिगर्दिभ्योऽभच्' (उ.३।२२) इति बाहुलकादलभच्प्रत्यये 'षिद्गौरादिभ्यश्च' (पा.४।१।४१) इति ङीषि वलभीति ।

वलभिः – वल्यते= आच्छाद्यते, वल् + अभि वा ङीषभावः ।[३२१]

**३.३.१०.१० विपण्या नामनी प्र.६२६, (२।२।२) विपणि२/विपणी२ ।**

विपणिः – विपण्यन्तेऽत्रेति विग्रहे 'पण व्यवहारे स्तुतौ च' (भ्वा.आ.से.४६९) इति धातोः 'इक्कृष्यादिभ्यः' (वा.३।३।१०८) इतीक्प्रत्यये 'विपणिः' इति ।

विपणी – पूर्ववत् विपणिशब्दात् 'कृदिकारादक्तिनः' (ग.४।१।४२)इति ङीषि विपणीति ।

---

[३२१] आप्टे वामनः शिवरामः, ***संस्कृत हिन्दी कोश,*** वाराणसी : भारतीय विद्याप्रकाशन, ई.२००१, पृ.९०५ ।

**पण्यवीथिका२/पण्यवीथी२ –**

पण्यवीथिका – पण्यानां विथीति विग्रहे षष्ठीतत्पुरुषसमासे 'संज्ञायां कन्' (पा.५।३।८७) इति कन्प्रत्यये 'केऽणः' (पा.७।४।१३) इति ह्रस्वे पण्यवीथिकेति ।

पण्यवीथी – पूर्ववत् कनभावे रूपम् ।

**३.३.१०.११ शालस्य नामनी प्र.६२८, (२।२।३) साल१/शाल१ ।**

सालः – सल्यत इति विग्रहे 'षल गतौ' भ्वा.प.से.५८७) इति धातोः 'अकर्तरि च कारके संज्ञायाम्' (पा.३।३।१९) इति घञ्प्रत्यये उपधावृद्धौ 'सालः' इति ।

शालः – 'शल गतौ' (भ्वा.प.से.९०१) इति धातोः पूर्ववत् सिद्धम् ।

**३.३.१०.१२ संकरस्य नामनी प्र.६५९, (२।२।१८) संकर१/संकार१ ।**

संकरः – संकीर्यत इति विग्रहे 'कॄविक्षेपे' (तु.प.से.१५०३) इति धातोः 'ॠदोरप्' (पा.३।३।५७) इत्यप्प्रत्यये गुणे संकरः सिद्धम् ।

संकारः – संकीर्यत इति विग्रहे 'कॄ विक्षेपे' (तु.प.से.१५०३) इति धातोः कर्मणि 'अकर्तरि च कारके संज्ञायाम्' (पा.क३।३।१९) इति घञ्प्रत्यये वृद्धौ 'संकारः' इति ।

**३.३.१०.१३ सूतिकागृहस्य नामनी प्र.६३८, (२।२।८) सूतिकागृह३/सूतकागृह३ ।**

सूतिकागृहम् –सूतिकायाः गृहमिति विग्रहे 'षष्ठी' (पा.२।२।८)इति तत्पुरुषसमासे सूतिकागृहमिति सिद्धम् ।

सूतकागृहम् – पूर्ववत् समासे 'सूतकापुत्रिकावृन्दारकाणां वेति वक्तप्यम्' (वा.७३।४५) इत्यत्वविधानात् सिद्धम् ।

## ३.३.११. शैलवर्गः

शैलवर्गात्-अतट-चक्रवाल-पर्वतविशेष-शिलानां नामानि –

**३.३.११.१ अतटस्य नामनी प्र.६७१, (२।३।४) अतट१/तट१ ।**

अतटः – न तटमत्रेति विग्रहे 'नञ्' (पा.२।२।६)इति समासे 'नलोपो नञः' (पा.६।३।७४) इति नलोपे 'अतटः' इति ।

तटः – 'प्रपातस्तु तटो भृगुः' इति पाठे –प्रपत्यते तटात् स भृगुः ।[३२२]

**३.३.११.२ चक्रवालस्य नामनी प्र.६६६, (२।३।२) चकवाल१/चक्रवाड१ ।**

[३२२] दीक्षितः भानुजि, ***अमरकोशः*** (सुधाटीका २.३.४), वाराणसी : चौखम्बा विद्याभवन, सन्.२०११, पृ.१२५ ।

चक्रवालः – चक्रम् = भूमण्डलम्, वलत इति विग्रहे 'वल संवरणे सञ्चरणे च '(भ्वा.आ.से.५२६) इति धातोः 'कर्मण्यण्' (पा.३।२।१)इत्यण्प्रत्यये 'उपपदमतिङ्' (पा.२।२।१९)इत्युपपदसमास उपधावृद्धौ चक्रवालः सिद्धम् ।

चक्रवाडः – चक्राकारेण वाडत इति विग्रहे 'वाडृ आप्लाव्ये' (भ्वा.आ.से.२९४) इति धातोः'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इत्यच्प्रत्यये चक्रवाडः ।

**३.३.११.३ .पर्वतविशेषस्य नामनी प्र.६६८, (२।३।३) पारियात्रक१/पारियात्रिक१ ।**

पारियात्रकः – परितो यात्रया दृश्यत इति विग्रहे'शेषे' (पा.४।२।९२)इत्यण्प्रत्यय आदिवृद्धौ पारियात्रेति जाते 'संज्ञायां कन्' (पा.५।३।७५) इति स्वार्थे कन्प्रत्यये पारियात्रकः सिद्धम् ।

पारियात्रिकः – पारियात्र+ठक् = पारियात्रिकः ।[३२३]

**३.३.११.४ शिलाया नामनी प्र.६७०, (२।३।४) शिला२/शिली२ ।**

शिला – शिलतीति विग्रहे 'शिल उञ्छे' (तु.प.से.१४५०) इति धातोः 'इगुपधज्ञाप्रीकिरः कः' (पा.३।१।१३५) इति कप्रत्यये टापिशिलेति ।

शिली – शिलतीति विग्रहे 'शिल उञ्छे' (तु.प.से.१४०५) इति धातोः 'सर्वधातुभ्य इन्' (उ.४।११७) इतीन्प्रत्यये 'कृदिकारादक्तिनः' (ग.सू.४।१।४२) इति ङीषि शिलीति ।

## ३.३.१२.वनौषधिवर्गः

वनौषधिवर्गात्-अक्षोट-अङ्कोट-असन-आम्रातक-आवली-उरुवूक-ओषधि-कपित्थ-कर्कन्धू-किसलय-कुम्भोलूखल-केसर -घण्टा-चिरिविल्ल-जम्वीर-तितिण्डी-तिन्दूक-नेमी-पट्टी -पर्कटी-पूतिकरज-बालतनय-मञ्जरी-मज्जन्-मधूक-मोघा-राजवृक्ष-लता-विकङ्कत-वृक्ष-व्याकोश-राजादन-रेखा-शस्य-शारद-शावर-शेलु-शोणाक-शोभाञ्जन-सक्तुफला-साल-सुसमानां नामानि –

**३.३.१२.१ अक्षोटस्य नामानिप्र.७३७, (२.४.२९) अक्षोट१/आक्षोट१/आक्षोड१ ।**

अक्षोटः – अक्ष्णातीति विग्रहे 'अक्षू व्याप्तौ संघाते च' (भ्वा.प.से.६९८) इति धातोः बाहुलकात् 'ओट' प्रत्यये 'अक्षोटः' इति ।

आक्षोटः – आ = समन्तादक्ष्णातीति विग्रहेपूर्ववद्बाहुलकात् सिद्धम् ।

---

[३२३] आप्टे वामनः शिवरामः, ***संस्कृत हिन्दी कोश,*** वाराणसी : भारतीय विद्याप्रकाशन, ई.२००१, पृ.६०८ ।

आक्षोडः – टकारस्य स्थाने डकारः पूर्ववत् । अन्तिमे द्वे रूपे रामाश्रम्यां न स्तः, आप्टे तु स्वीकरोति ।[३२४]

**कन्दराल१/कर्पराल१ –**

कन्दरालः – कन्दरमलतीति विग्रहे 'अल भूषणपर्याप्तिवारणेषु' (भ्वा.प.से.५५३) इति धातोः 'कर्मण्यण्' (पा.३।२।१) इत्यण्प्रत्यये 'कन्दरालः' इति । 'ओखर' इति भाषायां ख्यातस्य नाम ।

कर्परालः – कर्परमलतीति विग्रहे 'अल भूषणपर्याप्तिवारणेषु' (भ्वा.प.से.५५३) इति धातोः 'कर्मण्यण्' (पा.३।२।१)इत्यण्प्रत्यये 'कर्परालः' इति ।

**३.३.१२.२ अङ्कोटस्य नामनी प्र.७३७, (२।४।२९) अङ्कोट१/अङ्कोल१ ।**

अङ्कोटः – अङ्क्यत इति विग्रहे 'अकि लक्षणे' (भ्वा.प.से.९०) इति धातोः बाहुलकादोटप्रत्यये 'अङ्कोटः' इति ।

अङ्कोलः – पूर्ववत् बाहुलकादोलप्रत्यये सिद्धम् ।

**३.३.१२.३ असनस्य नामनी प्र.७६७, (२।४।४४) असन१/आसन१ ।**

असनः – अस्यति रुजमिति विग्रहे 'असु क्षेपणे' (दि.प.से.१२८६) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इति ल्युप्रत्यये 'युवोरनाकौ' (पा.७।१।१) इत्यनादेशे 'असनः' इति ।

आसनः – असन एवेति विग्रहे 'प्रज्ञादिभ्यश्च' (पा.५।४।३८) इति स्वार्थेऽणि रूपम् । 'विजयसाल' इति भाषायाम् ।

**३.३.१२.४ आम्रातकस्य नामनी प्र.७३४, (२।४।२७) आम्रातक१/अम्रातक१ ।**

आम्रातकः – आम्रमततीति विग्रहे 'अत सातत्यगमने' (भ्वा.प.से.३८) इति धातोः 'कृञादिभ्यो वुन्' (उ.५।३५) इति वुन्प्रत्ययेऽकादेशे 'आम्रातकः' इति । अमारो इति भाषायाम् ।

अम्रातकः – अम्लत्वमकतीति विग्रहे 'अक कुटिलायां गातौ' (भ्वा.प.से.८८४) इति धातोः 'कृञादिभ्यो वुन्' (उ.५।३५) इति वुन्प्रत्ययेऽकादेशे रलयोरैक्यमम्रातकमिति ।

**३.३.१२.५ आवल्या नामनी प्र. ६८७, (२।४।४) आवलि२/आवली२ ।**

आवलिः – आ = समन्तात्, वलतीति विग्रहे 'वल भूषणे' (भ्वा.प.से.५२५) इति धातोः 'सर्वधातुभ्य इन्' (उ.४।११७) इतीन्प्रत्यये 'आवलिः' सिद्धम् ।

आवली – आवलिशब्दात् 'कृदिकारादक्तिनः' (ग.सू.४।१।४२)इति ङीषि 'आवली' इति ।

---

[३२४] पूर्ववत् पृ.१३८ ।

**३.३.१२.६ उरुवूकस्य नामानि प्र.७८१, (२।४।४९) उरुवूक१/रुवूक१/उरुवुक१/-रुवुक१ ।**

उरुवूकः – उरुं महान्तं वायुं वायतीति विग्रहे 'ओवै शोषणे' (भ्वा.प.अ.९८७) इति धातोः 'उलूकादयश्च' (उ.४।४१) इत्यूकप्रत्यये वुकागमे 'उरुवूकः' इति । एरण्डस्य नाम ।

रुवूकः – रुं वायतीति विग्रहे पूर्ववत् ।

उरुवुकः – इति रभसः,पूर्ववत् ।[३२५]

रुवुकः – इति कुलचन्द्रः, पूर्ववत् ।[३२६]

**३.३.१२.७ ओषधेर्नामनी प्र.६९२, (२।४।६) ओषधी२/ओषधि२ ।**

ओषधी – ओषः = दीप्तिर्धीयतेऽत्रेति विग्रहे 'डुधाञ् धारणपोषणयोः' (जु.उ.अ.११६७) इति धातोः 'कर्मण्यधिकरणे च' (पा.३।३।९३) इति किप्रत्यये ओष धा इ, 'आतो लोप इटि च' (पा.६।४।६४) इत्याकारलोपे स्त्रीत्वविवक्षायां 'कृदिकारादक्तिनः' (ग.सू.४।१।४२)इति ङीषि 'ओषधी' सिद्धम् ।

ओषधिः – 'कृदिकारादक्तिनः' (ग.सू.४।१।४२)इति ङीषभावे 'ओषधिः' इति ।

**३.३.१२.८ कपित्थस्य नामनी प्र.७२१, (२।४।२१) कपित्थ१/कबित्थ१ ।**

कपित्थः – कपयस्तिष्ठन्त्यत्रेति विग्रहे 'पृषोदरादीनि यथोपदिष्टम्' (पा.६।३।१०९) इति सूत्रेण सिद्धम् ।

कबित्थः – अमरमालायां पवर्गतृतीयमध्योऽपि 'पृषोदरादीनि यथोपदिष्टम्' (पा.६।३।१०९) इति सूत्रेण साधु ।[३२७]

**३.३.१२.९ कर्कन्ध्वानामानिप्र.७५२, (२।४।३६) कर्कन्धू५/कर्कन्धु२ ।**

कर्कन्धूः – कर्कं कण्टकं दधातीति विग्रहे 'डुधाञ् धारणपोषणयोः' (जु.उ.अ.११६७) इति धातोः 'अन्दूदृन्भूजम्बूकफेलूकर्कन्धूदिधिषु' (उ.१।९३) इति निपातनादूप्रत्यये 'कर्कन्धूः' इति ।

कर्कन्धुः – बाहुलकाद् ह्रस्वमपि ।[३२८]

---

[३२५] दीक्षितः भानुजि, ***अमरकोशः*** (सुधाटीका २.४.५१), वाराणसी : चौखम्बा विद्याभवन, सन्.२०११, पृ.८८ ।

[३२६] गौतमः कुलचन्द्र, ***अमरकोश (स्वयंबोधिनी टीका)*** (२.४.४९) नेपाल : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६, पृ.८८ ।

[३२७]पूर्ववत् पृ.८४ ।

[३२८] दीक्षितः भट्टोजि, ***वैयाकरणसिद्धान्तकौमुदी,*** (जेबी गुटका, सम्पा.गोपालशास्त्री नेने) (उ.१।९३) वाराणसी : चौखम्वा अमरभारती प्रकाशन, पंचम संस्करण वि.सं.२०३४, पृ.५९३ ।

**कोली२/कोलि२ –**

कोली – कोलति घनीभवतीति विग्रहे 'कुल संस्त्याने' (भ्वा.प.से.९००) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इत्यच्प्रत्यये गुणे 'षिद्गौरादिभ्यश्च' (पा.४।१।४१) इति ङीषि 'कोली' सिद्धम् ।

कोलिः – कोलति घनीभवतीति विग्रहे 'कुल संस्त्याने' (भ्वा.प.से.९००) इति धातोः 'सर्वधातुभ्य इन्' (पा.४।११८) इतीन्प्रत्यये गुणे 'कोलिः' इति । बयर इति भाषायाम् ।

**३.३.१२.१० किसलयस्य नामनी प्र.७०८, (२।४।१४) किसलय५/किशलय५ ।**

किसलयः – किञ्चित् सलतीति विग्रहे 'षल गतौ' (भ्वा.प.से.५५७) इति धातोः बाहुलकात् कयन्प्रत्यये 'पृषोदरादीनि यथोपदिष्टम्' (पा.६।३।१०९) इति मकारलोपे 'किसलयः' इति ।

किशलयः – किञ्चित् शलतीति विग्रहे 'शल गतौ' (भ्वा.प.से.९०१) इति धातोः बाहुलकात् कयन्प्रत्यये 'पृषोदरादीनि यथोपदिष्टम्' (पा.६।३।१०९) इति मकारलोपे 'किशलयः' इति ।

**३.३.१२.११ कुम्भोलूखलकस्य नामानि प्र.७४७, (२।४।३४) कुम्भोलूखलक३/कुम्भोलू२/-उलूखलक३/खलक३ ।**

कुम्भोलूखलकम् – कमुम्भतीति विग्रहे 'उम्भ पूरणे' (तु.प.से.१४०६) इति धातोः 'कर्मण्यण्' (पा.३।२।१)इत्यण्प्रत्यये क+उम्भ इति जाते 'शकन्ध्वादिषु पररूपं वाच्यम्' (वा.६।१।९४) इति पररूपे कुम्भम् । ऊर्ध्वं खमिति विग्रहे 'पृषोदरादीनि यथोपदिष्टम्' (पा.६।३।१०९) इति सूत्रेण 'ऊलूखम्' सिद्धम् । ऊलूखं लातीति विग्रहे 'ला दाने' (अ.प.अ.) इति धातोः 'आतोऽनुपसर्गे कः' (पा.३।२।३) इति कप्रत्यय ऊलूखलम् । कुम्भोलूखलशब्दात् 'संज्ञायां कन्' (पा.५।३।७५) इति स्वार्थे कन्प्रत्यये कुम्भोलूखलमिति सिद्धम् ।

कुम्भोलूः – 'कुम्भोलूखलकं कुम्भं कुम्भोलुः खलकं वरम्' वाचस्पतिः इति । [३२९]

खलकम् – पूर्ववत् सिद्धम् ।

उलूखलकम् – 'क्लीबमुक्तमुलूखलम्' रुद्रः ।[३३०]

**३.३.१२.१२ केसरस्य नामनी प्र.७३०, (२।४।२५) केसर१/केशर१ ।**

केसरः –के = जले सरतीति विग्रहे 'सृ गतौ' (भ्वा.प.से.१००१) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इत्यच्प्रत्यये 'हलदन्तात्सप्तम्याः संज्ञायाम्' (

---

[३२९] दीक्षितः भानुजि,***अमरकोशः*** (सुधाटीका २.४.३४), वाराणसी : चौखम्बा विद्याभवन, सन्.२०११, पृ.८६ ।

[३३०]पूर्ववत् पृ.८६ ।

पा.६।३।१) इति विभक्त्यलुकि केसरः,ततः प्रशस्ताः केसरा अस्येति विग्रहे 'अर्श आदिभ्योऽच्' (पा.५।२।१२७)इत्यच्प्रत्यये केसरः सिद्धम् ।

केशरः – के शीर्यत इति विग्रहे 'शॄ हिंसायाम्' (क्रया.प.से.१५८६) इति धातोः 'ऋदोरप्' (पा.३।३।५७) इत्यप्प्रत्यये गुणे केशरः, ततः प्रशस्ताः केशरा अस्येति विग्रहे 'अर्श आदिभ्योऽच्' (पा.५।२।१२७)इत्यच्प्रत्यये केशरः सिद्धम् । 'चिलाउने' इति नेपाल्याम् ।

**३.३.१२.१३ घण्टायानामानि प्र.७५८, (२।४।३९) घण्टा२/पाटलि१/-घण्टापाटलि१ ।**

.घण्टा – अहन्नीति विग्रहे 'हन हिंसागत्योः' (अ.प.अ.१०८२) इति धातोः बाहुलकात्तप्रत्यये घत्वे च टापि 'घण्टा' इति ।

पाटलिः – पटनमिति विग्रहे 'पट गतौ' (भ्वा.प.से.३०५) इति धातोः 'भावे' (पा.३।३।१८) इति घञ्प्रत्यय उपधावृद्धौ पाटः, ततः पाटं लातीति विग्रहे बाहुलकाड्डिप्रत्यये 'पाटलिः' सिद्धम् ।

घण्टापाटलिः – घण्टा चासौ पाटलिश्चेति विग्रहे 'विशेषणं विशेष्येण बहुलम्' (पा.२।१।५७)इति कर्मधारयसमासे 'घण्टापाटलिः' इति ।

**३.३.१२.१४ चिरिबिल्वस्य नामानि प्र.७७४, (२।४।४७) चिरिबिल्व१/चिरबिल्ल१ ।**

चिरिबिल्वः – चिरिं बिलतीति विग्रहे 'बिल भेदने' (तु.प.से.१४४७) इति धातोाः बाहुलकाद् वप्रत्यये 'चिरिबिल्वः' इति ।

चिरबिल्लः – चिरं बिलं लातीति इति विग्रहे 'ला आदाने दाने च' (अ.प.अ.११३४) इति धातोः 'आतोऽनुपसर्गे कः' (पा.३।२।३) इति कप्रत्यये निपातनादकारलोपे 'चिरबिल्लः' इति (आप्टेः)।

चिरिविल्वः– चिरिं विलतीति विग्रहे 'विल संवरणे' (तु.प.से.१४४६) इति धातोाः बाहुलकाद् वप्रत्यये 'चिरिविल्वः' इति ।

चिरविल्लः – चिरं विलं लातीति विग्रहे 'ला आदाने दाने च' (अ.प.अ.११३४) इति धातोः 'आतोऽनुपसर्गे कः' (पा.३।२।३) इति कप्रत्यये निपातनादकारलोपे 'चिरविल्लः' इति । 'करञ्जः' इति भाषायाम् । उपपदशब्दभेदन, धातुभेदेन, प्रत्ययभेदेन चानेकरूपाणि भवन्ति तथापि कुलचन्द्रो रूपद्वयं ददाति ।

**नक्तमाल१/रक्तमाल१ –**

नक्तमालः – नक्तमामलतीति विग्रहे 'अल भूषणपर्याप्तिवारणेषु' (भ्वा.प.से.५५३) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इत्यच्प्रत्यये 'नक्तमालः' इति ।

रक्तमालः – रक्तमामलतीति विग्रहे 'अल भूषणादौ' (भ्वा.प.से.५५३) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इत्यच्प्रत्यये 'नक्तमालः' इति ।

**३.३.१२.१५ जम्बीरस्य नामनी प्र.७२८, (२।४।२४) जम्बीर१/जम्बिर१ ।**

जम्बीरः – जम्यत इति विग्रहे 'जमु अदने' (भ्वा.प.से.५०४) इति धातोः 'कशपकटिपटिशौटिभ्य ईरन्' (उ.४.३२) इति सूत्रेण 'गभीरगम्भीरौ' (उ.४।३५) इतिवद् बाहुलकादीरन्प्रत्यये बागमे 'जम्बीरः' इति साधुः ।[३३१]

जम्बिरः – ह्रस्वरूपमपि बाहुलकात् पूर्वोक्तसूत्रेणैव सिद्धम् ।

**जम्भल१/जम्भर१ –**

जम्भलः – जम्भयत्यम्लत्वादिति विग्रहे 'जभी गात्रविनामे' (भ्वा.आ.से.४१५) इति धातोः वृषादित्वात् 'वृषादिभ्यश्च' (उ.१।१०६) इति कलच्प्रत्यये 'रधिजभोरचि' (पा.७।१।६१) इति नुमागमे 'जम्भलः' इति रूपं सिद्धम् ।

जम्भरः – रलयोरैक्यात् 'जम्भरः' इत्यपि । 'ज्यामिर' इति भाषायाम् ।

**३.३.१२.१६ तिन्तिड्या नामनी प्र.७६६, (२।४।४३) तिन्तिडी२/तिन्तिली२ ।**

तिन्तिडी – तिम्यतीति विग्रहे 'तिम आर्द्रीभावे' (दि.प.से.११९८) 'अलीकादयश्च' (उ.४।२५)इति निपातिते 'तिन्तिडी' इति ।

तिन्तिली – डलयोरैक्यात् 'तिन्तिली' इति सिद्धम् ।'अमिली' इति भाषायाम् ।

**अम्लिका२/आम्लीका२/आम्लिका२ –**

अम्लिका – अमयति रुजत्यरुचिमिति विग्रहे 'अम रोगे' (चु.प.से.१६५५) इति धातोः 'मूशक्यबिभ्यः क्लः' (उ.४।१०८) इति बाहुलकात्क्लप्रत्यये 'अम्लः' इति। अम्लो रसोऽस्यास्तीति विग्रहे 'अत इनिठनौ' (पा.५।२।११५)इति ठन्प्रत्यये टापि स्वादिकार्ये 'अम्लिका' सिद्धम् ।

आम्लीका –'अलीकादयश्च' (उ.४।२५)इति निपातितः ।

आम्लिका – पूर्ववत् बाहुलकात् ।

अम्ब्लिका – अम्ब्यते शब्द्यते भोक्तृभिरिति विग्रहे 'अबि शब्दे' (भ्वा.प.से.४०३) इति धातोः 'मूशक्यबिभ्यः क्लः' (उ.४।१०८) इति क्लप्रत्यये 'अम्ब्लः' इति। अम्ब्लो रसोऽस्यास्तीति विग्रहे 'अत इनिठनौ' (पा.५।२।११५)इति ठन्प्रत्यये टापि 'अम्ब्लिका' सिद्धम्

---

[३३१] पूर्ववत् पृ. १३६ ।

अम्ब्लीका –'अलीकादयश्च' (उ.४।२५)इति निपातितः ।

आम्ब्लीका – पूर्ववत् बाहुलकात् [३३२] । कुलचन्द्रस्त्वन्तिमानि त्रीणि रूपाणि नैव ददाति ।

**३.३.१२.१७ तिन्दुकस्य नामनी प्र.७५६, (२।४।३८) तिन्दुक१/तिन्दुकिन्१ ।**

तिन्दुकः – तिम्यतीति विग्रहे 'तिम आर्द्रीभावे' (दि.प.से.११९८) इति धातोः 'मृगय्वादयश्च' (उ.१।३७) इति बाहुलकाद्दुप्रत्यये तिन्दु, 'संज्ञायां कन्' (पा.५।३।७५) इति स्वार्थे कन्प्रत्यये 'तिन्दुकः' इति ।

तिन्दुकी – तिन्दुकोऽस्यास्तीति विग्रहे 'अत इनिठनौ' (पा.५।२।११५) इतीन्प्रत्यये स्वादिकार्ये 'तिन्दुकी' इति सिद्धम् ।

**३.३.१२.१८ नेम्या नामनी प्र.७३२, (२।४।२६) नेमि१/नेमी१ ।**

नेमिः – नयतीति विग्रहे 'णीञ् प्रापणे' (भ्वा.उ.अ.९६७) इति धातोः 'नियो मि' (उ.४।४३) इति मिप्रत्यये 'नेमिः' इति । 'साधन' इति भाषायाम् ।

नेमी – 'पुलिङ्गस्तिनिशे नेमिश्चक्रप्रान्ते स्त्रियामपि' इति रुद्रः । [३३३]अत्र मूले तु 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' (पा.६।३।१११) इति दीर्घस्तस्मादत्र दीर्घं रूपं नोपयुक्तम् ।

**३.३.१२.१९ पट्ट्यानामनी प्र.७६१, (२।४।४१) पट्टिन्१/पट्टी२ ।**

पट्टी – पट्टोऽस्यास्तीति विग्रहे 'अत इनिठनौ' (पा.५।२।११५)इतीनिप्रत्यये 'पट्टी' इति ।

पट्टी – 'पट गतौ' (भ्वा.प.से.) इति धातोः 'क्तिच्क्तौ च संज्ञायाम्' (पा.३।३।१७४) इति क्तिच्प्रत्यये श्चुत्वे 'कृदिकारादक्तिनः' (ग.सू.४।१।४२) इति ङीषि 'पट्टी' इति ।

**३.३.१२.२० पर्कट्या नामनी प्र.७४४, (२।४।३२) जटिन्१/जटी२ ।**

जटी – जटा अस्य सन्तीति विग्रहे 'अत इनिठनौ' (पा.५।२।१५)इतीन्प्रत्यये जटीति ।

जटिः – जटतीति विग्रहे 'जट संघाते' (भ्वा.प.से.३१४) इति धातोः 'सर्वधातुभ्य इन्' (उ.४।११८) इतीन्प्रत्यये 'जटिः' इति ।

जटी – जटिशब्दात् 'कृदिकारादक्तिनः' (ग.सू.४।१।४२)इति वा ङीषि जटीति । कुलचन्द्रस्तु द्वितीयं रूपं 'जटिः' इति नैव ददाति ।

**पर्कटि२/पर्कटी२ –**

---

[३३२]'अम्ब्लीका चाम्ब्लिका चिञ्चा तिन्तिडीका च तिन्तिला' इति चन्द्रः । पूर्ववत् पृ १४३ ।

[३३३] पूर्ववत् पृ १३७ ।

पर्कटिः – पृच्यत इति विग्रहे 'पृच संपर्के' (रु.प.से.१५५६) इति धातोः बाहुलकात् कटिप्रत्यये 'पर्कटिः' इति ।

पर्कटी – पृच्यत इति विग्रहे 'पृच संपर्के' (रु.प.से.१५५६) इति धातोः बाहुलकात् कटप्रत्यये 'षिद्गौरादिभ्यश्च' (पा.४।१।४१) इति ङीषि पर्कटीति । [३३४] 'पाखरी' इति भाषायाम् ।

**३.३.१२.२१ पूतीकरजस्य नामानिप्र.७७५, (२।४।४८) पूतिक१/पूतीक१/-पूतीकरञ्ज१/पूतीकरज१ ।**

पूतिकः – पूतिं कायतीति विग्रहे 'कै शब्दे' (भ्वा.प.से.९८२) इति धातोः 'आतोऽनुपसर्गे कः' (पा.३।२।३) इति कप्रत्यये 'पूतिकः' इति ।

पूतीकः – पुनातीति विग्रहे 'पूञ् पवने' (क्र्या.उ.से.१५८०) इति धातोः 'तिन्तिडीकादयश्च' (उ.४।२०)इतीकन्प्रत्यये तुगागमे च 'पूतीकः' इति ।

पूतीकरञ्जः – पूतीकं रजतीति विग्रहे 'रञ्ज रागे' (दि.उ.अ.१२४३) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इत्यच्प्रत्यये 'पूतीकरञ्जः' इति ।

पूतीकरजः[३३५] पूतीकरे जायत इति विग्रहे 'जनी प्रादुभावे' (दि.आ.से.१२२४) इति धातोः'सप्तम्यां जनेर्डः' (पा.३।२।९७) इति डप्रत्यये टिलोपे 'पूतीकरजः' इति सिद्धम् । 'लेकपाङ्ग्रो' इति भाषायाम् ।

**कलिमारक१/कलिकारक१ –**

कलिमारकः – कलिं मारयतीति विग्रहे 'मृङ् प्राणत्यागे' (तु.आ.अ.१४९७) इति धातोः ण्यन्तात् 'कर्मण्यण्' (पा.३।२।१)इत्यण्प्रत्यये वृद्धौ 'संज्ञायां कन्' (पा.५।३।७५) इति कप्रत्यये 'कलिमारकः' इति ।

कलिकारकः – कलिं कारयतीति विग्रहे 'डुकृञ् करणे' (त.उ.अ.१५६६) इति धातोः ण्यन्तात् 'कर्मण्यण्' (पा.३।२।१)इत्यण्प्रत्यये वृद्धौ 'संज्ञायां कन्' (पा.५।३।७५) इति कप्रत्यये 'कलिमारकः' इति ।

**३.३.१२.२२ बालतनयस्यनामनी प्र.७७८, (२।४।४९) बालतनय१/बालपत्र१ ।**

बालतनयः – बालास्तनया अस्येति विग्रहे 'अनेकमन्यपदार्थे' (पा.२।२।२४)इति बहुव्रीहिसमासे 'बालतनयः' इति ।

---

[३३४] पूर्ववत् पृ १३९।

[३३५] गौतमः कुलचन्द्रः **अमरकोश** (स्वयंबोधिनी टीका), काठमाण्डौ : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६, पृ.८८ ।

बालपत्रः – बालानि पत्राण्यस्येति विग्रहे 'अनेकमन्यपदार्थे' (पा.२।२।२४) इति बहुव्रीहिसमासे 'बालतनयः' इति रूपं सिद्धम् । खदिरस्य नाम ।

**३.३.१२.२३ मञ्जर्या नामानि प्र.७०६, (२।४।१३) वल्लरि२/वल्लरी२ ।**

वल्लरिः – वल्लत इति विग्रहे 'वल्ल संवरणे संचरणे च' (भ्वा.आ.से.५२६) इति धातोः 'अन्येभ्योऽपि दृश्यते' (पा.३।२।१७८)इति क्विपप्रत्यये सर्वापहारलोपे वल् , ऋच्छतीति विग्रहे 'ऋ गतौ' (भ्वा.प.अ.) इति धातोः 'अच इः' (उ.४।१३९) इतीप्रत्यये गुण अरिः, वल्चासावरिश्चेति विग्रहे 'विशेषणं विशेष्येण बहुलम्' (पा.१।२।५७) इति कर्मधारयसमासे 'वल्लरिः' इति ।

वल्लरी – 'कृदिकारादक्तिनः' (ग.सू.४।१।४२)इति वा ङीषि वल्लरीति ।

**मञ्जरि२/मञ्जरी२ –**

मञ्जरिः – मञ्जुत्वमृच्छतीति विग्रहे 'ऋ गतिप्राणनयोः' (भ्वा.प.से.१००२) इति धातोः 'अच इः' (उ.४।१३९) इतीप्रत्यये गुण अरिः, मञ्जु+ अरिरिति स्थिते 'शकन्ध्वादिषु पररूपं वाच्यम्' (वा.६।१।९४) इति पररूपे 'मञ्जरिः' इति ।

मञ्जरी – मञ्जरिशब्दात् 'कृदिकारादक्तिनः' (ग.सू.४।१।४२)इति वा ङीषि मञ्जरीति ।

**३.३.१२.२४ मज्जनो नामनी प्र.७०४ (२।४।१२) मज्जन्१/मज्जी२ ।**

मज्जा – मज्जतीति विग्रहे 'टुमस्जो शुद्धौ' (तु.प.अ.१५०९) इति धातोः 'श्वन्नुक्षन्पूषन्-प्लीहन्क्लेदन्स्नेहन्मूर्धन्मज्जन्नर्यमन्विश्वप्सन्सिरज्मन्मातरिश्वन्मघवन्निति' (उ.१।१५७) इति निपातनात् कनिन्प्रत्यये 'मज्जा' इति ।

मज्जी – अयं शब्दः कुत्रापि न प्राप्यते ।[३३६]

**३.३.१२.२५ मधूकस्य नामनी प्र.७३४, (२।४।२७) मधूक१/मधूलक१ ।**

मधूकः – मह्यत इति विग्रहे 'मह पूजायाम्' (भ्वा.प.से.७७६) इति धातोः 'उलूकादयश्च' (उ.४।४१) इत्यूकप्रत्यये हकारस्य धकारे साधुः ।

मधूलकः – मधु लातीति विग्रहे 'ला दाने' (अ.प.अ.११३४) इति धातोः 'आतोऽनुपसर्गे कः' (पा.३।२।३) इति कप्रत्यये 'अन्येषामपि दृश्यते' (६।३।१३७) इति दीर्घे 'संज्ञायां कन्' (५।३।७५) इति स्वार्थे कन्प्रत्यये साधुः । 'महुवा' इति भाषयाम् ।

---

[३३६] पूर्ववत् पृ.८३ ।

**३.३.१२.२६ मोघाया नामनी प्र.७८८, (२।४।५४) मोघा२/अमोघा२ ।**

मोघा – मोहयतीति विग्रहे 'मुह वैचित्ये' (दि.प.से.१२७५) इति धातोः ण्यन्तात् 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इत्यच्प्रत्यये 'न्यङ्क्वादीनां च' (पा.७।३।५३) इति कुत्वे हकारस्य घकार उपधागुणे टापि 'मोघा' इति । 'पाडरी' इति भाषायाम् ।

अमोघा – न मोघेति विग्रहे 'नञ्' (पा.२।२।६) इति नञ्समासे 'नलोपो नञः' (पा.६।३।७३) नलोपे 'अमोघा' इति ।

**३.३.१२.२७ राजवृक्षस्य नामानि प्र.७२६, (२।४।२३) शम्याक१/शंपाक१/संपाक१ ।**

शम्याकः – शमीं = शिविमकतीति विग्रहे 'अक कुटिलायां गतौ' (भ्वा.प.से.८४४) इति धातोः'कर्मण्यण्' (पा.३।२।१) इत्यण्प्रत्यये 'उपपदमतिङ्' (पा.२।२।१९)इत्युपपदसमास उपधावृद्धौ यणि 'शम्याकः' इति ।

शंपाकः – शम् = कल्याणं पाकोऽस्येति विग्रहे बहुव्रीहिसमासे शंपाकः सिद्धम् ।

संपाकः – सम्यक् पाकोऽस्येति विग्रहे पूर्ववत् सिद्धम् ।

**सुवर्णक१/सुपर्णक१ –**

सुवर्णकः – शोभनो वर्णोऽस्येति विग्रहे 'अनेकमन्यपदार्थे' (पा.२।२।२४) इति बहुव्रीहिसमासे 'संज्ञायां च' (पा.५।३।५३)इति कन्प्रत्यये सुवर्णकः सिद्धम् ।

सुपर्णकः – सुष्ठु पर्णान्यस्येति विग्रहे 'अनेकमन्यपदार्थे' (पा.२।२।२४) इति बहुव्रीहिसमासे 'संज्ञायां च' (पा.५।३।५३)इति कन्प्रत्यये 'सुपर्णकः' इति ।

**३.३.१२.२८ लताया नामानिप्र.६९७, (२।४।९) वल्ली२/वेल्लि२ ।**

वल्ली –वल्लत इति विग्रहे 'वल वल्ल संवरणे संचरणे च' (भ्वा.आ.से.५२६) इति धातोः 'सर्वधातुभ्य इन्' (उ.४।११८) इतीन्प्रत्यये 'कृदिकारादक्तिनः' (ग.सू.४।१।४२)इति वा ङीषि वल्लीति ।

वेल्लिः – वेल्लतीति विग्रहे 'वेल्ल चलने' (भ्वा.प.से.५७९) इति धातोः 'सर्वधातुभ्य इन्' ( उ.४।११८) इतीन्प्रत्यये 'वेल्लिः' इत्यपि सिद्धम् ।

**व्रतति२/व्रतती२/प्रतति२ –**

व्रततिः – प्रतनोतीति विग्रहे 'तनु विस्तारे' (त.उ.से.१५५७) इति धातोः 'क्तिच्क्तौ च संज्ञायाम्' (पा.३।३।१७४)इति क्तिच्प्रत्यये 'अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो

झलि क्ङिति' (पा.६।४।३७) इत्यनुनासिकलोपे 'पृषोदरादीनि यथोपदिष्टम्' (पा.६।३।१०९) इति पकारस्य वकारे व्रततिः सिद्धम् ।

व्रतती – व्रततिशब्दात् 'कृदिकारादक्तिनः' (ग.सू.४।१।४२)इति वा ङीषि व्रततीति ।

प्रततिः – 'पृषोदरादीनि यथोपदिष्टम्' (पा.६।३।१०९) इति पकाराभावे 'प्रततिः' इति ।

**३.३.१२.२९ विकङ्कतस्य नामनी प्र.७५४, (२।४।३७) विकङ्कत१/वैकङ्कत१ ।**

विकङ्कतः – विकङ्कत इति विग्रहे 'ककि गत्यर्थः' (भ्वा.आ.से.९७) इति धातोः नुमि परसवर्णे 'भृमृदृशियजिपर्विपच्यमितमिनमिहर्येभ्योऽतच्' (उ.२।११०)इति बाहुलकादतच्प्रत्यये 'विकङ्कतः' सिद्धम् । 'कागिंया' इति भाषायाम् ।

वैकङ्कतः – विकङ्कतशब्दात् स्वार्थे 'प्रज्ञादिभ्यश्च' (पा.५।४।३८) इत्यणि 'वैकङ्कतः' इति ।

**३.३.१२.३० वृक्षस्य नामानि प्र.६९०, (२।४।५) साल१/शाल१ ।**

सालः – सल्यत इति विग्रहे 'षल गतौ' भ्वा.प.से.५५७)'अकर्तरि च कारके संज्ञायाम्' (पा.३।३।१९) इति घञ्प्रत्यये उपधावृद्धौ 'सालः' इति ।

शालः – 'शल गतौ' (भ्वा.प.से.९०१) इति धातोः पूर्ववत् सिद्धम् ।

**अगम१/आगम१ –**

अगमः – न गच्छतीति विग्रहे 'गम्लृ गतौ' (भ्वा.प.अ.१०५१) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इत्यच्प्रत्यये नञ्समासेऽगम इति ।

आगमः – आ = समन्तात् गच्छतीति विग्रहे 'आगमः' वृक्षार्थेऽयं शब्दो न दृश्यते ।[३३७]

**३.३.१२.३१ व्याकोशस्य नामनी प्र.६९४, (२।४।७) व्याकोश७/व्याकोष७ ।**

व्याकोशः – कुश्यत इति विग्रहे यद्यपि धातुपाठे नास्ति तथापि 'कुश संश्लेषणे'(क्र्या.प.से.१६१९) इति धातुस्वीकारात् 'अकर्तरि च कारके संज्ञायाम्' (पा.३।३।१९) इति घञ्प्रत्यये गुणे कोशः, ततो व्यावृत्तः कोषः संकोचोऽस्मादिति विग्रहे 'प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः' (वा.२।२।२४)इति समास उत्तरपदलोपे 'व्याकोशः' इति ।

व्याकोषः – कुष्यत इति विग्रहे 'कुष निष्कर्षे' (क्र्या.प.से.१६१९) इति धातोः 'अकर्तरि च कारके संज्ञायाम्' (पा.३।३।१९) इति घञ्प्रत्यये गुणे कोशः, ततो व्यावृत्तः कोषः

[३३७] पूर्ववत् पृ.८२।

संकोचोऽस्मादिति विग्रहे 'प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः' (वा.२।२।२४) इति समास उत्तरपदलोपे 'व्याकोषः' इति । प्रफुल्लितवृक्षस्य नाम ।

**३.३.१२.३२ राजादनस्य नामानि प्र.७४९,(२।४।३५) राजादन३/राजातन३ ।**

राजादनम् – राजभिरद्यत इति विग्रहे 'अद भक्षणे' (अ.प.अ.१०८१) इति धातोः 'कृत्यल्युटो बहुलम्' (पा.३।३।११३) इति कर्मणि ल्युट्प्रत्ययेऽनादेशे सवर्णदीर्घे राजादनमिति ।

राजातनम् – राजानमततीति विग्रहे 'अत सातत्यगमने' (भ्वा.प.से.३८) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इति ल्युप्रत्ययेऽनादेशे राजातनमिति ।

**प्रियाल१/पियाल१ –**

प्रियालः – प्रीयत इति विग्रहे 'प्रीयु' सौत्रो धातुः, तस्मात् 'प्रीयुकणिभ्यां कालन् ह्रस्वः संप्रसारणं च' (उ.३।३५६) इति कालन्प्रत्यये ह्रस्वे 'प्रियालः' इति ।

पियालः – 'पियु' इति पाठभेदात् 'पियालः' इत्यपि सिद्धम् ।[३३८]

**धनुष्पट१/धनु१/पट१/धनुपट१ –**

धनुष्पटः – दधन्तीति विग्रहे 'धन धान्ये' (जु.प.से.११७९) इति धातोः'अर्तिपृवपियजितनिधनितपिभ्यो नित्' (पा.२।११७)इत्युस्प्रत्यये 'धनुः' इति । पटतीति विग्रहे 'पट गतौ'(भ्वा.प.से.३०५) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इत्यच्प्रत्यये 'पटः' इति । धनुरिव पटो विस्तारोऽस्येति विग्रहे बहुव्रीहिसमासे षत्वे 'धनुष्पटः' इति ।

धनुः – दधन्तीति विग्रहे 'धन धान्ये' (जु.प.से.११७९) इति धातोः'अर्तिपृवपियजित-निधनितपिभ्यो नित्' (पा.२।११७)इत्युस्प्रत्यये 'धनुः' इति सिद्धम् । 'भृमृशीतृचरित्सरित-निधनिमिमस्जिभ्य उः' (उ.१।७) इति उप्रत्यये 'धनुः' इत्युकारान्तोऽपि ।

पटः – पटतीति विग्रहे 'पट गतौ'(भ्वा.प.से.३०५) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इत्यच्प्रत्यये 'पटः' इति ।

धनुपटः – दधन्तीति विग्रहे 'धन धान्ये' (जु.प.से.११७९) इति धातोः 'भृमृशीतृचरित्सरितनि-धनिमिमस्जिभ्य उः' (उ.१।७) इति उप्रत्यये 'धनुः' इति । पटतीति विग्रहे 'पट गतौ'(

---

[३३८] दीक्षितः भानुजि,***अमरकोश :*** (सुधा/रामाश्रमी व्याख्या २.४.३५), वाराणसी : चौखम्बा सुरभारती प्रकाशन, सन् २०११, पृ.१४० ।

भ्वा.प.से.३०५) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इत्यच्प्रत्यये 'पटः' इति । धनु इव पटो विस्तारोऽस्येति विग्रहे बहुव्रीहिसमासे 'धनुपटः' इति ।

**३.३.१२.३३ रेखाया नामनी प्र.६८७, (२।४।४) लेखा२/रेखा२ ।**

लेखा – लिख्यत इति विग्रहे 'लिख अक्षरविन्यासे' (तु.प.से.१४५३) इति धातोः 'षिद्भिदादिभ्योऽङ्' (पा.३।३।१०४) इत्यङ्प्रत्यय उपधागुणे टापि लेखेति ।

रेखा –रलयोरेकत्वस्मरणात् 'रेखा' अपि ।[३३९]

**३.३.१२.३४ शस्यस्य नामनी प्र.७०९, (२।४।१५) सस्य३/शस्य३ ।**

सस्यम् –सस्तीति विग्रहे 'षस स्वप्ने' (अ.प.से.११५४) इति धातोः 'माछाससिभ्यो यः' (उ.४।१०९) इति यप्रत्यये सस्यमिति सिद्धम् ।

शस्यम् –शस्यत इति विग्रहे 'शसु हिंसायाम्' (भ्वा.प.से.७५३) इति धातोः तकिशसिचतियतिजनिभ्यो यद्वाच्यः' (वा) (पा.६।५।६५) इति यत्प्रत्यये शस्यमिति ।

**३.३.१२.३५ शारदस्य नामनी प्र.७२५, (२।४।२३) शारद१/शारदी२ ।**

शारदः – शरदि पुष्यतीति विग्रहे 'कालात्साधुपुष्यत्पच्यमानेषु' (पा.४।३।४३) इत्यण्प्रत्यय आदिवृद्धौ 'शारदः' इति ।

शारदी – 'शारदी तोयपिप्पल्यां सप्तपर्णे च शारदी' इति दन्त्यान्तेषु रुद्रः । [३४०] तस्मात् ङ्यन्तोऽपि सिद्धम् । 'छतिवन' इति भाषायाम् ।

**३.३.१२.३६ शावरस्य नामनी प्र.७४५, (२।४।३३) शावर१/सावर१ ।**

शावरः – शवराणामयमिति विग्रहे 'तस्येदम्' (पा.४।३।१००) इत्यणि 'तद्धितेष्वचामादेः' (पा.७।१।११७) इत्यादिवृद्धौ 'शावरः' इति । 'लोध' इति भाषायाम् ।

सावरः – दन्त्यादिरपि 'सावराख्यापराधे च लोध्रे पापे च पठ्यते' ।[३४१]

**३.३.१२.३७. शेलोर्नामनी प्र.७४८, (२।४।३४) शेलु१/सेलु१ ।**

शेलुः – शिलतीति विग्रहे 'शिल उञ्छे' (तु.प.से.१४५०) इति धातोः बाहुलकादुप्रत्यये शेलुरिति रूपं सिद्धम् ।

सेलुः – सिलतीति विग्रहे 'षिल उच्छे' (तु.प.से.१४५१) इति धातोः बाहुलकादुप्रत्यये शेलुरिति ।[३४२]श्लेष्मातकस्य नाम ।

---

[३३९]पूर्ववत् (२.४.४) पृ.१२८ ।

[३४०] पूर्ववत् पृ.१३९ ।

[३४१]पूर्ववत् (२.४.३३) पृ.१३९ ।

**३.३.१२.३८ शोणकस्य नामानि प्रक्रमाङ्कः ७९३, (२।४।५७) स्योनाक१/श्योनाक१-/शोणाक१ ।**

स्योनाकः – सीव्यतीति विग्रहे 'षिवु तन्तुसन्ताने' (दि.प.से.११८३) इति धातोः बाहुलकान्नप्रत्यये 'पृषोदरादीनि यथोपदिष्टम्' (पा.६।३।१०९) इति साधुः स्योनः = किरणः । स्योनेनाकतीति विग्रहे 'अक कुटिलायां गतौ' (भ्वा.प.से.८४४) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इत्यच्प्रत्यये 'स्योनाकः' इति । 'टटेला' इति नेपाल्याम् ।

श्योनाकः – श्यायत इति विग्रहे 'श्यैङ् गतौ' (भ्वा.आ.अ.१०३२) इति धातोः 'पिनाकादयश्च' (उ.४।१५) इति निपातनात् सिद्धम् ।

शोणाकः –इति शोणेनाकतीति विग्रहे 'अक कुटिलायां गतौ' (भ्वा.प.से.८४४) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इत्यच्प्रत्यये दीर्घे 'शोणाकः' इति सिद्धम् ।

**शोणक१/शोनक१ –**

शोणकः– शोणतीति विग्रहे 'शोणृ वर्णगत्योः' (भ्वा.प.से.४८६) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इत्यच्प्रत्यये 'संज्ञायां कन्' (पा.५।३।७५) इति स्वार्थे कन्प्रत्यये 'शोणकः' इति सिद्धम् ।

शोनकः – शुनतीति विग्रहे 'शुन गतौ' (तु.प.से.१४२३) इति धातोः 'ण्वुल्तृचौ' (पा.३।१।१३३) इति ण्वुल्प्रत्ययेऽकादेशउपधागुणे 'शोनकः' इति ।

**३.३.१२.३९ शोभाञ्जनस्य नामानिप्र.७४१,(२।४।३०) शोभाञ्जन१/शौभाञ्जन१ ।**

शोभाञ्जनः – शोभामनक्तीति विग्रहे 'अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु' (रु.प.से.१५५२) इति धातोः 'कृत्यल्युटो बहुलम्' (पा.३।३।११३) इति कर्तरि ल्युट्प्रत्यये 'युवोरनाकौ' (पा.७।१।१) इत्यनादेशे 'शोभाञ्जनः' इति ।

शौभाञ्जनः –शोभाञ्जन एवेति विग्रहे 'प्रज्ञादिभ्यश्च' (पा.५।४।३८) इत्यणि 'शौभाञ्जनः' इति ।

---

[३४२] गौतमः कुलचन्द्रः, ***अमरकोश (स्वयंबोधिनी टीका प्र.७४८)*** नेपाल : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६, पृ.८६ ।

सुभाञ्जनः – सुष्ठु भा तामनक्तीति विग्रहे 'अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु' (रु.प.से.१५५२) इति धातोः 'कृत्यल्युटो बहुलम्' (पा.३।३।११३) इति कर्तरि ल्युट्प्रत्यये 'युवोरनाकौ' (पा.७।१।१) इत्यनादेशे 'सुभाञ्जनः' इति ।

सौभाञ्जनः – सुभाञ्जन एवेति विग्रहे 'प्रज्ञादिभ्यश्च' (पा.५।४।३८) इत्यणि 'सौभाञ्जनः' इति । 'सहेंज' इति भाषायाम् । कुलचन्द्रस्तु द्वितीयतृतीये रूपे नैव ददाति ।[343]

**आक्षीव१/अक्षीव१ –**

आक्षीवः – आक्षीवत इति विग्रहे 'क्षीवृ मदे' (भ्वा.आ..से.४०७) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इत्यच्प्रत्यये स्वादिकार्ये 'आक्षीवः' इति ।

अक्षीवः – ह्रस्वादिरपि 'अक्षिवं वशिरे , शिग्रौ नाऽमत्ते पुनरन्यवत् ।[344]

**३.३.१२.४० सक्तुफलाया नामानिप्र.७८३, (२।४।५२) सक्तुफला२/सक्तुफली२ ।**

सक्तुफला – सक्तुवत् फलमस्या इति विग्रहे 'अनेकमन्यपदार्थे' (पा.२।२।२४)इति बहुव्रीहिसमासे 'अजाद्यतष्टाप्' (पा.४।१।४) इति टापि 'सक्तुफला' इति । शम्या नाम ।

सक्तुफली – सक्तुवत् फलमस्या इति विग्रहे 'अनेकमन्यपदार्थे' (पा.२।२।२४) इति बहुव्रीहिसमासे 'पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च' (पा.४।१।६४) इति ङीषि 'सक्तुफली' इति ।

**काचस्थाली२/काला२/स्थाली –**

काचस्थाली – काचस्य स्थालीति विग्रहे 'षष्ठी' (पा.२।२।८) इति षष्ठीतत्पुरुषसमासे 'काचस्थाली' इति ।

काला – कल्यत इति विग्रहे 'कल शब्दसंख्यानयोः' (भ्वा.आ.से.५३१) इति धातोः 'अकर्तरि च कारके संज्ञायाम्' (पा.३।३।१९) इति कर्मणि घञ्प्रत्यये कालः, कालो वर्णोऽस्येति विग्रहे 'अर्श आदिभ्योऽच्' (पा.५।२।१२७)इत्यच्प्रत्यये 'अजाद्यतष्टाप्' (पा.४।१।४) इति टापि 'काला' इति ।

स्थाली – तिष्ठतीति विग्रहे 'ष्ठा गतिनिवृत्तौ' (भ्वा.प.अ.९९४) इति धातोः 'स्थाचतिमृजेरालज्वालञालीयचः' (उ.१।११३) इत्यालच्प्रत्यये 'जातेरस्त्रीविषयादयोपधात्' ( पा.४।१।६३) इति ङीषि 'स्थाली' इति ।

**३.३.१२.४१ सालस्य नामनी प्र.७६८, (२।४।४४) साल१/शाल१ ।**

---

[343] पूर्ववत् पृ.८६ ।

[344] दीक्षितः भानुजि,***अमरकोशः*** (सुधाटीका २.४.३१), वाराणसी : चौखम्बा विद्याभवन, सन्.२०११, पृ.१३८ ।

सालः – सल्यत इति विग्रहे 'षल गतौ' (भ्वा.प.से.५८७) इति धातोः 'अकर्तरि च कारके संज्ञायाम्' (पा.३।३।१९) इति कर्मणि घञ्प्रत्यय उपधादीर्घे 'सालः' इति ।

शालः – शल्यत इति विग्रहे 'शल गतौ' (भ्वा.प.से.९०१) इति धातोः पूर्ववत् ।

**कार्ष्य१/कार्श्य१ –**

.कार्ष्यः – कृषतीति विग्रहे 'कृष विलेखने' (तु.प.से.१३७०) इति धातोः 'इगुपधज्ञाप्रीकिरः कः' (पा.३।१।१३५) इति कप्रत्यये गुणे कर्षः, कर्षस्य भावः कर्मो वेति विग्रहे चातुर्वर्ण्यादित्वात् 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' (पा.५।१।१२४) इति ष्यञ्प्रत्यये 'कार्ष्यः' इति ।

कार्श्यः – कृश्यतीति विग्रहे 'कृश तनूकरणे' (दि.प.से.१३०७) इति धातोः 'इगुपधज्ञाप्रीकिरः कः' (पा.३।१।१३५) इति कप्रत्यये गुणे कर्शः, कर्शस्य भावः कर्मो वेति विग्रहे चातुर्वर्ण्यादित्वात् 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' (पा.५।१।१२४)इति ष्यञ्प्रत्यये 'कार्श्यः' इति रूपं सिद्धम् ।

**सस्यसंवर१/शस्यसंवर१ –**

सस्यसंवरः – सस्तीति विग्रहे 'षस स्वप्ने' (अ.प.से.११५४) इति धातोः 'माछाशसिशुभ्यो यः' (उ.४।१०९) इति यप्रत्यये सस्यमिति । सस्यैः संव्रियत इति विग्रहे 'वृञ् वरणे' ( स्वा.प.से.१३३४) इति धातोः 'ग्रहवृदृनिश्चिगमश्च' (पा.३।३।५८) इत्यप्प्रत्यये गुणे 'सस्यसंवरः' इति ।

शस्यसंवरः – शस्यत इति विग्रहे 'शसु हिंसायाम्' (भ्वा.प.से.७७३) इति धातोः 'तकिशसिचतियतिजनिभ्यो यद्वाच्यः' (वा.३।१।९७) इति यत्प्रत्यये शस्यमिति । शस्यैः संव्रियत इति विग्रहे 'वृञ् वरणे' (स्वा.प.से.१३३४) इति धातोः 'ग्रहवृदृनिश्चिगमश्च' ( पा.३।३।९८) इत्यप्प्रत्यये गुणे 'शस्यसंवरः' इति ।

**३.३.१२.४२ सुसमस्य नामनी प्र.७१३, (२।४।१७) सुम३/सुसम३ ।**

सुमम् – सुष्ठु मातीति विग्रहे 'मा माने' (अ.प.अ.११३८) इति धातोः 'आतश्चोपसर्गे' ( पा.३।१।१३६) इति कप्रत्यय आकारलोपे सुममिति । पुष्पस्य नाम ।

सुसमम् – सुष्ठु समम् = सर्वं यस्मादिति विग्रहे 'अनेकमन्यपदार्थे' (पा.२।२।२४) इतिबहुव्रीहिसमासे सुसममिति ।

## ३.४ स्वयंबोधिनीटीकायां स्थितानामव्ययपदानामुदाहरणानि शब्दार्थदृष्ट्या पर्यालोचनम्

कोशविज्ञानानुसारेण कोश उदाहरणानि दातुं शक्यते। कुलचन्द्रेणाऽपि विशेषतयाऽव्ययशब्दानामुदाहरणानि दत्तानि। अत्र कुत्रचित् शास्त्रादुद्धृतानि कुत्रचित् स्वयंनिर्मितान्युदाहरणानि सन्ति। अव्ययशब्दे नानार्थता प्राप्यते तस्मादुदाहरणस्यातीवावश्यकता वर्तत एव। अव्ययशब्देऽन्वर्थो दृश्यते । न व्येतीतिविग्रहे नञ्पूर्वात् 'इण् गतौ' (अ.प.अ.) इति धातोः 'एरच्' (पा.३।३।५६) इत्यच्प्रत्यये गुणेऽयादेशे नञ्समासेऽव्ययमिति सम्पद्यते। यः शब्दः पुंलिङ्गेषु, स्त्रीलिंङ्गेषु, नपुंसकलिङ्गेषु च तथैव सर्वासु विभक्तिषु, सर्वेषु वचनेषु च तुल्यरूपो भवति, विकारं न प्राप्नोति सः शब्दोऽव्ययमिति कथ्यते। यथा 'प्रातर्' इति शब्दात् सर्वासु विभक्तिषु, सर्वेषु वचनेषु च स्वादिप्रत्यया जायन्ते। ततः 'प्रातर्' इत्यस्याव्ययत्वात् 'अव्ययादाप्सुपः'(पा.२।४।८२)इति सूत्रेण सुपो लुक् क्रियते। तेन 'प्रातः' इति रूपं सर्वासु विभक्तिषु सर्वेषु वचनेषु च भवति। अनेन प्रकारेण सर्वेषु लिङ्गेषु चैकमेव रूपं दृश्यते। यथोदाहरणं नाना पुरुषाः, नाना नार्यः, नाना वस्त्राणि च। अव्ययस्य लक्षणं यथा–

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥ [३४५]

अमरसिंहरचितेऽमरकोशे कुलचन्द्रोऽव्ययशब्दानामर्थं विचार्य व्याख्यां कुर्वन् प्रत्येकशब्दानामुदाहरणानि ददाति संस्कृते नेपाल्याञ्च। यथोदाहरणानि –

**नानार्थवर्गः** नानार्थवर्गात्-अग्रतस्-अति-अथ-अथो-अनु-अन्तर-अभितस्-अपि-अमा-अलम्-अहह-अहहा-आः-आ-आङ्-आरात्-इति-उत-उररी-ऊररी-ऊरी-एवम्-कम्-किम्-किल-कु-खलु-च-जोषम्-तावत्-तिरस्-तु-धिक्-ननु-नाना-नाम-नि-नु-नूनम्-पश्चात्-पुनस्-पुरस्तात्-पुरा-प्रति-प्रादुस्-मिथस्-यावत्-वत-वा-वृथा-शश्वत्-सकृत्-समया-साक्षात्-सामि-स्वः-स्वस्ति-स्वित्-हन्त-हा-हि-हुंशब्दानामुदाहरणानि –

### ३.४.१ अग्रतःशब्दस्योदाहरणानि प्र.२८९४, (३।३।२४६)।

'अग्रे' इति विग्रहे 'आद्यादिभ्य उपसङ्ख्यानम्' (वा.५।४।४४) इति तसिप्रत्ययेऽग्रत इति।

३.४.१.१ प्राच्याम् – अग्रतो भासते भानुः।

[३४५] पतञ्जलिः (६।१।१।३८), ***व्याकरणमहाभाष्यम्***, दिल्ली : मोतीलाल बनारसीदास, सन् १९८४, पृ.३६०।

३.४.१.२ प्रथमे – अग्रतो भुञ्जतेऽर्भकाः ।

३.४.१.३ पुरार्थे – मनोऽग्रतः समायान्तं सखायं वीक्ष्य मोदते ।

**३.४.२ अतिशब्दस्योदाहरणानि प्र.२८८५, (३।३।२४१) ।**

अततीति विग्रहे 'अत सातत्यगमने' (भ्वा.प.से.३८) इति धातोः 'सर्वधातुभ्य इन्' ( उ.४।११८) इतीन्प्रत्ययेऽति रूपं सिद्धम् ।

३.४.२.१ उत्कर्षे – अतिदेवान् यदुपतिः ।[३४६]

३.४.२.२लङ्घने – अतिवायु नृणां चित्तम् ।

**३.४.३ अथशब्दस्योदाहरणानि प्र.२८९६, (३।३।२४७) ।**

अर्थयत इति विग्रहे 'अर्थ उपयाच्ञायाम्' (चु.आ.से.२०५१) इति धातोः 'अन्येष्वपि दृश्यते' (पा.३।२।१०१) इति डप्रत्यये पृषोदरादित्वाद्रलोपः ।[३४७]

३.४.३.१ मङ्गले – अथातो ब्रह्मजिज्ञासा। अयं शब्दः पाणिनीयव्याकरणस्य स्वरादिगणे पठितोऽस्ति ।

३.४.३.३ प्रारम्भे – अथ शब्दानुशासनम् ।

३.४.३.४ प्रश्ने – अथ वक्तुं समर्थोऽसि ?

३.४.३.५ कार्त्स्न्ये – अथ धातून् ब्रूमः ।

**३.४.४ अथोशब्दस्योदाहरणानि प्र.२८९६, (३।३।२४७) ।**

अर्थयत इति विग्रहे 'अर्थ उपयाच्ञायाम्' (चु.आ.से.२०५१) इति धातोः बाहुलकात् डोप्रत्यये पृषोदरादित्वाद्रलोपः । उदाहरणानि अथशब्दवत् ।

**३.४.५ अनुशब्दस्योदाहरणे प्र.२८९८, (३।३।२४८) ।**

अनितीति विग्रहे 'अन प्राणने' (अ.प.से.११४६) इति धातोः बाहुलकाड्डुः[३४८] अनु सिद्धम् ।

३.४.५.१ पश्चादर्थे – प्रजाः प्रीतिगुणाकृष्टाः श्रीराममनुनिर्ययुः ।

३.४.५.२  सादृश्ये-स्पृहणीयैरन्वकरोच्छ्रीरामं भरतो गुणैः

**३.४.६ अन्तरशब्दस्योदाहरणानि प्र.२७७५, (३।३।१८७) ।**

---

[३४६]अत्र 'अतिरतिक्रमणे च' (१।४।९५) इति कर्मप्रवचनीयसंज्ञायां 'कर्मप्रवचनीययुक्ते द्वितीया' (२।३।८) इति द्वितीयाविभक्तिः ।

[३४७] दीक्षितः भानुजि,***अमरकोशः*** (सुधाटीका ३.३.२४७), वाराणसी : चौखम्बा विद्याभवन, सन्.२०११, पृ.४४१ ।

[३४८] क्दीक्षितः भानुजि, ***अमरकोशः*** (सुधाटीका १.१.४८), वाराणसी : चौखम्बा विद्याभवन, सन्.२०११, पृ.४४१ ।

अन्तं रातीति विग्रहे 'रा दाने' (अ.प.अ.११३३) इति धातोः 'आतोऽनुपसर्गे कः' (पा.३।२।३) इति कप्रत्यये 'आतो लोप इटि च' (पा.६।४।६४) इत्याकारलोपेऽन्तरमिति ।

३.४.६.१ अवकाशार्थे – नास्त्यन्तरं क्वेह तिष्ठाससि त्वम् ।अवकाशार्थे क्लीबत्वम् ।

३.४.६.२ अवध्यर्थे – मासान्तरे प्रतिदातास्मि नूनम् । अवध्यर्थे क्लीबत्वम् ।

३.४.६.३. परिधानार्थे – अन्तरे शाटका एते प्रिये ! तुभ्यं मयाऽऽहृताः । परिधानार्थे विशेषनिघ्नोऽयं शब्दः ।

३.४.६४ अन्तर्ध्यर्थे – उकारस्य न यण् तत्राऽच्यन्तरं धस्य वर्तते । सुधी उपास्येत्यत्र ।अन्तर्ध्यर्थे क्लीबत्वम् ।

३.४.६.५ भेदार्थे – यदन्तरं सर्षपशैलराजयोस्तदन्तरं दासरथेस्तवैव च । भेदार्थे क्लीबत्वम् ।

३.४.६.६ तादर्थ्ये – त्वदन्तरेणैव ऋणं ममैतत् । तादर्थे क्लीबत्वम् ।

३.४.६.७छिद्रार्थे – शत्रूणामन्तरं विद्धि तेन स्यात् सुकरो जयः । क्षिद्रार्थे क्लीबत्वम् ।

३.४.६.८ आत्मीयार्थे – अन्तरा एव सकला जना यद्यन्तरो हरिः । आत्मीयार्थे विशेष्यनिघ्नोऽयं शब्दः ।

३.४.६.९ विनार्थे – यत्नमन्तरमेव त्वं सत्वरं रत्नमिच्छसि ? विनार्थे क्लीबत्वम् ।

३.४.६.१० बहिरर्थे – अन्त्यजानां हि केषाञ्चिदवर्तन्ताऽन्तरे गृहाः । बहिरर्थे विशेष्यनिघ्नोऽयं शब्दः ।

३.३.६.११ अवसरार्थे – प्रतीक्षस्वान्तरं विद्वन् । अवसरार्थे क्लीबत्वम् ।

३.४.६१२ मध्येऽर्थे – आवयोरन्तरं गिरिः । मध्येऽर्थे क्लीबत्वम् ।

३.४.३.१३ आत्मार्थे – अन्तरे मन आधेहि । आत्मार्थे क्लीबत्वम् ।

३.४.६.१४ तुल्यार्थे – तवान्तरो भविता बालकोऽयम् । तुल्यार्थे विशेष्यनिघ्नोऽयं शब्दः ।

**३.४.७ अपिशब्दस्योदाहरणानि प्र.२९००, (३।३।२४९) ।**

न पियतीति विग्रहे 'पि गतौ' (तु.प.अ.१९९९) इति धातोः 'अन्येभ्योऽपि दृश्यते' (पा.३।२।१७८) इति सूत्रेण क्विप्प्रत्यये नञ्समासेऽपीति ।

३.४.७.१ गर्हायाम् – लशुनमपि विप्रपुत्रोऽनय ! त्रपिष्णुर्भवन् ग्रसते ।

३.४.७.२ समुच्चये – इदमिदमिदमपि मनुते संग्रहणीयं गृही सोऽयम् ।

३.४.७.३प्रश्ने – अपि जानासि मां वत्स ! चिरादद्य समागतम् ।

३.४.७.४शङ्कायाम् – अपि चोरः समासन्नो भषत्युच्चैः शुनः शिशुः ।

३.४.७.५संभावनायाम् – अपि चूर्णीकुर्वीत प्रहरन्नुर्वीधरं मुष्ट्या ।

**.३.४.७ अभितःशब्दस्योदाहरणानि प्र.२९१३, (३।३।२५५) ।**

अभ्युपसर्गात् 'पर्यभिभ्यां च' (पा.५।३।९) इति तसिल्प्रत्यये 'अभितः' इति । उभयत इत्यर्थः ।

३.४.८.१ समीपे – पश्याऽभितोऽयं तुहिनस्य पर्वतः ।

३.४.८.२ उभतोऽर्थे – अभितो वीज्यमानोऽयं चामराभ्यां रघूद्वहः ।

३.४.८.३ शीघ्रार्थे – अभितो गच्छतु भवान् यजमानः प्रतीक्षते ।

३.४.८.४ शाकल्ये – महान्तः पण्डितजना अभितः समुपस्थिताः ।

३.४.८.५ अभिमुखे – आयान्तमभिस्तूर्णं प्रत्युद्गच्छ निजं गुरुम्

**३.४.९ अमाशब्दस्योदाहरणे प्र.२९०२, (३।३।२५०) ।**

न मातीति विग्रहे 'मा माने' (अ.प.अ.११३८) इति धातोः 'अन्येभ्योऽपि दृश्यते' (पा.३।२।१७८) इति सूत्रेण क्विप्प्रत्यये नञ्समासेऽमेति ।

३.४.९.१ सहार्थे – चन्द्रार्कयोः सह स्थित्याऽमावास्या तिथिरुच्यते ।

३.४.९.२ समीपे – समीपवर्तिनं प्राहुरमात्यं पृथिवीपतेः ।

**३.४.१० अलंशब्दस्योदाहरणानि प्र.२९०६, (३।३।२५२) ।**

अलतीति विग्रहे 'अल भूषणपर्याप्तिवारणेषु' (भ्वा.प.से.५५३) इति धातोः बाहुलकादम्प्रत्ययेऽलमिति । अयं शब्दः पाणिनीयव्याकरणस्य स्वरादिगणे पठितोऽस्ति ।

३.४.१०.१ भूषणे – अलङ्करोति विद्वांसं विनयस्त्वं न वेत्सि तम् ।

३.४.१०.२ पर्याप्तौ – एतावदोदनमलं नास्ति वह्निबलं मम ।

३.४.१०.३ सामर्थे – अलं चाणूरमल्लाय श्रीगोपीगणवल्लभम् ।

३.४.१०.४ निवारणे – अलं महीपाल तव श्रमेण ।

**३.४.११ अहहशब्दस्योदाहरणे प्र.२९१६, (३।३।२५७) ।**

अहं जहातीति विग्रहे 'ओहाक् त्यागे' (जु.प.अ.११६५) इति धातोः 'अन्येष्वपि दृश्यते' (पा.३।२।१०१) इति डप्रत्यये 'पृषोदरादीनि यथोपदिष्टम्' (पा.६।३।१०९) इति इति मलोपे 'अहह' इति ।

३.४.११.१ अद्भुते – अहह ! हनुमानूढद्रोणाचलः समुपस्थितः ।
त्वरितमहहा ! सौमित्रिश्च स्फुरन् पुनरुत्थितः ।

३.४.११.२ खेदे – अहह ! बहुभिर्भीमैर्नागैरबन्धि रघूद्वहः ।

सभयमहहा ! सर्वे कीशा अनीशतया द्रुताः ।

**३.४.१२ अहहाशब्दस्योदाहरणे प्र.२९१६, (३।३।२५७) ।**

अहं जहातीति विग्रहे 'ओहाक् त्यागे' (जु.प.अ.११६५) इति धातोः 'क्विप् च' (पा.३।२।७६) इति क्विप्प्रत्यये सर्वापहारलोपे 'पृषोदरादीनि यथोपदिष्टम्' (पा.६।३।१०९) इति इति मलोपे 'अहहा' इति । उदाहरणे पूर्ववत् ।

**३.४.१३ आःशब्दस्योदाहरणे प्र.२८८२, (३।३।२४०) ।**

आस्त इति विग्रहे 'आस उपवेशने' (अ.आ.से.१०९१) इति धातोः 'अन्येभ्योऽपि दृश्यते' (पा.३।२।१७८) इति क्विप्प्रत्यये रुत्वे विसर्गे 'आः' इति ।

(३.४.१३.१ कोपे – आः परित्यज्य पठनं निष्क्रान्तोऽसि मठाच्छठ र ।[३४९]

(३.४.१३.२ पीडायाम् – आः शिरो बाध्यतेऽत्यर्थं नाधुनाऽध्येतुमुत्सहे ।

**३.४.१४ आशब्दस्योदाहरणे प्र.२८८२, (३।३।२४०) ।**

आप्नोतीति विग्रहे 'आप्लृ व्याप्तौ' (स्वा.प.अ.१९८१) इति धातोः 'अन्येभ्योऽपि दृश्यते' (पा.३।२।१७८) इति क्विप्प्रत्यये 'पृषोदरादीनि यथोपदिष्टम्' (पा.६।३।१०९) इति पलोपे 'आ' इति । अङिदयं शब्दो यथा –

ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः ।

एतमातं ङितं विद्याद् वाक्यस्मरणयोरङित् ॥ [३५०]

३.४.१४.१ स्मृतौ – आ एवं किल तत् हन्त ! स्मृतिशक्तिर्हता मम । [३५१]

३.४.१४.२ वाक्ये – आ एवं नु मन्यसे, त्वं शृणु तावन्मतं मम ।

**३.४.१५ आङ्शब्दस्योदाहरणानि प्र.२८८१, (३।३।२३९) ।**

अततीति विग्रहे 'अत सातत्यगमने' (भ्वा.प.से.३८) इति धातोः बाहुलकात् डाङ्प्रत्यय आङिति ।

३.४.१५.१ईषदर्थे – ओष्णं दुग्धमिदं सद्योदुग्धं प्रपिब धैनवम् ।

---

[३४९]मठाच्छठ इत्यत्र 'शश्छोऽटि' (पा.८।४।६३) इति छत्वम् ।

[३५०]पतञ्जलिः (सम्पा.चारुदेव शास्त्री), ***व्याकरणमहाभाष्यम्*** पा.सू.१।१।१४, वाराणसी : मोतीलाल बनारसी दास, सन् १९८४, पृ.२५८ ।

[३५१]आ एवमित्यत्र 'निपात एकाजनाङ्' (पा.१।१।१४) इति प्रगृह्यसंज्ञा ।

३.४.१५.२अभिव्याप्तौ – आकुम्भकारं कवयो भोजे शासति भूतलम् ।

३.४.१५.३ सीमार्थे – आलोकालोकपूर्वार्धं प्रसरन्ति रवेः कराः ।

३.४.१५.४ धातुयोगजे – आगच्छ शीतलं स्वच्छं मधुरं जलमाहर ।

**३.४.१६ आरात्शब्दस्योदाहरणे प्र.२८८७, (३।३।२४२) ।**

आरातीति विग्रहे 'रा दाने' (अ.प.अ.११३३) इति धातोः बाहुलकादातिप्रत्यय आरादिति सिद्धम् ।

३.४.१६.१ दूरे – आराद्गिरीशश्वशुरो हिमालयगिरीश्वरः ।

३.४.१६.२ समीपे – आरात् स्थितो ब्रूहि शिशो ! स्फुटं न श्रूयते वचः ।

**३.४.१७ इतिशब्दस्योदाहरणानि प्र.२८९३, (३।३।२४५) ।**

एतीति विग्रहे 'इण् गतौ' (अ.प.अ.११२०) इति धातोः 'क्तिच्क्तौ च संज्ञायाम्' (३।३।१७४) इति क्तिच्प्रत्यय इतीति सिद्धम् ।

३.४.१७.१ हेतौ – स व्यायामं करोतीति भीतिस्तस्य न रोगतः ।[३५२]

३.४.१७.२ प्रकरणे – सत्त्वं रजस्तम इति गुणाः शास्त्रेषु वर्णिताः ।

३.४.१७.३ प्रकाशे – धर्मात् स्वर्गं प्रयातीति भगवान् बादरायणः ।

३.४.१७.४ एवमर्थे – हन्त ! नानायि मत्सूनुरित्युक्त्वा विरराम सः ।

३.४.१७.५ समाप्तौ – इति श्रीमद्दाशरथिप्रथिताचारवर्णनम् ।

**३.४.१८ उतशब्दस्योदाहरणे प्र.२८८८, (३।३।२४३) ।**

ऊयते स्मेति विग्रहे 'उङ् शब्दे' (भ्वा.आ.अ.१०१९) इति धातोः 'क्तिच्क्तौ च संज्ञायाम्' (३।३।१७४) इति क्तप्रत्यय उतेति ।

३.४.१८.१ अप्यर्थे – उत व्रजेत् स एकाकी दिनान्ते गहनं वनम् ? ।

३.४.१८.२ विकल्पे – निनीषति सहैवाऽयं त्वामुत भ्रातरं तव ।

**३.४.१९ उररीशब्दस्योदाहरणे प्र.२९१०, (३।३।२५४) ।**

वयत इति विग्रहे 'वय गतौ' (भ्वा.आ.से.५०९) इति धातोः बाहुलकाद्ररीक्प्रत्यये यकारलोपे 'ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च' (पा.६।१।१६) इति सम्प्रसारणे 'उररी' इति सिद्धम् । अयं कृधातुना सहैव संबध्यते ।

३.४.१९.१विस्तारे –उररी करोति ।

---

[३५२]स व्यायाम इत्यत्र 'एतत्तदोः सुलोपोऽकोरनञ्समासे हलि' (पा.६।१।१३२) इति सलोपः ।

३.४.१९.२ अङ्गीकृतौ – पूर्ववत् ।

**३.४.२० ऊररीशब्दस्योदाहरणे प्र.२९१०, (३।३।२५४) ।**

ऊयत इति विग्रहे 'ऊयी तन्तुसन्ताने' (भ्वा.आ.से.५१७) इति धातोः बाहुलकाद्ररीक्प्रत्यये यकारलोपे 'ऊररी' इति सिद्धम् । अयमपि कृधातुना सहैव संबध्यते ।

३.४.२०.१विस्तारे –ऊररी करोति ।

३.४.२०.२ अङ्गीकृतौ – पूर्ववत् ।

**३.४.२१ ऊरीशब्दस्योदाहरणम् प्र.२९१०, (३।३।२५४) ।**

ऊयत इति विग्रहे 'ऊयी तन्तुसन्ताने' (भ्वा.आ.से.५१७) इति धातोः बाहुलकाद्रीक्प्रत्यये यकारलोपे 'ऊरी' इति सिद्धम् । अयञ्च कृधातुना सहैव संबध्यते ।

३.४.२१.१विस्तारे –ऊरी करोति ।

३.४.२१.२ अङ्गीकृतौ – पूर्ववत् ।

**३.४.२२ एवंशब्दस्योदाहरणे प्र.२९०३, (३।३।२५०) ।**

'ए' इत्थं वमतीति विग्रहे 'टु वम् उद्गिरणे' (भ्वा.प.से.९०७) इति धातोः 'अन्येभ्योऽपि दृश्यन्ते' (पा.३।२।७५)इति सूत्रेण विच्प्रत्यये सर्वापहारलोपएवमिति । अयं शब्दः पाणिनीयव्याकरणस्य स्वरादिगणे पठितः ।

३.४.२२.१  इवार्थे – वेदाभ्यासी वह्निरेवम्,

३.४.२२.२ इत्थमर्थे – एवं तिष्ठँश्च पूज्यते ।

**३.४.२३ कंशब्दस्योदाहरणे प्र.२९०२, (३।३।२५०) ।**

कम्यत इति विग्रहे 'कमु कान्तौ' (भ्वा.आ.से.४७३) इति धातोः 'अन्येभ्योऽपि दृश्यन्ते' (पा.३।२।७५) इति सूत्रेण णिङभावे विच्प्रत्यये सर्वापहारलोपे कमिति । अयं शब्दः पाणिनीयव्याकरणस्य स्वरादिगणे पठितः ।

३.४.२३.१ वार्यर्थे – जायते वारिणि ततः कमलं कञ्जमुच्यते ।

३.४.२३.२ मुधार्थे – मूर्ध्नो दश धरन् ख्यातो रावणो दशकन्धरः ।

**३.४.२४ किंशब्दस्योदाहरणे प्र.२९०४, (३।३।२५१) ।**

कूयत इति विग्रहे 'कु शब्दे' (अ.प.अ.) इति धातोः बाहुलकाड्डिम्प्रत्यये [३५३]किमिति ।

३.४.२४.१ पृच्छायाम् – किमाद्रियेरन् रसिकास्तावकीनां कृतिं कवे र ।

[३५३] दीक्षितः भानुजि, ***अमरकोशः*** (सुधाटीका ३.३.२५१), वाराणसी : चौखम्बा विद्याभवन, सन्.२०११, पृ.४४२ ।

३.४.२४.२ निन्दायाम् – स किं सखा साधु न शास्ति योऽधिपम् ।

**३.४.२५ किलशब्दस्योदाहरणे प्र.२९११, (३।३।२५४) ।**

किलतीति विग्रहे 'किल श्वैत्यक्रीडनयोः' (तु.प.से.१४४१) इति धातोः 'इगुपधज्ञाप्रीकिरः कः' (पा.३।१।१३५) इति कप्रत्यये किलेति । अयं शब्दः पाणिनीयव्याकरणस्य स्वरादिगणे पठितः ।

३.४.२५.१ वार्तायाम् – कंसं जघान किल बालक एव कृष्णः ।

३.४.२५.२ संभाव्ये – मेधावी सन्नयं बालोऽतिशयीतकिलाग्रजान् ।

**३.४.२६ कुशब्दस्योदाहरणानि प्र.२८८३, (३।३।२४०) ।**

कवते कूयते वेति विग्रहे 'कुङ् शब्दे' (भ्वा.आ.से.१०१०) इति धातोः 'डुप्रकरणे मितद्र्वादिभ्य उपसंख्यानम्' (वा.३।२।१८०) इति डुप्रत्यये टिलोपे 'कु' इति । कुशब्द एकाकी न प्रयुज्यते ।

३.४.२६.१.पापे – कुकर्म कृत्वा

३.४.२६.२ कुत्सायाम् – कुगतिं लभते

३.४.२६.३ ईषदर्थे – कुमतिर्जनः ।

**३.४.२७ खलुशब्दस्योदाहरणानि प्र.२९१२, (३।३।२५५) ।**

खलतीति विग्रहे 'खल सञ्चये' (भ्वा.प.से.५८५) इति धातोः बाहुलकादुप्रत्यये खल्विति । अयं शब्दः पाणिनीयव्याकरणस्य स्वरादिगणे पठितः ।

३.४.२७.१ निषेधे – अनाश्रवः पङ्क्तिलायां भुविद्रुतपदश्चलन् ।
स्खलितः पतितोऽसि त्वं रुदित्वा खलु वत्सक !।

३.४.२७.२ वाक्यालङ्कारे – एतत् खलु खलत्वं ते यत् परोक्षे विनिन्दसि ।

३.५.२७.३ जिज्ञासायाम् – भेषजं खलु जानासि प्रमेहामयनासनम् ।

३.४.२७.४ अनुनये – मुरलीं मे पुराऽऽच्छिन्ना प्रयच्छ खलु राधिके !।

**३.४.२८ चशब्दस्योदाहरणानि प्र.२८८४, (३।३।२४१) ।**

चन्दतीति विग्रहे 'चदि आह्लादे' (भ्वा.प.से.७०) इति धातोः 'अन्येष्वपि दृश्यते' ( वा.३।२।१०१) इति डप्रत्यये चेति । अयं शब्दः पाणिनीयव्याकरणस्य स्वरादिगणे पठितः ।

३.४.२८.१ अन्वाचये – याहि स्नानादिकृत्याय गत्वाभ्यर्चय भैरवम् ।
शाकानि च समादाय पथ्यान्यायाहि पण्डित र ।

अन्यतरस्यानुषङ्गिकत्वेनान्वयोऽन्वाचयोऽत्रासामर्थ्यात्समासो न भवति । अत्र भैरवपूजनं मुख्यता शाकानयनममुख्यतास्ति ।

३.४.२८.२ असमस्तसमाहारे – आराधनाय जगतां जहद् जनकनन्दिनीम् ।

जहौ दयां च स्नेहं च सौख्यं च रघुनन्दनः ॥

३.४.२८.३ समस्तसमाहारे – आराधनाय जगतां जहद् जनकनन्दिनीम् ।

जहौ दयास्नेहसौख्यं युगपद्रघुनन्दनः ॥

तिरोहितावयवगतसंख्यः समूहः समाहारः । अत्र 'चार्थे द्वन्द्वः' (पा.२।२।२९) इति द्वन्द्वसमासो भवति ।

३.४.२८.४ इतरेतरयोगे – अन्तरायैरर्दितानां स्मरतां भक्तिभावतः ।

देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः ॥

मिलितानां परस्परापेक्षाणामुद्भूतावयाभेदसमूहरूपाणामेकधर्मावच्छिन्नेऽन्वय इतरेतरयोगोऽत्रापि 'चार्थे द्वन्द्वः' (पा.२।२।२९) इति द्वन्द्वसमासो भवति ।

३.४.२८.५समुच्चये – सत्यं च धर्मं च पराक्रमं च भूतानुकम्पां च सुभाषितं च ।

द्विजातिदेवातिथिपूजनं च पन्थानमाहुस्त्रिदिवस्य सन्तः[३५४]परस्परनिरपेक्षस्या-

नेकस्यैकस्मिन्नन्वयः समुच्चयोऽत्रासामर्थात्समासो न भवति ।

**३.४.२९ जोषंशब्दस्योदाहरणे प्र.२९०४, (३।३।२५१) ।**

जुष्यत इति विग्रहे 'जुष परितर्पणे' (चु.उ.से.१९७६) इति धातोः बाहुलकादम्प्रत्यये गुणे जोषमिति । अयं शब्दः पाणिनीयव्याकरणस्य स्वरादिगणे पठितः ।

३.४.२९.१ तूष्णीमर्थे – जोषमास्स्व न जानीषे वृतान्तमिदमादितः ।

३.४.२९.२ सुखार्थे – जोषं ज्यौत्नीषु रात्रीषु विरहन्ति विलासिनः ।

**३.४.३० तावत्शब्दस्योदाहरणानि प्र.२८९५, (३।३।२४६) ।**

तत्परिमाणमस्येति विग्रहे 'यत्तदेतेभ्यः परिमाणे वतुप्' (पा.५।२।३९)इति वतुप्प्रत्यये तत् वदिति जाते 'आ सर्वनाम्नः' (पा.६।३।९१) इत्यात्वे सवर्णदीर्घे तावदिति । अयं शब्दः पाणिनीयव्याकरणस्य स्वरादिगणे पठितः ।

३.४.३०.१ शाकल्ये – यावद्देहि त्वं बुभुक्षावतेऽस्मै तावद्भुञ्जीतायमद्यैव दीनः ।

३.४.३०.२ अवधौ – प्राहुः प्राज्ञाः पादपांशप्रबुद्धाः शाखां तावत् मूलदेशात्प्रकाण्डम् ।

---

[३५४]वाल्मीकिः, ***वाल्मीकीयरामायणम्*** (अयोध्याकाण्डः सर्गः ३१
), गोरखपुर : गीताप्रेस, वि.सं.२०४५, पृ.४६८ ।

३.४.३०.३ माने – तावत्सुवर्णमप्यस्ति यावद्रजतमस्ति मे ।

३.४.३०.४ अवधारणे – इदं तावत् सुरुचिरं वचनं तावकं सखे !

**३.४.३१ तिरःशब्दस्योदाहरणे प्र.२९१५, (३।३।२५६) ।**

तरतीति विग्रहे 'तॄ प्लवनतरणयोः' (भ्वा.प.से.१०३८) इति धातोः 'सर्वधातुभ्य असुन्' (उ.४।१८९) इत्यसुन्प्रत्यये 'क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते' इति गुणविषय इरादेशे 'तिरः' इति ।अयं शब्दः पाणिनीयव्याकरणस्य स्वरादिगणे पठितः ।

३.४.३१.१ अन्तर्धौ – तिरो बभूव तिमिरम्,

३.४.३१.२ तिर्यगर्थे – तिर्यञ्चोऽपि समुत्थिताः ।

**३.४.३२ तुशब्दस्योदाहरणेप्र.२८८६, (३।३।२४२) ।**

तुदतीति विग्रहे 'तुद व्यथने' (तु.उ.अ.१६६५) इति धातोः 'मितद्र्वादिभ्य उपसंख्यानम्' (वा.३.२.८०) इति डुप्रत्यये टिलोपे त्विति ।

३.४.३२.१ भेदे – अयं तु बालोऽपि भवन् चापलं नावलम्बते ।

३.४.३२.२ अवधारणे – अचापलं तु विद्वत्तानिदानं ब्रुवते बुधाः ।

**३.४.३३ धिक्शब्दस्योदाहरणेप्र.२८८३, (३।३।२४०) ।**

धक्कयतीति विग्रहे 'धक्क नाशने' (चु.प.से.१७१४) इति धातोः बाहुलकाड्डिक्प्रत्यये टिलोपे धिगिति ।

३.४.३३.१ भर्त्सनायाम् – धिक् दस्यो ! तिष्ठ हन्मि त्वामुपलब्धोऽसि कोशगः ।

३.४.३३.२ निन्दायाम् – धिक् त्वां बलीयानपि सन् दुर्बलानेव बाधसे ।

**३.४.३४. ननुशब्दस्योदाहरणे प्र.२८९९, (३।३।२४८) ।**

न नुदतीति विग्रहे 'णुद प्रेरणे' (तु.उ.अ.१३६६) इति धातोः 'डुप्रकरणे मितद्र्वादिभ्य उपसंख्यानम्' (वा.३।२।१८०) इति डुप्रत्यये ननु सिद्धम् ।

३.४.३४.१ प्रश्ने – विहाय मातरं वृद्धां ननु गच्छसि पुत्रक !

३.४.३४.२ अवधारणे (निश्चये) – इयं त्वया परित्यक्ता वृद्धा संस्थास्यते ननु ।

**३.४.३५. नानाशब्दस्योदाहरणे प्र.२८९७, (३।३।२४७) ।**

न सहेति विग्रहे 'विनञ्भ्यां नानाञौ न सह' (पा.५।२।२७) इति नञो नाञ्प्रत्यये आदिवृद्धिः । अयं शब्दः पाणिनीयव्याकरणस्य स्वरादिगणे पठितः ।

३.४.३५.१ अनेके – नानाविधानि शास्त्राणि जानानोऽगाधधीरयम् ।

३.४.३५.२ उभये – ब्रूते नानागुणं (स्पर्शशब्दवान्) वायुं वेदान्ती विद्वदग्रणीः ॥

**३.४.३६ नामशब्दस्योदाहरणानि प्र.२९०५, .(३।३।२५१) ।**

नामयतीति विग्रहे 'णम प्रह्वत्वे शब्दे च' (भ्वा.प.अ.१०५०) इति धातोः ण्यन्तात् 'अन्येष्वपि दृश्यते' (पा.३।२।१०१) इति डप्रत्यये नामेति ।

३.४.३६.१ प्रसिद्धौ – हिमालयो नाम नगाधिराजः ।

३.४.३६.२ संभावनायाम् – युद्धं संपत्स्यते नाम ? ।

३.४.३६.३ कोधे – हन्तुं नाम भटान् दुष्टोऽसन्निकृष्टे मयि स्थिते ।

३.४.३६.४ उपगमे – ममापि नाम रिपवो दिग्दन्ताबलमर्दिनः ।

३.४.३६.५ निन्दायाम् – धार्मिकान् वशमानेतुं धनं नाम प्रदित्ससि ।

**३.४.३७ निःशब्दस्योदाहरणे प्र.२९०८, (३।३।२५३) ।**

नृणातीति विग्रहे 'नॄ नये' (क्र्या.प.से.१५१५) इति धातोः 'अन्येभ्योऽपि दृश्यते' ( पा.३।२।१७८) इति सूत्रेण क्विप्प्रत्यये सर्वापहारलोपे 'ॠत इद्धातोः' (पा७।१।१००) इतीत्वे निरिति ।

३.४.३७.१ निश्चये – स सर्वमङ्गलमयः समयः किल निर्गतः ।

३.४.३७.२ निषेधे – निर्धनो हि निरुत्साहो निरालम्बश्च जायते ।

**३.४.३८ नुशब्दस्योदाहरणानिप्र.२८९८, (३।३।२४८) ।**

नुदतीति विग्रहे 'णुद प्रेरणे' (तु.उ.अ.१३६६) इति धातोः 'डुप्रकरणे मितद्र्वादिभ्य उपसंख्यानम्' (वा.३।२।१८०) इति डुप्रत्यये नु सिद्धम् । अयं शब्दः पाणिनीयव्याकरणस्य स्वरादिगणे पठितः ।

३.४.३८.१ पृच्छायाम् (प्रश्ने) – अहं व्रजेयं नु ?

३.४.३८.२ विकल्पे – भवान् विलोकयेदहिर्नु रज्जुर्नु विलोक्यते पुरः

३.४.३८.३ अनुज्ञायाम् (आज्ञायाम्) – खनित्रं पिटकं दात्रं ननु गच्छ समाहर ।

३.४.३८.४ अनुनये – पठ ननु पठ वत्स ! सत्समाजे वदनमुज्ज्वलय मे मुदञ्च यच्छ ।

३.४.३८.५ संबोधने – ननु लक्ष्मण ! वैदेहीं विहाय त्वं समागतः ।

**३.४.३९ नूनंशब्दस्योदाहरणे प्र.२९०३, (३।३।२५०) ।**

नुवा = स्तुत्या नमतीति विग्रहे 'णम प्रह्वत्वे शब्दे च' (भ्वा.प.अ.१०५०) इति धातोः 'अन्येभ्योऽपि दृश्यन्ते' (पा.३।२।७५)इति सूत्रेण विच्प्रत्यये सर्वापहारलोपे नूनमिति ।

३.४.३९.१ तर्के – नूनं हनूमानायतः श्रूयते गर्जनध्वनिः ।

३.४.३९.२ निश्चये – द्रुतप्रसर्पणे वायुर्नूनं न्यूनोऽस्ति चेतसः ।

**३.४.४० पश्चात्शब्दस्योदारणे प्र.२८८८, (३।३।२४३) ।**

अपरस्मिन्निति विग्रहे 'पश्चात्' (५।३।३२)इत्यपरस्य पश्चभाव आतिश्च प्रत्ययनिपातिते पश्चादिति ।

३.४.४०.१ प्रतीच्याम् – पश्चादस्तगतो भास्वान् ।

३.४.४०.२ चरमे – पश्चात्प्राप्तोऽसि किं ददे ?

**३.४.४१ पुनःशब्दस्योदाहरणे प्र.२९०८, (३।३।२५३) ।**

पनत इति विग्रहे 'पन व्यवहारे स्तुतौ च' (भ्वा.आ.से.४७०) इति धातोः बाहुलकादरप्रत्ययेऽकारस्योत्वे पुनरिति । अयं शब्दः पाणिनीयव्याकरणस्य स्वरादिगणे पठितः ।

३.४.४१.१ अप्रथमे – पुनर्जल्पसि जाल्म ! त्वं वार्यमाणः सुहृज्जनैः ।

३.४.४१.२ भेदे – मानमर्हति सर्वोऽपि किं पुनः पृथिवीपतिः ।

**३.४.४२ पुरस्तात्शब्दस्योदाहरणानि प्र.२८९४, (३।३।२४६) ।**

पूर्वस्मिन्निति विग्रहे 'दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः' (५।३।२७)इत्यस्तातिप्रत्यये 'अस्ताति च' (५।३।४०) इति पुरादेशे पुरस्तादिति ।

३.४.४२.१ प्राच्याम् – पुरस्ताद् भासते भानुः,

३.४.४२.२ प्रथमे – पुरस्ताद् भुञ्जतेऽर्भकाः ।

३.४.४२.४ पुरार्थे – मनः पुरस्तादायान्तं सखायं वीक्ष्य मोदते ॥

**३.४.४३ पुराशब्दस्योदाहरणानि प्र.२९०९, (३।३।२५३) ।**

पुरतीति विग्रहे 'पुर अग्रगमने' (तु.प.से.१४३३) इति धातोः बाहुलकत् काप्रत्यये पुरेति । अयं शब्दः पाणिनीयव्याकरणस्य स्वरादिगणे पठितः ।

३.४.४३.१ प्रबन्धे – प्राचः कालात् प्रचलिता रीतिरेषा पुरातनी ।

३.४.४३.२ अतीते – वृद्धेभ्यश्च युवभ्यश्चाऽभोज्यन्त शिशवः पुरा ।

३.४.४३.३ चिरातीते – पुरा दसरथो नाम बभूव पृथिवीपतिः ।

३.४.४३.४ निकटभविष्ये – सिन्धो ! न चेद्दिशसि वर्त्म, विशोषितं त्वां पादैः पुरा तरति वानरवाहिनीयम् ।

**३.४.४४ प्रतिशब्दस्योदाहरणानि प्र.२८९२, (३।३।२४५) ।**

प्रातीति विग्रहे 'प्रा पूरणे' (अ.प.अ.११३७) इति धातोः बाहुलकाड्डुतिप्रत्यये प्रतीति सिद्धम् ।

३.४.४४.१ प्रतिनिध्यर्थे – प्रजानुरञ्जनपरो राजाकल्पद्रुमात् प्रति ।

अनुरक्तः प्रजावर्गः कामधेनुव्रजात् प्रति ।[३५५]

३.४.४४.२ वीप्सायाम् – गेहं गेहं प्रति प्रीता गायन्ति सुयशः प्रजाः ।

प्रजाः प्रजाः प्रति पुरा धर्म आसीत्सनातनः । [३५६]

३.४.४४.३ लक्षणे – कलाबलादुदयते श्रीः प्रतीचीं दिशं प्रति ।

व्यादायाऽऽननमभ्येति दुर्भिक्षं भारतं प्रति ।

३.४.४४.४ इत्थंभूताख्याने – प्राकृता अपि पाश्चात्या अभूवन् प्रकृतिं प्रति ।

भारतीया अपि पुनर्नाभूवन् भारतीं प्रति ।

३.४.४४.५ भागे – हरिं प्रति श्रीः, सुरभिर्मुनिन्प्रति, द्रुमः स कल्पोपपदः सुरान् प्रति ।

स कालकूटः किल कृत्तिवाससं प्रति, प्रवृत्तेऽम्बुधिमन्थने सति ॥

३.४.४४.६ प्रतिदाने – माषेभ्यः प्रतियच्छन्ति तिलाँस्तेमनकाङ्क्षिणः ।

तिलेभ्यः प्रतियच्छन्ति माषाँस्तर्पणकाङ्क्षिणः ॥

**३.४.४५ प्रादुःशब्दस्योदाहरणे प्र.२९१४, (३।३।२५६) ।**

प्रान्दतीति विग्रहे प्रोपसर्गात्'अदि बन्धने' (भ्वा.प.से.६३) इति धातोः 'इदितो नुम् धातोः' पा.७।१।५८) इति नुमि बाहुलकादुस्प्रत्यये प्रादुरिति ।[३५७]

३.४.४५.१ नाम्नि – रामः प्रादुर्बभूवेति ननन्दुर्मुनयो वने ।

३.४.४५.२ प्राकाश्ये – प्रादुरासीत्प्रभा भानोर्विनष्टं गहनं तमः ।

**३.४.४६ मिथःशब्दस्योदाहरणे प्र.२९१४, (३।३।२५६) ।**

मेथतीति विग्रहे 'मेथृ मेधाहिंसनयोः संगमे च' (भ्वा.उ.से.९३०) इति धातोः 'सर्वधातुभ्य असुन्' (उ.४।१८९) इत्यसुन्प्रत्यये 'पृषोदरादीनि यथोपदिष्टम्' (पा.६।३।१०९) इति ह्रस्वे 'मिथः' इति । अयं शब्दः पाणिनीयव्याकरणस्य स्वरादिगणे पठितः ।

३.४.४६.१ परस्परार्थे – सतीर्थ्या मिथो मित्रतामाश्रयन्ताम् ।

३.४.४६.२ रहसि – शान्ता मिथः समासीना मन्त्रयन्ते महीभुजः ।

---

[३५५]अत्र 'प्रतिः प्रतिनिधिप्रतिदानयोः' (पा.१।४।९२) इति कर्मप्रवचनीयसंज्ञायां 'प्रतिनिधिप्रतिदाने च यस्मात्' ( पा.२।३।११) इति पञ्चमीविभक्तिः ।

[३५६]अत्र 'नित्यवीप्सयोः' (पा.८।१।४) इति द्वित्वे 'लक्षणत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः' (पा.१।४।९०) इति कर्मप्रवचनीयसंज्ञायां 'कर्मप्रवचनीययुक्ते द्वितीया' (पा.२।३।८) इति द्वितीयाविभक्तिः ।

[३५७] दीक्षितः भानुजि,***अमरकोशः*** (सुधाटीका ३.३.२५६), वाराणसी : चौखम्बा विद्याभवन, सन्.२०११, पृ.२४२ ।

**३.४.४७ यावत्शब्दस्योदाहरणानि प्र.२८९५, (३।३।२४६) ।**

यत्परिमाणमस्येति विग्रहे 'यत्तदेतेभ्यः परिमाणे वतुप्' (पा.५।२।३९)इति वतुप्प्रत्यये यत् वदिति जाते 'आ सर्वनाम्नः' (पा.६।२।९१) इत्यात्वे सवर्णदीर्घे यावानिति । अयं शब्दः पाणिनीयव्याकरणस्य स्वरादिगणे पठितः ।

३.४.४७.१ शाकल्ये – यावद्देहि त्वं बुभुक्षावतेऽस्मै तावद्भुञ्जीतायमद्यैव दीनः ।

३.४.४७.२ अवधौ – प्राहुः प्राज्ञाः पादपांशप्रबुद्धाः शाखां यावत् मूलदेशात्प्रकाण्डम् ।

३.४.४७.३ माने – तावत्सुवर्णमप्यस्ति यावद्रजतमस्ति मे ।

३.४.४७.४ अवधारणे – इदं तावत् सुरुचिरं वचनं तावकं सखे !

**३.४.४८ वतशब्दस्योदाहरणानि प्र.२८९०, (३।३।२४४) ।**

वयते स्मेति विग्रहे 'वय गतौ' (भ्वा.आ.से.५०९) इति धातोः 'गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च' (३।४।७२) इति क्तप्रत्यये नेट् वतेति सिद्धम् । 'वत खेदेऽनुकम्पायां हर्षे संबोधनऽद्भुते ।' इत्योष्ठादिः ।[३५८]

३.४.४८.१ खेदे – वत ! (बत ! ) स्वानां विपत्पाते मुखं नादर्शयं निजम् ।

३.४.४८.२ अनुकम्पायाम् – संतोषमादत्तं वतोज्झितं जनैः पटच्चरं कच्चरमेषदुर्गति ।

३.४.४८.३ सन्तोषे – वत ! पुत्रैश्च पौत्रैश्च संगतोऽस्मि निरामयैः ।

३.४.४८.४ विस्मये – वियता वत ! यान्ति निर्जरा इव पश्याद्य यथेप्सितं नराः ।

३.४.४८.५ आमन्त्रणे – वत ! सखि ! कियदेतत्पश्य वित्तं मदीयम् ।

**३.४.४९ वाशब्दस्योदाहरणे प्र.२९०१, (३।३।२४९) ।**

वातीति विग्रहे 'वा गतिगन्धनयोः' (अ.प.अ.११२६) इति धातोः 'अन्येभ्योऽपि दृश्यते' ( पा.३।२।१७८) इति सूत्रेण क्विप्प्रत्यये वेति ।अयं शब्दः पाणिनीयव्याकरणस्य स्वरादिगणे पठितः ।

३.४.४९.१ उपमायाम् – प्रतप्तलोहपिण्डो वा भानुः कुज्झटिकावृतः ।

३.४.४९.२ विकल्पे – उमेशं वा रमेशं वा भजेशं वान्छता हृदा ।

**३.४.५० वृथाशब्दस्योदाहरणे प्र.२८९७, (३।३।२४७) ।**

वृणोतीति विग्रहे 'वृञ् वरणे' (स्वा.उ.से.१३३४) इति धातोः बाहुलकात्थाक् ।अयं शब्दः पाणिनीयव्याकरणस्य स्वरादिगणे पठितः ।

---

[३५८] पूर्ववत् ।

३.४.५०.१ निरर्थके – अनिर्लोडितकार्यस्य वाग्जालं वाग्मिनो वृथा ।

३.४.५०.२ अविधौ – यथेष्टं फलितुं नेष्टे वृथादानं हि भूर्यपि ।

**३.४.५१ शश्वत्शब्दस्योदाहरणानि प्र.२८८९, (३।३।२४३) ।**

शशतीति विग्रहे 'शश प्लुतगतौ' (भ्वा.प.से.७७२) इति धातोः बाहुलकाद्वत्प्रत्यये शश्वदिति ।अयं शब्दः पाणिनीयव्याकरणस्य स्वरादिगणे पठितः ।

३.४.५१.१ पुनरर्थे – शश्वत् स्मृत्वा शङ्करं श्रेयसोऽर्थे,

३.४.५१.२ सहार्थे – शश्वद्याम द्रष्टुमुत्सृष्टकार्याः ।

**३.४.५२ सकृत्शब्दस्योदाहरणे प्र.२८८७, (३।३।२४२) ।**

एकवारमिति विग्रहे 'एकस्य सकृच्च' (५।४।१९) इति सुच्प्रत्यये सकृदादेशे सकृत् स् इत्यवस्थायां 'संयोगान्तस्य लोपः' (८।२।२३) इति सलोपे सकृदिति ।

३.४.५२.१ सहार्थे – सकृद्गच्छन्ति शिशवः कक्षविन्यस्तपुस्तकाः ।

३.४.५२.२. एकवारे – सकृज्जल्पन्ति राजानः सकृत्कन्या प्रदीयते ।[३५९]

**३.४.५३ समयाशब्दस्योदाहरणे प्र.२९०७, (३।३।२५२) ।**

सम्पूर्वात् 'इण् गतौ' (अ.प.अ.११२०) इति धातोः 'आः समिण्निकसिभ्याम्' (उ.४।१३८) इति आप्रत्यये गुणेऽयादेशे गणपाठादव्ययं समया सिद्धम् ।अयं शब्दः पाणिनीयव्याकरणस्य स्वरादिगणे पठितः ।

३.४.५३.१ अन्तिके – नद्यस्ति समया ग्रामम्,

३.४.५३.२ मध्ये – तदद्वयं समया मठः ।

**३.४.५४ साक्षात्शब्दस्योदाहरणे प्र.२८८९, (३।३।२४३) ।**

सहाक्षेण साक्षः । साक्षमततीति विग्रहे 'अत सातत्यगमने' (भ्वा.प.से.३८) इति धातोः 'अन्येभ्योऽपि दृश्यते' (३।२।१७८) इति क्विप्प्रत्यये सवर्णदीर्घे साक्षादिति ।

३.४.५४.१ प्रत्यक्षे – साक्षात्कार्यः केशिकंसादिहन्ता,

३.४.५४.२ तुल्ये – साक्षात्कल्पः सोऽयमायाति कालः ।

**३.४.५५ सामिशब्दस्योदाहरणे प्र.२९०१, (३।३।२४९) ।**

सामयतीति विग्रहे 'साम सान्त्वप्रयोगे' (चु.उ.से.२०२४) इति धातोः 'अच इः' (उ.४।१३८) इति इप्रत्यये सामि सिद्धम् ।अयं शब्दः पाणिनीयव्याकरणस्य स्वरादिगणे पठितः ।

३.४.५५.१ अर्धे – यामि यामि शयनाय मुञ्च मां सामि सामि कुरु निर्जितं धनम् ।

---

[३५९] आचार्यः नारायणः, ***सुभाषितरत्नभाण्डागारम्***, दिल्ली : मुन्सीराम मनोहरलाल, सन् १९५२, पृ.३७७ ।

३.४.५५.२ जुगुप्सिते – मामिह स्थितमवेक्ष्य ताडयेत् सामिकर्मनिरतं क्रुधा गुरुः ।

**३.४.५६ स्वःशब्दस्योदाहरणे प्र.२९११, (३।३।२५४) ।**

स्वरतीति विग्रहे 'स्वृ शब्दोपतापयोः' (भ्वा.प.अ.९९८) इति धातोः 'अन्येभ्योऽपि दृश्यन्ते' (पा.३।२।७५)इति सूत्रेण विच्प्रत्यये सर्वापहारलोपे गुणे स्वरिति। अयं शब्दः पाणिनीयव्याकरणस्य स्वरादिगणे पठितः ।

३.४.५६.१ स्वर्गे – स्वः प्रयाति खलु पुण्यवान् जनः ।

३.४.५६.२ परलोके – स्वर्गतो जरया जीर्णो नास्तिकः स परेऽहनि ।

**३.४.५७ स्वस्तिशब्दस्योदाहरणानि प्र.२८८५, (३।३।२४१) ।**

स्वसतीति विग्रहे 'अस गतिदीप्यादानेषु' (भ्वा.उ.से.९५०) इति धातोः 'क्तिच्क्तौ च संज्ञायाम्' (३।३।१७४) इति बाहुलकाक्तिच्प्रत्यये स्वस्ति रूपं सिद्धम् ।अयं शब्दः पाणिनीयव्याकरणस्य स्वरादिगणे पठितः ।

३.४.५७.१ आशिषि – स्वस्ति स्याद्भूमिपालाय ।

३.४.५७.२ कुशले – स्वस्तिमान् स्यात् प्रजाजनः ।

३.४.५७.३ पुण्ये – स्वस्तिकृत् सुखमाप्नोतु ।

३.४.५७.४ मङ्गले – स्वस्तिगायन्तु बालिकाः ।

**३.४.५८ स्वित्शब्दस्योदाहरणेप्र.२८८६, (३।३।२४२) ।**

सुष्ठु एतीति विग्रहे 'इण् गतौ' (अ.प.अ.११२०) इति धातोः 'क्विप् च' (३।२।७६) इति क्विपि 'ह्रस्वस्य पिति कृति तुक्' (६।१।७१) इति तुकागमे स्विदिति ।

३.४.५८.१ प्रश्ने – गमिष्यसि स्विद् आषाढ्यां गुरुपूजनकर्मणे ।

३.४.५८.२ वितर्के – स्विद् ब्राह्मणोऽसि भो ! भाले भसितेन विभासितः ।

**३.४.५९ हन्तशब्दस्योदाहरणानि प्र.२८९१, (३।३।२४४) ।**

हन्तीति विग्रहे 'हन हिंसागत्योः' (अ.प.अ.१०८२) इति धातोः बाहुलकात्तो हन्तेति ।अयं शब्दः पाणिनीयव्याकरणस्य स्वरादिगणे पठितः ।

३.४.५९.१ हर्षे – हन्त ! प्रत्यागतः श्रीमान् श्रीरामः सप्रियानुजः ।

३.४.५९.२ अनुकम्पायाम् – हन्त ! हन्त ! निहन्यते दुर्जनैरकृतागसः ।

३.४.५९.३ वाक्यारम्भे – हन्त ते कथयिष्यामि जानकीनाथसद्गुणान् ।

३.४.५९.४ विषादे – हन्त न स्फुरति प्रज्ञा दुर्भिक्षव्याकुलं मम ।

**३.४.६० हाशब्दस्योदाहरणानि प्र.२९१५, (३।३।२५६) ।**

जहातीति विग्रहे 'ओहाक् त्यागे' (जु.प.अ.११६५) इति धातोः 'अन्येभ्योऽपि दृश्यते' (पा.३।२।१७८) इति सूत्रेण क्विप्प्रत्यये सर्वापहारलोपे हेति ।

३.४.६०.१ विषादे – हाहाकारकरं नैतद्दुर्भिक्षं हा ! प्रशाम्यति ।

३.४.६०.२ शुचि (शोके) – हा ! रन्तिदेव ! हा ! कर्ण ! हा ! शिवे ! हा ! युधिष्ठिर र ।

३.४.६०.३ अर्तौ (पीडायाम्) – हा ! निशेयं कथं पौषी विषमा नियता मया ।

**३.४.६१ हिशब्दस्योदाहरणे प्र.२९१६, (३।३।२५७) ।**

हिनोतीति विग्रहे 'हि गतौ वृद्धौ च' (स्वा.प.अ.१३३८)इति धातोः 'अन्येभ्योऽपि दृश्यन्ते' (पा.३।२।७५)इति सूत्रेण विच्प्रत्यये सर्वापहारलोपे संज्ञापूर्वकत्वाद्गुणाभावे हीति ।

३.४.६१.१ हेतौ – अग्निस्तत्रास्त्यविछिन्ना धूमरेखा हि दृश्यते ।

३.४.६१.२ अवधारणे – न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ।

**३.४.६२ हुंशब्दस्योदाहरणे प्र.२९०७, (३।३।२५२) ।**

हूयत इति विग्रहे 'हु दानादानयोः' (जु.प.अ.११५८) इति धातोः बाहुलकान्मप्रत्ययेहुमिति ।

३.४.६२.१ वितर्के – हुं हनुमान् समायाति परीतः कपिकुञ्जरैः ।

३.४.६२.२ प्रश्ने – हुं गच्छसि ? प्रतीक्षस्व गच्छामि नयमामपि ।

उपर्युक्तेष्वव्ययशब्देषु स्वःपुनर्ज्योषंसमयावृथातिरःकंनानास्वस्त्यलंपुरामिथोऽथैते त्रयोदश शब्दाः स्वरादिगणे पठिता एवं चवैवंनूनंशश्वत्हन्तयावत्तावत्खलुकिलोथैकादश शब्दाश्चादिगणे पठिताः । पाणिनीयगणपाठस्य शब्दा उभयोर्मिलित्वा चतुर्विंशतिः सञ्जाताः । अन्ये शब्दा अमरेण स्थापिताः ।

## ३.४.६४ अध्यायनिष्कर्षः

अमरकोशस्य स्वयंबोधिनीटीकायां कुलचन्द्रेण प्रत्ता विविधाः टिप्पण्यः सन्ति । टीकाकारेण विविधशास्त्राणामुद्धरणानि दत्वा पादटिप्पणी पाठटिप्पणी च स्थापिते स्तः । केषाञ्चित् शब्दानां स्पष्टार्थं तथा केषाञ्चित् शब्दानामर्थप्रकाशार्थं टिप्पण्यः प्रदत्ताः । अत्रत्याष्टिप्पण्यः कण्ठस्थीकरणीया एव जिज्ञासुभिः ।

स्वयंबोधिनीटीकाकारेण कुलचन्द्रेण समस्तशब्दनिर्माणविधिर्दर्शितोऽस्ति । विविधदेवमनुष्यराक्षसादीनां नाम्नां समस्तशब्दसाधनप्रक्रिया प्रदर्शिता । तान् समस्तशब्दान् अधीत्य शब्दनिर्माणकला वर्धत एव ।

अस्यां टीकायां द्विरूपशब्दास्तथैव बहुरूपशब्दाश्च प्रत्ताः। कुत्रचिद् धातुभेदेन कुत्रचित् प्रत्ययभेदेन कुत्रचित् विकल्पेन कुत्रचित् रेफलकारादिभेदेन बहुरूपशब्दाः स्थापिताः सन्ति। ते शब्दा व्याकरणद्वारा सिद्धा भवन्ति।

कुलचन्द्रेण टीकायां शब्दानामुदाहरणान्यपि दत्तानि सन्ति । प्रायः अव्ययशब्दानामेवोदाहरणानि दृश्यन्ते। दुर्बोधशब्दानामुदाहरणैरर्थो स्पष्टीभवति। एतेषूदाहरणेषु कानिचनोदाहरणानि शास्त्रान्तरात् कानिचनोदाहरणानि स्वयं रचितानि सन्ति। एताभिर्व्याख्याकलाभिर्ग्रन्थो बहूपयुक्तो विराजते।

# चतुर्थोऽध्यायः

# ४.स्वयंबोधिनीटीकाया विशेषतान्यूनतयोः प्रदर्शनम्

## विषयप्रवेशः

अस्मिन्नध्याये स्वयंबोधिनीटीकाया विशेषताया न्यूनतायाश्च प्रदर्शनं भवति । विवेचनक्रमे स्वयंबोधिनीटीकायां स्थिता उपलब्धयस्तथैव न्यूनताश्चोपस्थाप्यन्ते ।

## ४.१ स्वयंबोधिनीटीकाया विशेषता

अस्मिन्प्रकरणेऽमरकोशपरिशेषस्य रूपावल्याश्च शब्दानामनुशीलनं क्रियते ।

### ४.१.१ अमरकोशपरिशेषः (परिशेषकोशः)

### लिङ्गानुशासनदृष्ट्या पर्यालोचनम्

अमरकोशपरिशेषः कुलचन्द्रप्रणीतग्रन्थोऽस्ति । अयं कोशोऽमरकोशस्याङ्गत्वेन चतुर्थकाण्डरूपेण बालकृष्णाचार्येण प्रकाशितः । व्यावहारिककोशश्चास्यापरं नाम । अस्मिन् परिशेषकोशेऽष्टाशित्युत्तरमेकशतं श्लोका अनुष्टुब्छन्दसि लिखिताः सन्ति । अयं कोशो भाषादृष्ट्यामरकोशवदेव । अस्य कोशस्य दर्शनेन कुलचन्द्रस्य वैयाकरणत्वं दृश्यते । व्यावहारिकशब्दानां ज्ञानार्थं तथामरकोशेऽप्रविष्टानां शब्दानां स्थापनार्थमयं रचितः । शास्त्रान्तरशब्दानां संकलय्य लिखितकोशो विद्वत्प्रियोऽस्ति । यद्यप्यमरकोशस्य शब्दा अत्र प्राप्यन्ते तथापि पौनरुक्त्यदोषो न भवतीति स्वयं लिखति ग्रन्थस्यान्ते ।

नाम्नां प्रसङ्गतः प्राप्तं तत्प्राचुर्याय दर्शितम् ।
क्वचित्क्वचिद्वर्तमानं पौनरुक्त्यं न दुष्यति ॥[३६०]

१९९३तमे वर्षे प्रकाशित इति स्वयं ग्रन्थान्ते लिखति लेखकः ।

बैक्रमाब्दे गुणालङ्कारभू(१९९३) मिते नाति विस्तरः ।
निर्माय परिशेषोऽयं कुलचन्द्रेण मुद्रितः ॥[३६१]

अमरकोशपरिशेषकोशः कुलचन्द्रस्य शिष्येण बालकृष्णाचार्येण बालकृष्णाश्रमीटीकासहितः प्रकाशितः । अस्य प्रकाशकः कुलचन्द्रगौतमस्य पुत्रो लक्ष्मीनाथगौतमोऽस्ति । अस्य द्वितीयपृष्ठे १९९३तमस्य प्रकाशितस्याधारे २०१७तमे वर्षे

---

[३६०] गौतमः कुलचन्दः, बालकृष्णाचार्य) अमरकोशपरिशेष (१९९३) यशोदापुस्तकालय वाराणसी पृ.३४८ ॥

[३६१]पूर्ववत् पृ.३४९ ।

प्रकाशितोऽस्ति । वाराणस्या न्यायालयेन सर्वाधिकारो लक्ष्मीनाथाय दत्तस्तस्माज्ज्ञायते कुलचन्द्रस्य टीकायां किमपि समासो व्यासो वा भवेदिति । परिशेषकोशस्य प्रणेत्रा कुलचन्द्रगौतमेन छात्रवर्गस्य हिताय रचना कृता ।

नामानि व्यवहार्याणां बोधयन् दिविषद्गिरा ।
छात्राणामुपयुक्तोऽयं परिशेषो विरच्यते ॥[३६२]

कोशस्य महत्त्वं दर्शयन्नन्यच्च लिखति गौतमो यथा –

निसर्गतीक्ष्णोऽपि भवन् कोशाऽभावान्मलीमसः ।
छात्रवर्गश्च खड्गश्चाऽनर्थकृत् सद्भिरुच्यते ॥[३६३]

अस्मिन् कोशे व्यावहारिकशब्दानां मौलिकरूपेण संग्रहोऽस्ति । अमरकोशपरिशेषकोशयोः काचित् समानता काचिदसमानताऽस्ति । यथा –

धान्यं व्रीहिः स्तम्बकरिः (अमरः)
धान्यं व्रीहिः स्तम्बकरिः शालिः कर्दमकादयः ।
हायनाः कलमाः षष्टिकादयो धान्यजातयः ॥ (कुलचन्द्रः)
शितशूकयवौ समौ (अमरः)
धान्यराजो यवस्तीक्ष्णशूकस्तुरगवल्लभः ।
शितशूकोऽक्षतो मेध्यः कञ्चुकी श्वेतशुङ्गकः ॥ (कुलचन्द्रः)

### ४.१.१.१. अक्षोटकः (पं.३१९७, श्लो.१०४)

अक्ष्णोतीति विग्रहे 'अक्षू व्याप्तौ सङ्घाते च' (भ्वा.प.से.६९८) इति धातोः बाहुलकादोटप्रत्ययस्तथा च 'संज्ञायां कन्' (पा.४।३।१४७) इति सूत्रेण स्वार्थे कन्प्रत्ययेऽक्षोटक इति ।'कोपधः' ( पा.लि.६१ ) इति पुंस्त्वम् । हाडे ओखर इति भाषायाम् ।

### ४.१.१.२. अङ्कोटम् (पं.३२११, श्लो.१११)

अङ्कयतीति विग्रहे 'अङ्क पदे लक्षणे च' (चु.उ.से.२०७७) इति धातोः बाहुलकादोटच्प्रत्यये (पारिजातकोशः) अङ्कोटमिति ।'फलजातिः' (पा.लि.१६२) इति क्लीबत्वम् । अङ्कोटवृक्षः पिस्तेको बोट इति (पारिजातकोशः) चिलगोजा ( अम्फी )इति भाषायाम् ।

---

[३६२] पूर्ववत् पृ.३१८ ।

[३६३] पूर्ववत् आमुखपृ.१ ।

### ४.१.१.३. अञ्जीरम् (पं.३१९०, श्लो.१०१)

अञ्जनमिति विग्रहे 'अञ्जु गतिपूजनयोः' (भ्वा.प.से.१९६) इति धातोः बाहुलकाद् भाव इञ्प्रत्यये (शब्दकल्पद्रुमः) स्त्रियां वा ङीप् च अञ्जी। अञ्जीं राति ददातीति विग्रहे 'आतोऽनुपसर्गे कः' (पा.३।२।३) इति कप्रत्यये 'आतो लोप इटि च' (६।४।६४) इत्याकारलोपे अञ्जीरमिति। 'फलजातिः' (पा.लि.१६२) इति क्लीबत्वम्।

### ४.१.२.४. अतसी (पं.३०११, श्क्लो.११)

अततीति विग्रहे 'अत सातत्यगमने' (भ्वा.प.से.३८) इति धातोः 'अत्यविचमितमिरभिलभिनभितपिपतिपनिपणिमहिभ्योऽसच्' (उ.३।११७) इति सूत्रेणासच् प्रत्यय अतस इति जाते 'षिद्गौरादिभ्यश्च' (पा.४।१।४१) इति सूत्रेण ङीषि आतसीति। 'ङ्याबूङन्तं चलं संस्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम्। आलस इति भाषायाम्।

### ४.१.१.५. अम्बष्ठा (पं.३०९४, श्लो.५३)

अम्बायां मातरि तिष्ठतीति विग्रहे अम्बापूर्वात् 'ष्ठा गतिनिवृत्तौ' (भ्वा.प.अ.९८४) इति धातोः 'सुपि स्थः' (पा.३।२।४) इति कप्रत्यये 'उपपदमतिङ्' (पा.२।२।२९) इत्युपपदसमासे 'आतो लोप इटि च' (पा.६।४।६४) इत्याकारलोपे अम्बस्थ इति जाते 'अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिपरमेबर्हिर्दिव्यग्निभ्यः स्थः' (पा.८।३।४१) इति ष्टुत्वे 'ङ्यापोः संज्ञाच्छन्दसोर्बहुलम्' (पा.६।३।६३) इति सूत्रेण ह्रस्वे स्त्रीत्वे टापि अम्बष्ठेति। [३६४] 'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम्। ठोटने, जुही चेति भाषायाम् ।थः' (पा.८।४।९७) इति सूत्रेण षत्वे 'ष्टुना

### ४.१.१.६. अम्भःफलम् (पं.३१४२, श्लो.७७)

अम्भ इव फलमिति विग्रहे 'उपमानानि सामान्यवचनैः' (पा.२।१।५५) इति सूत्रेण कर्मधारयसमासे अम्भःफलमिति। 'फलजातिः' ( पा.लि. १६२ ) इति क्लीबत्वम्। नासपाती इति भाषायाम्।

### ४.१.१.७. अम्लबीजम् (पं.३२४७, श्लो.१२९)

अम्लं च तत् बीजं चेति विग्रहे 'विशेषणं विशेष्येण बहुलम्' (पा.२।१।५७) इति सूत्रेण बहुव्रीहिसमासे अम्लबीजमिति। 'फलजातिः' ( पा.लि. १६२ ) इति क्लीबत्वम्। भकि अमिलो इति भाषायाम्।

---

[३६४] देवः राधाकान्तः, ***शब्दकल्पद्रुम,*** वाराणसी : चौखम्वा संस्कृत सिरीज आफिस, सं. २०२४।

**४.१.१.८. अम्लवेतसः (पं.३२०३, श्लो.१०७)**

अम्लश्चासौ वेतसश्च इति विग्रहे 'विशेषणं विशेष्येण बहुलम्' (पा.२।१।५७) इति सूत्रेण कर्मधारयसमासेऽम्लवेतस इति ।'सोपधः' ( पा.लि. ९६ ) इति पुंस्त्वम् । सङ्खत्रो इति भाषायाम् ।

**४.१.१.९. अहिफेनकम् (पं.३२८३, श्लो.१४८)**

अहेः फेनमिति विग्रहे 'षष्ठी' (पा.२।२।८) इति सूत्रेण तत्पुरुषसमासः । ततः अहिफेन इव प्रतिकृतिरिति विग्रहे 'इवे प्रतिकृतौ' (पा.५।३।९६) इति सूत्रेण स्वार्थे कन्प्रत्यये अहिफेनकमिति ।'फलजातिः' ( पा.लि. १६२ ) इति क्लीबत्वम् । अफीम इति भाषायाम् ।

**४.१.१.१०. आढकी (पं.३००८, श्लो.१०)**

ढौकत इति विग्रहे आङ् पूर्वात् 'ढौकृ गतौ' (भ्वा.आ.से.१०१) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.सू.३।१।१३४) इति सूत्रेणाच्प्रत्ययेऽनुबन्धलोपे गौरादित्वात् 'षिद्गौरादिभ्यश्च' (पा.४।१।४१ ) इति सूत्रेण ङीषि आढकीति ।'ङ्याबूङन्तं चलं संस्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम् । रहर इति भाषायाम् ।

**४.१.१.११. आर्द्रकम् (पं.३१०२, श्लो.५७)**

आर्द्रायां जातमिति विग्रहे 'पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद् वुन् (पा.४।३।२८) इति सूत्रेण वुन्प्रत्यये 'युवोरनाकौ' (पा.७।१।७) इति सूत्रेणाकादेशे आर्द्रकमिति ।'फलजातिः' ( पा.लि. १६२ ) इति क्लीबत्वम् । 'व्यञ्जनान्यनुलेपनम्' ( अ.लि.२३ ) इति च क्लीबत्वम् । अदुवा इति भाषायाम् ।

**४.१.१.१२. आमलकी (पं.३२१७, श्लो.११४)**

आमलत इति विग्रहे 'मल धारणे' (भ्वा.आ.से.५२७) इति धातोः 'शिल्पिसंज्ञयोः क्वुन्' (उ. २।३२) इति सूत्रेण क्वुन्प्रत्यये स्त्रीत्वविवक्षायां 'जातेरस्त्रीविषयादयोपधात्' (पा.४।१।६३) इति सूत्रेण ङीषि आमलकीति । 'ङ्याबूङन्तं चलं स्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम् । अमला इति भाषायाम्

**४.१.१.१३. आम्रः (पं.३१२८, श्लो.७०)**

अम्यत इति विग्रहे 'अम गतौ' (भ्वा.प.से.४९८) इति धातोः 'अमितम्योर्दीर्घश्च ' (उ.२।१६) इति सूत्रेण रक्प्रत्यये दीर्घे च कृते आम्र इति ।'रोपधः ' ( पा.लि. ८९ ) इति पुंस्त्वम् । आँप इति भाषायाम् ।

**४.१.१.१४. आम्रातकः (पं.३१३०, श्लो.७१)**

आम्रमततीति विग्रहे 'अत सातत्यगमने' (भ्वा.प.से.३८) इति धातोः 'कृञादिभ्यो वुन्' (उ.५।३५) इति सूत्रेण वुन्प्रत्यये 'युवोरनाकौ' (पा.सू.७१।१) इति सूत्रेणाकादेशे आम्रातक इति ।'कोपधः ' ( पा.लि. ६१ ) इति पुंस्त्वम् । अमारो इति भाषायाम् ।

**४.१.१.१५. आरुकम् (पं.३१५४, श्लो.८३)**

ऋच्छति अर्यते वेति विग्रहे 'ऋ गतिप्राणनयोः' (भ्वा.प.से.१००२) इति धातोः णिचि वृद्धौ आरि बाहुलकाद् ऊ प्रत्यये (शब्दकल्पद्रुमः) णिलोपे 'संज्ञायां कन्'(५।३।८७) इति स्वार्थे कन्प्रत्यये आरूकमिति । 'फलजातिः' .( पा.लि. १६२ ) इति क्लीबत्वम् । आरु इति भाषायाम् ।

**४.१.१.१६. आलुकम् (पं.३०७१, श्लो.४१)**

आलाति सर्वमिति विग्रह आङ्पूर्वात् 'ला आदाने दाने च' (अ.प.अ.११३४) इति धातोः बाहुलकात् डुप्रत्यये ।[३६५] आलु इति जाते, आलुशब्दात् 'संज्ञायां कन्' (पा.४।३।१४७) इति स्वार्थे कन्प्रत्यये आलुकमिति ।'फलजातिः' ( पा.लि. १६२ ) इति क्लीबत्वम् । 'व्यञ्जनान्यनुलेपनम्' ( अ.लि.२३ ) इति च क्लीबत्वम् । आलु इति भाषायाम् ।

**४.१.१.१७. आहारः (पं.३२६५, श्लो.१३९)**

आहरणमिति विग्रहे 'हृञ् हरणे' (भ्वा.उ.अ.९६५) इति धातोः 'हलश्च' (पा.३।३।१२१) इति घञ्प्रत्यये 'अचोऽञ्णिति' (पा.७।२।११५) इति वृद्धौ आहार इति । 'घञबन्तः' ( पा.लि. ३६ ) इति पुंस्त्वम् । खाना इति भाषायाम् ।

**४.१.१.१८. इक्षुः (पं.३२३४, श्लो.१२३)**

इष्यत इति विग्रहे 'इषु इच्छायाम्' (तु.प.से.१४३९) इति धातोः 'इषः क्सुः' ( उ.३।१५७) इति सूत्रेण क्सुप्रत्यये 'षढोः कः सि' (पा.८।२।४१) इति सूत्रेण कुत्वे 'आदेशप्रत्यययोः' (पा.८।३।५९) इति षत्वे 'ष्टुना ष्टुः' (पा.८।४।४१) इति ष्टुत्वे 'कषसंयोगे क्षः' इति नियमेन क्षत्वे इक्षुरिति । 'उकारान्तः' ( पा.लि. ५१ ) इति पुंस्त्वम् । उखु इति भाषायाम् ।

**४.१.१.१९. इङ्गुदी (पं.३२०१, श्लो.१०६)**

इङ्गनमिति विग्रहे 'इगि गतौ' (भ्वा.प.से.१५७) इति धातोः 'भावे' (पा.३।३।१८) इति सूत्रेण घञ्प्रत्ययेऽनुबन्धलोपे इङ्गः । इङ्गं द्यतीति विग्रहे 'दो अवखण्डने' (दि.प.अ.१२२३)

[३६५] देवः राधाकान्तः ***शब्दकल्पद्रुम,*** वाराणसी : चौखम्वा संस्कृत सिरीज आफिस, सं. २०२४ ।

इति धातोः 'आदेच उपदेशेऽशति' (पा.६।१।४५) इत्यात्वे 'आतोऽनुपसर्गे कः' (पा.३।२।३) इति कप्रत्यये 'पृषोदरादीनि यथोपदिष्टम् (पा.६।३।१०९) इति सूत्रेणोत्वे स्त्रीत्वविवक्षायां 'जातेरस्त्रीविषयादयोपधात्' (पा.४।१।६३) इति सूत्रेण ङीषि इङ्गुदीति। 'ङ्याबूङन्तं चलं सस्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम्। चिउरी इति भाषायाम्।

**४.१.१.२० उद्दालः (प.३०२२, श्लो.१७)**

उद्दालयतीति विग्रहे 'दल विशरणे' (भ्वा.प.से.५८८) इति धातोः 'हेतुमति च' ( पा.३।१।२६) इति सूत्रेण णिच्यनुबन्धलोपे 'अत उपधाया ' (पा.७।२।११६) इति सूत्रेण उपधावृद्धौ 'नन्दिग्रहिपचादिभ्योल्युणिन्यचः' (पा.३।१।१३४) इति सूत्रेणाच्यनुबन्धलोपे 'णेरनिटि' ( पा.६।४।५१) इति सूत्रेण णिलोपे उद्दाल इति।'घाजन्तश्च' ( पा.लि. ३७ ) इति पुंस्त्वम्। वनकोदो इति भाषायाम्।

**४.१.१.२१. एरण्ड (पं.३२०६, श्लो.१०९)**

आ ईरयति वायुमिति विग्रहे आङ्पूर्वात् 'ईर गतौ कम्पने च' (अ.आ.से१०८८) इति धातोः अस्मात् णिजन्तात् बाहुलकात् अण्डच्प्रत्यये (भानुजी) आद्गुणः (पा.६।१।८६ ) इति सूत्रेण गुणे एरण्ड इति। 'एरण्ड उरुबूकश्च रुचकश्चित्रकश्च सः।' (अमरः प्र.७८१ ) इति निर्देशात् पुंस्त्वम्। मेवाको बोट इति भाषायाम्।

**४.१.१.२२. एला (पं.३११७, ६४श्लो.)**

एलयतीति विग्रहे 'इल प्रेरणे' (चु.प.से.१७८७) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इति सूत्रेणाच्प्रत्यये 'पुगन्तलघूपधस्य च' (पा.७।३।८६) इति सूत्रेण लघूपधागुणे स्त्रीत्वविवक्षायां टापि एलेति सिद्ध्यति। पुनः एला एव इति विग्रहे 'प्रज्ञादिभ्यश्च' (पा.५।४।३८ ) इति सूत्रेण स्वार्थेऽण्प्रत्यये 'तद्धितेष्वचामादेः' (पा.७।२।११७) इति सूत्रेणादिवृद्धौ टापि ऐलेति।'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम्। अलैंची इति भाषायाम्।

**४.१.१.२३. ओदनम् (पं.३२५८, श्लो.१३५)**

उनत्तीति विग्रहे 'उन्दी क्लेदने' (रु.प.से.१५५१) इति धातोः 'उन्देर्नलोपश्च' ( उ.२।७६) इति सूत्रेण युच्प्रत्यये नलोपेऽनादेशे गुणे ओदनमिति। 'भिस्सा स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्री स दीदिविः।' ( अमरः प्र.१८६० ) इति निर्देशात् क्लीबत्वम्। भात इति भाषायाम्।

**४.१.१.२४. कङ्गुः (पं.३०२१, श्लो.१६)**

कमङ्गतीति विग्रहे 'अगि गतौ' (भ्वा.प.से.१५०) इति धातोः 'इदितो नुम् धातोः' (पा.७।१।५८) इति सूत्रेण नुम्प्रत्यये 'मृगय्वादयश्च' (उ.१।३७) इति सूत्रेण कुप्रत्यये 'शकन्ध्वादिषु पररूपं वाच्यम्' (वा.६।१।९४) इति पररूपे कङ्गुरिति ।'उकारान्तः' ( पा.लि. ५१) इति पुंस्त्वम् । कागुनु इति भाषायाम् ।

**४.१.१.२५. कट्फलम् (पं.३२०८, श्लो.११०)**

कटतीति विग्रहे 'कटे वर्षावरणयोः' (भ्वा.प.से.२०२) इति धातोः 'अन्येभ्योऽपि दृश्यते' (पा.३।२।१७८) इति सूत्रेण क्विप्प्रत्यये तस्य सर्वापहारिलोपे कट् । पुनः कट्फलमस्येति विग्रहे 'अनेकमन्यपदार्थे' (पा.२।२।२४) इति सूत्रेण बहुव्रीहिसमासे कट्फलमिति ।'फलजातिः' ( पा.लि. १६२) इति क्लीबत्वम् । काफल इति भाषायाम् ।

**४.१.१.२६. कटुवीरा (पं.३१०९, श्लो.६०)**

कट्वी चासौ वीरा चेति विग्रहे 'विशेषणं विशेष्येण बहुलम्' (पा.२।१।५७ ) इति सूत्रेण कर्मधारयसमासे 'पुंवत्कर्मधारयजातीयदेशीयेषु' (पा.६।३।४२) इति सूत्रेण पुंवद्भावे कटुवीरेति । 'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । खुर्सानी इति भाषायाम् ।

**४.१.१.२७. कदली (पं.३१३४, श्लो.७३)**

केन वायुना दल्यत इति विग्रहे 'दल विशरणे '(भ्वा.प.से.५८८) इति धातोः 'खनो घ च' (पा.३।३।१२५) इति सूत्रेण घप्रत्ययेऽनुबन्धलोपे कदल इति जाते गौरादित्वात् 'षिद्गौरादिभ्यश्च' (पा.४।१।४१ ) इति सूत्रेण ङीषि 'यस्येति च' (पा.६।४।१४८) इत्यकारलोपे कदलीति । 'ङ्याबूङन्तं चलं स्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम् । केरा इति भाषायाम् ।

**४.१.१.२८. कन्दकः (पं.३०७४, श्लो.४३)**

कन्दतीति विग्रहे 'कदि आह्वाने रोदने च' (भ्वा.प.से.७२) इति धातोः 'इदितो नुम् धातोः' (पा.७।१।५८) इति सूत्रेण नुम्यनुबन्धलोपे 'नन्दिग्रहिपचादिभ्योल्युणिन्यचः' (पा.३।१।१३४) इति सूत्रेणाच्प्रत्यये 'संज्ञायां कन्' (पा.४।३।१४७) इति स्वार्थे कन्प्रत्यये कन्दकः ।'घाजन्तश्च' ( पा.लि. ३७ ) इति पुंस्त्वम् । तरुल इति भाषायाम् ।

**४.१.१.२९. कपित्थः (पं.३१६२, श्लो.८७)**

कपयस्तिष्ठन्त्यत्रेति विग्रहे 'ष्ठा गतिनिवृत्तौ' (भ्वा.प.से.९९४) इति धातोः 'सुपि स्थः' (पा.३।२।४) इति सूत्रेण कप्रत्यये'कपि स्था अ' इति जाते 'आतो लोप इटि च' (पा.६।४।६४) इत्याकारलोपे 'पृषोदरादीनि यथोपदिष्टम्' (पा.६।३।१०४) इति सूत्रेण षकारस्य तकारे कपित्थः । 'थोपधः' ( पा.लि. ७०) इति पुंस्त्वम् । कैथ इति भाषायाम् ।

**४.१.१.३०. कर्कटी (पं.३०४२, श्लो.२७)**

करं कटतीति विग्रहे 'कटे वर्षावरणयोः' (भ्वा.प.से.२०२) इति धातोः 'सर्वधातुभ्य इन् '(उ.४।१८) इति सूत्रेण इन्प्रत्यये 'शकन्ध्वादिषु पररूपं वाच्यम्' (वा.६।१।१४) इति वार्तिकेन पररूपे ततः परं 'कृदिकारादक्तिनः' (ग.सू.४।१।४५) इति ङीषि कर्कटीति। 'ङ्याबूङन्तं चलं स्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम्। काँक्रा इति भाषायाम्।

**४.१.१.३१. कर्कन्धूः (पं.३१६८, श्लो.९०)**

कर्कं कण्कटं दधातीति विग्रहे 'डुधाञ् धारणपोषणयोः' (जु.उ.अ.११६७) इति धातोः 'अन्दूदृन्भूजम्बूकफेलुकर्कन्धूदिधिषु' (उ.१।९६) इति सूत्रेण निपातनाद् कर्कन्धूरित। 'मृत्युसीधुकर्कन्धुकिष्कुकण्डुरेणवः' ( पा.लि. १७३ ) इति स्त्रीत्वं पुंस्त्वञ्च । बयर इति भाषायाम्

**४.१.१.३२. कर्मकरः (पं.३१६४, श्लो.८८)**

कर्म करोतीति विग्रहे 'डुकृञ् करणे' (तु.प.से.१५६६) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इति सूत्रेणाच्यनुबन्धलोपे स्वादिकार्ये कर्मकर इति।'घाजन्तश्च' - पा.लि. ३७ ) इति पुंस्त्वम्। करमख (मधाने फल) इति भाषायामाम्।

**४.१.१.३३. कलम्बी (पं.३०३१, श्लो.२१)**

के जले लम्बत इति विग्रहे 'लवि शब्दे अवस्रंसने च' (भ्वा.आ.से.४०४) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यच' (पा.३।१।१३४) इति सूत्रेण अच्यनुबन्धलोपे 'षिद्गौरादिभ्यश्च' (पा.४।१।४१) इति सूत्रेण ङीषि कलम्बीति। 'ङ्याबूङन्तं चलं सस्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम्। करेमु शाक इति भाषायाम्।

**४.१.१.३४. कलायः (पं.३००५, श्लो.८)**

कलमयते (वीर्यं,दुर्बलम् अयते) इति विग्रहे 'अय गतौ' ( भ्वा.प.से.५०८) इति धातोः 'कर्मण्यण्' (पा.३।२।१)इति सूत्रेणाण्प्रत्यये 'उपपदमतिङ्' (पा.२।१।१९) इति सूत्रेणोपपदसमासे कलाय इति। 'योपधः' ( पा.लि. ८६ ) इति पुंस्त्वम्। केराउ इति भाषायाम्।

**४.१.१.३५. कारवेल्ली (पं.३०६०, श्लो.३६)**

कारं वेल्लतीति विग्रहे 'वेल्ल चलने' (भ्वा.प.से.५७९) इति धातोः 'कर्मण्यण्' ( पा.३।२।१) इति सूत्रेणाण्प्रत्ययेऽनुबन्धलोपे 'उपपदमतिङ्' (२।२।२९) इत्युपपदसमासे स्त्रीत्वविवक्षायां 'टिड्ढाणञ्द्वय्सज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः' (पा.४।१।१५) इति

सूत्रेण ङीपि कारवेल्लीति । 'ङ्याबूङन्तं चलं स्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम् । करेला इति भाषायाम् ।

**४.१.१.३६. कालकम् (प.३०३२, श्लो.२२)**

कालयतीति विग्रहे 'कल क्षेपे' (चु.प.से.१७२४) इति धातोः 'ण्वुल्तृचौ' (पा.३।१।१३३) इति सूत्रेण ण्वुल्प्रत्यये 'अत उपधायाः' (पा.७।२।११६ ) इति सूत्रेणोपधावृद्धौ 'युवोरनाकौ '(पा. ७।१।१ ) इति सूत्रेणाकादेशे  कालकमिति । 'व्यञ्जनान्यनुलेपनम्' ( अ.लि.२३ ) इति क्लीबत्वम् । नरिचो (नर्चा)इति भाषायाम् ।

**४.१.१.३७. कुलत्थः (पं.३००९, श्लो.१०)**

कुले तिष्ठतीति विग्रहे 'ष्ठा गतिनिवृत्तौ' (भ्वा.प.अ.९९४) इति धातोः 'सुपि स्थः' ( पा.३।२।४) इति सूत्रेण कप्रत्ययेऽनुबन्धलोपे 'पृषोदरादीनि यथोपदिष्टम्' (पा.१।३।१०९) इति सूत्रेण तकारे कुलत्थः । 'थोपधः' ( पा.लि.७० ) इति पुंस्त्वम् । गहत इति भाषायाम् ।

**४.१.१.३८. कूष्माण्डी (पं.३०३८, श्लो.२५)**

कू ईषद् ऊष्मा अण्डेषु बीजेषु यस्या इति विग्रहे 'अनेकमन्यपदार्थे' (पा.२।२।२४) इति सूत्रेण बहुव्रीहिसमासे 'षिद्गौरादिभ्यश्च' (पा.४।१।४१ ) इति सूत्रेण ङीषि कूष्माण्डीति । 'ङ्याबूङन्तं चलं स्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम् । कुभिण्डो इति भाषायाम् ।

**४.१.१.३९. कृष्णबीजम् (पं.३०४५, श्लो.२८)**

कृष्णं बीजं यस्येति विग्रहे 'अनेकमन्यपदार्थे ' (पा.२।२।२४) इति सूत्रेण बहुव्रीहिसमासे कृष्णबीजमिति ।'फलजातिः' ( पा.लि. १६२) इति क्लीबत्वम् । तर्बूजा इति भाषायाम् ।

**४.१.१.४०. कृसरः (पं.३२६१, श्लो.१३६)**

करोतीति विग्रहे 'डुकृञ् करणे '(त.उ.अ.१५६६) इति धातोः 'कृधूमदिभ्यः कित्' ( उ.३।७३) इति सूत्रेण सरप्रत्यये कित्त्वे च, गुणाभावे बाहुलकान्नसत्वं कृसर इति ।'रोपधः' - पा.लि. ८६ ) इति पुंस्त्वम् । खीचडी (खिच्रो) इति भाषायाम् ।

**४.१.१.४१. केतकी (पं.३३४३८, श्लो.१७५)**

केतयतीति विग्रहे 'कित निवासे रोगापनयने च' (भ्वा.प.से.१०६२) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इति ण्वुल्प्रत्यये 'युवोरनाकौ' (पा.७।१।१) इत्यकादेशे 'षिद्गौरादिभ्यश्च' (पा.४।१।४१) इति ङीषि केतकीति । 'ङ्याबूङन्तं चलं सस्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम् । केवडा इति भाषयाम् ।

**४.१.१.४२. केसरः (पं.३२८७, श्लो.१५०)**

के जले सरतीति विग्रहे 'सृ गतौ' (भ्वा.प.अ.१००१) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इति सूत्रेणाच्प्रत्ययेऽनुबन्धलोपे 'हलदन्तात् सप्तम्याः संज्ञायाम्' ( पा.६।३।९) इति सप्तम्या अलुक् केसर इति । 'रोपधः' ( पा.लि. ८६ ) इति पुंस्त्वम् । केस्रा इति भाषायाम् ।

**४.१.१.४३. कोद्रवः (पं.३०२१, श्लो.१६)**

केन वायुना द्रवतीति विग्रहे 'द्रु गतौ' (भ्वा.प.अ.१०११) इति धातोः 'कर्मण्यण्' ( पा.३।२।१) इति सूत्रेण अण्प्रत्ययेऽनुबन्धलोपे 'उपपदमतिङ्' (पा.२।२।१९) इति सूत्रेण उपपदसमासे 'पृषोदरादीनि यथोपदिष्टम्' (पा.६।३।१०९) इति सूत्रेण निपातनादोकारे कोद्रवः । 'कोरदूषस्तु कोद्रवः' (अमरः प्र.१७९६) इति निर्देशात् पुंस्त्वम् । कोदो इति भाषायाम् ।

**४.१.१.४४. कोमलवल्कला (पं.३१९३, श्लो.१०२)**

कोमलं वल्कलं यस्या इति विग्रहे अनेकमन्यपदार्थे' (पा.२।२।२४ ) इति सूत्रेण बहुव्रीहिसमासे कोमलवल्कलेति । 'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । गुलाव जामुन इति ख्यातस्य नाम ।

**४.१.१.४५. कोशातकी (पं.३०४७, श्लो.२९)**

कोशमततीति विग्रहे 'अत सातत्यगमने' (भ्वा.प.से.३८) इति धातोः 'क्वुन् शिल्पीसंज्ञयोरपूर्वस्यापि' (उ.२।२२) इति सूत्रेण क्वुन्प्रत्ययेऽनुबन्धलोपे गौरादित्वात् 'षिद्गौरादिभ्यश्च' (पा.४।१।४१) इति सूत्रेण ङीषि कोशातकीति । 'ङ्याबूङन्तं चलं स्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम् । पाटे तोरिया इति भाषायाम् ।

**४.१.१.४६. क्षीरिका (पं.३१७१, श्लो.९१)**

क्षीरमस्त्यस्या इति विग्रहे 'अत इनिठनौ' (पा.५।२।११५) इति सूत्रेण ठन्प्रत्यये 'ठस्येकः' (पा.७।३।५०) इति सूत्रेणेकादेशे स्त्रीत्वविवक्षायाम् 'अजाद्यतष्टाप्' (पा.४।१।४) इति सूत्रेण टाप्प्रत्यये क्षीरिकेति । 'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । खिर्नि ( जुरेकाफल ) इति भाषायाम् ।

**४.१.१.४७. खर्जूः (पं.३१३९, श्लो.७५)**

खर्ज्यत इति विग्रहे 'खर्ज पूजने च, चाद् व्यथने' (भ्वा.प.से.२३७) इति धातोः 'कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः' (उ.१।८४) इति सूत्रेण ऊप्रत्यये खर्जूरिति ।'ज्ञेयं शिष्टप्रयोगतः' ( अ.लि.४६ ) इति स्त्रीत्वम् । छोहोरा इति भाषायाम् ।

**४.१.१.४८. खर्वूजकम् (पं.३०४४, श्लो.२८)**

खर्बूपूर्वात् 'जनी प्रादुर्भावे' (दि.आ.से.१२२४) इति धातोः 'सप्तम्यां जनेर्डः' ( पा.३।२।९७) इति सूत्रेण डप्रत्यये टिलोपे खर्बुज इत्यवस्थायां 'संज्ञायां कन्' (पा.५।३।८७) इति स्वार्थे कन्प्रत्यये खर्वूजकमिति ।'फलजातिः' ( पा.लि. १६२) इति क्लीबत्वम् । खर्बुजा इति भाषायाम् ।

### ४.१.१.४९. गुडः (पं.३२३६, श्लो.१२४)

गुडतीति विग्रहे 'गुड रक्षायाम्' (तु.प.से.१४५८) इति धातोः 'इगुपधज्ञाप्रीकिरः कः' ( पा.३।३।१३५) इति सूत्रेण कप्रत्यये गुड इति ।'गुडो गोलेक्षुपाकयोः' (अमरःप्र.२४८१) इति निर्देशात् पुंस्त्वम् । गुड, सख्खर इति भाषायां स्पष्टम् ।

### ४.१.१.५०. गृञ्जनम् (पं.३०८७, श्लो.४९)

गृञ्जतीति विग्रहे 'गृजि शब्दे' (भ्वा.प.से.२५७) इति धातोः 'इदितो नुम् धातोः' ( पा.७।१।५८) इति सूत्रेण नुमि 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इति सूत्रेण ल्युटि 'युवोरनाकौ' (पा.७।१।७) इत्यनादेशे गृञ्जनमिति ॥'फलजातिः' ( पा.लि. १६२) इति क्लीबत्वम् । 'व्यञ्जनान्यनुलेपनम्' ( अ.लि.२३ ) इति क्लीबत्वम् । गाजर इति भाषायाम् ।

### ४.१.१.५१. गृष्टिः (पं.३०७६, श्लो.४४)

गृह्णातीति विग्रहे 'ग्रह उपादाने' (क्र्या.प.से.१६३६) इति धातोः 'क्तिच्क्तौ च संज्ञायाम्'(पा.३।३।१७४) इति सूत्रेण क्तिच्प्रत्ययेऽनुबन्धलोपे ग्रह् ति इति जाते 'ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च' (पा.६।१।१६) इति सम्प्रसारणे गृह् ति इति जाते 'पृषोदरादीनि यथोपदिष्टम्' (पा.६।३।१०९) इति सूत्रेण हकारस्य सत्वे 'आदेशप्रत्यययोः' (पा.८।३।५९) इति सूत्रेण षत्वे ष्टुत्वे गृष्टिः ।'विष्वक्सेनप्रिया गृष्टिर्वाराही बदरेत्यपि' (अमरःप्र.९८१) इति निर्देशात् पुंस्त्वम् । गिठा इति भाषायाम् ।

### ४.१.१.५२. गोधूमः (पं.२९९६, श्लो.४)

गुध्यतीति विग्रहे 'गुध परिवेष्टने' (दि.प.से.११९५) इति धातोः 'गुधेरूमः' ( उ.५।२) इति सूत्रेण ऊमप्रत्यये गोधूम इति ।'मोपधः ' - पा.लि. ८३ ) इति पुंस्त्वम् । गहु इति भाषायाम् ।

### ४.१.१.५३. घृतम् (पं.३२३०, श्लो.१२१)

घ्रियत इति विग्रहे 'घृ क्षरणदीप्त्योः' (जु.प.से.११६१) इति धातोः 'आञ्जिघ्रिसिभ्यः क्तः' (उ. ३।८९) इति सूत्रेण क्तप्रत्ययेऽनुबन्धलोपे घृतमिति ।

'घृतभूतमुस्तक्ष्वेलितैरावतपुस्तकबुस्तलोहिताः ' ( पा.लि. १७७ ) इति पुंस्त्वं नपुंसकत्वञ्च । घिउ इति भाषायाम् ।

**४.१.१.५४. घोलिका (पं.३०२७, श्लो.१९)**

घोल्यत इति विग्रहे 'घुर भीमार्थशब्दयोः'(तु.प.से.१४३२) इति धातोः 'हलश्च' ( पा.३।३।१२१) इति घञ्प्रत्ययेऽनुबन्धलोपे 'पुगन्तलघूपधस्य च' (पा.७।३।८६) इति गुणे रलयोरभेद इति नियमात् रकारस्य लत्वे घोल इति जाते 'संज्ञायां कन्' (पा.५।३।८७) इति 'स्वार्थे कन्प्रत्यये 'अजाद्यतष्टाप्' (पा.४।१।४) इति टापि 'प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः' (पा.७।३।४४) इत्यादिना कात्पूर्वस्येत्वे घोलिकेति । 'ऊङाबन्तश्च ' (पा.लि. ११ ) इति स्त्रीत्वम् । नुनिया साग इति भाषायाम् ।

**४.१.१.५५. घोषकः (पं.३०४९, श्लो.३०)**

घोषतीति विग्रहे 'घुषिर अविशब्दने' (भ्वा.प.से.६९८) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इति सूत्रेणाच्प्रत्यये 'संज्ञायां कन्' (पा.५।३।७५) इति सूत्रेण स्वार्थे कन्प्रत्यये घोषक इति । 'घाजन्तश्च' (पा.लि. ३७ ) इति पुंस्त्वम् । घिरौंला इति भाषायाम् ।

**४.१.१.५६. चणकः (पं.३००७, श्लो.९)**

चण्यते इति विग्रहे 'चण दाने च (गतौ)' (भ्वा.प.से.८४८)इति धातोः 'क्वुन् शिल्पीसंज्ञयोरपूर्वस्यापि' (उ.२।३२) इति सूत्रेण क्वुन्प्रत्ययेऽनुबन्धलोपे चण् वु इति जाते 'युवोरनाकौ' (पा.७।१।१) इति सूत्रेण अकादेशे चणक इति ।'कोपधः ' (पा.लि. ६१ ) इति पुंस्त्वम् । चना इति भाषायाम् ।

**४.१.१.५७. चन्द्रसूरः (पं.३०९७, श्लो.५४)**

चन्द्रश्चासौ सूरश्चेति विग्रहे 'विशेषणं विशेष्येण बहुलम्' (पा.२।१।५७ ) इति सूत्रेण समासे चन्द्रसूरः । 'रोपधः' ( लिङ्गानुशासनम् ८६ ) इति पुंस्त्वम् । 'घाजन्तश्च' ( पा.लि. ३७ ) इति च पुंस्त्वम् । चमसूर इति भाषायाम् ।

**४.१.१.५८. चर्व्यः (पं.३२६८, श्लो.१४०)**

चर्वितुं योग्यमिति विग्रहे 'चर्व अदने' (भ्वा.प.से.६१९) इति धातोः 'ऋहलोर्ण्यत् ' (पा.३।१।१२४) इति सूत्रेण ण्यत्प्रत्ययेऽनुबन्धलोपे चर्व्यः ।'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥' ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । चपाउन योग्य इति भाषायाम् ।

**४.१.१.५९. चाङ्गेरी (पं.३०३४, श्लो.२३)**

चाङ्गमिरयतीति विग्रहे (चाङ्ग शोभन दक्ष) 'इर गतौ' (अ.आ.से.अयं धातुः सिद्धान्तकौमुद्यां नास्ति) इति धातोः 'कर्मण्यण्' (पा.३।२।१) इति सूत्रेणाण्प्रत्ययेऽनुबन्धलोपे 'उपपदमतिङ् '(पा.२।२।१९) इति सूत्रेणोपपदसमासे स्त्रीत्वविवक्षायां' टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः' (पा.४।१।१५) इति सूत्रेण ङीपि चाङ्गेरीति । 'ङ्याबूङन्तं चलं स्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम् । चरिअमिलो इति भाषायाम् ।

**४.१.१.६०. चुक्रकः (पं.३०३५, श्लो.२३)**

चक्यतेऽनेनेति विग्रहे 'चक तृप्तौ प्रतिघाते च' (भ्वा.प.से.९६) इति धातोः 'चकिचम्योरुच्चोपधायाः' (उ.२।१४) इति रक्प्रत्यय उपधाया उत्वे 'संज्ञायां कन्' (पा.५।३।८७) इति 'स्वार्थे कन्प्रत्यये चुक्रक इति ।'कोपधः ' (पा.लि. ६१ ) इति पुंस्त्वम् । चूक इति भाषायाम् ।

**४.१.१.६१. चुक्रम् (पं.३०२८, श्लो.२०)**

चुक्कयत्यनेनेति विग्रहे 'चुक्क व्यथने' (चु.उ.से.१७१६) इति धातोः 'ऋज्रेन्द्राग्रवज्रविप्रकुब्रक्षुरखुरभद्रोग्रभेरभेलशुक्र-शुक्लगौरवभ्रेरामालाः' (उ.२।२८) इति सूत्रेण बाहुलकात् चुक्रमिति ।'फलजातिः ' ( पा.लि. १६२ ) इति क्लीबत्वम् । अमिली,अमिलो पालुङ्गो (चूकाभाजी) इति भाषायाम् ।

**४.१.१.६२. चोष्यः (पं.३२६८, श्लो.१४०)**

चूषितुं योग्यमिति विग्रहे 'चूष पाने' (भ्वा.प.से.७१९) इति धातोः 'ऋहलोर्ण्यत्' (पा.३।१।१२४) इति सूत्रेण ण्यत्प्रत्ययेऽनुबन्धलोपे 'पृषोदरादीनि यथोपदिष्टम्' (पा.६।३।१०९) इत्युपधागुणे चोष्यः । [३६६] 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥' ( अ. लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । आँप आदिको नाम इति भाषायाम् ।

**४.१.१.६३. छत्राकम् (पं.३२५०, श्लो.१३१)**

छत्रमकतीति विग्रहे 'अक कुटिलायां गतौ' (भ्वा.प.से.८४४) इति धातोः 'कर्मण्यण् '( पा.३।२।१) इति सूत्रेणाण्प्रत्यये 'उपपदमतिङ्' (२।२।१९) इत्युपपदसमासे 'अत उपधायाः' ( पा.७।२।११६ )इति सूत्रेणोपधावृद्धौ सवर्णदीर्घे छत्राकमिति ।'कोपधः ' ( लिङ्गानुशासनम् ६१ )

---

[३६६] आचार्यः भट्टः, ***शब्दस्तोममहानिधिः***, वाराणसीः, चौखम्बा संस्कृत सिरिज, तृ.सं.सन् १९६७ ।

इति पुंस्त्वम् । अत्र शिष्टप्रयोगात् क्लीबत्वम् । 'व्यञ्जनान्यनुलेपनम्' ( अ.लि.२३ ) इति च क्लीबत्वम् । च्याउ इति भाषायाम् ।

**४.१.१.६४. जपा (पं.३३४७, श्लो.१८०)**

जपतीति विग्रहे 'जप व्यक्तायां वाचि मानसे च' (भ्वा.प.से.४२४) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इत्यच्प्रत्यये टापि जपेति ।'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । बाह्रमासे फूल इति भाषायाम् ।

**४.१.१.६५. जम्भीरः (पं.३१५०, श्लो.८१)**

जम्भयतीति विग्रहे 'जभी गात्रविनामे' (भ्वा.प.से.४१५) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इति सूत्रेणाच्यनुबन्धलोपे 'रधिजभोरचि' (पा.७।१।६१) इति सूत्रेण नुमि जम्भ इति जाते गम्भीरादित्वात् 'गभीरगम्भीरौ '(उ.१।१०६) इति सूत्रेण इरन्प्रत्यये जम्भीरः ।'रोपधः ' ( पा.लि. ८९ ) इति पुंस्त्वम् । ज्यामिर इति भाषायाम् ।

**४.१.१.६६. जम्बूः (पं.३१८२, .श्लो.९७)**

जमतीति विग्रहे 'जमु अदने' (भ्वा.प.से.५०४) इति धातोः 'अन्दूदृन्भूजम्बूकफेलुकर्कन्धुदिधिषूः' (उ.१।९६) इति सूत्रेण कुप्रत्यये बुगागमश्च निपात्यते जम्बूरिति । 'वृक्षजातिः स्त्रियामेव' ( पा.लि.१६३) इति च स्त्रीत्वम् । जामुना इति भाषायाम् ।

**४.१.१.६७. जातिकोशः (पं.३१२४, श्लो.६८)**

जात्याः कोश इति विग्रहे 'षष्ठी' (पा.२।२।८ ) इति सूत्रेण षष्ठीतत्पुरुषसमासे जातिकोश इति । 'घञबन्तः' ( पा.लि. ३६ ) इति पुंस्त्वम् ।जाईफल इति भाषायाम् ।

**४.१.१.६८. जीरकः (पं.३१०७ , श्लो.५९)**

जवतीति विग्रहे जु गतौ वेगे च (कृ.२१३९) सौत्रधातोः 'जोरी च' (उ.२।३२) इति सूत्रेण रक्प्रत्ययेऽनुबन्धलोपे ईकारन्तादेशे च 'संज्ञायां कन्' (पा.५।३।७५) इति सूत्रेण कन्प्रत्यये जीरकः ।'कोपधः ' ( पा.लि. ६१ ) इति पुंस्त्वम् । जीरा इति भाषायाम् ।

**४.१.१.६९. जीवा (पं.३०३७, श्लो.२४)**

जीवयतीति विग्रहे 'जीव प्राणधारणे' (भ्वा.प.से.६०२) इति धातोर्ण्यन्तात् 'नन्दिग्रहिपचादिभ्याल्युणिन्यचः' (पा.३।१।१३४) इति सूत्रेणाच्यनुबन्धलोपे 'णेरनिटि' ( पा.६।४।५१) इति णिलोपे स्त्रीत्वविवक्षायां 'अजाद्यतष्टाप् '(पा.४।१।४ ) इति सूत्रेण

टाप्यनुबन्धलोपे जीवेति ।'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । जिरी शाक इति भाषायाम् ।

**४.१.१.७०. डहुः (पं.३१६०, श्लो.८६)**

दहतीति विग्रहे 'दह भस्मीकरणे' (भ्वा.प.अ.१०६०) इति धातोः निपातनाद् 'मृगय्वादयश्च'(उ.१।३७) इति सूत्रेण कुप्रत्ययेऽनुबन्धलोपे निपातनादेव सर्वं सिद्ध्यति ।'उकारान्तः' ( पा.लि. ५१) इति पुंस्त्वम् । बडहर इति भाषायाम् ।

**४.१.१.७१. तक्रम् (पं.३२२६, श्लो.११९)**

तञ्चतीति विग्रहे 'तञ्चु गतौ' (भ्वा.प.से.१९९) इति धातोः 'स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदिसृपितृपिदृपिबन्ध्युन्दिश्वितिवृत्यजिनीपदिमदिमुदिखिदिछिदिदिमिन्दचन्दिदहिदसिदम्भिवसिवाशिशीङ्हसिसिधिशुभिभ्यो रक्' (उ.२।१३) इति सूत्रेण रक्प्रत्यये 'न्यङ्क्वादीनां च' (पा.६।३।५३) इति सूत्रेण कुत्वे ककारे तक्रम् ।'तक्रम्' ( अ.लि. १८७१) इति निर्देशात् क्लीबत्वम् । मही इति भाषायाम् ।

**४.१.१.७२. तण्डुलः (पं.३२५६, श्लो.१३४)**

ताड्यत इति विग्रहे 'तड आघाते' (चु.प.से.१६९६) इति धातोः 'सानसिवर्णसिपणसि-तण्डुलाङ्कुशचषालेल्वलधिष्ण्यशल्याः' (उ.४।५५७) इति सूत्रेण निपातनात् सिद्धम् ।'लोपधः' ( पा.लि.१४१) इति क्लीबत्वम् । तथैव शिष्टप्रयोगात् शास्त्रे लोके च पुंस्त्वम् । चामल इति भाषायाम् ।

**४.१.१.७३. तण्डुलीयः (पं.३०२६, श्लो.१९)**

तण्डुलाय हितमिति विग्रहे तण्डुलशब्दात् 'तस्मै हितम्' (पा.५।१।५) इति सूत्रेण छ प्रत्यये 'आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्' (पा.७।१।२) इति सूत्रेण ईयादेशे 'यस्येति च' (पा.६।४।१४८) इत्यकारलोपे तण्डुलीयः ।'योपधः' ( पा.लि. ८६ ) इति पुंस्त्वम् । लुडे इति भाषायाम् ।

**४.१.१.७४.ताम्बूलम् (पं.३२७६, श्लो.१४४)**

ताम्यतीति विग्रहे 'तमु काङ्क्षायाम्' (दि.प.से.१२७९) (तमु ग्लानौ इति बालमनोरमायां तत्वबोधिन्याञ्च) इति धातोः 'खर्जिपिञ्जादिभ्य उरोलचौ' (उ.४.९०) इति सूत्रेण ऊलच्प्रत्ययेऽनुबन्धलोपे 'तमेर्बुग्वृद्धिश्च' इति गणसूत्रेण बुगागमे वृद्धौ ताम्बूलमिति । 'लोपधः' ( पा.लि. १४१ ) इति क्लीबत्वम् । 'फलजातिः ' (पा.लि. १६२ ) इति च क्लीबत्वम् । पानको बीडा इति भाषायाम् ।

**४.१.१.७५. तालः (पं.३१९४, श्लो.१०३)**

तालयतीति विग्रहे 'तल प्रतिष्ठायाम्' (चु.प.से.१७१८) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इति सूत्रेणाच्यनुबन्धलोपेणिलोपे ताल इति ।'घाजन्तश्च' ( पा.लि. ३७ ) इति पुंस्त्वम् । ताडवृक्ष इति भाषायाम् ।

**४.१.१.७६. तिलः (पं.३००४, श्लो.८)**

तिलतीति विग्रहे 'तिल स्नेहे' (तु.प.से.१४४२) इति धातोः 'इगुपधज्ञाप्रीकिरः कः' ( पा.३।१।१३५) इति सूत्रेण कप्रत्यये कित्वात् गुणाभावे तिलः । 'ज्ञेयं शिष्टप्रयोगतः' ( अ.लि.४६ ) एतस्मात्कारणात् पुंस्त्वम् ।

**४.१.१.७७. तिन्तिडी (पं.३२४५, श्लो.१२८)**

तिम्यतीति विग्रहे 'तिम आर्द्रीभावे' (दि.प.से.११९८) इति धातोः 'अलिकादयश्च' ( उ.४।१२५) इति सूत्रेण निपातनाद् तिन्तिडीति सिद्धम् ।'वृक्षजातिः स्त्रियामेव' ( पा.लि.१६३) इति च स्त्रीत्वम् । अमिली (तित्री) इति भाषायाम् ।

**४.१.१.७८. तिन्दुकः (पं.३१६१, श्लो.८६)**

तिम्यतीति विग्रहे 'तिम आर्द्रीभावे' (दि.प.से.)११९८ इति धातोः नुमि 'मृगय्वादयश्च' (उ.१।३७) इति सूत्रेण कुप्रत्यये तिन्दु सिद्धम् (भानुजी),ततः 'संज्ञायां कन्' (पा.५।३।७५) इति सूत्रेण कप्रत्यये तिन्दुकः सिद्ध्यति ।'कोपधः ' ( पा.लि. ६१ ) इति पुंस्त्वम् । तिन्दू इति भाषायाम् ।

**४.१.१.७९. तुम्बिका (पं.३०४०, श्लो.२६)**

तुम्बति रूचिमिति विग्रहे 'तुबि अर्दने (भ्वा.प.से.४५६) इति धातोः 'इदितो नुम् धातोः' (पा.७।१।५८ ) इति सूत्रेण नुम्यनुबन्धलोपे तुम्ब् इति जाते 'नन्दिग्रहिपचादिभ्योल्युणिन्यचः' (पा.३।१।१३४) इति सूत्रेणाच्यनुबन्धलोपे 'षिद्गौरादिभ्यश्च' ( पा.४।१।४१ ) इति सूत्रेण ङीष्यनुबन्धलोपे 'संज्ञायां कन् (पा.४।३।१४७ ) इति सूत्रेण कन्प्रत्यये तुम्बीक इत्यवस्थायां 'केऽणः' (पा.७।४।१३) इति सूत्रेण ह्रस्वे स्त्रीत्वविवक्षायाम् 'अजाद्यतष्टाप्' (पा.४।१।४) इति सूत्रेण टापि तुम्बिकेति ।'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । लौका इति भाषायाम् ।

**४.१.१.८०. तुम्बुरुः (पं.३१०३, श्लो.५७)**

तुम्बतीति विग्रहे 'तुबि अर्दने' (भ्वा.प.से.४५६) इति धातोः 'इदितो नुम् धातोः' ( पा.७|१|५८) इति नुमि 'कुस्तुम्बुरूणि जातिः' (पा.६|१|१४३) इति सूत्रेण उरुप्रत्यये तुम्बुरुः । 'उकारान्तः' ( पा.लि. ५१ ) इति पुंस्त्वम् । टिमुर इति भाषायाम् ।

**४.१.१.८१.तुवरी (पं.३०१६, श्लो.१४)**

तवीति रोगान् इति विग्रहे हिंसार्थकात् 'तु गतिवृद्धिहिंसासु' सौत्रधातोः ( अ.प.अ.११०९) 'छित्वरछत्वरधीवरपीवरमीवरचीवरतीवरनीवरगह्वरकद्वरसंयद्वराः' (उ.३|१) इति सूत्रेण ष्वरच् प्रत्ययेऽनुबन्धलोपे तुवर इति जाते 'षिद्गौरादिभ्यश्च' (पा.४|१|४१) इति सूत्रेण ङीषि तुवरीति ।'ङ्याबूङन्तं चलं सस्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम् । सानो तोरी इति भाषायाम् ।

**४.१.१.८२. तूलम् (पं.३१८९, श्लो.१००)**

तूलयतीति विग्रहे 'तूल निष्कर्षे' (भ्वा.प.से.५६५) इति धातोः ण्यन्तात् 'इगुपधज्ञाप्रीकिरः कः' (पा.३|१|१३५) इति सूत्रेण कप्रत्ययेतूलमिति ।'लोपधः' ( लिङ्गानुशासनम् १४१ ) इति क्लीबत्वम् । 'फलजातिः ' ( पा.लि. १६२ ) इति च क्लीबत्वम् । किम्बू इति भाषायाम् ।

**४.१.१.८३. तेजपत्रम् (पं.३११६, श्लो.६४)**

तेजयतीति विग्रहे 'तिज निसाने' (चु.उ.से.१७७७) इति धातोः स्वार्थे णिचि 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३|१|१३४) इत्यच्यनुबन्धलोपे णिलोपे तेजमिति । तेजं पत्रमस्येति विग्रहे 'अनेकमन्यपदार्थे' (पा.२|२|२४ ) इति सूत्रेण बहुव्रीहिसमासे तेजपत्रमिति । 'त्रान्तः ' ( लिङ्गानुशासनम् १५४ ) इति क्लीबत्वम् । 'द्वाराग्रस्फारतक्रवक्रवप्रक्षिप्रक्षुद्रनारतीरदुरकृच्छ्ररन्धाश्रश्वभ्रभीरगभीरक्रुरविचित्रकेयुर-केदारोदराजस्रशरीरकन्दरमन्दारपञ्चराजरजठराजिरवैरचामरपुष्करगह्वरकुहरकुटीरकुलीरचत्वर काश्मीरनीराम्बरशिशिरतन्त्रयन्त्रनक्षत्रमित्रकलत्रचित्रमूत्रसूत्रवक्त्रनेत्रगोत्राङ्गुलित्रभलत्रशस्त्रशास्त्र वस्त्रपत्रपात्रच्छत्राणि नपुंसके' ( पा.लि.९० ) इति च नपुंसकत्वम् ।(शब्दकल्पद्रुमः) तेजपात इति भाषायाम् ।

**४.१.१.८४. तेमनम् (पं.३२६३, श्लो.१३७)**

तिम्यत अनेनेति विग्रहे 'तिम आर्द्रीभावे' (दि.प.से.११९८) इति धातोः 'करणाधिकरणयोश्च' (पा.३|३|११७ ) इति करणे ल्युटि 'युवोरनाकौ' (पा.७|१|१ ) इत्यनादेशे तेमनमिति ।'करणाधिकरणोर्ल्युट् च' (पा.लि.१८९) इत्यविशिष्टलिङ्गत्वेऽपि शास्त्रे लोके च

क्लीबत्वम् । 'व्यञ्जनान्यनुलेपनम्' ( अ.लि.२३ ) इति च क्लीबत्वम् । तिउन् इति भाषायाम् ।

**४.१.१.८५. तैलम् (पं.३२३१, श्लो.१२१)**

तिलस्य विकार इति विग्रहे 'तस्य विकारः' (पा.४।३।१३४) इति सूत्रेणाण्प्रत्ययेऽनुबन्धलोपे 'तद्धितेष्वचामादेः' (पा.७।२।११७) इति सूत्रेणादिवृद्धौ तैलमिति । 'लोपधः' ( पा.लि. १४१ ) इति क्लीबत्वम् । तेल इति भाषायाम् ।

**४.१.१.८६. त्रिकटुः (पं.३२२२, श्लो.११७)**

त्रयाणां कटूनां समाहार इति विग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' (पा.२।१।५१) इति सूत्रेण समासे त्रिकटुरिति सम्पन्नम् । 'उकारान्तः' ( पा.लि. ५१ ) इति पुंस्त्वम । सुण्ठी-मरीच-पिप्पलीनां समूहस्य नाम ।

**४.१.१.८७. त्रिपुटः (पं.३०१०, श्लो.११)**

त्रयः पुटा यस्य स इति विग्रहे 'अनेकमन्यपदार्थे' (पा.२।२।२४) इति सूत्रेण बहुव्रीहिसमासे त्रिपुट इति ।'टोपधः ' ( पा.लि. ६४ ) इति पुंस्त्वम् । खेसरी इति भाषायाम् ।

**४.१.१.८८. त्रिपुटकः (पं.३००६, श्लो.९)**

त्रयः पुटका यस्येति विग्रहे 'अनेकमन्यपदार्थे' (पा.२।२।२४) इति सूत्रेण बहुव्रीहिसमासे स्वादिकार्ये सति त्रिपुटकः सिद्ध्यति ।'कोपधः ' ( पा.लि. ६१ ) इति पुंस्त्वम् । सानो केराउ इति भाषायाम् ।

**४.१.१.८९. त्रिफला (पं.३२१८, श्लो.११२)**

त्रयाणां फलानां समाहार इति विग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' (पा.२।१।५१ ) इति सूत्रेण द्विगुसमासेस्त्रीत्वविवक्षायाम् 'अजाद्यतष्टाप्' (पा.४।१।४) इति सूत्रेण टाप्प्रत्यये त्रिफलेति ।'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । त्रिफला भाषायां स्पष्टमेव ।

**४.१.१.९०.त्वक्पत्रम् (पं.३११४, श्लो.६३)**

त्वगिव पत्रमस्येति विग्रहे 'उपमानानि सामान्यवचनैः'(पा.२।१।५५) इति सूत्रेण कर्मधारयसमासे त्वक्पत्रमिति सिद्धम् ।'त्रान्तः ' ( पा.लि. १५४ ) इति क्लीबत्वम् । 'द्वाराग्रस्फारतक्कवक्कवप्रक्षिप्रक्षुद्रनारतीरदूरकृच्छ्ररन्ध्राश्रश्वभ्रभीरगभीरकुरविचित्रकेयूरकेदारोदराजस्रशरीरकन्दरमन्दारपञ्चराजरजठराजिरवैरचामरपुष्करगह्वरकुहरकुटीरकुलीरचत्वरकाश्मीरनीराम्बरशिशिरतन्त्रयन्त्रनक्षत्रमित्रकलत्रचित्रमूत्रसूत्रवक्त्रनेत्रगोत्राङ्गुलित्रभलत्रशस्त्रशास्त्रवस्त्रपत्रपात्रच्छत्राणि नपुंसके' ( पा.लि.९० ) इति च नपुंसकत्वम् । दालचिनी इति भाषायाम् ।

**४.१.१.९१.दधि (पं.३२२५, श्लो.११८)**

दधत इति विग्रहे 'दध धारणे' (भ्वा.आ.से.८) इति धातोः 'सर्वधातुभ्य इन्' ( उ.४।११८) इति सूत्रेण इन्प्रत्यये दधीति ।'ज्ञेयं शिष्टप्रयोगतः' (अ.लि.४६ ) एतस्मात् क्लीबत्वम् । दही इति भाषायाम् ।

**४.१.१.९२. दाडिमः (पं.३१३३, श्लो.७२)**

दलनमिति विग्रहे 'दल विशरणे' (भ्वा.प.से.५८८) इति धातोः 'भावे' (पा.३।३।१८) इति सूत्रेण घञ्प्रत्ययेऽनुबन्धलोप उपधावृद्धौ दाल इति जाते दालेन निर्वृत्त इति विग्रहे 'भावप्रत्ययान्तादिमप्' (वा.४।४।२०) इति वार्तिकेन इमप्प्रत्ययेऽनुबन्धलोपे डलयोरभेदकत्वात् दाडिम इति ।'मोपधः ' ( पा.लि. ८३ ) इति पुंस्त्वम् । दारिम (अनार) इति भाषायाम्

**४.१.१.९३. दारुफलम् (पं.३१४३, श्लो.७७)**

दारु इव फलम् इति विग्रहे 'उपमानानि सामान्यवचनैः' (पा.२।१।५५) इति सूत्रेण कर्मधारयसमासे दारुफलमिति ।'फलजातिः ' ( पा.लि. १६२ ) इति क्लीबत्वम् । अम्बा इति भाषायाम् ।

**४.१.१.९४. दाली (पं.३२५७, श्लो.१३४)**

दाल्यत इति विग्रहे 'दल विदारणे' (चु.उ.से.१८९०) इति धातोः णिचि 'सर्वधातुभ्य इन्' (उ.४।११७) इति इन्यनुबन्धलोपे 'कृदिकारादक्तिनः' (वा.४।१।४५) इति विकल्पेन ङीषि दालीति पक्षे दालिश्च ।'ङ्याबूङन्तं चलं स्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम् । द्विदल दाल इति भाषायाम् ।

**४.१.१.९५. दुग्धम् (पं.३२२३, श्लो.११७)**

दुह्यते स्मेति विग्रहे 'दुह प्रपूरणे ' (अ.उ.अ.१०८४.) इति धातोः 'निष्ठा' ( पा.३।१।१२०) इति सूत्रेण क्तप्रत्यये दुग्धमिति ।'निष्ठा च' ( पा.लि.१२० ) इति क्लीबत्वम् । दूध इति भाषायाम् ।

**४.१.१.९६. देवकुसुमम् (पं.३१२१, श्लो६६.)**

देवप्रियं कुसुमं पुष्पं यस्येति विग्रहे 'अनेकमन्यपदार्थे' (पा.२।२।२४) इति सूत्रेण बहव्रीहिसमासे उत्तरपदलोपे च देवकुसुममिति ।'फलजातिः ' ( पा.लि. १६२ ) इति क्लीबत्वम् । (शब्दकल्पद्रुम) ल्वाङ् इति भाषायाम् ।

**४.१.१.९७. द्राक्षा (पं.३१७४, श्लो.९३)**

द्रङ्क्ष्यत इति विग्रहे 'द्राक्षि कांक्षायां घोरवासिते च' (भ्वा.प.से.७१६) इति धातोः 'अकर्तरि च कारके संज्ञायाम्' (पा.३।३।१९) इति सूत्रेण कर्मणि घञ्प्रत्ययेऽनुबन्धलोपः। आगमशास्त्रमनित्यम्। स्त्रीत्वविवक्षायाम् 'अजाद्यतष्टाप्' (पा.४।१।४) इति टापि द्राक्षेति। 'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम्। दाख, मुनक्का, किसमिस इति भाषायाम्।

**४.१.१.९८. धन्याकम् /धान्यकम् (पं.३१०५, श्लो.५८)**

धन्यत इति विग्रहे 'धन धान्ये' (जु.प.से.११७९) इति धातोः 'पिनाकादयश्च' ( उ.४।१५) इति सूत्रेण धन्याकमिति साधु। अथवा धान्यमकतीति विग्रहे 'अक कुटिलायां गतौ' (भ्वा.प.से.७९२) इति धातोः 'कर्मण्यण्' (पा.३।२।१) इति सूत्रेणाण्प्रत्यय उपपदसमासे धान्यकमपि । 'कुस्तुम्बुरु च धान्यकम्' (अमरः प्र.१८३९ ) इति निर्देशात् क्लीबत्वम्। 'व्यञ्जनान्यनुलेपनम्' ( अ.लि.२३ ) इति चक्लीबत्वम्। धनिया इति भाषायाम्।

**४.१.१.९९. धान्यम् (पं.२९९२, श्लो.२)**

दधतीति विग्रहे डुधाञ् 'धारणपोषणयोः' (जु.उ.अ.११६७) इति धातोः 'धापृवस्याज्यतिभ्योः नः' (उ. सू.३।६) इति सूत्रेण नप्रत्यये धान इति जाते ततो धाने पोषणे साधुरिति विग्रहे 'तत्र साधुः' (पा.४।४।९८) इति सूत्रेण यत्प्रत्ययेऽनुबन्धलोपे धान्यमिति। 'धान्यं व्रीहिः स्तबकरिः' (अमरः प्र.१८०६ ) इति निर्देशात् क्लीबत्वम्। धान इति भाषायाम्।

**४.१.१.१००. धूमवर्तिः (पं.३२८५, श्लो.१४९)**

धूमस्य वर्ती इति विग्रहे 'षष्ठी ' (पा.२।२।८) इति सूत्रेण समासे धूमवर्तिरिति। 'गात्रानुलेपनी वर्तिः' (अमरः प्र.१३७९ ) इति निर्देशात् स्त्रीत्वम् । सिग्रेट, बीडी इति भाषायाम्।

**४.१.१.१०१.नवनीतम् (पं.३२२८, श्लो.१२०)**

नवं च तन्नीतं चेति विग्रहे 'विशेषणं विशेष्येण बहुलम्' (पा.२।१।५७ ) इति सूत्रेण कर्मधारयसमासे नवनीतमिति। 'निष्ठा च' ( पा.लि.१२० ) इति क्लीबत्वम् । नौनी इति भाषायाम्।

**४.१.१.१०२. नागरङ्गकः (पं.३१४४, श्लो.७८)**

नागो नागकेशर इव रङ्गक इति विग्रहे 'उपमानानि सामान्यवचनैः' (पा.२।१।५५) इति सूत्रेण कर्मधारयसमासे नारङ्गकमिति।'कोपधः '(पा.लि. ६१ ) इति पुंस्त्वम्। सुन्तला इति भाषायाम्।

**४.१.१.१०३. नारिकेलः (पं.३१३६, श्लो.७४)**

नलतीति विग्रहे 'णल गन्धे' (भ्वा.प.से.८९६) इति धातोः बाहुलकादिण्प्रत्यये ( भानुजी) नालि इति। पश्चात् केन वायुना ईयते इति विग्रहे 'ईर प्रेरणे' (अ.आ.से.) इति धातोः 'भावे' (पा.३।३।१९) इति सूत्रेण घञ्प्रत्ययेऽनुबन्धलोपे गुणे केर इति। नारिचासौ केरश्चेति विग्रहे कर्मधारयसमासे नालिकेलः, रलयोरभेदकत्वात् नारिकेलः।'घञबन्तः' ( पा.लि. ३६ ) इति पुंस्त्वम्। नरिवल इति भाषायाम्।

**४.१.१.१०४. निम्बूः (पं.३१५२, श्लो.८२)**

निन्वति स्वास्थ्यमिति विग्रहे 'णिवि सेवने (भ्वा.प.से.६३०) इति धातोः 'जागरूकः' (पा.३।२।१६५) इति सूत्रेण ऊकप्रत्यये बाहुलकात् बकारे दीर्घे च कृते निम्बूरिति।'निम्बूः स्त्री निम्बुकं क्लीबे' ( कुलचन्द्रः श्लो.८२ ) इति निर्देशात् शिष्टप्रयोगाच्च स्त्रीत्वम्। निबुवा इति भाषायाम्।

**४.१.१.१०५. निम्बूकम् (पं.३१५३, श्लो.८२)**

निन्वति स्वास्थ्यमिति विग्रहे 'णिवि सेवने (भ्वा.प.से.६३०) इति धातोः 'जागरूकः' (पा.सू.३।२।१६५) इति सूत्रेण ऊकप्रत्यये बाहुलकात् बकारे दीर्घे च कृते निम्बू, 'संज्ञायां कन्'( ५।३।८७) इति स्वार्थे कन्प्रत्यये निम्बूकमिति। 'फलजातिः ' ( पा.लि. १६२ ) इति क्लीबत्वम्। कागती इति भाषायाम्।

**४.१.१.१०६. नीवारः (पं.३०२३, श्लो.१७)**

निव्रियते इति विग्रहे निपूर्वात् 'वृञ् वरणे (स्वा.उ.से.१३३४) इति धातोः 'नौ वृ धान्ये' (पा.३।३।४८) इति सूत्रेण घञ्प्रत्ययेऽनुबन्धलोपे 'अचोऽञ्णिति' (पा.७।२।११५) इति सूत्रेण वृद्धौ 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' (पा.६।३।१२२) इति दीर्घे नीवार इति।'घञबन्तः' ( लिङ्गानुशासनम् ३६ ) इति पुंस्त्वम्। 'रोपधः ' ( पा.लि. ८९ ) इति च पुंस्त्वम् वनधान इति भाषायाम्।

**४.१.१.१०७. पटोलः (पं.३०५६, श्लो.३४)**

पटतीति विग्रहे 'पट गतौ' (भ्वा.प.से.३०५) इति धातोः 'कपिगडिगण्डिकटिभ्य ओलच्' (उ.१।६९) इति सूत्रेणौलच्प्रत्यये पटोल इति।'पटोलस्तिक्तकः पटुः' ( अमरः प्र.९८९ ) इति निर्देशात् पुंस्त्वम्। परवल इति भषायाम्।

**४.१.१.१०८. पत्रगोभी (पं.३०५५, श्लो.३३)**

पत्राणां गोभीति विग्रहे 'षष्ठी '(पा.२।२।८ ) इति सूत्रेण तत्पुरुषसमासे पत्रगोभीति। 'य्वन्तमेकाक्षरम् ' ( पा.लि. १२ ) इति स्त्रीत्वम्। बन्दाकोभी इति भाषायाम्।

**४.१.१.१०९. पनसः (पं.३१५८, श्लो.८५)**

पनत इति विग्रहे 'पन व्यवहारे स्तुतौ च' (भ्वा.आ.से.४७०) इति धातोः अत्यविचतिमिरभिलभिनभितपिपतिपनिपणिमहिभ्योऽसच् (उ.३।११७) इति सूत्रेण असच्प्रत्यये निपातनात् सिद्धम् । 'पनसबिसबुससाहसानि नपुंसके' ( पा.लि. ९७ ) इति क्लीबत्वम् । फले नपुंसकत्वं वृक्षे तु पुंस्त्वम् । कटहर इति भाषायाम् ।

**४.१.१.११०. परागः (पं.३२८८, श्लो.१५०)**

परा गच्छतीति विग्रहे 'गम्लृ गतौ' (भ्वा.प.अ.१०५१) इति धातोः 'अन्येष्वपि दृश्यते' ( पा.३।२।१०१) इति सूत्रेण डप्रत्ययेऽनुबन्धलोपे 'टेः' (पा.६।४।१४३) इति टिलोपे पराग इति । 'परागः सुमनोरजः' ( अमरः प्र.७१३ ) इति निर्देशात् पुंस्त्वम् । फूलको रस इति भाषायाम् ।

**४.१.१.१११. परूषकम् (पं.३१८७, श्लो.९९)**

पृणातीति विग्रहे 'पॄपालनपूरणयोः' (क्र्या.प.अ.१५८७) इति धातोः बाहुलकादूषन्प्रत्यये (शब्दकल्पद्रुमः) ततः 'संज्ञायां कन्' (पा.४।३।१४७) इति सूत्रेण स्वार्थे कन् परूषकमिति । 'फलजातिः ' ( पा.लि. १६२ ) इति क्लीबत्वम् । फाल्सा (स्यालफुस्रा) इति भाषायाम् ।

**४.१.१.११२. पलाण्डुः (पं.३०९१, श्लो.५१)**

पलतीति विग्रहे 'पल गतौ' (भ्वा.प.से.८९७) इति धातोः बाहुलकात् आण्डुप्रत्यये पलाण्डुः ।'उकारान्तः' ( पा.लि. ५१) इति पुंस्त्वम् । प्याज इति भाषायाम् ।

**४.१.१.११३. पायसम् (पं.३२६२, श्लो.१३७)**

पयसि संस्कृतमिति विग्रहे 'संस्कृतं भक्षाः' (पा.४।२।१६) इति सूत्रेणाण्प्रत्यये 'तद्धितेष्वचामादेः' (पा.७।२।११७) इति सूत्रेणादिवृद्धः पायसमिति ।'अणाद्यन्तास्तेन रक्ताद्यर्थे नानार्थभेदकाः' ( अ.लि.४५ ) इत्यविशिष्टलिङ्गत्वम् । खीर इति भाषायाम् ।

**४.१.१.११४. पालङ्की (पं.३०२९, श्लो.२०)**

पालनमिति विग्रहे 'पाल रक्षणे' (चु.प.से.१७२९क) इति धातोः 'सम्पदादिभ्यः क्विप्' ( वा.३।३।९४) इति वार्तिकेन क्विप्प्रत्यये तस्य सर्वापहारलोपे पाल् इति जाते पाल् अङ्क्यते इत्यवस्थायाम् 'अङ्क पदे लक्षणे च' (चु.प.से) इति धातोः ततो घञ्प्रत्यये गौरादित्वात् ङीषि पालङ्कीति । 'ङ्याबूङन्तं चलं स्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम् । पालुङ्गो इति भाषायाम् ।

**४.१.१.११५. पिण्डितकः (पं.३०७२, श्लो.४२)**

पिण्डीं तनोतीति विग्रहे 'तनु विस्तारे' (त.प.से.१५५७) इति धातोः 'अन्येभ्योऽपिदृश्यते' (वा.३।२।१०१) इति वार्तिकेन डप्रत्यये टिलोपे 'संज्ञायां कन्' (पा.५।३।७५) इति स्वार्थे कन्प्रत्यये पिण्डितक इति । 'कोपधः ' ( पा.लि. ६१ ) इति पुंस्त्वम् । पिडालु इति भाषायाम् ।

**४.१.१.११६. पिप्पली (पं.३१२७, श्लो.६९)**

पिपर्तीति विग्रहे 'पॄ पालनपूरणयोः' (जु.प.से.११६१) इति धातोर्बाहुलकादलच्प्रत्यये (भानुजी) 'पृषोदरादीनि यथोपदिष्टम्' (पा.६।३।१०९ ) इति सूत्रेणेत्वे पकारे पिप्पल इति जाते गौरादित्वात् 'षिद्गौरादिभ्यश्च' (पा.४।१।४१) इति सूत्रेण ङीषि पिप्पलीति ।'ङ्याबूङन्तं चलं सस्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम् । पिप्ला इति भाषायाम् ।

**४.१.१.११७. पिष्टका (पं.३२७२, श्लो.१४२)**

पिष्टानां विकार इति विग्रहे 'संज्ञायां कन्' (पा.४।३।१४७) इति सूत्रेण स्वार्थे कन्प्रत्यये स्त्रीत्वे टापि पिष्टकेति । 'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । साधारण पिठाका पक्वान्न सेल दँदेउरा इति भाषायाम् ।

**४.१.१.११८. पीता (पं.३११३, श्लो.६२)**

पीयत इति विग्रहे 'पा पाने' (भ्वा.प.से.९९१) इति धातोः 'निष्ठा' (पा.३।२।१०२) इति सूत्रेण कर्मणि क्तप्रत्यये'घुमास्थागापाजहातिसां हलि' (पा.६।४।६६) इति सूत्रेण ईत्वे टापि पीता । 'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । हलेदो (वेसार) इति भाषायाम् ।

**४.१.१.११९. पीतपुष्पा (पं.३०५३, श्लो.३२)**

पीतं पुष्पं यस्या इति विग्रहे 'अनेकमन्यपदार्थे' (पा.२।२।२४) इति सूत्रेण बहुव्रीहिसमासे स्त्रीत्वविवक्षायाम् 'अजाद्यतष्टाप्' (पा.४।१।४) इति सूत्रेण टापिपीतपुष्पेति । 'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । चटेला इति भाषायाम् ।

**४.१.१.१२०. पीतफला (पं.३०३९, श्लो.२५)**

पीतं फलं यस्या इति विग्रहे 'अनेकमन्यपदार्थे ' (पा.२।२।२४ ) इति सूत्रेण बहुव्रीहिसमासे स्त्रीत्वविवक्षायां 'अजाद्यतष्टाप्' (पा.४।१।४) इति सूत्रेण टाप्प्रत्यये पीतफला । 'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । फर्सी इति भाषायाम् ।

**४.१.१.१२१. पीलुः (पं.३१९८, श्लो.१०५)**

पीलतीति विग्रहे 'पील प्रतिष्ठम्भे' (भ्वा.प.से.५५९) इति धातोः 'मृगय्वादयश्च' (उ.१।३७) इति सूत्रेण उप्रत्यये पीलुरिति । 'उकारान्तः' ( पा.लि. ५१ ) इति पुंस्त्वम् । दाते ओखर इति भाषायाम् ।

**४.१.१.१२२. पूगफलम् (पं.३१९६, श्लो.१०४)**

पूगस्य फलमिति विग्रहे 'षष्ठी '(पा.२।२।८ ) इति सूत्रेण समासे पूगफलमिति । 'फलजातिः' ( लि.१६२ ) इति क्लीबत्वम् ।सुपारीका फलका नाम ।

**४.१.१.१२३. पुष्पम् (प.३२८६, श्लो.१४९)**

पुष्यतीति विग्रहे 'पुष्प विकसने' (दि.प.से.११९७) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इति सूत्रेणाच्प्रत्यये पुष्पमिति ॥ 'बलकुसुमशुल्वपत्तन-रणाभिधानानि' ( पा.लि. १५८ ) इति क्लीबत्वम् । फूल इति भाषायाम् ।

**४.१.१.१२४. पुष्पशाका (पं.३०५४, श्लो.३३)**

पुष्पं शाकं यस्या इति विग्रहे 'अनेकमन्यपदार्थे' (पा.२।२।२४) इति सूत्रेण बहुव्रीहिसमासे टापि पुष्पशाकेति । 'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । फूलगोभी इति भाषायाम् ।

**४.१.१.१२५. पूगः (पं.३१९५, श्लो.१०३)**

पुनातीति विग्रहे 'पूञ् पवने' (क्र्या.उ.से.१५८०) इति धातोः 'छापूखडिभ्यः कित्' ( उ.१।१२४) इति सूत्रेण गन्प्रत्यये कित्त्वात् गुणनिषेधे पूगः ॥ 'अर्घपथिमथ्यृभुक्षिस्तम्बनितम्बपूगाः' ( पा.लि. ११६ ) इति पुंस्त्वम् । सुपारी इति भाषायाम् ।

**४.१.१.१२६.पूतिका (पं.३०३०, श्लो.२१)**

पुनातीति विग्रहे 'पूञ् पवने' (क्र्या.उ.से.१५८०) इति धातोः 'तिन्तिडिकादयश्च' ( उ.४।२०) इति सूत्रेण इकन् प्रत्यये तुक्चागमे पूतिक इत्यवस्थायां स्त्रीत्वविवक्षायाम् 'अजाद्यतष्टाप्' (पा.४।१।४) इति सूत्रेण टापि पूतिकेति ।'ऊङाबन्तश्च ' ( लि. ११ ) इति स्त्रीत्वम् । पवै इति भाषायाम् ।

**४.१.१.२२७. पूपः (पं.३२७३, श्लो.१४३)**पुवं पवित्रं पाति रक्षतीति विग्रहे 'पा रक्षणे' ( अ.प.अ.११३२) इति धातोः 'आतोऽनुपसर्गे कः' (पा.३।३।३) इति सूत्रेण कप्रत्यये 'आतो लोप इटि च' (पा.६।४।६४) इत्याकारलोपे पूप इति ।'पोपधः' (पा.लि.७७ ) इति पुंस्त्वम् । माल्पुवा इति भाषायाम्

**४.१.१.१२८. पूरिका (पं.३२७०, श्लो.१४१)**

पूर्यत इति विग्रहे 'पॄ पालनपूरणयोः' (क्र्या.प.अ.१५८७) इति धातोः 'कॄगॄशॄपॄकुटिभिदिछिदिभ्यश्च'(उ.४।१४२) इति सूत्रेण इप्रत्यये 'उदोष्ठ्यपूर्वस्य' (पा.७।१।१०२) उत्वे रपरत्वे 'हलि च' (पा.८।२।७७ ) इति दीर्घे 'संज्ञायां कन्' (पा.४।३।१४७) इति सूत्रेण स्वार्थे कन्प्रत्यये टाप्युपान्तस्येत्वे पूरिकेति । 'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । पूरी इति भाषायाम् ।

**४.१.१.१२९. पृथुः (पं.३०९२, श्लो.५२)**

प्रथत इति विग्रहे 'प्रथ प्रख्याने' (भ्वा.आ.से.)८१४ इति धातोः 'प्रथिम्रदिभ्रस्जां सम्प्रसारणं सलोपश्च' (उ.१।२८) इति सूत्रेण कुप्रत्यये सम्प्रसारणे स्वादिकार्ये पृथुरिति । 'उकारान्तः' ( पा.लि. ५७ज्ञ) इति पुंस्त्वम् । जिम्बु इति भाषायाम् ।

**४.१.१.१३०. पेयम् (पं.३२६८, श्लो.१४०)**

पातुं योग्यमिति विग्रहे 'अचो यत्' (पा.३।१।९७) इचि सूत्रेण यत्प्रत्यये 'ईद्यति' ( पा.६।४।६५) इति सूत्रेणेत्वे 'सार्वधातुकार्धधातुकयोः' (पा.७।३।८४) इति सूत्रेण गुणे पेयमिति । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥' ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । पिउन योग्य इति भाषायाम् ।

**४.१.१.१३१. प्रियालः (पं.३१७२, श्लो.९२)**

पीयत इति विग्रहे 'प्रीयु' (उ.३५५)इति सौत्रधातोः 'प्रीयुक्वणिक्भ्यां कालन्ह्रस्वसंप्रसारणं च' (उ.३।७६) इति सूत्रेण कालन्प्रत्ययेऽनुबन्धलोपे ह्रस्वे प्रियाल इति (भानुजी)।'राजादनं प्रियालः स्यात्सन्नकद्रुर्धनुष्पटः' ( अ.लि.७४९ ) इति निर्देशात् पुंस्त्वम् । चिरौंजी इति भाषायाम् ।

**४.१.१.१३२. फेनिका (पं.३२७३, श्लो.१४३)**

फेन इव प्रतिकृतिरस्त्यस्या इति विग्रहे 'इवे प्रतिकृतौ' (५।३।९६) कन्प्रत्यये स्त्रीत्वे टाप्युपान्तस्येत्वे फेनिकेति । 'ऊङाबन्तश्च ' ( .पा.लि. ११ ) इति स्त्रीत्वम् । फीनि इति भाषायाम् ।

**४.१.१.१३३. बहुकण्टः (पं.३२०९, श्लो.११०)**

बहवः कण्टाः सन्ति यस्येति विग्रहे 'अनेकमन्यपदार्थे' (पा.२।२।२४) इति सूत्रेण बहुव्रीहिसमासे बहुकण्ट इति । 'टोपधः' ( पा.लि.६४ ) पुंस्त्वम् । ऐंसेलु इति भाषायाम् ।

**४.१.१.१३४. बिभीतकः (पं.३२१५, श्लो.११३)**

विगतं भीतं रोगभयमस्मादिति विग्रहे 'प्रादिभ्योधातुजस्य वाच्यो वा चोत्तरपदलोपः' ( वा.२।२।२४ ) इति समासे सुब्लुकि उत्तरपदलोपे 'संज्ञायां कन्' (पा.४।३।१४७ ) इति सूत्रेण स्वार्थे कन्प्रत्यये बिभीतक इति ।'कोपधः' (पा.लि.६१ ) इति पुंस्त्वम् । वर्रो इति भाषायाम् ।

**४.१.१.१३५. बिम्बिका (पं.३०५८, श्लो.३५)**

बिम्बीं कामयतीति विग्रहे 'कै शब्दे '(भ्वा.प.से.९८२) धातोः 'आदेचउपदेशेऽशिति' ( पा.६।१।४५) इति सूत्रेणात्वे 'आतोऽनुपसर्गे कः' (पा.३।२।३) इति सूत्रेण कप्रत्ययेऽनुबन्धलोपे 'आतोलोप इटि च' (पा.६।४।६४) इत्याकारलोपे ' ङ्यापोः संज्ञाछन्दसोर्बहुलम्' (पा.६।३।६३) इति सूत्रेण ह्रस्वे स्त्रीत्वविवक्षायां टापि बिम्बिकेति । 'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । गोलकाक्री इति भाषायाम् ।

**४.१.१.१३६. बीजपूरः (पं.३१४५, श्लो.७८)**

बीजेन पूर्यत इति विग्रहे 'पूरी आप्यायने' (दि.आ.से.१२२६) इति धातोः 'इगुपधज्ञाप्रीकिरः कः' (पा.३।१।१३५) इति सूत्रेण कप्रत्यये बीजपूर इति । 'रोपधः ' ( पा.लि. ८९ ) इति पुंस्त्वम् । बिमिरा इति भाषायाम् ।

**४.१.१.१३७. ब्राह्मी (पं.३०३३, श्लो.२२)**

ब्रह्मण इयमिति विग्रहे 'तस्येदम्' (पा.४।३।१२०) इति सूत्रेणाण्प्रत्यये ब्रह्मन् अ इत्यवस्थायां 'ब्राह्मोऽजातौ' (पा.६।४।१७१) इति सूत्रेण टिलोप उपधावृद्धौ 'टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्-तयप्ठक्ठञ्कञ्क्वरपः' (पा.४।१।१५) इति सूत्रेण ङीप्प्रत्यये ब्राह्मीति । 'ङचाबूङन्तं चलं स्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम् । हुरहुरे, घोडताप्रे इति च भाषायाम् ।

**४.१.१.१३८. भक्तम् (पं.३२५९, श्लो.१३५)**

भज्यते स्मेति विग्रहे 'भज सेवायाम्' (भ्वा.उ.अ.१०६७) इति धातोः 'निष्ठा' ( पा.२।२।३६) इति सूत्रेण कर्मणि क्तप्रत्ययेभक्तमिति । 'निष्ठा च' ( पा.लि.१२० ) इति क्लीबत्वम् । भात इति लोके ।

**४.१.१.१३९. भक्ष्यम् (पं.३२६८, श्लो.१४०)**

भक्षितुं योग्यमिति विग्रहे 'भक्ष अदने' (भ्वा.प.से.९५९) इति धातोः 'ऋहलोर्ण्यत्' ( पा.३।१।१२४) इति सूत्रेण ण्यत्प्रत्यये भक्ष्यमिति ।'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः ।

कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥' ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । साधारण चपाएर खानुपर्ने लड्डु प्रभृतिको नाम इति भाषायाम ।

**४.१.१.१४०. भङ्गा (पं.३२७९, श्लो.१४६)**

भज्यतेऽनयेति विग्रहे 'भञ्जो आमर्दने' (रु.प.से.१५४७) इति धातोः 'अकर्तरि च कारके संज्ञायाम्' (पा.३।३।१९) इत्यनेन 'हलश्च' (पा.३।३।१२१) इति सूत्रेण वा घञ्प्रत्यये 'चजोः कु घिण्ण्यतोः' (पा.७।३।५२) इति सूत्रेण कुत्वे स्त्रीत्वविक्षायां टापि भङ्गेति । 'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । भाङ इति भाषायाम् ।

**४.१.१.१४१. भवम् (पं.३१५५, श्लो.८३)**

भवत्यस्मादिति विग्रहे 'भू सत्तायाम्' (भ्वा. प. से.१) इति धातोः 'ऋदोरप् '( पा.३।३।५७) इति सूत्रेणाप्प्रत्यये 'सार्वधातुकार्धधातुकयोः' (पा.७।३।८४) इति सूत्रेण गुणे 'एचोऽयवायावः' ( पा.६।१।७७ ) इति सूत्रेणावादेशे भवमिति । 'फलजातिः ' ( पा.लि. १६२ ) इति क्लीबत्वम् । लिची इति भाषायाम् ।

**४.१.१.१४२. भूपनसम् (पं.३१९२, श्लो.१०२)**

भुवः पनसमिति विग्रहे 'षष्ठी '(पा.२।२।८ ) इति सूत्रेण समासे भूपनसमिति । 'पनसबिसबुससाहसानि नपुंसके' ( पा.लि. ९७ ) इति क्लीबत्वम् । फले नपुंसकत्वं वृक्षे तु पुंस्त्वम् । भई कटहर इति भाषायाम् ।

**४.१.१.१४३. भोज्यम् (पं.३२६८श्लो.१४०)**

भोक्तुं योग्यमिति विग्रहे 'भुज पालनाभ्यवहारयोः' (रु..प.अ.१५४८) इति धातोः 'ऋहलोर्ण्यत्' (पा.३।१।१२४) इति सूत्रेण ण्यत्प्रत्यये लघूपधगुणे भोज्यमिति । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥' ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । नचपाएर पनि सजिलै निलिने भात प्रभृतिको नाम इति भाषायाम् ।

**४.१.१.१४४. मकरन्दः (पं.३२८८, श्लो.१५०)**

मकरमपि द्यतीति विग्रहे 'दो अवखण्डने' (दि.प.अ.१२२३) इति धातोः 'आदेच उपदेशेऽशिति' (६।१।४५) इत्यात्वे 'आतोऽनुपसर्गे कः' (पा.३।२।३) इति सूत्रेण कप्रत्यये 'आतो लोप इटि च' (६।४।६४) इत्याकारलोपे 'पृषोदरादीनि यथोपदिष्टम्' (पा.६।३।१०९) इति सूत्रेण नकारे मकरन्द इति । 'मकरन्दः पुष्परसः' ( अ.प्र.७१३ ) इति निर्देशात् पुंस्त्वम् । फूलको रस इति भाषायाम् ।

**४.१.१.१४५. मदिरा (पं.३२५३, श्लो.१३२)**

माद्यत्यनयेति विग्रहे 'मदी हर्षे' (दि.प.से.१२८५) इति धातोः 'इषिमदिमुदिखिदिच्छिदिभिदिमन्दिचन्दितिमिमिहिमुहिमुचिरुचिरुधिवन्धिशुभ्यः किरच्' (उ.१।५४) इति सूत्रेण किरच्प्रत्यये स्त्रीत्वविवक्षायां टापि मदिरेति। 'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम्। रक्सी इति भाषायाम्।

**४.१.१.१४६. मधु (पं.३२३२, श्लो.१२२)**

मन्यत इति विग्रहे 'मन ज्ञाने' (दि.आ.अ.१२५३) इति धातोः 'फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च' (उ.१।१८) इति सूत्रेणोप्रत्यये धादेशे च मधु। 'मद्गुमधुसीधुशीधुसानुकमण्डलूनि नपुंसके च' ( लिङ्गानुशासनम् ५६ ) इति पुंस्त्वं नपुंसकत्वञ्च। मह इति भाषायाम्।

**४.१.१.१४७. मधुवारः (पं.३२००, श्लो.१०६)**

मधुनो वार इति विग्रहे 'षष्ठी' (पा.२।२।८ ) इति सूत्रेण समासे मधुवार इति। 'घञबन्तः' ( लिङ्गानुशासनम् ३६ ) इति पुंस्त्वम्। 'रोपधः ' ( पा.लि. ८९ ) इति च पुंस्त्वम्। मौवा इति भाषायाम्।

**४.१.१.१४८.मधुकर्कटी (पं.३२०७, श्लो.१०९)**

मधु चासौ कर्कटी चेति विग्रहे 'विशेषणं विशेष्येण बहुलम्' (पा.२।५।७ ) इति सूत्रेण कर्मधारयसमासे कधुकर्कटीति।'ङ्याबूङन्तं चलं सस्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम्। मेवा फल इति भाषायाम्।

**४.१.१.१४९. मरीचकम् (पं.३१०८, श्लो.६०)**

म्रियते विषमनेनेति विग्रहे 'मृङ् प्राणत्यागे' (तु .आ. अ.१४९७) इति धातोः बाहुलकादिच्प्रत्यये (भानुजी) गुणे 'संज्ञायां कन्' (पा.५।३।७५) इति सूत्रेण स्वार्थे कन्प्रत्यये मरीचकमिति। 'फलजातिः ' ( पा.लि. १६२ ) इति क्लीबत्वम्। मरीच इति भाषायाम्।

**४.१.१.१५०. मसुरः (पं.३००३, श्लो.७)**

मस्यतीति विग्रहे 'मसी परिमाणे' (दि.प.से.१२००) इति धातोः 'मसेरुरन्' (उ.५।३) इति सूत्रेण उरन्प्रत्यये मसुर इति। 'रोपधः ' ( पा.लि. ८९ ) **इति** पुंस्त्वम्।

**४.१.१.१५१.महाकायः (पं.३०१९, श्लो.१५)**

महान् काय यस्य इति विग्रहे 'अनेकमन्यपदार्थे' (पा.२।२।२४) इति सूत्रेण बहुव्रीहिसमासे 'आन्महतः समानाधिकरणजातीययोः' (पा.६।३।४६) इति सूत्रेणात्वे सवर्णदीर्घे महाकाय इति । 'योपधः' ( पा.लि. ८६ ) इति पुंस्त्वम् । मकै इति भाषायाम् ।

**४.१.१.१५२.महामाषः (पं.३०००, श्लो.६)**

महान् च असौ माषश्चेति विग्रहे 'विशेषणं विशेष्येण बहुलम्' (पा.२।१।५७) इति सूत्रेण कर्मधारयसमासे महत् मास इति जाते 'आन्महतःसमानाधिकरणजातीययोः' ( पा.६।३।४६) इति सूत्रेण आत्वे मह आ मास इति जाते 'अकः सवर्णे दीर्घः' (पा.६।१।१०१)इति सूत्रेण दीर्घे महामासः । 'घञबन्तः' ( पा.लि. ३६ ) इति पुंस्त्वम् । बोडी इति भाषायाम् ।

**४.१.१.१५३ मारिष. (पं.३०२७, श्लो.१९)**

रिष्यतीति विग्रहे 'रिष हिंसायाम्' (दि.प.से.१३११) इति धातोः 'इगुपधज्ञाप्रीकिरः कः' (पा.३।१।१३५) इति सूत्रेण कप्रत्यये प्रतिषेधार्थकमाशब्देन समासे मारिष इति ।'षोपधः' ( पा.लि. ९३ ) इति पुंस्त्वम् । लट्टे इति भाषायाम् ।

**४.१.१.१५४.मालती (पं.३३१०, श्लो.१६१)**

मालं तनोतीति विग्रहे 'तनु विस्तारे' (त.उ.से.१५५७) इति धातोः 'अन्येभ्योऽपि दृश्यते' (वा.३।२।१००) इति डप्रत्यये टिलोपे 'षिद्गौरादिभ्यश्च' (पा.४।१।४१) इति ङीषि मालतीति । 'ङ्याबूङन्तं चलं स्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम् । चमेली इति भाषायाम् ।

**४.१.१.१५५.माषः (पं.२९९९, श्लो.५)**

मष्यते = हिंस्यते अनेनेति विग्रहे 'मष हिंसायाम्' (भ्वा.प.से.७३८) इति धातोः 'हलश्च' (पा.३।३।१२१)इति सूत्रेण घञ्प्रत्यये 'अत उपधायाः' (पा.७२।११६) इति सूत्रेण वृद्धौ माष इति । 'घञबन्तः' ( पा.लि. ३६ ) इति पुंस्त्वम् । कालो दाल इति भाषायाम् ।

**४.१.१.१५६.मुद्गः (पं.२९९७, श्लो.४)**

मुद्यत अनेनेति विग्रहे 'मुद हर्षे' (भ्वा.आ.से.१६०) इति धातोः गकप्रत्यये (आप्टे सन्२००१) मुद्गः । 'ज्ञेयं शिष्टप्रयोगतः' ( अ.लि.४६ ) इति पुंस्त्वम् । मुगीमास इति भाषायाम् ।

**४.१.१.१५७.मुनिप्रियः (पं.३०२४, श्लो.१८)**

मुनीनां प्रिय इति विग्रहे 'षष्ठी' (पा.२।२।८) इति सूत्रेण षष्ठीतत्पुरुषसमासे मुनिप्रियः । 'ज्ञेयं शिष्टप्रयोगतः' ( अ.लि.४६ ) इति पुंस्त्वम् । फापर इति भाषायाम् ।

**४.१.१.१५८. मूलकम् (पं.३०८५, श्लो.४८)**

मूलतीति विग्रहे 'मूल प्रतिष्ठायाम्' (भ्वा.प.से.५६७) इति धातोः 'क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापि' (उ.२।३२) इति सूत्रेण क्वुन्प्रत्यये 'युवोरनाकौ' (पा.७।१।७) इति सूत्रेणाकादेशे मूलकमिति ।'व्यञ्जनान्यनुलेपनम्' ( अ.लि.२३ ) इति क्लीबत्वम् । मूला इति भाषायाम् ।

**४.१.१.१५९. मेथिका (पं.३०९६, श्लो.५४)**

मेथतीति विग्रहे 'मेथृ मेधाहिंसनयोः' (भ्वा.उ.से.९३१) इति धातोः 'ण्वुल्तृचौ' ( पा.३।१।१३३) इति सूत्रेण ण्वुल्प्रत्यये स्त्रीत्वविवक्षायाम् 'अजाद्यतष्टाप्' (पा.४।१।४) इति सूत्रेण टाप्प्रत्यये 'प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः' (पा.७।३।४४) इति सूत्रेणेत्वे मेथिकेति । 'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । मेथी इति भाषायाम् ।

**४.१.१.१६०. मोदकम् (पं.३२७०, श्लो.१४१)**

मोदयत इति विग्रहे 'मुद हर्षे' (भ्वा.आ.से.१६०) इति धातोः 'हेतुमति च' (३।१।२६) इति णिचि 'ण्वुल्तृचौ' (पा.३।१।१३३) इति सूत्रेण ण्वुल्प्रत्यये 'युवोरनाकौ' (पा.७।१।१) इति सूत्रेणाऽकादेशे 'पुगन्तलघूपधस्य च' ( पा.७।३।८६) इति सूत्रेण लघूपधगुणे मोदकमिति । 'मोदकस्तण्डकष्टङ्कः' ( अ.लि.३३ ) इति निर्देशात् पुंनपुंसकत्वम् । लड्डू इति भाषायाम् ।

**४.१.१.१६१. यवः (पं.२९९४, श्लो.३)**

यौतीति विग्रहे 'यु मिश्रणामिश्रणयोः' (अ.प.से.११०७) इति धातोः 'नन्दिग्रहिपचादिभ्योल्युणिन्यचः' (पा.३।१।१३४) इति सूत्रेणाच्प्रत्यये यु अ इति जाते 'सार्वधातुकार्धधातुकयोः' (पा. ७ ३।८४ ) इति सूत्रेण गुणे 'एचोऽयवायावः' (पा.६।१।७७) इति सूत्रेणावादेशे यव इति ।'घाजन्तश्च' ( पा.लि. ३७ ) इति पुंस्त्वम् । जौ इति भाषायाम् ।

**४.१.१.१६२. यवानी (पं.३०९५, श्लो.५३)**

यवशब्दात् स्त्रीत्वविवक्षायाम् 'इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमा-तुलाचार्याणामानुक्' (पा.४।१।४९) इति सूत्रेण ङीप्प्रत्यय आनुगागमे च यवानीति । 'ङ्याबूङन्तं चलं स्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम् । ज्वानु इति भाषायाम् ।

**४.१.१.१६३.रक्तबीजा (पं.३१७९, श्लो.९५)**

रक्तं बीजं यस्याः सेति विग्रहे 'अनेकमन्यपदार्थे' (पा.२।२।२४ ) इति सूत्रेण बहुव्रीहिसमासे स्त्रीत्वविवक्षायां 'अजाद्यतष्टाप्' (पा.४।१।४) इतिटापि रक्तबीजेति । 'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । मुमबदाम इति भाषायाम् ।

**४.१.१.१६४.राजमाषः (पं.३००३, श्लो.७)**

माषाणां राजाइति विग्रहे ‘षष्ठी’ (पा.२।२।८ )इति सूत्रेण समासे राजदन्तादित्वात् परनिपाते राजमाष इति । ‘घञबन्तः’ ( पा.लि. ३६ ) इति पुंस्त्वम् । भटमास इति भाषायाम् ।

**४.१.१.१६५. राजिका (पं.३०१५, श्लो.१३)**

राजतीति विग्रहे ‘राजृ दीप्तौ’ (भ्वा.उ.से.८८०) इति धातोः ‘क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापि’ (उ.२।२४) इति सूत्रेण क्वुन्प्रत्यये राज् वु इति जाते ‘युवोरनाकौ’ ( पा.७।१।१) इति सूत्रेणाकादेशे राज् अक इत्यवस्थायां स्त्रीत्वविवक्षायाम् ‘अजाद्यतष्टाप्’ ( पा.४।१।४) इति सूत्रेण टाप्प्रत्यये राजका इति जाते ‘प्रत्ययस्थात्कात्पूर्वस्यातइदाप्यसुपः’ ( पा.७।३।४४) इति सूत्रेणोपान्तस्याकारस्येत्वे राजिकेति ।‘ऊङाबन्तश्च ’ ( पा.लि. ११ ) इति स्त्रीत्वम् । रायो इति भाषायाम् ।

**४.१.१.१६६. रामफलम् (पं.३१६७, श्लो.८९)**

रामस्य फलमिति विग्रहे ‘षष्ठी’ (पा.२।२।८ ) इति सूत्रेण समासे रामफलमिति । ‘फलजातिः’ ( लिङ्गानुशासनम् १६२ ) इति क्लीबत्वम् । ‘फलजातिः’ ( पा.लि. *१६२ ) इति क्लीबत्वम् । हलुवावेत इति भाषायाम् ।*

**४.१.१.१६७. लवङ्गम् (पं.३१२१, श्लो.६६)**

लुनातीति विग्रहे ‘लूञ् छेदने’ (क्र्या.प.से.१५८१) इति धातोः ‘त्वरत्यादिभ्यश्च’ ( उ.१।१२०) इति सूत्रेण अङ्गच्प्रत्यये गुणेऽवादेशे लवङ्गमिति ।‘फलजातिः ’ ( पा.लि. १६२ ) इति क्लीबत्वम् । ल्वाङ् इति भाषायाम् ।

**४.१.१.१६८. लवणम् (पं.३२४०, श्लो.१२६)**

लुनातीति विग्रहे ‘लूञ् छेदने’ (क्र्या.उ.से.१५८१) इति धातोः ‘नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः’ (पा.३।१।१३४) इति सूत्रेण ल्युट्प्रत्यये ‘युवोरनाकौ’ (पा.७।१।१ ) इत्यनादेशे ‘सार्वधातुकार्धधातुकयोः’ (पा.७।३।८४) इति गुणेऽवादेशे गणपाठे निपातनाद् णत्वे लवणम् । ‘जलपुष्पाणि लवणम्’ ( अ.लि.२३ ) इति क्लीबत्वम् । नुन इति भाषायाम् ।

**४.१.१.१६९. लशुनम् (पं.३०९०, श्लो.५१)**

अश्नातीति विग्रहे ‘अश भोजने’ (क्र्या.प.से.१६२४) इति धातोः ‘अशेर्लश्च’ (उ.३।५७) इति सूत्रेण उनन्प्रत्यये लादेशे च लशुनम् ।‘फलजातिः ’ ( पा.लि. १६२ ) इति क्लीबत्वम् । ‘व्यञ्जनान्यनुलेपनम्’ ( अ.लि.२३ ) इति च क्लीबत्वम् ।

**४.१.१.१७०. लेह्यम् (पं.३२६८, श्लो.१४०)**

लेहितुं योग्यमिति विग्रहे 'लिह आस्वादने' (अ.उ.अ.१०८६) इति धातोः 'ऋहलोर्ण्यत्' (पा.३।१।१२४) इति सूत्रेण ण्यत्प्रत्यये 'पुगन्तलघूपधस्य च' ( पा.७।३।८६) इति सूत्रेण लघूपधगुणे लेह्यमिति ।'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥' ( अ. लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । चाट्न योग्य इति भाषायाम् ।

**४.१.१.१७१.वटका (पं.३२७२, श्लो.१४२)**

वटतीति विग्रहे 'वट वेष्टने' (भ्वा.प.से.) इति धातोः 'क्वुन्शिल्पिसंज्ञयोरपूर्वस्यापि' ( उ.२।३२) इति सूत्रेण क्वुन्प्रत्यये 'युवोरनाकौ' (पा.७।१।१)इत्यकादेशे टापि वटकेति । 'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । वारा (फुरौला) इति भाषायाम् ।

**४.१.१.१७२. वनमुद्गः (पं.२९९८, श्लो.५)**

वनस्य मुद्गः इति विग्रहे 'षष्ठी' (पा.२।२।८) इति सूत्रेण समासे वनमुद्गः ।'ज्ञेयं शिष्टप्रयोगतः' ( अ.लि.४६ ) इति पुंस्त्वम् । मोठ इति भाषायाम् ।

**४.१.१.१७३. वरवर्णिनी (पं.३११२, श्लो.६२)**

वरश्चासौ वर्णश्चेति विग्रहे 'विशेषणं विशेष्येण बहुलम्' (पा.२।१।५७) इति सूत्रेण कर्मधारयसमासे,वरवर्णोऽस्या अस्तीति विग्रहे 'अत इनिठनौ' (पा.५।२।११५) इति सूत्रेण इन्प्रत्यये 'ऋन्नेभ्यो ङीप्' (पा.४।१।५) इति सूत्रेण ङीपि वरवर्णिनीति ।'ङ्याबूङन्तं चलं सस्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम् । वेसार इति भषायाम् ।

**.१.१.१७४. वर्वरी (पं.३०१८, श्लो.१५)**

वर्वर्तीति विग्रहे 'वृञ् वरणे' (स्वा.उ.से.१३३४) इति धातोः 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' (पा.३।१।२२) इति सूत्रेण यङ्यनुबन्धलोपे 'यङोऽचि च' (पा.२।४।७४) इति सूत्रेण यङो लुकि 'सन्यङोः' (पा.६।१।९) इति सूत्रेण द्वित्वे अभ्यासकार्ये गुणे वर्वर् इति जाते 'ऋतश्च' (पा.७।४।९२) इत्यभ्यासस्य रुगागमे 'नन्दिग्रहिपचादिभ्योल्युणिन्यचः' (पा.३।१।१३४) इति सूत्रेण अच्प्रत्यये गौरादित्वात् 'षिद्गौरादिभ्यश्च' (पा.४।१।४१) इति ङीषि वर्वरीति । 'ङ्याबूङन्तं चलं स्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम् । वाजरा इति भाषायाम् ।

**४.१.१.१७५. वातादकः (पं.३१४०, श्लो.७६)**वाताय वातनिवृत्तये अद्यत अनेनेति विग्रहे 'अद भक्षणे' (अ.प.अ.१०८१) इति धातोः (शब्दकल्पद्रुमः) 'हलश्च' (पा.३।३।१२१) इति सूत्रेण घञ्प्रत्यये उपधावृद्धौ सवर्णदीर्घे स्वार्थे कन्प्रत्यये वातादक इति । 'घञबन्तः' ( पा.लि. ३६ ) इति पुंस्त्वम् । वदाम इति भाषायाम् ।

**४.१.१.१७६. वार्ताकी (पं.३०६९, श्लो.४०)**

वार्तमारोग्यमाकयतीति विग्रहे 'अक कुटिलायां गतौ' (भ्वा.प.से.८४४) इति धातोः 'हेतुमति च' (पा.३।१।२६) इति णिच्यनुबन्धलोपे वार्तं आकि इति जाते 'कर्मण्यण्' (पा.३।२।१)इति सूत्रेणाण्प्रत्यये 'उपपदमतिङ्' (२।२।१९) इत्युपपदसमासे सवर्णदीर्घे 'टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः' (पा.४।१।१५ ) इति सूत्रेण ङीपि वार्ताकीति । 'ङ्याबूङन्तं चलं सस्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम् । भण्टा इति भाषायाम् ।

**४.१.१.१७७. वास्तूकम् (पं.३०२५, श्लो.१८)**

देहे वसतीति विग्रहे 'वस निवासे' (भ्वा.प.से.१०७४) इति धातोः 'उलूकादयश्च' (उ.४।४१) इति सूत्रेण ऊकञ्प्रत्यये 'अत उपधायाः' (पा.६।२।११६) इति सूत्रेण उपधावृद्धौ वास्तूकमिति ।'व्यञ्जनान्यनुलेपनम्' ( अ.लि.२३ ) इति क्लीबत्वम् । वेथु इति भाषायाम् ।

**४.१.१.१७८. विडम् (पं.३२४३, श्लो.१२७)**

विडतीति विग्रहे 'विड भेदने' (तु.प.से.) इति धातोः 'इगुगधज्ञाप्रीकिरः कः' (पा.३।१।१३५) इति सूत्रेण कप्रत्यये विडमिति ।'जलपुष्पाणि लवणम्' ( अ.लि.२३ ) इति क्लीबत्वम् । विरेनून इति भाषयाम् ।

**४.१.१.१७९. विल्वः (पं.३१५६, श्लो.८४)**

विलतीति विग्रहे 'विल संवरणे' (तु.प.से.१४४६) इति धातोरुल्वादित्वात् 'उल्वादयश्च' (उ.४।९५) इति सूत्रेण वन्प्रत्यये विल्व इति ।'ज्ञेयं शिष्टप्रयोगतः' ( अ.लि.४६ ) इति पुंस्त्वम् । बेल इति भाषायाम् ।

**४.१.१.१८०. विष्णुकन्दः (पं.३०७८, श्लो.४५)**

विष्णोः कन्दः इति विग्रहे 'षष्ठी' (पा.२।२।८ ) इति सूत्रेण तत्पुरुषसमासे विष्णुकन्द इति ।'ज्ञेयं शिष्टप्रयोगतः' ( अ.लि.४६ ) इति पुंस्त्वम् । वनतरुल इति भाषायाम् ।

**४.१.१.१८१. वृत्तपत्रः (पं.३१८१, श्लो.९६)**

वृत्तं पत्रं यस्येति विग्रहे 'अनेकमन्यपदार्थे' (पा.२।२।२४ ) इति सूत्रेण बहुव्रीहिसमासे वृत्तपत्र इति । 'ज्ञेयं शिष्टप्रयोगतः' ( अ.लि.४६ ) इति पुंस्त्वम् । काजू इति भाषायाम् ।

**४.१.१.१८२. वृत्तबीजः(पं.३०६८, श्लो.४०)**

वृत्तं बीजं यस्येति विग्रहे 'अनेकमन्यपदार्थे' (पा.२,२।२४ ) इति सूत्रेण बहुव्रीहिसमासे बृत्तबीज इति । 'घाजन्तश्च' ( पा.लि. ३७ ) इति पुंस्त्वम् । । भिण्डी इति भाषायाम् ।

**४.१.१.१८३. वृत्तबीजम् (पं.३२४८, श्लो.१३०)**

वृत्तं बीजं यस्य तदिति विग्रहे 'अनेकमन्यपदार्थे' (पा.२।२।२४ ) इति सूत्रेण समासे वृत्तबीजमिति । 'घाजन्तश्च' ( लिङ्गानुशासनम् ३७ ) इति पुंस्त्वञ्च ।'व्यञ्जनान्यनुलेपनम्' ( अ.लि.२३ ) इति च क्लीबत्वम् । गोलभेडा इति भाषायाम् ।

**४.१.१.१८४. व्यञ्जनम् (पं.३२६४, श्लो.१३८)**

व्यज्यतेऽनेनेति विग्रहे विपूर्वकात् 'अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु' (रु.प.से.१५५२) इति धातोः 'करणाधिकरणयोश्च' (पा.३।३।११७) इति ल्युट्यनादेशे व्यञ्जनमिति ।'व्यञ्जनान्यनुलेपनम्' ( अ.लि.२३ ) इति क्लीबत्वम् । सितन इति भाषायाम् ।

**४.१.१.१८५. शर्करा (पं.३२३७, श्लो.१२४)**

शृणाति पित्तमिति विग्रहे 'शॄ हिंसायाम्' (क्र्या.प.से.१५८६) इति धातोः 'श्रः करन्' ( उ.४।३) इति सूत्रेण करन्प्रत्ययः । उत्तरसूत्रे किद्ग्रहणादिह ककारस्य नेत्वम् । गुणे स्त्रीत्वविवक्षायाम् 'अजाद्यतष्टाप्' (पा.४।१।४ ) इति सूत्रेण टापि शर्करेति ।'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम्। चिनी इति भाषायाम् ।

**४.१.१.१८६.शर्करानिम्बूकम् (पं.३१४८, श्लो.८०)**

शर्करा चासौ निम्बुकञ्चेति विग्रहे 'विशेषणं विशेष्येण बहुलम् '(पा.२।१।५७) इति सूत्रेण कर्मधारयसमासे शर्करानिम्बूकमित । 'फलजातिः ' ( पा.लि. १६२ ) इति क्लीबत्वम् । मौसम इति भाषायाम् ।

**४.१.१.१८७. शष्कुली (पं.३२७१, श्लो.१४२)**

शष्यत इति विग्रहे 'शष हिंसायाम्' (भ्वा.प.से.६३६) इति धातोः बाहुलकाद् कुरच्प्रत्यये 'षिद्गौरादिभ्यश्च' (पा.४।१।४१) इति ङीषि शष्कुलीति । 'ङ्याबूङन्तं चलं स्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम् । जिलेवी इति भाषायाम् ।

**४.१.१.१८८. शितिवरः (पं.३०३६, श्लो.२४)**

शिति चासौ वरश्चेति विग्रहे 'विशेषणं विशेष्येण बहुलम्' (पा.२।१।५७) इति सूत्रेण कर्मधारयसमासे शितिवर इति । 'रोपधः ' ( पा.लि. ८९ ) इति पुंस्त्वम् । चौपतिया इति भाषायाम् ।

**४.१.१.१८९. शिम्बी (पं.३०६३, श्लो.३७)**

शाम्यतीति विग्रहे 'शमु उपशमे' (दि.प.से.१२७८) इति धातोः इम्बच्प्रत्ययेऽनुबन्धलोपे 'पृषोदरादीनि यथोपदिष्टम्' (पा.६।३।१०९) इति सूत्रेण टिलोपे (आप्टे

इ.सं.२००१) गौरादित्वात् 'षिद्गौरादिभ्यश्च' (पा.४।१।१४१) इति सूत्रेण ङीषि शिम्बीति। 'ङ्याबूङन्तं चलं सस्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम्। सिबी (सिमी) इति भाषायाम्।

**४.१.१.१९०. शीतशिवा (पं.३१००, श्लो.५६)**

शीता चासौ शिवा चेति विग्रहे 'विशेषणं विशेष्येण बहुलम्' (पा.२।१।५७ ) इति सूत्रेण समासे 'पुंवत्कर्मधारयजातीयदेशीयेषु '(पा.६।३।४२) इति सूत्रेण पुंवद्भावे शीतशिवेति। 'ऊङाबन्तश्च ' ( लिङ्गानुशासनम् ११ ) इति स्त्रीत्वम्। मदेशे सूप इति भाषायाम्।

**४.१.१.१९१. शुण्ठी (पं.३२१९, श्लो.११५)**

शुण्ठति कफमिति विग्रहे 'शुठि प्रतिघाते' (भ्वा.प.से.३६४) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इत्यच्यनुबन्धलोपे 'षिद्गौरादिभ्यश्च' ( पा.४।१।४१) इति ङीषि शुण्ठीति। सुठो इति भाषायाम्।

**४.१.१.१९२. शूरणः (पं.३०८४, श्लो.४८)**

शूर्यत इति विग्रहे 'शूरी हिंसास्तम्भनयोः' (दि.आ.से.१२३२) इति धातोः 'बहुलमन्यत्रापि' (उ.२।७८) इति सूत्रेण युच्प्रत्यये 'युवोरनाकौ' (पा.७।१।१) इति सूत्रेणानादेशे 'अट्कुप्वाङ्नुम्व्यवायेऽपि' (पा.८।४।२ ) इति सूत्रेण णत्वे शूरणः। 'णोपधः' ( पा.लि. ६७ ) इति पुंस्त्वम्। ओल इति भाषायाम्।

**४.१.१.१९३. शृङ्गाटकम् (पं.३२०५, श्लो.१०८)**

शृङ्गं प्राधान्यमटति विग्रहे 'अट गतौ' (भ्वा.प.से.३०४) इति धातोः 'कर्मण्यण्' ( पा.३।२।१) इति सूत्रेणाऽण्प्रत्यये 'उपपदमतिङ् '(पा.२।२।१९ ) इति सूत्रेणोपपदसमासे 'अत उपधायाः' (पा.७।२।११६ ) इति सूत्रेणोपधावृद्धौ 'संज्ञायां कन्' (पा.४।३।१४७ ) इति सूत्रेण कन्प्रत्यये शृङ्गाटकमिति। 'फलजातिः ' ( पा.लि. १६२ ) इति क्लीबत्वम्। सिङ्गडा इति भाषायाम्।

**४.१.१.१९४.श्यामलालुः (पं.३०७९, श्लो.४५)**

श्यामलश्चासौ आलुश्चेति विग्रहे 'विशेषणं विशेष्येण बहुलम्' (पा.२।१।५७ ) इति सूत्रेण कर्मधारयसमासे श्यामलालुरिति। 'उकारान्तः' ( पा.लि. ५१) इति पुंस्त्वम्। नीलो बोक्रे तरुल इति भाषायाम्।

**४.१.१.१९५. श्यामाकः (पं.३०२०, श्लो.१६)**

श्यामं वर्णं अकतीति विग्रहे 'अक कुटिलायां गतौ' (भ्वा.प.से.८४४) इति धातोः कर्मण्यण्' (पा.३।२।१) इति सूत्रेण अण्प्रत्यये 'उपपदमतिङ् '(पा.सू.२।२।१९) इत्युपपदसमासे सवर्णदीर्घे श्यामाक इति । 'कोपधः ' ( पा.लि. ६१ ) इति पुंस्त्वम् । सामा इति भाषायाम् ।

**४.१.१.१९६. श्लेष्मान्तकः (पं.३१८४, श्लो.९८)**

श्लेष्माणमन्तयतीति विग्रहे 'अति बन्धने' (भ्वा.प.से.६२) इति धातोः'ण्वुल्तृचौ' ( ३।१।१३३) इति ण्वुल्प्रत्यये 'युवोरनाकौ' (७।१।१) इत्यकादेशे श्लेष्मान्तक इति ।'कोपधः ' ( पा.लि. ६१ ) इति पुंस्त्वम् । लप्सी इति भाषायाम् ॥

**४.१.१.१९७. संयावः (पं.३२७३, श्लो.१४३)**

संयूयते मिश्रीक्रियते गुणादिभिरिति विग्रहे संपूर्वात् 'यु मिश्रणामिश्रणयोः' ( अ.प.से.११०७) इति धातोः 'समि युद्रुदुवः' (पा.३।३।२३) इति सूत्रेण घञ्प्रत्यये वृद्धावादेशे स्वादिकार्ये संयाव इति(संस्कृत शब्दार्थकौस्तुभः) । (पिष्टविकारो अपूपविषेशः - भट्टोजी) ।'घञबन्तः' ( पा.लि. ३६ ) इति पुंस्त्वम् । हलुवा इति भाषायाम् ।

**४.१.१.१९८.सर्षपः (पं.३०१३, श्लो.१२)**

सरति स्नेहोऽस्मादिति विग्रहे 'सृ गतौ' (भ्वा.प.से.१००१) इति धातोः 'सर्तेरपः सुक् च' (उ.३।१४१) इति सूत्रेण अप्प्रत्यये सुगागमे च सृ स् अप इति जाते 'सार्वधातुकार्धधातुकयोः' (पा.७।३।८४) इति सूत्रेण गुणे 'आदेशप्रत्यययोः' (पा.८।३।५९) इति सूत्रेण षत्वे सर्षप इति । 'पोपधः' (पा.लि.७७ ) इति पुंस्त्वम् । तोरी इति भाषायाम् ।

**४.१.१.१९९.सहकारः (पं.३१२९, श्लो.७०)**

सह युगपत् कारयति विक्षेपयति सौगन्धमिति विग्रहे (शब्दकल्पद्रुमः) (डु कृञ् करणे' ( त.उ.अ.१५६६) इति धातोः 'हेतुमति च' (पा.३।१।२६.) इति णिचि वृद्धौ सहकारीति जाते 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इति सूत्रेणाच्प्रत्यये सहकारि अ इति जाते 'णेरनिटि '(पा.६।४।५१) इति णिलोपे सहकार इति ।'घाजन्तश्च' ( पा.लि. ३७ ) इति पुंस्त्वम् । 'रोपधः ' ( लिङ्गानुशासनम् ८९ ) इति च पुंस्त्वम् । खूप वास्ना आउने आँप इति भाषायाम् ।

**४.१.१.२००. सिक्थकम् (पं.३२३३, श्लो.१२२)**

सिञ्चतीति विग्रहे 'षिच क्षरणे' (तु.उ.अ.१५२८) इति धातोः 'पातृतुदिवचिरिचिसिचिभ्यस्थक् (उ.३।७) इति सूत्रेण थक्प्रत्यये 'संज्ञायां कन्' (पा.४।३।१४७)

इति सूत्रेण कन्प्रत्यये सिक्थकमिति ।ज्ञेयं शिष्टप्रयोगतः' ( अ.लि.४६ ) इति क्लीबत्वम् । मैन इति भाषायाम् ।

**४.१.१.२०१. सितोपला (पं.३२३९, श्लो.१२५)**

सिता चासौ उपला च इति विग्रहे 'विशेषणं विशेष्येण बहुलम्' (पा.२।१।५७ ) इति सूत्रेण कर्मधारयसमासे सुब्लुकि गुणे सितोपलेति ।'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । मिश्री इति भाषायाम् ।

**४.१.१.२०२. सिद्धार्थकः (पं.३०१४, श्लो.१३)**

सिद्धोऽर्थोऽस्मादिति विग्रहे 'अनेकमन्यपदार्थे' (पा.२।२।२४) इति सूत्रेण समासे स्वार्थे कनि सिद्धार्थकइति ।'कोपधः ' ( पा.लि. ६१ ) इति पुंस्त्वम् । सर्स्यु इति भाषायाम् ।

**४.१.१.२०३. सीताफलम् (प.३१६५, श्लो.८८)**

सीतायाः फलमिति विग्रहे 'षष्ठी' (पा.२।२।८ ) इति सूत्रेण तत्पुरुषसमासे सीताफलमिति ।'फलजातिः' ( पा.लि. १६२ ) इति क्लीबत्वम् । सरिफा इति भाषायाम् ।

**४.१.१.२०४. सुदीर्घः (पं.३०५१, श्लो.३१)**

सुष्ठुः दीर्घ इति विग्रहे 'कुगतिप्रादयः' (पा.२।२।१८ ) इति सूत्रेण समासे सुदीर्घ इति ।ज्ञेयं शिष्टप्रयोगतः' ( अ.लि.४६ ) इति पुंस्त्वम् । चिचिण्डो इति भाषायाम् ।

**४.१.१.२०५. सुरा (पं.३२५१, श्लो.१३१)**

सुष्ठु रातीति विग्रहे 'रा दाने' (अ.प.अ.११३३) इति धातोः 'आतश्चोपसर्गे '( पा.३।३।१०६) इति सूत्रेणाऽङ्प्रत्यये 'आतोलोप इटि च' (पा.६।४।६४) इति सूत्रेणाकारलोपे स्त्रीत्वविवक्षायां टापि सुरेति । 'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । मदिरा इति भाषायाम् ।

**४.१.१.२०६. सूक्ष्मैला (पं.३१२०, श्लो.६६)**

सूक्ष्मा चासौ एला चेति विग्रहे 'विशेषणं विशेष्येण बहुलम् '(पा.२।१।५७) इति सूत्रेण कर्मधारयसमासे 'पुंवत्कर्मधारयजातीयदेशीयेषु' (पा.६।३।४२) इति पुंवद्भावे सूक्ष्म एला इत्यवस्थायां वृद्धौ सूक्ष्मैलेति ।'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । सुकुमेल इति भाषायाम् ।

**४.१.१.२०७. सूपः (पं.३२६०, श्लो.१३६)**

सुखेन पीयत इति विग्रहे सुपूर्वात् 'पा पाने' (भ्वा.प.से.९९१) इति धातोः 'घञर्थे क विधानम् '(वा.३।३।५८) इति वार्तिकेन कप्रत्यये 'आतोलोप इटि च' (पा.६।४।६४)

इत्याकारलोपे 'पृषोदरादीनि यथोपदिष्टम्' (पा.६।३।१०९) इति दीर्घे सूप इति ।'पोपधः' ( पा.लि.७७ ) इति पुंस्त्वम् । दाल इति भाषायाम् ।

**४.१.१.२०८. सेवम् (पं.३१४१, श्लो.७६)**

सेव्यत इति विग्रहे 'षेवृ सेवने' (भ्वा.प.से.५३५) इति धातोः 'गुरोश्च हलः' ( पा.३।३।१०३) इति सूत्रेणाप्रत्यये सेवमिति । 'फलजातिः ' ( पा.लि. १६२ ) इति क्लीबत्वम्। स्याउ इति भाषायाम् ।

**४.१.१.२०९. सेवन्ती (पं.३३०८, श्लो.१६०)**

सीव्यतीति विग्रहे 'षिवु तन्तुसन्ताने' (दि.प.से.११८३) इति धातोः झिप्रत्ययेऽन्तादेशे ङीषि (आप्टे इ.सं२००१) सेवन्तीति । 'ङ्याबूङन्तं चलं सस्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम् । गुलाब इति भाषायाम् ।

**४.१.१.२१०. सैन्धवः (पं.३२४१, श्लो.१२६)**

सिन्धुषु भव इति विग्रहे 'तत्र भवः' (पा.४।३।५३) इति सूत्रेणाण्प्रत्यये 'ओर्गुणः' ( पा.६।४।१४६) इति गुणेऽवादेशे 'तद्धितेष्वचामादेः' (पा.७।२।११७ ) इति सूत्रेणादिवृद्धौ सैन्धव इति ।'दण्डमण्डखण्डशमसैन्धवपार्श्वाकशकुशकाशाङ्कुशकुलिशाः' (पा.लि.१८१ ) इति पुंनपुंसकत्वम् । सीधे नून इति भाषायाम् ।

**४.१.१.२११. हरिद्रा (पं.३११२, श्लो.६२)**

हरिं वर्णं द्राति इति विग्रहे 'द्राकुत्सायां गतौ' (अ.प.अ.११३०) इति धातोः 'आतोऽनुपसर्गे कः' (पा.३।२।३) इति सूत्रेण कप्रत्यये 'आतो लोप इटि च' (पा.६।४।६४) इत्याकारलोपे स्त्रीत्वविवक्षायाम् 'अजाद्यतष्टाप्' (पा.४।१।४) इति सूत्रेण टापि हरिद्रेति ।'ऊङाबन्तश्च ' ( पा.लि. ११ ) इति स्त्रीत्वम् । हलेदो इति भाषायाम् ।

**४.१.१.२१२. हरीतकी (पं.३२१२, श्लो.११२)**

हरिवर्ण इतो यस्यामिति विग्रहे 'संज्ञायां कन्' (पा.५।३।७५) इति सूत्रेण स्वार्थे कन्प्रत्यये 'षिद्गौरादिभ्यश्च '(पा.४।१।४१) इति ङीषि हरीतकीति ।(भानुजी)'ङ्याबूङन्तं चलं सस्थिरम्' ( अ.लि. ५ ) इति स्त्रीत्वम् । 'वृक्षजातिः स्त्रियामेव' ( पा.लि.१६३) इति च स्त्रीत्वम् । हर्रो इति भाषायाम् ।

**४.१.१.२१३. हस्तिकन्दः (पं.३०८१, श्लो.४६)**हस्तिनः पाद इव कन्दो यस्येति विग्रहे 'अनेकमन्यपदार्थे '(पा.२।२।२४ ) इति सूत्रेण बहुव्रीहिसमासे हस्तिकन्द इति । ज्ञेयं शिष्टप्रयोगतः' ( अ.लि.४६ ) इति पुंस्त्वम् । घ्याम्पे तरुल इति भाषायाम् ।

### ४.१.१.२१४. हिङ्गु (पं.३११०, श्लो.६१)

हिमं गच्छतीति विग्रहे 'गम्लृ गतौ' (भ्वा.प.अ.१०५१) इति धातोः मृगय्वादयश्च ( उ.१।३६) इति सूत्रेण कुप्रत्यये निपातनात् हिङ्गुरिति । 'उकारान्तः' ( पा.लि. ५१) इति पुंस्त्वम् । हिङ् इति भाषायाम् ।

### ४.१.१.२१५. हैयङ्गवीनम् (पं.३२२९, श्लो.१२०)

दुह्यत इति विग्रहे 'दुह प्रपूरणे' (अ.उ.अ.१०८४) इति धातोः 'अकर्तरि च कारके संज्ञायाम्' (पा.३।३।१९) इति सूत्रेण घञ्प्रत्यये दोहः । गवां दोहो गोदोहः । ह्योगोदोहस्यविकार इति विग्रहे तस्य 'हैयङ्गवीनं संज्ञायाम् ' (पा.५।२।२३) इति सूत्रेण निपातनात् खप्रत्यय ईनादेशे हैयङ्गवीनमिति ।ज्ञेयं शिष्टप्रयोगतः' ( अ.लि.४६ ) इतिक्लीबत्वम् । हिजोको दूधको नौनी इति भाषायाम् ।

अमरकोषपरिशेषे २९३ वस्तूनां १४९६ नामानि सन्ति । तेषां एकैकशः प्रमुखशब्दाः विवृताः । सर्वेषां शब्दानां व्याकरणदृष्ट्या तथा साहित्यिकदृष्ट्या च विस्तृतशोधस्य विषयोऽस्ति । द्विभाषिकटीकात्वात् नेपाल्यामर्थोऽपि दत्तः । अनेकशास्त्रेभ्यः संकलय्य व्यावहारिकाः शब्दाः स्थापिताः कुलचन्द्रेण । छात्राणां शिक्षकाणां वा व्यावहारिकशब्दज्ञानाय अतीवावश्यकता भवत्येव ।

## ४.२ कोशे लिङ्गविषये स्त्रीप्रत्ययः स्त्रीत्वशक्तिश्च

अमरकोशस्यापरं नाम 'नामलिङ्गानुशासनम्' इत्यपि वर्तते । कुलचन्द्रगौतमस्य स्वयंबोधिन्यां टीकायामपि लिङ्गविषये चर्चा दरीदृश्यते ।तस्माल्लिङ्गविषये चर्चा क्रियतेऽत्र । स्त्रीलिङ्गविषयं विचार्य सामान्यतया व्यक्तयश्चिह्नानामाधारे बुध्यन्ते । स्तनकेशवती ( भगवती ) स्त्री भवति, लोमशः ( शिश्नवान् ) पुरुषो भवति । तस्मात् पुंस्त्वचिह्नयुक्ताः पुरुषा भवन्ति, स्त्रीत्वचिह्नयुक्तास्त्रियो भवन्ति । तद्भिन्नं यदस्ति स शब्दो नपुंसकलिङ्गो भवति । अस्यापि न्यूनत्वादग्रे कथयत्याचार्यः । यदि चिह्नेन पुंलिङ्गं स्त्रीलिङ्गं भवेत्तर्हि भ्रकुंशः ( स्त्रीवेषधारिपुरुषः ) शब्दादपि स्तनकेशवत्त्वात् टाप् भवेत् । खरकुटी ( नापितगृहम् ) शब्दात् रोमवत्त्वात् पुंलिङ्गं भवेत् । द्वितीयविभक्तया बहुवचने 'खरकुटीः' इत्यत्र नत्वं भवेत् ।तथैव अचेतनतावाचिशब्दः खट्वा च स्त्रीलिङ्गो न भवेत् । वृक्षशब्दः पुंलिङ्गश्च न भवेत् ।[३६७]

---

[३६७] स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः । उभयोरन्तरं यच्च तदभावे नपुंसकम् ॥
लिङ्गात् स्त्रीपुंसयोर्ज्ञाने भ्रकुंशे टाप् प्रशष्यते । नत्वं खरकुटीः पश्य खट्वावृक्षौ न सिद्ध्यतः॥
पतञ्जलिः, *व्याकरणमहाभाष्यम्* 'स्त्रियाम्' ( पा.४।१।३ ) वाराणसी : चौखम्बा सुरभारतीप्रकाशन, सन् १९९१, पृ.१७ ।

चिह्नानां प्रयोगं कृत्वा तु भ्रकुंशः ( स्त्रीवेषधारिपुरुषः ) स्त्रीलिङ्गो भवेत्, खरकुटी ( नापितगृहम् ) पुंलिङ्गो भवेत्, वृक्षः पुंलिङ्गो न भवेत्, खट्वाशब्दः स्त्रीलिङ्गो न भवेत् । अतः कथयति पतञ्जलिर्यथा मृगतृष्णावत् गन्धर्वनगरवदाभासो भवति ।तस्मादचेतनेऽपि लिङ्गस्याभासो भवति । यथा सूर्यस्य गतिरस्ति तथापि प्रत्यक्षं न दृश्यते । यथा वस्त्रान्तर्हितवस्तु गोप्यं भवति तथैव लिङ्गमपि गोप्यं भवति । खट्वावृक्षादिशब्दानां लिङ्गं न दृश्यते । प्रत्यक्षेऽदर्शनात् विरुद्धवत् प्रतीयते । अनुपलब्धेः कारणानि बहूनि सन्ति ।[३६८]यथा –

४.२.१ **अतिदूरात्** – अतिदूरत्वदोषात् प्रत्यक्षं न भवति, आकाशे ऊर्ध्वमुत्पतन् पक्षी अतिदूरतया चक्षुषा न दृश्यते । परदेशिगृहे न दृश्यते ।

४.२.२ **अत्यधिकसामीप्यात्** – दीपस्य पार्श्वभागेऽन्धकारो भवति , अतिसामीप्यात् चक्षुर्गोलकगतमञ्जनं नोपलभ्यते ।

४.२.३ **इन्द्रियदौर्बल्यात्** – चक्षुषादीनां रोगकारणेन न दृश्यते न श्रूयते प्राणिभिः ।

४.२.४ **अतिप्रमादात्** – मनोऽनवस्थानात् मनो विषयान्तरे व्यापृतत्वात् व्यग्रचित्तः सम्यक् कथितमपि नावधारयति । विस्मृतौ, मादकपदार्थसेवने, शोकमग्नादौ ।

४.२.५ **सौक्ष्म्यात्** – अतिसूक्ष्मत्वात् धूमोष्णनीहारपरमाणवो नोपलभ्यन्ते ।

४.२.६ **तमसावृतात्** – यथान्धकारे किमपि न दृश्यते । व्यवधानात् कुड्यजवनिकादिभिर्व्यवहितं वस्तु नोपलभ्यते ।

४.२.७ **अभिभवात्** – अभिभूतत्वात् गगने विद्यमाना अपि सूर्यतेजसाभिभूता ग्रहनक्षत्रतारकादयो दिवा न दृश्यन्ते ।

४.२.८ **समानाभिहारात्** – समानजातीयपदार्थैः संमिश्रणात् मुद्गराशौ क्षिप्तो मुद्गः, माहिषे दुग्धे पतितं गोदुग्धं न पृथगनुभूयते समानगुणमिश्रत्वात् ।

अग्रे पतञ्जलिः कथयति तटशब्दः ( तटः, तटी, तटम् ) त्रिषु लिङ्गेषु प्रचलति, दाराशब्दः पुंलिङ्गे, कलत्रं नपुंसकलिङ्गे प्रचलति [३६९]। लौकिकचिह्नेन कार्यं न चलति तस्मात्

---

[३६८]ईश्वरकृष्णः (सं.श्रीकृष्णमणि त्रिपाठी), **सांख्यकारिका** ( श्लो.७), वाराणसी : चौखम्बा सुरभारती प्रकाशन, सन् १९७७, पृ.१३ ।
अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् । सौक्ष्म्याद् व्यवधानादभिभवात् समानाभिहाराच्च ॥

[३६९]पतञ्जलिः, *व्याकरणमहाभाष्यम्* 'स्त्रियाम्' ( पा.४।१।३ ) वाराणसी : चौखम्बा सुरभारती प्रकाशन, सन् १९९१, पृ.१७ ॥
नापुंसकं भवेत् तस्मिन् तदभावे नपुंसकम् । असत्तु मृगतृष्णावत् गन्धर्वनगरं यथा ॥
आदित्यगतिवत्सन्न वस्त्रान्तर्हितवच्च तत् । अन्योन्यसंश्रयं त्वेतत् प्रत्यक्षेण विरुध्यते ॥
तटे च सर्वलिङ्गानि दृष्ट्वा कोऽध्यवसास्यति ।

पुनः कथयत्याचार्यो यथा स्वकृतान्ततः ( शास्त्रसिद्धान्ततः ) संस्त्यानप्रसवयोराधारेण लिङ्गस्य निर्णयो भवति ।

**४.२.९ स्त्री** ( अधिकरणम् ) स्त्यायति शुक्रशोणिते यस्यामिति विग्रहे 'स्त्यै शब्दसंघातयोः' ( भ्वा.प.अ.) इति धातोः 'स्त्यायतेर्ड्रट्' (उ.४।१६६ ) इति ड्रट्प्रत्यये 'टेः' ( पा.६।४।१४३ ) इति टिलोपे 'लोपो व्योर्वलि' (पा.६।१।६६ ) इति यलोपे 'टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः' ( पा.४।१।१५ ) इति ङीपि सति रूपं सिध्यति ।

**४.२.१० प्रसवः** – प्रसूयत इति विग्रहे 'षूङ् प्राणिप्रसवे' ( दि.आ.से.) इति धातोः'ऋदोरप्' ( ३।३।५७ ) इत्यप्प्रत्यये गुणेऽवादेशे प्रसवः सिद्धम् ।

**४.२.११ पुमान्** ( कर्ता ) पातीति विग्रहे 'पा रक्षणे' ( अ.प.अ.) इति धातोः 'पातेर्डुंसुन्' ( उ.४।१७८ ) इति डुंसुन्प्रत्यये रूपं सिध्यति [३७०]।

व्याकरणशास्त्रे पठितलिङ्गानुशासनं दृष्ट्वा लिङ्गं ज्ञेयम् । व्याकरणं लिङ्गस्य निर्धारणं करोति तथाप्यनुगाम्यस्ति । एकवारमेव लिङ्गनिर्धारणं करोति । भाषा तु स्रोतस्विन्यस्ति सदा वहत्येव। अतो व्याकरणमपि सर्वदा लिङ्गस्य निर्णयं कर्तुं न शक्नोति। तस्मात् कात्यायनोवदति 'लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य ।' ( वा. ) पाणिनिरपि वदति 'तदशिष्यं संज्ञाप्रमाणत्वात्' ( १।२।५३ )इति ।

अतो लोकोऽपि कथं निर्धारयति लिङ्गमिति प्रश्ने, गुणस्याधारे लोको लिङ्गनिर्णयं करोति । यद्यप्येते शब्दः, स्पर्शः, रूपम्, रसः, गन्धादयो गुणाः सन्ति तथापि सांख्यमतस्याधारे सत्त्वरजस्तमोभिर्लिङ्गनिर्धारणं वर्णितमस्ति । यत्र गुणस्याधिक्यं प्रवृत्तिः, आविर्भावः, उपचयो वा भवति तत्र पुंलिङ्गं भवति । यत्र च गुणानां न्यूनता, तिरोभावः, अपचयं, संस्त्यानं वा भवति तदा स्त्रीलिङ्गं भवति । यत्र गुणानां स्थितिरथवा साम्यावस्था भवति तत्र नपुंसकलिङ्गं भवति । अनेनैवप्रकारेण यत्र प्रत्ययस्य लोपो भवति तत्र 'लुपि युक्तवद्व्यक्तिवचने' ( पा.१।२।५१ )इति सूत्रेणपूर्ववल्लिङ्गं भवति ।

गुणानां कस्मिंश्चित्स्थानेऽन्येन प्रकारेण वर्णनमपि प्राप्यते । यदा सत्वगुणस्योपचयो भवति तदा पुंलिङ्गं भवति । शौर्यादीनामाधिक्यं शुक्ररूपे दृश्यते यदा रजोगुणस्योपचयो भवति

---

[३७०]पूर्ववत् १८ ।
संस्त्यानप्रसवौ लिङ्गमस्थेयौ स्वकृतान्ततः । संस्त्याने स्त्यायतेर्ड्रट् स्त्री सूतेः सप् प्रसवे पुमान् ॥
तस्योक्तौ लोकतो नाम गुणो वा लुपि युक्तवत् ।

तदा स्त्रीलिङ्गं भवति । चञ्चलादीनि रजोरूपे दृश्यन्ते । यदा तमोगुणस्योपचयो भवति तत्र तदा नपुंसकलिङ्गं भवति मोहाधिक्यरूपे दृश्यते । ब्रह्म, ईश्वरः, परमात्मेत्यादिशब्देषु निर्गुणत्वेऽपि लिङ्गरूपमारोप्यते ।

अचेतनेषु खट्वामालादिशब्देषु स्त्रीलिङ्गं दृष्ट्वा पतञ्जलिना 'स नपुंसकम्' (२।४।१७ )इति सूत्रं प्रत्याख्यातमस्ति । एकस्मिन्नर्थेऽपि लिङ्गानां गुणे भिन्नता दृश्यते ।यथा पुष्यः, तारका, नक्षत्रमेते शब्दाः त्रिषु लिङ्गेषु दृश्यन्ते । तादृशमेव केचन शब्दा एकलिङ्गे यथा वृक्षः । द्विलिङ्गे यथा गौः । त्रिलिङ्गे यथा तटः, तटी, तटमिति । तस्माल्लिङ्गं शब्दनिष्ठं भवति । कस्मिञ्चित्स्थाने पुंलिङ्गशब्देन स्त्रीत्वमर्थोऽवगम्यते यथा दाराः । द्वितीयाविभक्तौ बहुवचने सस्य नत्वं भवति, दारान् सिद्धचति । अत्र स्त्रीत्वमर्थ एव बोध्यो भवति न तु शब्दः, तस्मादेव करणात् 'तस्माच्छसो नः पुंसि' ( पा.६।१।१०३ ) इति सूत्रं प्रयुक्तं भवति ।

स्त्रीत्वद्योतनविषये व्याकरणे प्रत्ययानां व्यवस्थाऽस्ति । यथा –

४.२.१२ अकारान्तशब्दादजादिगणपठितशब्दाच्च स्त्रीत्वे द्योत्वे टाप्प्रत्ययो भवति ।**'अजाद्यतष्टाप्'** ( ४।१।४ ) अजा, सर्वा ।

४.२.१३ अनन्तबहुव्रीहिशब्दात् विकल्पेन डाप्प्रत्ययो भवति ।**'डाबुभाभ्यामन्यतरस्याम्'** ( ४।१।१३ ) सीमा ।

४.२.१४ यङन्तशब्दाच्चाप्प्रत्ययो भवति ।**'डाबुभाभ्यामन्यतरस्याम्**' ( ४।१।१३ ) कारीषगन्ध्या ।

४.२.१५ उगिदन्तशब्दात् स्त्रियां ङीप्प्रत्ययो भवति । **'उगितश्च'** ( पा.४।१।६ ) पचन्ती ।

४.२.१६ षिद्भ्यो गौरादिभ्यश्च स्त्रियां ङीष्प्रत्ययो भवति ।**'षिद्गौरादिभ्यश्च'** ( ४।१।४१ ) नर्तकी, गौरी ।

४.२.१७.शार्ङ्गरवादेरञो योऽकारस्तदन्ताच्च जातिवाचिनो स्त्रियां ङीन्प्रत्ययो भवति । **'शार्ङ्गरवाद्यञो ङीन्'** (४।१।७३ ) शार्ङ्गरवी, बैदी ।

४.२.१८ उकारान्तशब्दात् स्त्रियामूङ्प्रत्ययो भवति । '**ऊङुतः**' ( ४।१।६६ ) कुरूः ।

४.२.१९ युवन्शब्दात्तिप्रत्ययो भवति स्त्रियाम् । '**यूनस्तिः**' ( ४।१।७७ ) युवतिः ।

यद्यपि स्त्रीलिङ्गशब्दात् टाबादयः प्रत्यया भवन्ति तथापि तेषामनिवार्यता न भवति । लिङ्गं तु प्रातिपदिकशब्दस्य ( मूलशब्दस्य ) एव भवति । यथा मातृ, दुहितृ, स्वसृ, पोतृ,ननन्द्रयादयः शब्दाः प्रत्ययं विनापि स्त्रिलिङ्गं बोधयन्ति । 'ऋकारान्ताः मातृ-दुहितृ–स्वसृ–

पोतृ–ननान्दरः' इति लिङ्गानुशासने ।[३७१]तादृशमेव प्रावृट्, विप्रुट्, रुच्,त्विषादयः शब्दाः स्त्रीलिङ्गिनः सन्ति । तस्माट्टाबादयः प्रत्यया द्योतका भवन्ति न तु वाचकाः । वाचकस्तु प्रातिपदिकः ( मूलशब्दः ) एव भवति । यत्र लिङ्गस्य निश्चयो न भवति तत्र सामान्ये नपुंसकलिङ्गं प्रयुज्यते । 'सामान्ये नपुंसकम्' (वा.७४।१४ ) ।

लिङ्गव्यवस्थायां दार्शनिकरहस्यमपि दृश्यते । यथा ब्रह्मन्शब्दः (परमात्मवाचकशब्दः) निर्गुणवाचकार्थे चिह्नाभावाद्गुणात्परत्वान्नपुंसकलिङ्गो भवति । यदा साकाररूपे प्रयुज्यते तदा ब्रह्मन्शब्दः ( धातृवाचकशब्दः ) पुंलिङ्गो भवति यथा ब्रह्मा । तथैव स्त्रीलिङ्गश्च यथा ब्रह्माणी । निर्गुणर्थेऽपि गुणस्यारोपं विधाय सगुणवत् प्रयुज्यन्ते शब्दाः । यथा परमात्मा, पुरुषः, ईश्वरादयः शब्दाः पुंलिङ्गिनो भवन्ति । तथैव प्रकृतिः, ईश्वरी, भगवत्यादयः शब्दाः स्त्रीलिङ्गिनो भवन्ति । तादृशमेव जगति ये ये पुंलिङ्गिनः शब्दा भवन्ति ते ते ईश्वरस्य वाचका भवन्ति । ये ये स्त्रीलिङ्गिनः शब्दाः सन्ति ते ते ईश्वर्या वाचका भवन्ति । यथा पुंलिङ्गिनः – व्यापकः, प्रभुः, स्वामी, गणेशादयः । तथैव स्त्रीलिङ्गिनः करुणाः, दया, निद्रा, विद्या, शान्ति, सरस्वत्यादयः ।[३७२]

लिङ्गव्यवस्थायां सामान्यरूपेण शब्दान् दृष्ट्वा यत्र स्थिरता, दृढता दृश्यते तत्र पुंलिङ्गं भवति । यथा सागरः, वृक्षः, आकाशादयः । यत्र चञ्चलता, कोमलता दृश्यते तत्र स्त्रीलिङ्गं भवति । यथा नदी, लता, पृथ्वी, देवतादयः । यत्र समो भवति तत्र नपुंसकलिङ्गं भवति । यथा ज्ञानम्, वस्तु, कलत्रमादयः ।

अन्यप्रकारेणान्तर्मुखार्थाः शब्दाः पुंलिङ्गिनो भवन्ति । कस्यचिदपि देवमूर्तयो नेत्रबद्धा भवन्ति । देवीमूर्तयो नेत्रोद्घाटिता भवन्ति । रहस्यमिदमेव भवेत् , पुरुषोऽन्तर्मुखो भवति तथैव प्रकृतिर्बहिर्मुखी भवति । तस्माल्लिङ्गस्य वैचित्र्यत्वादमरसिंहादिभिर्यत्परिश्रमः कृतः, तस्मिन् विषये कुलचन्द्रगौतमोऽग्रेसरोऽभूत्, प्रशंसार्हो विषयोऽस्त्येव । वास्तविकलिङ्गं तु लोकाश्रयं शिष्टप्रयोगो वा 'परं विरोधे शेषं तु ज्ञेयं शिष्टप्रयोगतः' इत्यमरः लिङ्गादिसंग्रहे ।[३७३]

---

[३७१] दीक्षितः भट्टोजि,***वैयाकरणसिद्धान्तकौमुदी,*** (जेबी गुटका, सम्पा.गोपालशास्त्री नेने) वाराणसी : चौखम्वा अमरभारती प्रकाशन, वि.सं.२०३४, पृ.७७६ ।

[३७२] वर्मा सत्यकामः,***व्याकरण की दार्शनिक भूमिका*** (लिङ्ग विचार) नई दिल्ली : मुंशिराम मनोहरलाल, सन् १९७१, पृ.४३४ ।

[३७३] गौतमः कुलचन्द्रः, ***अमरकोश (स्वयंबोधिनी टीका ३.५.४६)*** नेपाल : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६, पृ.३१५ ।

## ४.३ आदर्शरूपावल्यां लिङ्गादिसंग्रहस्य लिङ्गानुशासनस्य च सङ्गमनम् ।

### लिङ्गानुशासनदृष्ट्या पर्यालोचनम्

विद्वच्छिरोमणिः कुलचन्द्रश्छात्रहिताय सर्वेषां शब्दानां रूपनिर्देशनं करोति । न केवलममरकोशे स्थितानां परन्तु युष्मदस्मदादीनां शब्दानामपि रूपावलीनिर्देशनं करोति । अनया आदर्शरूपावल्या छात्राः सर्वेषां शब्दानां रूपाणि ज्ञातुं समर्था भवन्ति । अत्र न केवलं सामान्यशब्दानां परन्तु निर्जर-सखि-पाद-दन्तादीनां विशिष्टशब्दानामपि रूपाणि दत्तानि । यद्यपि रूपनिर्देशनं कोशविज्ञानस्य कार्यमस्ति, सर्वेषु कोशेषु रूपाणि प्राप्यन्ते तथापि कुलचन्द्रो विशेषप्रकारेण विस्तृतरूपेण वा व्याख्यां करोति । कोशविज्ञाने न्यायालयात्मकप्रकार्ये व्याकरणस्य वर्चस्वमस्त्येव । व्याकरणं शब्दानां रूपाणि दर्शयति । तस्माद् व्याकरणपरककोशे शब्दानां रूपाणि दीयन्ते कोशकारैः । भाषा यादृच्छिकी भवति । तस्मात् संस्कृते शब्दानां रूपाणि स्वप्रकृत्या प्रचलन्ति । तस्मादावश्यकतामनुभूय कुलचन्द्रेणादर्शरूपावली दत्ता । येनाल्पबुद्धीनां व्याकरणज्ञानरहितानां वा छात्राणां हितकारिकाऽस्ति रूपावली । स्वयं कुलचन्द्रो लिखति –

स्वान्तं सद्यः पश्यतां प्रीणयन्ती
नव्या विद्युद्दीपगुल्कावलीव ।
अव्याकीर्णा नामरूपावलीयं
ध्वान्तं गाढं ध्वंसयेद्बालकानाम् ॥

आदर्शरूपावल्यां मङ्गलाचरणप्रसङ्गे गौतमः प्रतीकात्मरूपेण लिखति यथा भगवतोऽनेके अवतारा भवन्ति तथैव शब्दानामनेकरूपाणि भवन्तीति –

रामकृष्णादिविविधरूपावलिविधायिने ।
नमो देवाय बृहते क्षीरसागरशायिने ॥

कुलचन्द्रो वैयाकरणसिद्धान्तकौमुदीस्थानामुदाहरणानां प्रयोगं करोति तथापि स्वकीयक्रमविन्यासोऽपरित्यक्तो दृश्यते । अमरकोशस्य प्रसङ्गानुसारेण वैयाकरणसिद्धान्तकौमुदीस्थानि सामान्यान्युदाहरणानि गृह्णाति । अनावश्यकान्युदाहरणानि त्यजति च । यथा –

बालानां विपुलायासभीरूणां बोधमिच्छताम् ।
संगृह्यतेऽनुग्रहीत्री नामरूपावलिः स्फुटा ॥ २ ॥
शब्दानुपेक्ष्य विरलप्रयोगानत्र दुर्ग्रहान् ।

कृतः प्रायः प्रयुक्तानां शब्दानामेव संग्रहः ॥ ३ ॥

अस्यां रूपावल्यां केचन घट-मल्लक-तटादयः शब्दाः प्रयोजनार्थं स्थापिताः सन्ति। भट्टोजिदीक्षितेन सिद्धान्तकौमुद्यां शब्दा हल्प्रत्याहारानुसारेण लिखिताः सन्ति परन्तु कुलचन्द्रः स्वयंबोधिन्यां कादिव्यञ्जनक्रमेण लिखति। तस्या एव रूपावल्या विवेचनं क्रियते क्रमेण –

दर्शयिष्यमाणानां प्रातिपदिकशब्दानां प्रक्रमानुसारिविमर्शः

**४.३.१. राम** – रमन्तेऽस्मिन् योगिनः [३७४]इति विग्रहे ' रमु क्रीडायाम् ' (भ्वा.आ.अ.९११) इति धातोः 'हलश्च' (पा.२।३।१२१ ) इत्यधिकरणे घञ्। अकारान्तपुलिङ्गस्य सामान्यरूपज्ञानार्थं गृहीतोऽयं दाशरथि–रौहिणेय–जामदग्न्यवाची पुंलिङ्गो रामशब्दः कुलचन्द्रेण। 'घञबन्तः' ( पा.लि.३६ ) इति 'मोपधः' ( पा.लि. ८३ ) इत्यनेन च पुंस्त्वम्। तथैव 'पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुराः।' ( अ.लि. ११ ) इति च पुंस्त्वम्। रामः, रामौ, रामाः।

**४.३.२. रमा** – रमते, इति विग्रहे 'रमु क्रीडायाम्' (भ्वा.आ.अ.) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' ( पा.३।१।१३४ ) इत्यच्प्रत्यये स्त्रीत्वविवक्षायां 'अजाद्यतष्टाप्' (पा.४।१।४ ) इति टापि 'ऊङाबन्तश्च' ( पा.लि. ११ ) इति स्त्रीत्वबोधनम्। 'ङ्याबूङन्तं चलं स्थिरम्' ( अ.लि. ५ ) इति च स्त्रीत्वम्, आबन्तो लक्ष्मीवाचकः स्त्रीलिङ्गो रमाशब्दः। रमा, रमे रमाः।

**४.३.३. नदी** – नदतीति विग्रहे 'णद अव्यक्ते शब्दे' (भ्वा.प.से.५५) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' ( पा.३।१।१३४ ) इत्यच्प्रत्यये स्त्रीत्वविवक्षायां 'नदट्' इति टित्वनिपातनात् 'टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः' (पा.४।१।१५ ) इति ङीपि 'भूमिविद्युत्सरिल्लतावनिताभिधनानि' (पा.लि. १८) इति स्त्रीत्वम्। 'ङ्यन्तः सरिद्वाचकस्त्रीलिङ्गबोधनार्थमयं शब्दः 'ङ्याबूङन्तं चलं स्थिरम्' ( अ.लि. ५ ) इति च स्त्रीत्वम्। ङ्यन्तः सरिद्वाचकः स्त्रीलिङ्गो नदी–शब्दः। नदी, नद्यौ, नद्यः।

**४.३.४.ज्ञान** – ज्ञायतेऽनेनेति विग्रहे 'ज्ञा अवबोधने' (क्रया.प.अ.१६०७) इति धातोः 'करणाधिकरणयोश्च' (पा.३।३।११७) इति करणे ल्युट्प्रत्ययः। 'मोक्षे धीर्ज्ञानम्' ( अ.लि.६) इति क्लीबनिर्देशः। अकारान्तः क्लीबलिङ्गो बोधवाची ज्ञानशब्दः। ज्ञानम्, ज्ञाने, ज्ञानानि।

---

[३७४]रमन्ते योगिनोऽनन्ते सत्यानन्दे चिदात्मनि। इति रामपदेनासौ परं ब्रह्माभिधीयते। इति श्रुतिः। दीक्षितः भट्टोजि ( टीकाकारः वासुदेवदीक्षितः बालमनोरमाटीका), **वैयाकरणसिद्धान्तकौमुदी,** वाराणसी : चौखम्वा संस्कृत संस्थान, दशम संस्करण वि.सं.२०३९, पृ.१२२।

**४.३.५. मल्लक** – मल्लत इति विग्रहे 'मल्ल धारणे' (भ्वा.आ.से.५२८) इति धातोः 'ण्वुल्तृचौ' ( पा.३।१।१३३) इति ण्वुल्प्रत्ययः 'युवोरनाकौ' (पा.७।१।१) इत्यकादेशः । स्त्रीत्वविवक्षायां टापि 'प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः' (पा.७।३.४४ ) इति प्रत्ययस्थात्कात्पूर्वस्याकारस्येकारः । अकारान्तः पुंस्त्रीलिङ्गः स्त्रियामाबन्त उपान्त्येकारादेशवान् पुष्पविशेषवाची मल्लक–शब्दः । 'जातिभेदाः पुमाख्याश्च स्त्रीयोगैः सह मल्लकः । ( अ.लि. ३७) इति स्त्रीपुंस्कत्वम् । पुंसि – मल्लकः, मल्लकौ, मल्लकाः रामवत् । स्त्रियाम् – मल्लिका, मल्लिके, मल्लिकाः रमावत् ।

**४.३.६. फण** – फणतीति विग्रहे 'फण गतौ' (भ्वा.प.से.८७९) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' ( पा.३।१।१३४ ) इत्यच्प्रत्ययः । अकारान्तः पुंस्त्रीलिङ्गः स्त्रियामाबन्तः सर्पशीर्षवाची फणशब्दः । 'स्फटायां तु फणा द्वयोः' ( अ.लि. ) स्त्रीत्वविवक्षायां 'अजाद्यतष्टाप्' (पा.४।१।४ ) इति टाप् । पुंसि – फणः, फणौ, फणाः । स्त्रियाम् – फणा, फणे, फणा इत्यादयः ।

**४.३.७. घट** – घटत इति विग्रहे 'घट चेष्टायाम्' (भ्वा.आ.से.८१२) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' ( पा.३।१।१३४ ) इत्यच्प्रत्ययः । अकारान्तः पुंस्त्रीलिङ्गः स्त्रियां ङ्यन्तः कुम्भवाची घटशब्दः । 'टोपधः' ( पा.लि. ६४ ) इति पुंस्त्वम् ' ..कलशस्तु त्रिषु द्वयोः । घटः कुटनिपौ' (अमरः ) इति पुंस्त्रीलिङ्गत्वम्, 'जातेरस्त्रीविषयादयोपधात्' (पा. ४।१।१६३ ) इति ङीष् । पुंसि – घटः, घटौ, घटाः । स्त्रियाम् – घटी, घट्यौ घट्यः ।

**४.३.८. क्षेम** – क्षिणोत्यशुभमिति विग्रहे 'क्षि क्षये' (भ्वा.प.अ.२४४) इति धातोः 'अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन्' ( उ.१।१४० ) इति मन्प्रत्ययः । अकारान्तः पुंनपुंसकलिङ्गः कल्याणवाची क्षेमशब्दः । 'क्षेममस्त्रियाम्' ( अमरः ) तथैव 'कुष्ठं मुण्डं शीधु बुस्तं क्ष्वेडितं क्षेमकुट्टिनम् ।( अ.लि. ३४ ) इति च पुंनपुंसकलिङ्गत्वम् । पुंसि – क्षेमः, क्षेमौ, क्षेमाः । क्लीबे – क्षेमम्, क्षेमे, क्षेमाणि ।

**४.३.९. औचित्य** – उचितस्य भावः कर्म वेति विग्रहे 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' ( पा.५।१।१२४ ) इति ष्यञ्प्रत्यये 'षिद्गौरादिभ्यश्च' ( पा.४।१।४१ ) इति ङीष् । 'त्वष्यञौ तद्धितौ' ( पा.लि. १२१ ) इति नपुंसकत्वम्, ष्यञः षित्वसामर्थ्यात्पक्षे स्त्रीत्वम् । तथैव –

स्त्रीनपुंसकयोर्भावक्रिययोः ष्यञ् क्वचिच्च वुञ् ।
औचित्यमौचिती मैत्र्यं मैत्री, वुञ् प्रागुदाहृतः ॥ ( अ.लि. ३९)

अकारान्तः क्लीबस्त्रीलिङ्गः युक्ततावाची स्त्रीत्वे ङ्यन्तः औचित्यशब्दः । क्लीबे – औचित्यम्, औचित्ये, औचित्यानि । स्त्रियाम् – औचिती, औचित्यौ, औचित्यः ।

**४.३.१० गोशाल** – गवां शालेति विग्रहे 'षष्ठी' (२।२।८) इति तत्पुरुषसमासे गोशाला । पक्षे – 'विभाषा सेनासुराच्छायाशालानिशानाम्' ( २।४।२५ ) इति विकल्पेन क्लीबता । 'सुरासेनाच्छायाशालानिशा स्त्रियां च' ( पा.लि. १२९ ) इति च नपुंसकत्वम् । तथैव –

षष्ठ्यन्तप्राक्पदाः सेनाच्छायाशालासुरानिशाः ।

स्याद्वा नृसेनं श्वनिशं गोशालमितरे च दिक् ॥ ( अ.लि.४२ ) अकारान्तः क्लीबस्त्रीलिङ्गः स्त्रीत्वे आबन्तः गोष्ठवाची गोशालाशब्दः । क्लीबे – गोशालम्, गोशाले, गोशालानि । स्त्रियाम् – गोशाला, गोशाले, गोशालाः ।

**४.३.११. तट** – तटतीति विग्रहे (तट उच्छ्राये भ्वा.प.से.३१७) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' ( पा.३।१।१३४ ) इत्यच्प्रत्ययः । 'कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु ।' ( अ.लि.७ ) इति त्रिलिङ्गत्वम् (पुं-स्त्री-क्लीब-लिङ्गत्वम् ) । 'जातेरस्त्रीविषयादयोपधात्' (पा. ४।१।६३ ) इति ङीष् । अकारान्तपुं-स्त्री-क्लीब-लिङ्गबोधनार्थम्, स्त्रीत्वे ङ्यन्ततीरवाची शब्दोऽयम् । पुंसि – तटः तटौ तटाः । स्त्रियाम् – तटी तट्यौ तट्यः । क्लीबे – तटम् तटे तटानि ।

**४.३.१२. दयित** –दयते स्मेति विग्रहे 'दय दानगतिरक्षणहिंसादानेषु' (भ्वा.आ.से.५१५) इति धातोः 'निष्ठा' (पा.३।२।१०२) इति सूत्रेण क्तप्रत्यय इडागमश्च । अकारान्तो विशेष्यनिघ्नलिङ्गः स्त्रीत्वे आबन्तः प्रियवाची दयितशब्दः । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥' ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । पुंसि – दयितः, दयितौ, दयिताः । स्त्रियाम् – दयिता, दयिते, दयिताः । क्लीबे – दयितम्, दयिते, दयितानि ।

**४.३.१३. सुमुख** –शोभनं मुखं यस्य यस्या वेति विग्रहे 'अनेकमन्यपदार्थे' (पा.२।२।२४) इति बहुव्रीहिसमासे सुमुखेति जाते स्त्रीत्वविवक्षायां 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' ( पा.४।१।५४) इति वा ङीष् । अकारान्तो विशेष्यनिघ्नलिङ्गः स्त्रीत्वे ङ्यन्त आबन्तश्च सुमुखशब्दः । 'बहुव्रीहिरदिङ्नाम्नामुन्नेयं तदुदाहृतम् ।' ( अ.लि. ४४ ) इति विशेष्यनिघ्नलिङ्गत्वम् । पुंसि – सुमुखः सुमुखौ सुमुखाः । स्त्रियाम् – सुमुखी सुमुख्यौ सुमुख्यः । सुमुखा सुमुखे सुमुखाः । क्लीबे – सुमुखम् सुमुखे सुमुखानि ।

**४.३.१४. हरित** – हरतीति विग्रहे 'हृञ् हरणे' (भ्वा.उ.अ.९६५) इति धातोः 'हृश्याभ्यामितन्' (उ.३।९३) इतीतन्प्रत्यये 'वर्णादनुदात्तात्तोपधात्तो नः' (४।१।३९) इति वा ङीप् नकारादेशश्च । अकारान्तो विशेष्यनिघ्नलिङ्गः स्त्रीत्वे ङचन्त आबन्तश्च हरितशब्दः । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥' ( अ.लि.: ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । पुंसि – हरितः हरितौ हरिताः । स्त्रियां ङीबन्ते – हरिणी हरिण्यौ हरिण्यः । स्त्रियामाबन्ते – हरिता हरिते हरिताः । क्लीबे – हरितम् हरिते हरितानि ।

**४.३.१५. यशस्कर** – यशः करोतीति विग्रह उपपदसमासे 'कृञो हेतुताच्छील्यानुलोम्येषु' ( पा.३।२।२०) इति टप्रत्यये गुणे 'अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य' (पा.८।३।४६) इति विसर्गस्य सादेशे यशस्कर इति जाते स्त्रीत्वविवक्षायां 'टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः' (पा.४।१।१५) इति ङीप्प्रत्ययः । अकारान्तो विशेष्यनिघ्नलिङ्गः स्त्रीत्वे ङचन्त एव यशस्करशब्दः । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥' ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । पुंसि – यशस्करः यशस्करौ यशस्कराः । स्त्रियाम् – यशस्करी यशस्कर्यौ यशस्कर्यः । क्लीबे – यशस्करम् यशस्करे यशस्कराणि ।

**४.३.१६. दारक** – दारयतीति विग्रहे 'दॄ विदारणे' (क्र्या.प.से.१५९१) इति धातोः ण्यन्तात् 'ण्वुल्तृचौ' (पा.३।१।१३२) इति ण्वुल्प्रत्यये 'युवोरनाकौ' (पा.७।१।१)इत्यकादेशे णिलोपे स्त्रीत्वविवक्षायां 'अजाद्यतष्टाप्' (४।१।४) इति टापि 'प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः' ( ७।३।४४) इतीकारे दारिकेति । अकारान्तो विशेष्यनिघ्नलिङ्गो दारयितृवाची दारकशब्दः । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । पुंसि – दारकः दारकौ दारकाः ।स्त्रियाम् – दारिका दारिके दारिकाः । क्लीबे – दारकम् दारके दारकानि ।

**४.३.१७. सर्व** – सृतमनेन विश्वमिति विग्रहे 'सृ गतौ' (भ्वा.प.अ.१००१) इति धातोः 'सर्वनिधृष्वरिष्वलष्वशिवपद्वप्रह्वेष्वा अतन्त्रे' (उ.१।१५३) इति निपातनादकर्तरि वन्प्रत्ययः । अकारान्तो विशेष्यनिघ्नलिङ्गः समस्तवाची सर्वशब्दः । 'सर्वादीनि सर्वनामानि' (१।१।२७) इति सर्वनामसंज्ञायाम् 'तद्धितार्थो द्विगुः संख्यासर्वनामतदन्तकाः ।' ( अ.लि. ४३ ) इति विशेष्यनिघ्नत्वम् । पुंसि – सर्वः सर्वौ सर्वे । स्त्रियाम् – सर्वा सर्वे सर्वाः । क्लीबे – सर्वम् सर्वे सर्वाणि ।

**४.३.१८. पूर्व** –पूर्वतीति विग्रहे 'पुर्व पूरणे' (भ्वा.प.से.६१६) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इत्यच्प्रत्यये 'उपधायां च' (पा.८।२।७८) इति दीर्घः । अकारान्तो विशेष्यनिघ्नलिङ्गः प्राग्वाची पूर्वशब्दः । 'सर्वादीनि सर्वनामानि' (१।१।२७) इति सर्वनामसंज्ञायाम् 'तद्धितार्थो द्विगुः संख्यासर्वनामतदन्तकाः ।' ( अ.लि. ४३ ) इति विशेष्यनिघ्नत्वम् । पुंसि – पूर्वः पूर्वौ पूर्वे-पूर्वाः । स्त्रियाम् – पूर्वा पूर्वे पूर्वाः । क्लीबे – पूर्वम् पूर्वे पूर्वाणि ।

**४.३.१९.(क). प्रथम** – प्रथत इति विग्रहे 'प्रथ प्रख्याने' (भ्वा.आ.से.८१४) इति धातोः 'प्रथेरमच्' (उ.५।६८) इत्यमच्प्रत्ययः । अकारान्तो विशेष्यनिघ्नलिङ्गः स्त्रीत्वे आबन्तः प्रथमशब्दः । 'तद्धितार्थो द्विगुः संख्यासर्वनामतदन्तकाः ।' ( अ.लि. ४३ ) इति विशेष्यनिघ्नत्वम् । पुंसि – प्रथमः प्रथमौ प्रथमे-प्रथमाः । स्त्रियाम् – प्रथमा प्रथमे प्रथमाः । क्लीबे – प्रथमम् प्रथमे प्रथमानि ।

**४.३.१९-(ख).द्वितय** – द्वौ अवयवौ अस्येति विग्रहे 'संख्याया अवयवे तयप्' (पा.५।२।४२) इति तयप्प्रत्ययः । अकारान्तो विशेष्यनिघ्नलिङ्गः स्त्रीत्वे ङचन्तो द्वितयशब्दः, स्त्रीत्वविवक्षायां 'टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः' (पा.४।१।१५) इति ङीप्प्रत्ययः । 'सर्वादीनि सर्वनामानि' (१।१।२७) इति सर्वनामसंज्ञायाम् 'तद्धितार्थो द्विगुः संख्यासर्वनामतदन्तकाः ।' ( अ.लि. ४३ ) इति विशेष्यनिघ्नत्वम् । पुंसि – द्वितयः द्वितयौ द्वितये-द्वितयाः । स्त्रियाम् – द्वितयी द्वितय्यौ द्वितय्यः । क्लीबे – द्वितयम् द्वितये द्वितयानि ।

**४.३.२०. द्वितीय** – द्वयोः पूरण इति विग्रहे 'द्वेस्तीयः' (पा.५।२।५४) इति तीयप्रत्ययः । अकारान्तः विशेष्यनिघ्नलिङ्गः स्त्रीत्वे आबन्तः द्वितीयशब्दः । 'विभाषा प्रकरणे तीयस्य ङित्सूपसङ्ख्यानम्' (वा.१।१।२३) इति ङित्सु वा सर्वनामसंज्ञा । 'तद्धितार्थो द्विगुः संख्यासर्वनामतदन्तकाः ।' ( अ.लि. ४३ ) इति विशेष्यनिघ्नत्वम् । पुंसि – द्वितीयः द्वितीयौ द्वितीयाः । स्त्रियाम् – द्वितीया द्वितीये द्वितीयाः । क्लीबे – द्वितीयम् द्वितीये द्वितीयानि । ङिति – द्वितीयस्मै द्वितीयाय ।

**४.३.२१. पाद** – पद्यतेऽनेनेति विग्रहे 'पद गतौ' (दि.आ.अ.१२४५) इति धातोः 'पदरुजविशस्पृशो घञ्' (पा.३।३।१६) इति घञ्प्रत्ययः । 'घञबन्तः' ( पा.लि.७) इति सूत्रेण तथैव 'नाम्न्यकर्तरि भावे च घञजब्नङ्णघाथुचः ।' ( अ.लि. १५) इत्यनेन च पुंस्त्वम् । अकारान्तः पुलिङ्गः चरणवाची पादशब्दः । पादः पादौ पादाः, शसि – 'पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु' ( पा.६।१।६३ ) इति वा पदादेशः । पदः-पादान् ।

**४.३.२२. दन्त** – दाम्यतीति विग्रहे 'दमु उपशमे' (दि.प.से.१२८०) इति धातोः धातोरन्तर्भावितण्यर्थाद्वाहुलकात्तन्प्रत्ययः ।[३७५]अकारान्तःपुलिङ्गो रदनवाची दन्तशब्दः । 'देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि' (पा.लि. ४३ ) इत्यनेन तथैव'करगण्डोष्ठदोर्दन्तकण्ठकेशनखस्तनाः ।' ( अ.लि. १२) इत्यनेन च पुंलिङ्गत्वम्, दन्तः दन्तौ दन्ताः । शसि – 'पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु' ( पा.६।१।६३ ) इति वा ददादेशः । दतः-दन्तान् ।

**४.३.२३. मास** –मस्यते परिमीयतेऽयमिति विग्रहे 'मसी परिमाणे' (दि.प.से.१२००) इति धातोः 'अकर्तरि च कारके संज्ञायाम्' (पा.३।३।१९ ) इति घञ्प्रत्ययः । 'चमसांसरसनिर्यासोपवसकार्पासवासमासकासकांसमांसानि नपुंसके च' ( पा.लि. ९८ ) इति पुंस्त्वं नपुंसकत्वं च । 'मासस्तु तावुभौ' ( अ.लि. १२ ) इति निर्देशात्पुंलिङ्गत्वम् । अकारान्तःपुलिङ्गः कालवाची मासशब्दः । मासः मासौ मासाः । शसि – 'पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु' ( पा.६।१।६३ ) इति वा मासादेशः । मासः-मासान् ।

**४.३.२४. यूष** – यूषतीति विग्रहे 'यूष हिंसायाम्' ( भ्वा.प.से. ७२६) इति धातोः 'इगुपधज्ञाप्रीकिरः कः' (पा.३।१।१३५ ) इति कप्रत्ययः । अकारान्तः पुंक्लीबलिङ्गः पक्ववस्तुरसवाची यूषशब्दः । 'यूषकरीषमिषविषवर्षाणि नपुंके च' (पा.लि. ९५) इति पुंक्लीबत्वम् । 'यूपं प्रग्रीवपात्रीवे यूषं चमषचिक्कसौ ।' ( अ.लि. ३५ ) इति पुंक्लीबत्वम् । पुंसि – यूषः युषौ यूषाः । शसि – 'पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छ-कन्नुदन्नासञ्छस्प्रभृतिषु' ( पा.६।१।६३ ) इति वा यूषनादेशः । यूष्णः-यूषान् । क्लीबे – यूषम् यूषे यूषाणि ।

**४.३.२५. निर्जर** – जराया निष्क्रान्त इति विग्रहे 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' ( वा.१।४।७९ ) इति वार्तिकेन तत्पुरुषसमासः ।' देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तन्-भुजकण्ठखड्गशरपङ्काभिधानानि' (पा.लि. ४३ ) इति पुंलिङ्गत्वबोधनम्, तथैव 'पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुराः ।' ( अ.लि. ११ ) इति च पुंस्त्वम् । अकारान्तःपुलिङ्गः

[३७५] दीक्षितः भानुजि, अमरकोश : (सुधा/रामाश्रमी व्याख्या), वाराणसी : चौखम्बा सुरभारती प्रकाशन, सन् २०११ ।

देववाची निर्जरशब्दः । निर्जरः 'जराया जरसन्यतरस्याम्' ( पा.७।२।१०१ ) इति जरसादेशः । निर्जरसौ-निर्जरौ, निर्जरसः-निर्जराः ।

**४.३.२६. अजर** – न जरा यस्य यस्या वेति विग्रहे 'अनेकमन्यपदार्थे' (पा.२।२।२४)इति बहुव्रीहिसमासः । अकारान्तो विशेष्यनिघ्नलिङ्गोऽवृद्धव्यक्तिवाची अजरशब्दः । 'बहुव्रीहिरदिङ्नाम्नामुन्नेयं तदुदाहृतम् । ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । पुंसि – अजरः 'जराया जरसन्यतरस्याम्' ( पा.७।२।१०१ ) इति जरसादेशः । अजरसौ-अजरौ, अजरसः - अजराः । स्त्रियाम् – अजरा अजरसौ/अजरे, अजरसः/अजराः । क्लीबे– अजरम्/अजरसम्, अजरसी/अजरे, अजरांसि/अजराणि ।

**४.३.२७. कतर** – अनयोः क इति विग्रहे 'किंयत्तदो निर्धारणे द्वयोरेकस्य डतरच्' ( पा.५।३।९२) इति डतरच्प्रत्यये 'टेः' (पा.६।४।१४३) इति टिलोपः । अकारान्तो विशेष्यनिघ्नलिङ्गो डतरप्रत्ययान्तः कतरशब्दः । 'सर्वादीनि सर्वनामानि' (१।१।२७) इति सर्वनामसंज्ञायाम् 'तद्धितार्थो द्विगुः संख्यासर्वनामतदन्तकाः ।' ( अ.लि. ४३ ) इति विशेष्यनिघ्नत्वम् । पुंसि – कतरः कतरौ कतरे । स्त्रियाम् – कतरा कतरे कतराः । क्लीबे – 'अदड्डतरादिभ्यः पञ्चभ्यः' ( पा.७।१।२५ ) इत्यडदादेशः, कतरत् कतरे कतराणि ।

**४.३.२८. कतम** – एषां क इति विग्रहे 'वा बहूनां जातिपरिप्रश्ने डतमच्' (पा.५।३।९३) इति डतमच्प्रत्यये 'टेः' (पा.६।४।१४३) इति टिलोपः । अकारान्तो विशेष्यनिघ्नलिङ्गो डतमप्रत्ययान्तः कतमशब्दः । 'सर्वादीनि सर्वनामानि' (पा.१।१।२७) इति सर्वनामसंज्ञायाम्'तद्धितार्थो द्विगुः संख्यासर्वनामतदन्तकाः ।' ( अ.लि. ४३ ) इति विशेष्यनिघ्नत्वबोधनम् । पुंसि – कतमः कतमौ कतमे । स्त्रियाम् – कतमा कतमे कतमाः । क्लीबे – 'अदड्डतरादिभ्यः पञ्चभ्यः' ( पा.७।१।२५ ) इत्यडदादेशः, कतमत् कतमे कतमानि ।

**४.३.२९. अन्य** – अनतीति विग्रहे 'अन प्राणने' (अ.प.से.१२५२) इति धातोः 'अघ्न्यादयश्च' उ.४।११२) इतिनिपातनाद्यप्रत्ययः ।अकारान्तो विशेष्यनिघ्नलिङ्गोभिन्नार्थकोऽन्यशब्दः । 'सर्वादीनि सर्वनामानि' (पा.१।१।२७) इति सर्वनामसंज्ञायाम् 'तद्धितार्थो द्विगुः संख्यासर्वनामतदन्तकाः ।' ( अ.लि. ४३ ) इति विशेष्यनिघ्नत्वम् । पुंसि – अन्यः अन्यौ अन्ये । स्त्रियाम् – अन्या अन्ये अन्याः । क्लीबे – 'अदड्डतरादिभ्यः पञ्चभ्यः' ( पा.७।१।२५ ) इत्यडदादेशः, अन्यत् अन्ये अन्यानि ।

**४.३.३० अन्यतर** –अन्य एवेति विग्रहे 'अल्पाच्तरप्' (पा.२।२।३४) इतिवत् स्वार्थे तरप्प्रत्ययः (भानुजी)।[३७६]अकारान्तो विशेष्यनिघ्नलिङ्गोऽन्यतरशब्दः। 'सर्वादीनि सर्वनामानि' पा.(१।१।२७) इति सर्वनामसंज्ञायाम् 'तद्धितार्थो द्विगुः संख्यासर्वनामतदन्तकाः।' ( अ.लि. ४३ ) इति विशेष्यनिघ्नत्वम्। पुंसि – अन्यतरः अन्यतरौ अन्यतरे। स्त्रियाम् – अन्यतरा अन्यतरे अन्यतराः। क्लीबे – 'अदड्डतरादिभ्यः पञ्चभ्यः' ( पा.७।१।२५ ) इत्यदडादेशः, अन्यतरत् अन्यतरे अन्यतराणि।

**४.३.३१. इतर** – तरणमिति विग्रहे 'तॄप्लवनतरणयोः' (भ्वा.प.से.१०३८) इति धातोः 'ॠदोरप्' (पा.३।३।५७) इत्यप्प्रत्ययः, ततः एः कामस्य तरइति विग्रहे षष्ठीतत्पुरुषसमासः। इना तर इत्यपि शब्दस्तोमे वर्तते। अकारान्तो विशेष्यनिघ्नलिङ्गो भिन्नार्थक इतरशब्दः। 'सर्वादीनि सर्वनामानि' (पा.१।१।२७) इति सर्वनामसंज्ञायाम् 'तद्धितार्थो द्विगुः संख्यासर्वनामतदन्तकाः।' ( अ.लि. ४३ ) इति विशेष्यनिघ्नत्वम्। पुंसि – इतरः इतरौ इतरे। स्त्रियाम् – इतरा इतरे इतराः। क्लीबे – 'अद्ड्डतरादिभ्यः पञ्चभ्यः' ( पा.७।१।२५ ) इत्यद्डादेशः, इतरत् इतरे इतराणि।

**४.३.३२. एकतर** – अनयोरेक इति विग्रहे 'द्विवचनविभज्योपपदे तरबीयसुनौ' (पा.५।३।५७) इति तरप्प्रत्ययः। अकारान्तो विशेष्यनिघ्नलिङ्ग एकतरशब्दः।' सर्वादीनि सर्वनामानि' ( पा.१।१।२७) इति सर्वनामसंज्ञायाम् 'तद्धितार्थो द्विगुः संख्यासर्वनामतदन्तकाः।' ( अ.लि. ४३ ) इति विशेष्यनिघ्नत्वम्। पुंसि – एकतरः एकतरौ एकतरे।स्त्रियाम् – एकतरा एकतरे एकतराः। क्लीबे – अत्र तु 'एकतरात्प्रतिषेधो वक्तव्यः' (वा.७।१।२५ ) इत्यडदादेशाभावः, एकतरम् एकतरे एकतराणि।

**४.३.३३. उदक** –उनत्तीति विग्रहे 'उन्दी क्लेदने' (रु.प.से.१५५१) इति धातोः 'उदकं च' ( उ.२।३८९ ) इति क्वुन्प्रत्ययेऽकादेशः। 'मुखनयनलोहवनमांसरुधिरकार्मुकविवर-जलहलधनान्नाभिधायकानि' (पा. लि. १३७) इति नपुंसकत्वम्। 'कबन्धमुकं पाथः' ( अ.लि. ४ ) इति च नपुंसकत्वम्। अकारान्तः क्लीबलिङ्गो जलवाची उदकशब्दः। उदकम् उदके उदकानि। शसि – 'पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्य-कञ्छकन्नुदन्नासञ्छस्प्रभृतिषु' ( पा.६।१।६३ ) इति उदन्नादेशो वा। उदानि-उदकानि।

---

[३७६] दीक्षितः भानुजि, अमरकोश : (सुधा/रामाश्रमी व्याख्या), वाराणसी : चौखम्बा सुरभारती प्रकाशन, सन् २०११।

**४.३.३४. मांस** – मन्यत इति विग्रहे 'मन ज्ञाने' (दि.आ.अ.१२५३) इति धातोः'मनेर्दीर्घश्च' (उ.३।६४) इति सप्रत्ययो दीर्घश्च ततः 'नश्चापदान्तस्य झलि' (पा.८।३।२४)) इत्यनुस्वारः ।'चमसांसरसनिर्यासोपवसकार्पासवासमासकासकांसमांसानि नपुंसके च' (पा.लि. ९८ ) इति पुंस्त्वं नपुंसकत्वं च ।'मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहल-धनान्नाभिधायकानि' (पा.लि. १३७) इति च नपुंसकत्वम् ।अकारान्तः क्लीबलिङ्गः पिशितवाची मांसशब्दः । मांसम् मांसे मांसानि । शसादौ – 'मांसपृतनासानूनां मांस्पृत्स्नवो वाच्याः शसादौ वा' (वा.६।१।६३ ) इति विकल्पेन मांसादेशः, मांसि-मांसानि ।

**४.३.३५. हृदय** –हरतीति विग्रहे 'हृञ् हरणे' (भ्वा.उ.अ.९६५) इति धातोः 'वृह्रोः षुक्दुकौ च' ( उ.४।१०० ) इति कयन्प्रत्यये दुकागमः । 'हृदयं हृत्' ( अ.लि. ६४ ) 'हृदयं मानसे वुक्कोरसोरपि नपुंसकम् ।' [३७७]अकारान्तः क्लीबलिङ्गश्चित्तवाची हृदयशब्दः । हृदयम् हृदये हृदयानि । शसादौ – 'पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु' ( पा.६।१।६३) इति वा हृदादेशः, हृन्दि-हृदयानि ।

**४.३.३६. आस्य** –अस्यन्ते वर्णा येनेति विग्रहे 'असु क्षेपणे' (दि.प.से.१२८६) इति धातोः 'कृत्यल्युटो बहुलम्' इति ण्यत्प्रत्ययः ।'मुखनयनलोहवनमांसरुधिरकार्मुकविवरजल-हलधनान्नाभिधायकानि' (पा.लि. १३७) इति नपुंसकत्वम् ।'वक्रास्ये वदनं तुण्डमाननं लपनं मुखम् ।' ( अ.लि. ८९ ) ' आस्यं मुखे च तन्मध्ये तद्भवे च स्त्रियां स्थितौ ।' [घठड]अकारान्तः क्लीबलिङ्गो मुखवाची आस्यशब्दः ।आस्यम् आस्ये आस्यानि । शसादौ – 'पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु' ( पा.६।१।६३ ) इत्यासनादेशो वा, आसानि-आस्यानि ।

**४.३.३७. विश्वपा** – विशतीति विग्रहे 'विश प्रवेशने' (तु.प.अ.१२१८) इति धातोः 'अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन्' (उ.१।१५२) इति क्वन्प्रत्यये विश्वः, ततः पुनर्विश्वं पातीति विग्रहे 'क्विप्च' (पा.३।२।७६) इति क्विप्प्रत्ययः । आकारान्तो विशेष्यनिघ्नलिङ्गो लोकपालवाची विश्वपाशब्दः ।'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ. लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् ।पुंसि – विश्वपाः विश्वपौ विश्वपाः । स्त्रियां पुंवत् । क्लीबे –विश्वपम् विश्वपे विश्वपानि ।

---

[३७७]मेदिनीकरः, मेदिनीकोशः, वाराणसी : चौखम्बा संस्कृत सिरिज अफिस, वि.सं.२०२४ ।

[३७८]पूर्ववत् ।

**४.३.३८. हाहा** – हा इति शोकव्यञ्जकशब्दं जहातीति विग्रहे 'ओहाक् त्यागे' ( जु.प.अ.११६५) इति धातोः 'आतो मनिन्क्वनिप्क्वनिपश्च' (पा.३।२।७४) इति विच्प्रत्ययः । आकारान्तःपुलिङ्गोः गन्धर्वविशेषवाची हाहाशब्दः । 'देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठ-खड्गशरपङ्काभिधानानि' ( पा.लि. ४३ ) इति पुंलिङ्गत्वम्, तथैव 'पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुराः ।' ( अ.लि. ११ ) इति च पुंस्त्वम् । हाहाः हाहौ हाहाः ।

**४.३.३९. निशा** –नितरां श्यति तनूकरोति व्यापारानिति विग्रहे 'शो तनूकरणे' ( दि.प.अ.२२२०) इति धातोः 'आतश्चोपसर्गे' ( पा.३।१।१३६ ) इति कप्रत्यये टाप् ।'ङाबन्तश्च' ( पा.लि. ११ ) इति स्त्रीत्वम् तथैव 'ङ्याबूङन्तं चलं स्थिरम्' ( अ.लि. ५ ) इति च स्त्रीत्वम् । आकारान्तःस्त्रीलिङ्गो रात्रिवाची निशाशब्दः ।निशा निशे निशाः । शसादौ – 'पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु' ( पा.६।१।६३ ) इति वा निशादेशः, निशः-निशाः ।

**४.३.४०. नासिका** – नासत इति विग्रहे 'णासृ शब्दे' (भ्वा.आ.से.६६६) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इत्यच्प्रत्ययः । स्वार्थे कन्प्रत्यये टापि कात्पूर्वाकारस्येत्वम् ।आबन्तःस्त्रीलिङ्गो घ्राणवाची नासिकाशब्दः ।'ऊङाबन्तश्च' ( पा.लि. ११ ) इति स्त्रीत्वम् तथैव 'ङ्याबूङन्तं चलं स्थिरम्' ( अ.लि. ५ ) इति च स्त्रीत्वबोधनम् ।नासिका नासिके नासिकाः । शसादौ – 'पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु' ( पा.६।१।६३ ) इति वा नशादेशः, नसः-नासिकाः ।

**४.३.४१. पृतना** – प्रियत इति विग्रहे 'पृङ् व्यायामे' (तु.आ.अ.१४९६) इति धातोर्बाहुलकात्तनन्प्रत्ययः ।[३७९]आबन्तःस्त्रीलिङ्गः सैन्यवाची पृतनाशब्दः ।'ऊङाबन्तश्च' ( पा.लि. ११ ) इति स्त्रीत्वम् तथैव 'ङ्याबूङन्तं चलं स्थिरम्' ( अ.लि. ५ ) इति च स्त्रीत्वम् । पृतना पृतने पृतनाः । शसादौ – 'मांसपृतनासानूनां मांस्पृत्स्नवो वाच्याः शसादौ वा' ( वा.६।१।६३ ) इति विकल्पेन पृदादेशः, पृतः-पृतनाः ।

**४.३.४२. अम्बा** – अम्ब्यते शब्द्यत इति विग्रहे 'अबि शब्दे' भ्वा.आ.से.४०३) इति धातोः 'गुरोश्च हलः' (३।३।१०६) इत्यप्रत्ययः, ततष्टाप् ।आबन्तःस्त्रीलिङ्गो मातृवाची अम्बाशब्दः ।

---

[३७९] दीक्षितः भानुजि, अमरकोश : (सुधा/रामाश्रमी व्याख्या), वाराणसी : चौखम्बा सुरभारती प्रकाशन, सन् २०११ ।

'ऊङाबन्तश्च' ( पा.लि. ११ ) इति स्त्रीत्वम् तथैव 'ङ्याबूङन्तं चलं स्थिरम्' ( अ.लि. ५ ) इति च । अम्बा अम्बे अम्बाः । सम्बुद्धौ – 'अम्बार्थनद्योर्ह्रस्वः' ( पा.७।३।१०७ ) इति ह्रस्वः हे अम्ब र

**४.३.४३. जरा** – जीर्यतेऽनयेति विग्रहे 'जॄष् वयोहानौ' (दि.प.से.१२०५) इति धातोः 'षिद्भिदादिभ्योऽङ्' (पा.३।३।१०४) इत्यङ्प्रत्यये 'ऋदृशोऽङि गुणः' (पा.७।४।१६) इति गुणः । आबन्तःस्त्रीलिङ्गो वार्धक्यवाची जराशब्दः । 'ऊङाबन्तश्च' ( पा.लि. ११ ) इति स्त्रीत्वम् तथैव 'ङ्याबूङन्तं चलं स्थिरम्' ( अ.लि. ५ ) इति च । जरा 'जराया जरसन्यतरस्याम्' ( पा.७।२।१०१ ) इति जरसादेशः, जरसौ-जरे, जरसः-जराः ।

**४.३.४४. हरि** – हरतीति विग्रहे 'हृञ् हरणे' (भ्वा.उ.अ.९६५) इति धातोः 'अच इः' ( उ.४।१३९) इतीप्रत्ययः ।इकारान्तः पुंलिङ्गो विष्णुप्रभृतिवाची हरिशब्दः ।'देवासुरात्मस्वर्गगिरि-समुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि' ( पा.लि. ४३ ) इति पुंलिङ्गत्वम्, तथैव 'पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुराः ।' ( अ.लि. ११ ) इति च पुंस्त्वम् ।हरिः हरी हरयः ।

**४.३.४५. मति** –मन्यतेऽनया मननं वेति विग्रहे 'मन ज्ञाने' (दि.आ.अ.१२५३) इति धातोः 'स्त्रियां क्तिन्' ( पा.३।३।९४ ) इति क्तिन्प्रत्यये 'क्तिन्नन्तः' ( पा.लि. ९ ) इति स्त्रीत्वम् ।'स्त्रीभावादावनिक्तिण्ण्वुल्णच्ण्वुच्क्यब्युजिञङ्निशाः' ( अ.लि. ४ ) इति च ।इकारान्तः स्त्रीलिङ्गो बुद्धिवाची मतिशब्दः ।मतिः मती मतयः । ङिति सुपि – 'ङिति ह्रस्वश्च' ( पा.१।४।६। ) इति वा नदीसंज्ञा । मत्यै-मतये । मत्याः-मतेः । मत्याम्-मतौ ।

**४.३.४६. वारि** –प्राणान् मलानि वा वारयतीति विग्रहे 'वृञ् आवरणे' (चु.आ.से.१९५२) इति धातोः ण्यन्तात् 'वसिवपियजिराजिव्रजिसदिहनिवाशिवादिवारिभ्य इञ्' (उ.४।१२५ ) इति इञ्प्रत्ययः। 'मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहलधनान्नाभिधानानि' ( पा.लि. १३७ ) इति नपुंसकत्वम् । 'आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम् ।' ( अ.वा.व. ३ ) इति क्लीबत्वमुक्तम् ।इकारान्तः क्लीबलिङ्गो जलवाची वारिशब्दः । वारि । 'इकोऽचि विभक्तौ ' ( पा.७।१।७३ ) इति नुम्, वारिणी वारीणि ।

**४.३.४७. ऊर्मि** –ऋच्छतीति विग्रहे 'ऋ गतिप्राणनयोः' (भ्वा.प.अ.१००२) इति धातोः 'अर्तेरूच्च' (उ.४।४४ ) इति मिप्रत्ययेऽर्तेरूदादेशः, 'श्रोणियोन्यूर्मयः पुंसि च । ( पा.लि. ८ ) इति पुंस्त्रीलिङ्गत्वम् ।'ऊर्मिर्वराटकः स्वातिर्वर्णको झाटलिर्मनुः ।' इति स्त्रीपुंस्त्वम् ।'भङ्गतरङ्ग ऊर्मिर्वा स्त्रियां वीचिः' ( अ.लि ५ ) इति च ।इकारान्तः पुं-स्त्रीलिङ्गस्तरङ्गवाची ऊर्मिशब्दः ।पुंसि – ऊर्मिः ऊर्मी ऊर्मयः ।स्त्रियाम् – प्रथमाविभक्तौ पुंवत्, ङिति मतिवत् ।

**४.३.४८. अनादि** – आ प्रथमं दीयते गृह्यत इति विग्रहे 'डु दाञ् दाने' (जु.उ.अ.११६६) इति धातोः 'उपसर्गे घो किः' (पा.३।३।९२) इति किप्रत्ययः । न आदीति विग्रहे नञ्समासः । इकारान्तोविशेष्यनिघ्नलिङ्ग आदिरहितवाची अनादिशब्दः ।'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् ।अयं च पुंसि हरिवत्, स्त्रियां मतिवत्, क्लीबे तु अनादि अनादिनी अनादीनि ।

**४.३.४९. पति** –पातीति विग्रहे 'पा रक्षणे' (अ.प.अ.११३२) इति धातोः 'पातेर्डतिः' ( उ.४।५७ ) इति डतिप्रत्ययः ।'धवः प्रियः पतिर्भर्ता' ( अ.लि. ३५ ) इति पुंलिङ्गनिर्देशः ।इकारान्तः पुंलिङ्गः स्वामिवाची पतिशब्दः ।पतिः पती पतयः । ङिति – 'पतिः समास एव' (१।४।८। ) इति समास एव घिसंज्ञा । अत्रासमासे तु पत्ये । पत्युः । पत्यौ ।

**४.३.५०. सखि** –समानः ख्यायते लोकैरिति विग्रहे 'ख्या प्रकथने' (अ.प.अ.११९६) इति धातोः 'समाने ख्यः स चोदात्तः' ( उ.४।१३७ ) इतीण्प्रत्यये स च डित्, 'टेः' ( पा.६।४।१४३ ) इति टिलोपे 'नौ व्यो यलोपः' इत्यतोऽनुवर्तनाद्यलोपः समानस्य सभावश्च । 'अथ मित्रं सखा सुहृत्' ( अ.लि. १२ ) इति पुंलिङ्गनिर्देशः । इकारान्तः पुंलिङ्गो मित्रवाची सखिशब्दः । 'अनङ् सौ' ( ७।१।९३ ) इत्यनङ् सौ । सखा । 'सख्युरसंबुद्धौ' ( ७।१।९२ ) इति सर्वनामस्थानं णिद्वत् ।सखायौ सखायः ।

**४.३.५१. अस्थि** –अस्यत इति विग्रहे 'असु क्षेपणे' (दि.प.से.१२८६) इति धातोः 'असिसञ्जिभ्यां क्थिन्' ( उ.३।१५४ ) इति क्थिन्प्रत्ययः ।'श्राद्धकुलिशदैवपीठकुण्डाङ्काङ्गदधि-सक्थ्यक्ष्यस्थ्यास्पदकाशकण्वबीजानि' (पा.लि. १६६ ) इति नपुंसकत्वम् ।'कीकसं कुल्यमस्थि च' ( अ.लि. ६८ ) इति निर्देशनात् क्लीबत्वम् ।इकारान्तः क्लीबलिङ्गोऽस्थिशब्दः ।अस्थि अस्थिनी अस्थीनि । टादावचि – 'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' ( पा.७।१।७५ ) इत्यनङ् अस्थ्ना ।

**४.३.५२. दधि** –दधत इति विग्रहे 'दध धारणे' (भ्वा.आ.से.८) इति धातोः 'सर्वधातुभ्यइन्' ( उ.४।११७ )
इतीन्प्रत्ययः ।'श्राद्धकुलिशदैवपीठकुण्डाङ्काङ्गदधिसक्थ्यक्ष्यस्थ्यास्पदकाशकण्वबीजानि' (पा.लि. १६६ ) इति नपुंसकत्वम् । 'द्रप्सं दधि घनेतरत्' ( अ.लि. ५१ ) इति निर्देशनात् क्लीबत्वम् ।इकारान्तः क्लीबलिङ्गो दधिशब्दः ।दधि दधिनी दधीनि । टादावचि – 'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' ( पा.७।१।७५ ) इत्यनङ् दध्ना ।

**४.३.५३. सक्थि** –सजतीति विग्रहे 'षञ्ज सङ्गे' (भ्वा.प.अ.१०५६) इति धातोः 'असिसञ्जिभ्यां क्थिन्' ( उ.३।१५४ ) इति क्थिन्प्रत्ययः ।इकारान्तः क्लीबलिङ्ग ऊरुवाची सक्थिशब्दः ।'श्राद्धकुलिशदैवपीठकुण्डाङ्काङ्गदधिसक्थ्यक्ष्यस्थ्यास्पदकाशकण्वबीजानि' (पा.लि. १६६ ) इति नपुंसकत्वम् ।'सक्थि क्लीबे' ( अ.म.व.७३) इति क्लीबत्वम् ।सक्थि सक्थिनी सक्थीनि । टादावचि – 'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' ( पा.७।१।७५ ) इत्यनङ् सक्थ्ना ।

**४.३.५४. अक्षि** –अक्षतीति विग्रहे 'अक्षू व्याप्तौ' (भ्वा.प.से.६९८) इति धातोः 'सर्वधातुभ्य इन्' ( उ.४।११७ ) इतीन्प्रत्ययः । 'श्राद्धकुलिशदैवपीठकुण्डाङ्काङ्गदधिसक्थ्यक्ष्यस्थ्यास्पदकाश-कण्वबीजानि' (पा.लि. १६६ ) इति नपुंसकत्वम् । 'लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी' .( अ.लि. ९३ ) इति निर्देशनात् क्लीबत्वम् । इकारान्तः क्लीबलिङ्गश्चक्षुर्वाची अक्षिशब्दः ।अक्षि अक्षिणी अक्षीणि ।टादावचि – 'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' ( पा.७।१।७५ ) इत्यनङ् अक्ष्णा ।

**४.३.५५. द्वि** – दृधातोर्डिप्रत्ययः ।[३८०]इकारान्तोः विशेष्यनिघ्नलिङ्गो द्वित्ववद्वाची द्विवचनान्तो द्विशब्दः । 'सर्वादीनि सर्वनामानि' (१।१।२७) इति सर्वनामसंज्ञायाम् 'तद्धितार्थो द्विगुः संख्यासर्वनामतदन्तकाः ।' ( अ.लि. ४३ ) इति विशेष्यनिघ्नत्वम् ।पुंसि – द्वौ । स्त्रियाम् – द्वे । क्लीबे – द्वे ।

**४.३.५६. त्रि** – तरतीति विग्रहे 'तॄ प्लवनतरणयोः' (भ्वा.प.से.१०३८) इति धातोः 'तरतेर्ड्रिः' (उ.५।६६) इति ड्रिप्रत्यये टिलोपः । इकारान्तोविशेष्यनिघ्नलिङ्गो त्रित्ववद्वाची बहुवचनान्तः त्रिशब्दः । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । पुंसि – त्रयः । स्त्रियाम् – 'त्रिचतुरोः स्त्रियां तिसृचतसृ' ( पा.७।२।९९ ) इति तिस्रादेशः, 'अचि र ऋतः' ( पा.७।२।१०० ) इति रेफादेशः, तिस्रः । क्लीबे – त्रीणि ।

**४.३.५७. स्त्री** – स्त्यायति गर्भोऽस्यामिति,स्त्यायते शुक्रशोणिते यस्यामिति वा विग्रहे 'ष्ट्यै शब्दसंघातयोः' (भ्वा.प.अ.९७७) इति धातोः 'स्त्यायतेर्ड्रट्' ( उ.४।१६६ ) इति ड्रट्प्रत्यये 'टेः' (पा.६।४।१४३) इति टिलोपे 'लोपो व्योर्वलि' ( पा.६।१।६६ ) इति यलोपः ।'भूमिविद्युत्सरिल्लतावनिताभिधानानि' (पा.लि. १८) इति स्त्रीलिङ्गत्वम् । 'स्त्रियामीदूद्विरामैकाच् सयोनिप्राणिनाम च' ( अ.लि. २) इति च स्त्रीत्वम् ।'स्त्री योषिदबला

---

[३८०] आप्टे वामन शिवरामः, संस्कृत हिन्दी कोश, वाराणसी : भारतीय विद्याप्रकाशन, ई.२००१ ।

योषा नारी सीमन्तिनी वधूः ।' ( अ.लि. २ ) इति निर्देशनाच्च स्त्रीत्वम् ।ङचन्तः स्त्रीलिङ्गो योषिद्वाची स्त्रीशब्दः । स्त्री 'स्त्रियाः' ( पा.६।४।७९ ) इतीयङ्, स्त्रियौ स्त्रियः ।

**४.३.५८. श्री** –श्रयति हरिमिति विग्रहे 'श्रिञ् सेवायाम्' (भ्वा.उ.से.९६३) इति धातोः 'क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसंप्रसारणं च' ( वा.३।२।२७८ ) इति क्विपि दीर्घश्च । 'य्वन्तमेकाक्षरम्' ( पा.लि. १२ ) इति स्त्रीत्वम्, 'स्त्रियामीदूद्विरामैकाच् सयोनिप्राणिनाम च' ( अ.लि. २ ) इति च ।ईकारान्तः स्त्रीलिङ्गो लक्ष्मीवाचकः श्रीशब्दः । ङ्यन्ताभावादत्र सोर्लोपो न भवति ।श्रीः [घडञ्] 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' ( पा.६।४।७७ ) इतीयङ् श्रियौ श्रियः ।

**४.३.५९. लक्ष्मी** –लक्षयति पश्यति नीतिज्ञमिति विग्रहे 'लक्ष दर्शनाङ्कनयोः' (चु.प.से.१६४२) इति धातोः 'लक्षेर्मुट् च' ( उ.३.१६० ) इति ईप्रत्यये तस्य मुटागमः । 'ईकारान्तश्च' ( पा.लि. १० ) इति स्त्रीत्वम्, 'स्त्रियामीदूद्विरामैकाच् सयोनिप्राणिनाम च' ( अ.लि. २ ) इति च स्त्रीत्वम् । ईकारान्तः स्त्रीलिङ्गः श्रीवाचको लक्ष्मीशब्दः । ङ्यन्ताभावादत्र सोर्लोपो न भवति,[३८२]लक्ष्मीः लक्ष्म्यौ लक्ष्म्यः ।

**४.३.६०. ग्रामणी** – ग्रामं नयतीति विग्रहे 'णीञ् प्रापणे' (भ्वा.उ.से.९६७) इति धातोः 'सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्' (पा.३।२।६१) क्विप्प्रत्ययः, 'अग्रग्रामाभ्यां नयतेर्णो वाच्यः' (वा३।२।६१) इति णत्वम् । ईकारान्तो विशेष्यनिघ्नलिङ्गः श्रेष्ठवाचको ग्रामणीशब्दः । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । पुंसि – ग्रामणीः ग्रामण्यौ ग्रामण्यः । स्त्रियां पुंवत् । क्लीबे तु ग्रामणि ग्रामणिनी ग्रामणीनि ।

**४.३.६१. नी** –नयतीति विग्रहे 'णीञ् प्रापणे' (भ्वा.उ.से.९६७) इति धातोः क्विप् च' ( पा.३।२।७६ ) इतिक्विप्प्रत्ययः ।[३८३]ईकारान्तः पुं-स्त्रीलिङ्गयोः समो नेतृवाची नीशब्दः ।पुंसि –नीः 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' ( पा.६।४।७७ ) इतीयङ् नियौ नियः । स्त्रियाम् – पुंवत् ।

**४.३.६२. सुधी** – सुष्ठु ध्यायतीति विग्रहे 'ध्यै चिन्तायाम्' (भ्वा.प.अ.९७४) इति धातोः 'ध्यायते संप्रसारणं च' ( वा.३।२।१८० ) इति क्विप्प्रत्ययः संप्रसारणं च, 'हलः' (पा.६।४।२)

---

[३८१]अवीतन्त्रीतरीलक्ष्मीधीह्रीश्रीणामुणादितः । अपि स्त्रीलिङ्गवृत्तीनां सोर्लोपो न कदाचन ॥ आचार्यः वरदराजः, (टीकाकारः नारायणदत्तशास्त्री), **लघुसिद्धान्कौमुदी** गोरखपुर : गीताप्रेस, वि.सं.२०६६, पृ.४३ ।

[३८२]पूर्ववत् ।

[३८३] आप्टे वामनः शिवरामः, संस्कृत हिन्दी कोश, वाराणसी : भारतीय विद्याप्रकाशन, ई.२००१ ।

इति दीर्घः । 'विद्वान्विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बुधः ।' इति निर्देशनात् पुंलिङ्गत्वम् ।ईकारान्तः पुंलिङ्गः पण्डितवाची सुधीशब्दः सुधी । 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' ( पा.६।४।७७ ) इतीयङ् सुधियौ सुधियः ।

**४.३.६३. भानु** – भातीति विग्रहे 'भा दीप्तौ' (अ.प.अ.११२७) इति धातोः 'दाभाभ्यां नुः' ( उ.३।३२) इति नुप्रत्ययः। उकारान्तः पुंलिङ्गः सूर्यवाची किरणवाची च भानुशब्दः । 'देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि' ( पा.लि. ४३ ) इति अथवा 'उकारान्तः' ( पा.लि. ५१ ) इति पुंस्त्वम् । भानुः भानू भानवः ।

**४.३.६४. धेनु** –धीयत इति विग्रहे 'धेट् पाने' (भ्वा.प.अ.९६८.) इति धातोः 'धेट इच्च' ( उ.३।३४ ) इति नुप्रत्यय आत्वं प्रबाध्यैकारस्येकारः । 'धेनुरज्जुकुहुसरयुतनुरेणुप्रियङ्गवः स्त्रियाम्' ( पा.लि. ५३ ) इति स्त्रीत्वम् । 'धेनुः स्यान्नवसूतिका ।' ( अ.लि.७१ ) इति निर्देशः । उकारान्तः स्त्रीलिङ्गो गोवाचको धेनुशब्दः । धेनुः धेनू धेनवः । ङिति सुपि – 'ङिति ह्रस्वश्च' ( पा.१।४।६। ) इति वा नदीसंज्ञा । धेन्वै-धेनवे । धेन्वाः-धेनोः । धेन्वाम्-धेनौ ।

**४.३.६५. अम्बु** –अम्बत इति विग्रहे 'अबि शब्दे' (भ्वा.आ.से.४०३) इति धातोः बाहुलकादुः ।[३८४] ''मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहलधनान्नाभिधानानि' ( पा.लि. १३७ ) इति नपुंसकत्वम् । 'अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशंवरम्' ( अ.लि. ४ ) इति निर्देशाच्च नपुंसकत्वम् ।उकारान्तः क्लीबलिङ्गो जलवाचकोऽ अम्बुशब्दः ।अम्बु 'इकोऽचि विभक्तौ ' ( पा.७१।७३ ) इति नुम्, अम्बुनी अम्बूनि ।

**४.३.६६. मनु** – मन्यत इति विग्रहे 'मन ज्ञाने' (दि.आ.अ.१२५३) इति धातोः 'शॄस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च' (उ.१।१०) इत्युप्रत्ययः । उकारान्तः पुं-स्त्रीलिङ्गो मन्त्रवाचको मनुशब्दः । 'ऊर्मिर्वराटकः स्वातिर्वर्णको झाटलिर्मनुः । ( अ.लि. ३८ ) इति पुंस्त्रीलिङ्गत्वम् । पुंसि – मनुः मनू मनवः । स्त्रियाम् – मनुः मनू मनवः । ङिति सुपि – 'ङिति ह्रस्वश्च' ( पा.१।४।६। ) इति वा नदीसंज्ञा, मन्वै-मनवे ।

**४.३.६७. मधु** – मन्यत इति विग्रहे 'मन ज्ञाने' (दि.आ.अ.१२५३) इति धातोः 'फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च' ( उ. १। १७ ) इत्युप्रत्ययः, धश्चान्तादेशः । 'स्याच्चैत्रे चैत्रिको मधुः' इति पुंलिङ्गनिर्देशः, (अ. का.व. १५ ) । 'मधु क्षौद्रं माक्षिकादि' इति नपुंसकलिङ्गनिर्देशः ( अ. शू.व. १०७ ) । उकारान्तः पुंक्लीबलिङ्गश्चैत्र-क्षौद्रादिवाचको

[३८४] दीक्षितः भानुजि, अमरकोश : (सुधा/रामाश्रमी व्याख्या), वाराणसी : चौखम्बा सुरभारती प्रकाशन, सन् २०११ ।

मधुशब्दः । पुंसि – मधुः मधू मधवः । क्लीबे – मधु 'इकोऽचि विभक्तौ ' ( पा.७।१।७३ ) इति नुम्, मधुनी मधूनि ।

**४.३.६८. उडु** –अवतीति विग्रहे 'अव रक्षण-गति-कान्ति-प्रीति-तृप्त्यवगम-प्रवेश-श्रवण-स्वाम्यर्थ-याचन-क्रियेच्छा-दीप्त्यावाप्त्यालिङ्गन-हिंसा-दान-भाग-वृद्धिषु' (भ्वा.प.से.६४०)इति धातोः 'अन्येभ्योऽपि दृश्यते' ( पा.३।२।१७६ ) इति क्विप्प्रत्यये 'ज्वरत्वरस्रिव्यविम-वामुपधायाश्च' ( पा. ६।४।२० ) इत्यूठ्, ऊः ।उना शम्भुना डीयत इति विग्रहे 'डीङ् विहायसा गतौ' (भ्वा.आ.से.१०३७) इति धातोः 'मितद्र्वादिभ्य उपसंख्यानम्' ( वा.३।२।१८० ) इति डुप्रत्ययः,'इको ह्रस्वोऽङ्यो गालवस्य' (पा.६।३।६१) इति ह्रस्वः । 'नक्षत्रमृक्षं भं तारा तारकाप्युडु वा स्त्रियाम्' ( अ. दि.व. २१ ) इति स्त्रीक्लीबलिङ्गत्वम् । उकारान्तः स्त्री-क्लीबलिङ्गः नक्षत्रवाचकः उडुशब्दः । स्त्रियाम् – उडुः उडू उडवः । ङिति सुपि – 'ङिति ह्रस्वश्च' ( पा.१।४।६। ) इति वा नदीसंज्ञा । उड्वै-उडवे । उड्वाः-उडोः । उड्वाम्-उडौ । क्लीबे – उडु 'इकोऽचि विभक्तौ ' ( पा.७।१।७३ ) इति नुम्, उडुनी उडूनि ।

**४.३.६९. पङ्गु** –पनत इति विग्रहे 'पन व्यवहारे स्तुतौ च' (भ्वा.आ.से.४७०) इति धातोः बाहुलकाद् गुप्रत्ययः।[३८५]शब्दस्तोमे तु 'खजि गतिवैकल्ये' (भ्वा.प.से.२४१) इति धातोर्बाहुलकात् कुप्रत्यये प्रकृतेः पगादेशश्च ।'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥' ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । उकारान्तो विशेष्यनिघ्नलिङ्गः स्त्रियामूङन्तः हतजानुवाचकः पङ्गुशब्दः ।पुंसि – पङ्गुः पङ्गू पङ्गवः । क्लीबे – पङ्गु 'इकोऽचि विभक्तौ ' ( पा.७।१।७३ ) इति नुम्, पङ्गुनी पङ्गूनि । स्त्रियाम् – 'पङ्गोश्च' ( पा.४।१।६८ ) इत्यूङ्, 'ऊङाबन्तश्च' ( पा.लि. ११ ) इति स्त्रीत्वम् 'ङ्याबूङन्तं चलं स्थिरम्' ( अ.लि ५ )इति च ।पङ्गूः पङ्ग्वौ पङ्ग्वः ।

**४.३.७०. भविष्णु** –भवनशीलमिति विग्रहे 'भू सत्तायाम्' (भ्वा.प.से.१) इति धातोः 'भुवश्च' (पा.३।३।१३८) इतीष्णुच्प्रत्ययः । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् ।उकारान्तो विशेष्यनिघ्नलिङ्गो भवितृवाचको भविष्णुशब्दः ।पुंसि – भविष्णुः भविष्णू भविष्णवः । स्त्रियाम् – भविष्णुः भविष्णू भविष्णवः । ङिति सुपि – 'ङिति ह्रस्वश्च' ( पा.१।४।६। ) इति वा नदीसंज्ञा, भविष्ण्वै-भविष्णवे । क्लीबे – भविष्णु 'इकोऽचि विभक्तौ ' ( पा.७।१।७३ ) इति नुम्, भविष्णुनी भविष्णूनि ।

---

[३८५] पूर्ववत् पृ.२१८ ।

**४.३.७१. स्वादु** –स्वदत इति विग्रहे 'स्वद आस्वादने' (भ्वा.आ.से.२८) इति धातोः 'कृवापाजिमिस्वदिसाभ्यशूभ्य उण्' (उ.१।१) इत्युण्प्रत्ययः, तत उपधावृद्धिः। उकारान्तो विशेष्यनिघ्नलिङ्गः स्त्रीलिङ्गे वा ङचन्तः स्वादुशब्दः।'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः। कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि॥ ( अ.लि. ४४-४५ ) इति विशष्यनिघ्नलिङ्गत्वम्।पुंसि – स्वादुः स्वादू स्वादवः। स्त्रियाम् – 'वोतो गुणवचनात्' ( पा.४।१।४५ ) इति वा ङीष्, स्वाद्वी स्वाद्व्यौ स्वाद्व्यः। पक्षे – स्वादुः स्वादू स्वादवः। क्लीबे – क्लीबे – स्वादु 'इकोऽचि विभक्तौ ' ( पा.७।१।७३ ) इति नुम्, स्वादुनी स्वादूनि।

**४.३.७२. क्रोष्टु** – क्रोशतीति विग्रहे 'क्रुश आह्वाने रोदने च' (भ्वा.प.अ.९१४) इति धातोः 'सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन्' (उ.१।६९) इति तुन्प्रत्ययः, षत्वष्टुत्वे क्रोष्टु। 'सृगालवञ्चकक्रोष्टुफेरुफेरवजम्बुकाः' ( अ.सिं.व.५) इति पुंस्त्वम्। 'स्त्रीपुंसयोरपत्यन्ता द्विचतुःषट्पदेरगाः। जातिभेदाः पुमाख्याश्च स्त्रीयोगैः सह मल्लकः॥' ( अ.लि. ३७) इति स्त्रीपुंसकत्वम्।उकारान्तः पुं-स्त्रीलिङ्गः शृगाल-शृगालीवाची क्रोष्टुशब्दः।पुंसि – 'तृज्वत्क्रोष्टुः' ( पा.७।१।९५ ) इति क्रोष्टृशब्दादेशः, क्रोष्टा क्रोष्टारौ क्रोष्टारः। स्त्रियाम् – 'ऋन्नेभ्यो ङीप्' ( पा.४।१।५ ) इति ङीप्, क्रोष्ट्री क्रोष्ट्र्यौ क्रोष्ट्र्यः।

**४.३.७३. सानु** –सनोतीति विग्रहे 'षणु दाने' (तु.उ.से.१५५८) इति धातोः 'दृसनिजनिचरिचटिभ्यो ञुण्' ( उ.१।३ ) इति ञुण्। 'स्नुः प्रस्थः सानुरस्त्रियाम्' ( अ. शै.व. ५ ) इति निर्देशात् पुंक्लीबलिङ्गत्वम्। उकारान्तः पुं-क्लीबलिङ्गो गिरिप्रस्थवाची सानुशब्दः।पुंसि – सानुः सानू सानवः। क्लीबे – सानु 'इकोऽचि विभक्तौ ' ( पा.७।१।७३ ) इति नुम्, सानुनी सानूनि। शसादौ – 'मांसपृतनासानूनां मांस्पृत्स्नवो वाच्याः शसादौ वा' (वा.६।१।६३ ) इति विकल्पेन स्न्वादेशः, स्नूनि-सानूनि।

**४.३.७४. हूहू** –हू इति ह्वयतीति विग्रहे 'ह्वेञ् स्पर्धायां शब्दे च' (भ्वा.उ.अ.१०७७) इति धातोः बाहुलकाड्डूः।[३८६]'पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुराः।' ( अ.लि. ११ ) इति पुंलिङ्गत्वम्। 'हाहा हूहूश्चैवमाद्या गन्धर्वास्त्रिदिवौकसाम्' ( अ.लि. ५२ ) इति च पुंलिङ्गनिर्देशः। ऊकारान्तः पुंलिङ्गो गन्धर्वविशेषवाची हूहूशब्दः। हूहूः हूह्वौ हूह्वः।

**४.३.७५. भू** –भवतीति विग्रहे 'भू सत्तायाम्' (भ्वा.प.से.१) इति धातोः 'अन्येभ्योऽपि दृश्यते' ( ३।२।१७८ ) इति कर्तरि क्विप्प्रत्ययः। 'भूमिविद्युत्सरिल्लतावनिताभिधानानि' ( पा.लि. १८ )

---

[३८६] पूर्ववत् पृ.२१८ २२।

इति स्त्रीलिङ्गत्वम् । ‘य्वन्तमेकाक्षरम्’ ( पा.लि. १२ ) इति तथैव स्त्रीत्वम्, ‘स्त्रियामीदूद्विरामैकाच् सयोनिप्राणिनाम च’ ( अ.लि. २ ) इति च । ऊकारान्तः स्त्रीलिङ्गः पृथ्वीवाची भूशब्दः । भूः ‘अचि श्नुधातुभ्रुवां य्वोरियङुवङौ’ ( पा.६।४।७७ ) इत्युवङ्, भुवौ भुवः । ङिति सुपि – ‘ङिति ह्रस्वश्च’ ( पा.१।४।६। ) इति वा नदीसंज्ञा, भुवै-भुवे ।भुवाः-भुवः । भुवाम्-भुवि ।

**४.३.७६. स्वयंभू** –स्वयमेव भवतीति विग्रहे‘भू सत्तायाम्’ (भ्वा.प.से.१) इति धातोः ‘भुवः संज्ञान्तरयोः’ (पा.३।२।१७९ ) इति क्विप् । ‘देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि’ ( पा.लि. ४३ ) ‘स्वयंभूश्चतुराननः’ ( अ.स्व.व. १६ ) इति च पुंलिङ्गनिर्देशः ।ऊकारान्तः पुंलिङ्गश्चतुर्मुखवाची स्वयम्भूशब्दः । स्वयम्भूः स्वयम्भुवौ स्वयम्भुवः ।

**४.३.७७. वर्षाभू** –वर्षायां भवतीति विग्रहे ‘भू सत्तायाम्’ (भ्वा.प.से.१) इति धातोः ‘भुवः संज्ञान्तरयोः’ (पा.३।२।१७९ ) इति क्विप् । ‘भेकी वर्षाभ्वी’ ( अ.वा.व. २४ ) इति स्त्रीलिङ्गनिर्देशः । ‘वर्षाभ्वी’ इत्यसाधु । ङीब्विधायकाभावात् स्त्रियामपि ‘वर्षाभूः’ इत्येव । ‘भेक्यां पुनर्नवायां स्त्री वर्षाभूर्दर्दुरे पुमान्’ इति यादवः ।[387]ऊकारान्तः पुंस्त्रीलिङ्गः पुंसि दर्दुरवाची स्त्रियां भेकी-पुनर्नवयोर्वाचकः वर्षाभूशब्दः । पुंसि – वर्षाभूः ‘वर्षाभ्वश्च’ (६।४।८४) इति यणि वर्षाभ्वौ वर्षाभ्वः । स्त्रियाम् – वर्षाभूः वर्षाभ्वौ वर्षाभ्वः ।

**४.३.७८. वधू** –वहतीति विग्रहे ‘वह प्रापणे’ (भ्वा.उ.अ.१०७३)इति धातोः ‘वहो धश्च’ ( उ.१।८३ ) इत्यूप्रत्ययो धान्तादेशश्च । ‘वधूर्जाया स्नुषा स्त्री च’ ( अ.ना.व. १०२ ) इति स्त्रीलिङ्गनिर्देशः ।ऊकारान्तः स्त्रीलिङ्गो जायावाची वधूशब्दः ।वधूः वध्वौ वध्वः ।

**४.३.७९. भ्रू** –भ्रमतीति विग्रहे ‘भ्रमु चलने’ (भ्वा.प.से.९०८) इति धातोः ‘भ्रमेर्डूः’ (उ.२।६८) इति डूः । ‘ऊर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियौ’ ( अ.म.व. ९२ ) इति स्त्रीलिङ्गनिर्देशः । ऊकारान्तः स्त्रीलिङ्गो नेत्रोपरितनभागवाची भ्रूशब्दः ।भ्रूः ‘अचि श्नुधातुभ्रुवां य्वोरियङुवङौ’ ( पा.६।४।७७ ) इत्युवङ् भ्रुवौ भ्रुवः ।

**४.३.८०. धातृ** –दधातीति विग्रहे ‘डुधाञ् धारणपोषणयोः’ (जु.उ.अ.११६७) इति धातोः ‘ण्वुल्तृचौ’ (पा.३।१।१३३ ) इति तृच्प्रत्ययः ।‘देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशर-पङ्काभिधानानि’ (

[387]पूर्ववत् पृ.१०२ ।

पा.लि. ४३ ) इत्यनेन तथैव 'धाताब्जयोनिर्द्रुहिणो विरञ्चिः कमलासनः ।' ( अ. स्व.व. १७ ) इति च पुंलिङ्गनिर्देशः ।ऋकारान्तः पुंलिङ्गः पितामहवाची धातृशब्दः ।'ऋदुशनस्पुरुदंसोऽनेहसां च' ( पा.७।१।९४ ) इत्यनङसम्बुद्धौ सौ ।धाता । 'ऋतो ङिसर्वनामस्थानयोः' ( पा.७।३।११० ) इति गुणो ङौ सर्वनामस्थाने च ।धातारौ धातारः ।

**४.३.८१. पितृ** –पातीति विग्रहे 'पा रक्षणे' (अ.प.अ.११३२) इति धातोः 'नप्तृनेष्टृत्वष्टृ-होतृपोतृभ्रातृजामातृपितृदुहितृ' ( उ.२।९५ ) इति तृच्प्रत्यय इत्वं च । 'तातस्तु जनकः पिता' ( अ.म.व. २८ ) इति पुंलिङ्गनिर्देशः ।'ऋदुशनस्पुरुदंसोऽनेहसां च' ( पा.७।१।९४ ) इत्यनङसम्बुद्धौ सौ ।ऋकारान्तः पुंलिङ्गो जनकवाची पितृशब्दः ।उणादिनिष्पन्नानां तृन्तृच्प्रत्ययान्तानां संज्ञाशब्दानामुपधादीर्घश्चेत्तर्हि नप्त्रादिनामेवेति नियमार्थम् । तस्मात् पित्रादिशब्देषु न दीर्घः । [३८८]पिता । 'ऋतो ङिसर्वनामस्थानयोः' ( पा.७।३।११० ) इति गुणो ङौ सर्वनामस्थाने च ।पितरौ पितरः ।

**४.३.८२. नृ** –नयतीति विग्रहे 'णीञ् प्रापणे' (भ्वा.उ.से.९६७) इति धातोः 'नयतेर्डिच्च' ( उ.२।१०० ) इत्यृन्प्रत्यये डित्वं च । 'ऋतुपुरुषकपोलगुल्फमेघाभिधानानि' (लिङ्गानुशासनम् ४६ )इति पुंलिङ्गत्वम् । 'स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नरः' ( अ.म.व. १ ) इति पुंलिङ्गनिर्देशः ।ऋकारान्तः पुंलिङ्गो नरवाची नृशब्दः । 'ऋदुशनस्पुरुदंसोऽनेहसां च' ( पा.७।१।९४ ) इत्यनङसम्बुद्धौ सौ ।ना । 'ऋतो ङिसर्वनामस्थानयोः' (पा.७।३।११०) इति गुणो ङौ सर्वनामस्थाने च । नरौ नरः ।

**४.३.८३. मातृ** – मान्यत इति विग्रहे 'मान पूजायाम्' (भ्वा.आ.से.१०४१) इति धातोः 'नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ' (उ.२।९८) इति निपातनात्तृन्प्रत्ययो नलोपश्च । ऋकारान्तः स्त्रीलिङ्गः प्रसूवाची मातृशब्दः ।'ऋकारान्ता मातृदुहितृस्वसृननान्दरः' ( पा.लि. ३) इति स्त्रीत्वम् ।'सयोनिप्राणिनाम च' (अमरः स्त्रीलिङ्गसंग्रहः २) इति च स्त्रीत्वम् । स्त्रीत्वेऽपि 'न षट्स्वस्रादिभ्यः' (पा.४।१।१०) इति ङीप् निषेधः ।[३८९] 'ऋदुशनस्पुरुदंसोऽनेहसां च' (पा.७।१।९४) इत्यनङसमबुद्धौ सौ ।माता । 'ऋतो ङिसर्वनामस्थानयोः' (पा.७।३।११०) इति गुणो ङौ सर्वनामस्थाने च । मातरौ मातरः ।

---

[३८८] पित माता ननन्दा च सव्येष्टृभ्रातृयातरः । जामाता दुहिता देवा तृन्तृच्भ्यां रहिता नव ॥
आचार्यः वरदराजः, (टीकाकारः नारायणदत्तशास्त्री), **लघुसिद्धान्कौमुदी** गोरखपुर : गीताप्रेस, वि.सं.२०६६, पृ.४६।
[३८९] स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा । याता मातेति सप्तैते स्वस्रादय उदाहृताः ॥
पूर्ववत् पृ.४९ ।

**४.३.८४. स्वसृ** –सुष्ठु अस्यतीति विग्रहे 'असु क्षेपणे' (दि.प.से.१२८६) इति धातोः 'सुञ्यसेर्ऋन्' उ.२।९६ ) इति ऋन्प्रत्ययः ।ऋकारान्तः स्त्रीलिङ्गो भगिनीवाची स्वसृशब्दः । 'ऋकारान्ता मातृदुहितृस्वसृननान्दरः' ( पा.लि. ३ ) इति स्त्रीत्वम् ।'सयोनिप्राणिनाम च' ( अ.लि. २ ) इति च । 'भगिनी स्वसा' ( अ.व. २९ ) इति निर्देशः । 'ऋदुशनस्पुरुदंसोऽनेहसां च' ( पा.७।१।९४ ) इत्यनङसमबुद्धौ सौ ।स्वसा । 'ऋतो ङिसर्वनामस्थानयोः' ( पा.७।३।११० ) इति गुणो ङौ सर्वनामस्थाने च ।स्वसारौ स्वसारः ।

**४.३.८५. हन्तृ** – हन्तीति विग्रहे 'हन हिंसागत्योः' (अ.प.अ.१०८२) इति धातोः 'ण्वुल्तृचौ' ( पा.३।१।११३) इति तृच्प्रत्ययः । ऋकारान्तो विशेष्यनिघ्नलिङ्गो घातकवाची हन्तृशब्दः । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् ।पुंसि – 'ऋदुशनस्पुरुदंसोऽनेहसां च' ( पा.७।१।९४ ) इत्यनङसम्बुद्धौ सौ हन्ता । 'ऋतो ङिसर्वनामस्थानयोः' ( पा.७।३।११० ) इति गुणो ङौ सर्वनामस्थाने च ।हन्तारौ हन्तारः । स्त्रियाम् – 'ऋन्नेभ्यो ङीप्' ( पा.४।१।५ ) इति ङीप्, हन्त्री हन्त्र्यौ हन्त्र्यः । क्लीबे – हन्तृ 'इकोऽचि विभक्तौ ' ( पा.७।१।७३ ) इति नुम्, हन्तृणी हन्तृणि ।

**४.३.८६. गो** –गच्छतीति विग्रहे 'गम्लृ गतौ' (भ्वा.प.अ.१०५१)इति धातोः 'गमेर्डोः' ( उ.२।६७) इति डोप्रत्ययः ।'स्त्रीपुंसयोरपत्यन्ता द्विचतुःषट्पदेरगाः । जातिभेदाः पुमाख्याश्च स्त्रीयोगैः सह मल्लकः ॥' (अ.लि. ३७) इति स्त्रीपुंसकत्वम् ।'अनड्वान्सौरभेयो गौः' ( अ.वै.व.६०) इति पुंस्त्वम् । 'माहेयी सौरभेयी गौः' ( अ.वै.व.६०) इति स्त्रीत्वम् ।ओकारान्तः पुंसि वृषवाची स्त्रियां धेनुवाची उभयत्र समरूपो गोशब्दः । 'गोमणियष्टिमुष्टिपाटलिवस्तिशाल्मलित्रुटिमसिमरीचयः' ( पा.लि. १७२ ) इति पुंस्त्रीलिङ्गत्वम् । 'गोतो णित्' (पा.७।१।९० ) इति सर्वनामस्थानं णिद्वत् । गौः गावौ गावः ।

**४.३.८७. रै** –राति सुखमिति विग्रहे 'रा आदाने' (अ.प.अ.११३३) इति धातोः 'रातेर्डैः' ( उ.२।६६ ) इति डैप्रत्ययः ।ऐकारान्तः पुं-स्त्री-लिङ्गो धनवाची समरूपो रैशब्दः ।'हिरण्यं द्रविणं द्युम्नमर्थरैविभवा अपि' ( अ.वै.व. ९० ) इति पुंलिङ्गनिर्देशः ।रा द्रयोर्विभवे स्वर्णे' इति रुद्रः ।[३९०]'रायो हलि' (७।२।८५ ) इत्यात्वं हलि विभक्तौ, रा रायौ रायः ।

[३९०] दीक्षितः भानुजि, अमरकोश : (सुधा/रामाश्रमी व्याख्या), वाराणसी : चौखम्बा सुरभारती प्रकाशन, सन् २०११ ।

**४.३.८८. नौ** –नुद्यत इति विग्रहे 'णुद प्रेरणे' (तु.उ.अ.१५२०) इति धातोः 'ग्लानुदिभ्यां डौः' उ.२।६४ ) इति डौप्रत्ययः ।औकारान्तः स्त्रीलिङ्गस्तरीवाची नौशब्दः। 'स्रक्त्वक्ज्योग्वाग्यवागूनौस्फिजः' ( पा.लि.३० ) इति स्त्रीत्वम् ।'स्त्रियां नौस्तरणिस्तरिः' ( अ.वा.व. १० ) इति स्त्रीलिङ्गनिर्देशः ।नौः नावौ नावः ।

**४.३.८९. वाच्** –उच्यत इति विग्रहे 'वच परिभाषणे' (अ.प.अ.११३९) इति धातोः 'क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसंप्रसारणं च' ( वा.३।२।१७८ )इति क्विप् दीर्घोऽसंप्रसारणं च । चकारान्तः स्त्रीलिङ्गो वाणीवाची वाच्-शब्दः । 'स्रक्त्वक्ज्योग्वाग्यवागूनौस्फिजः' ( पा.लि. ३० ) इति स्त्रीत्वम् ।'ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती ।' ( अ.धीव. १ ) इति च ।'वाग्वाचे भारत्यां वचने स्त्रियौ' ।[३९१]'चोः कुः' ( ८।२।३० ) इति कुत्वम्, वाक् ( वाग् ) वाचौ वाचः ।

**४.३.९०. क्रुञ्च्** –क्रुञ्चतीति विग्रहे 'क्रुञ्च कौटिल्याल्पीभावयोः' (भ्वा.प.से.१९४) इति धातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' (पा.३।२।५९) इति क्विन्प्रत्ययो नलोपाभावश्च । चकारान्तः पुंलिङ्गः पक्षिविशेषवाची क्रुञ्च्-शब्दः ।'क्रुङ् क्रौञ्चः' ( अ.सिं.व. २२ ) इति पुंलिङ्गनिर्देशः ।'क्विन्प्रत्ययस्य कुः' ( ८।२।६२ ) इति कुत्वम् ।क्रुङ् क्रुञ्चौ क्रुञ्चः ।

**४.३.९१. प्राञ्च्** – प्रपूर्वात् 'अञ्चु गतिपूजनयोः' (भ्वा.प.से.१९६) इति धातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' (पा.३।२।५९) इति क्विनि निष्पन्नोऽर्थ-भेदाद्रुपभेदवान् विशेष्यनिघ्नः प्राञ्च्-शब्दः । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् ।पुंसि गतौ –'अनिदितां हल उपधायाः क्ङिति' (पा.६।४।२४) इत्युपधाया नस्य लोपः, प्राङ् प्राञ्चौ प्राञ्चः । शसि – प्राचः । पुंसि पूजायाम् – 'नाञ्चेः पूजायाम्' ( पा.६।४।३० )इत्युधाया नस्य लोपो न, प्राङ् प्राञ्चौ प्राञ्चः । शसि – प्राञ्चः । गतौ पूजायां च स्त्रियाम् – प्राची प्राच्यौ प्राच्यः । गतौ क्लीबे – प्राक् (ग् ) प्राची प्राञ्चि । पूजायां क्लीबे – प्राङ् प्राञ्ची प्राञ्चि ।

**४.३.९२. प्रत्यञ्च्** – प्रतिपूर्वात् 'अञ्चु गतिपूजनयोः' (भ्वा.प.से.१९६) इति धातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' (पा.३।२।५९) इति क्विनि निष्पन्नो विशेष्यनिघ्नः प्रत्यञ्च् शब्दः । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । पुंसि गतौ – 'अनिदितां हल

---

[३९१]पूर्ववत् ।

उपधायाः क्ङिति' ( पा.६।४।२४ ) इत्युपधाया नस्य लोपः, प्रत्यङ् प्रत्यञ्चौ प्रत्यञ्चः । शसि – प्रतीचः । पुंसि पूजायाम् –'नाञ्चेः पूजायाम्' ( पा.६।४।३० ) इत्युपधाया नस्य लोपो न, प्रत्यङ् प्रत्यञ्चौ प्रत्यञ्चः । शसि – प्रत्यञ्चः । गतौ पूजायां च स्त्रियाम् – प्रतीची प्रतीच्यौ प्रतीच्यः । गतौ क्लीबे – प्रत्यङ् प्रतीची प्रत्यञ्चि । पूजायां क्लीबे – प्रत्यङ् प्रत्यञ्ची प्रत्यञ्चि ।

**४.३.९३. सध्र्यञ्च्** –सहाञ्चतीति विग्रहे सहपूर्वात् 'अञ्चु गतिपूजनयोः' (भ्वा.प.से.१९६) इति धातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' (पा.३।२।५९) इति क्विनि 'सहस्य सध्रिः' (पा.६।३।९५) इति सध्र्यादेशे निष्पन्नो विशेष्यनिघ्नः सध्र्यञ्च् शब्दः ।'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् ।पुंसि गतौ – 'अनिदितां हल उपधायाः क्ङिति' (पा.६।४।२४) उपधाया नस्य लोपः, सध्र्यङ् सध्र्यञ्चौ सध्र्यञ्चः । शसि – सध्रीचः । पुंसि पूजायाम् – 'नाञ्चेः पूजायाम्' ( पा.६।४।३० )इत्युपधाया नस्य लोपो न, सध्र्यङ् सध्र्यञ्चौ सध्र्यञ्च । शसि – सध्र्यञ्चः । गतौ पूजायां च स्त्रियाम् – सध्रीची सध्रीच्यौ सध्रीच्यः । क्लीबे गतौ – सध्र्यक् सध्रीची सध्र्यञ्चि । क्लीबे पूजायाम् – सध्र्यङ् सध्र्यञ्ची सध्र्यञ्चि ।

**४.३.९४. उदञ्च्** – उत्पूर्वात् 'अञ्चु गतिपूजनयोः' (भ्वा.प.से.१९६) इति धातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' (पा.३।२।५९) इति क्विनि निष्पन्नो विशेष्यनिघ्न उदञ्च्-शब्दः ।'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् ।पुंसि गतौ – 'अनिदितां हल उपधायाः क्ङिति' ( पा.६।४।२४ ) इत्युपधाया नस्य लोपः, उदङ् उदञ्चौ उदञ्चः । शसि – उदीचः । पुंसि पूजायाम् – 'नाञ्चेः पूजायाम्' ( पा.६।४।३० )इत्युपधाया नस्य लोपो न, उदङ् उदञ्चौ उदञ्च । शसि – उदञ्चः ।गतौ पूजायां च स्त्रियाम् – उदीची उदीच्यौ उदीच्यः । क्लीबे गतौ – उदक् उदीची उदञ्चि । क्लीबे पूजायाम् – उदङ् उदीञ्ची उदञ्चि ।

**४.३.९५. सम्यञ्च्** – संपूर्वात् 'अञ्चु गतिपूजनयोः' (भ्वा.प.से.१९६) इति धातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' (पा.३।२।५९) इति क्विनि 'समः समिः' ( पा.३।६।९३) इति सम्यादेशे निष्पन्नो विशेष्यनिघ्नः सम्यञ्च्शब्दः ।'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् ।पुंसि गतौ – 'अनिदितां हल उपधायाः क्ङिति' (पा.६।४।२४) उपधाया नस्य लोपः, सम्यङ् सम्यञ्चौ सम्यञ्चः । शसि – समीचः । पुंसि पूजायाम् – 'नाञ्चेः

पूजायाम्' ( पा.६।४।३० )इत्युपधाया नस्य लोपो न, सम्यङ् सम्यञ्चौ सम्यञ्चः । शसि – सम्यञ्चः । गतौ पूजायां च स्त्रियाम् – समीची समीच्यौ समीच्यः । क्लीबे गतौ – सम्यक् समीची सम्यञ्चि । क्लीबे पूजायाम् – सम्यङ् सम्यञ्ची सम्यञ्चि ।

**४.३.९६. तिर्यञ्च्** – तिरोऽञ्चतीति विग्रहे तिरस्पूर्वात् 'अञ्चु गतिपूजनयोः' (भ्वा.प.से.) इति धातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' (पा.३।२।५९) इति क्विनि 'तिरसस्तिर्यलोपे' (पा.३।३।९४) इति तिर्यादेशे निष्पन्नो विशेष्यनिघ्नस्तिर्यञ्च्शब्दः ।'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशष्यनिघ्नलिङ्गत्वम् ।पुंसि गतौ – 'अनिदितां हल उपधायाः क्ङिति' ( पा.६।४।२४ ) इत्युपधाया नस्य लोपः, तिर्यङ् तिर्यञ्चौ तिर्यञ्चः । शसि – तिरश्चः । पुंसि पूजायाम् – 'नाञ्चेः पूजायाम्' ( पा.६।४।३० )इत्युपधाया नस्य लोपो न, तिर्यङ् तिर्यञ्चौ तिर्यञ्चः । शसि – तिर्यञ्चः । गतौ पूजायां च स्त्रियाम् – तिरश्ची तिरश्च्यौ तिरश्च्यः । क्लीबे गतौ – तिर्यक् तिर्यश्ची तिर्यञ्चि । क्लीबे पूजायाम् – तिर्यङ् तिर्यञ्ची तिर्यञ्चि ।

**४.३.९७. विष्वद्रयञ्च्** – विष्वगञ्चतीति विग्रहे विष्वद्रिपूर्वात् 'अञ्चु गतिपूजनयोः' ( भ्वा.प.से.१९६) इति धातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' (पा.३।२।५९) इति क्विनि 'विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये' (पा.६।३।९२) इति टेरद्र्यादेशे निष्पन्नो विशेष्यनिघ्नोविष्वद्र्यञ्च्शब्दः ।'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । विष्वद्र्यङ् विष्वद्र्यञ्चौ विष्वद्र्यञ्चः ।पूर्ववत् ।[३९२]

**४.३.९८. राज्** –राजतीति विग्रहे 'राजृ दीप्तौ' (भ्वा.उ.से.८८०) इति धातोः 'सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्' (पा.३।२।६१) इति क्विप् । जकारान्तः पुंलिङ्गो राजवाची राज्शब्दः । 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' ( पा.८।२।३६)इति षत्वम् । जश्त्वचर्त्वे । राट् ( राड् ) राजौ राजः । शसि- 'अल्लोपोऽनः' ( पा.६।४।१३४) इत्यनोऽकारलोपो राज्ञः ।

---

[३९२]देवानञ्चति देवद्र्यङ् , विष्वद्र्यङ् विष्वगञ्चति । यः सहाञ्चति सध्र्यङ् सः , स तिर्यङ् यस्तिरोऽञ्चति ॥

अमरसिंहः, ***अमरकोशः (स्वयंबोधिनी टीका)*** (३।१।३४), नेपाल : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६, पृ. ।

**४.३.९९ (क)वणिज्** –पणत इति विग्रहे 'पण व्यवहारे स्तुतौ च' (भ्वा.आ.से.४६९) इति धातोः 'पणतेरिज्यादेश्च वः' ( उ.२।७० ) इति इजिप्रत्ययः,आदेः पकारस्य वकारश्च ।'वैदेहकः सार्थवाहो नैगमो वणिजो वणिक् ।' ( अ.वै.व.७८) इति पुलिङ्गनिर्देशः ।जकारान्तः पुंलिङ्गो वैश्यवाची वणिज्शब्दः ।कुत्वम् ।वणिक् ( वणिग् ) वणिजौ वणिजः ।

**४.३.९९ (ख) सुखभुज्** – सुखं भुनक्तीति विग्रहे 'भुज पालनाभ्यवहारयोः' (रु.प.अ.१५४८) इति धातोः'अन्येभ्योऽपि दृश्यते' (पा.३।२।१७८) इति क्विप्प्रत्ययः । जकारान्तो विशेष्यनिघ्नलिङ्गः सुखभोक्तृवाची सुखभुज्शब्दः ।'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् ।पुंसि – सुखभुक् ( सुखभुग् ) सुखभुजौ सुखभुजः । स्त्रियाम् – पुंवत् । क्लीबे – सुखभुक् सुखभुजी सुखभुञ्जि ।

**४.३.१००. स्रज्** – सृज्यते सुखमिति विग्रहे 'सृज विसर्गे' (तु.प.अ.१५०८) 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' (पा.३।२।५९)इति क्विन्प्रत्ययो निपातनादमागमश्च । जकारान्तः स्त्रीलिङ्गो माल्यवाची स्रज्शब्दः । 'भाःस्रुक्स्रग्दिगुष्णिगुपानहः' ( पा.लि. २० ) इति स्त्रीत्वम् । 'स्रक्त्वक्ज्योग्वाग्यवागूनौस्फिजः' ( पा.लि. ३० ) इति च स्त्रीत्वम् ।स्रक् स्रजौ स्रजः ।

**४.३.१०१. असृज्** – न सृजतीति विग्रहे 'सृज विसर्गे' (तु.प.अ.१५०८) इति धातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' ( पा.३।२।५९ ) इति क्विन्प्रत्ययो नञ्समासश्च । जकारान्तः क्लीबलिङ्गो रुधिरवाची असृज्शब्दः । 'रुधिरेऽसृग्लोहितास्ररक्तक्षतजशोणितम्' ( अ.म.व. ६४ ) इति नपुंसकलिङ्गनिर्देशः । 'क्विनप्रत्यस्य कुः' ( पा.८।२।६२ ) इति कुत्वम् ।असृक् असृजी असृञ्जि । शसादौ – 'पद्दन्नोमास्हृन्निशसन्यूषन्दोष-न्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु' ( पा.६।१।६३ ) इत्यसनादेशो वा । असानि-असृञ्जि ।

**४.३.१०२. विश्वराज्** – विश्वं राजतीति विग्रहे 'राजृ दीप्तौ' (भ्वा.उ.से.८८०) इति धातोः 'सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्' ( ३।२।६१ ) इति क्विप् । जकारान्तो विशेष्यनिघ्नलिङ्गः संसारशोभिवाची विश्वराज्शब्दः ।'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् ।पुंसि – विश्वराट् ( विश्वराड् ) विश्वराजौ विश्वराजः । स्त्रियाम् – पुंवत् । क्लीबे – विश्वराट् विश्वराजी विश्वराञ्जि ।

**४.३.१०३. पृषत्** – पर्षतीति विग्रहे 'पृषु सेचने' (भ्वा.प.से.७५१) इति धातोः 'वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च' (उ.२।८४ ) इत्यतिप्रत्ययो गुणाभावश्च ।तकारान्तः पुंलिङ्गो मृगवाची पृषत्शब्दः ।'पृषन्मृगे पुमान्, बिन्दौ न द्वयोः' ( अ.वा.व. ६) इति पुंलिङ्गत्वमुक्तम् ।पृषन् पृषन्तौ पृषन्तः ।

**४.३.१०४. हरित्** – हरतीति विग्रहे 'हृञ् हरणे' (भ्वा.उ.अ.९६५) इति धातोः 'हृसृरुहियुषिभ्य इतिः' ( १।९७ ) इति इतिप्रत्ययः । तकारान्तः स्त्रीलिङ्गः दिग्-वाची हरित्-शब्दः । 'काष्ठा दिगर्थाः स्त्रियाम्' ( पन.लि.७२ ) इति स्त्रीत्वम्, 'दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः' ( अ.दि.व. १ ) इति स्त्रीलिङ्गनिर्देशः । 'हरिद्दिशि स्त्रियां, पुंसि हयवर्णविशेषयोः । अस्त्रियां स्यात्तृणे' ( भानुजिः ) इति च ।[३९३]हरित् ( हरिद् ) हरितौ हरितः ।

**४.३.१०५. जगत्** – गच्छतीति विग्रहे 'गम्लृ गतौ' (भ्वा.प.अ.१०५१) इति धातोः 'वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च' (उ.२।८४ ) इत्यतिप्रत्ययो जगादेशश्च ।तकारान्तः क्लीबस्त्रीलिङ्गो लोकवाची जगत्-शब्दः ।'वियज्जगत्सकृत्शकन्पृषत्शकृद्यकृदुदश्वितः' ( पा.लि. १६४ ) इति क्लीबत्वम् । 'अथो जगती लोको विष्टपं भुवनं जगत्' ( अ.भू.व. ६ ) इति च । 'जगत् स्याद्विष्टपे क्लीबं, वायौ ना, जङ्गमे त्रिषु' ।[३९४]क्लीबे – जगत् जगती जगन्ति । स्त्रियाम् – 'उगितश्च' ( पा.४।१।६ ) इति ङीप्, जगती जगत्यौ जगत्यः ।

**४.३.१०६. यकृत्** – यमनमिति विग्रहे 'यम उपरमे' (भ्वा.प.अ.१०४३) इति धातोः 'सम्पदादिभ्यः क्विप्' (वा.३।३।९४) इति क्विपि 'गमादीनामिति वक्तव्यम्' (वा.३।४।४०) इति मलोपः, ततो यं संयमं करोतीति विग्रहे यंपूर्वात् 'डुकृञ् करणे' (त.उ.अ.१५६४) इति धातोः 'क्विप् च' (पा.५।२।५९) इति क्विप्प्रत्यये तुक् ।तकारान्तः क्लीबलिङ्गःकालखण्डवाची यकृत्-शब्दः (कलेजा इति भाषयाम्)।'वियज्जगत्सकृत्शकन्पृषत्शकृद्यकृदुदश्वितः' ( पा.लि. १६४ ) इति क्लीबत्वम् ।यकृत् यकृती यकृन्ति । शसादौ – 'पद्दन्नोमास्हृन्निशसन्यूषन्दोष-न्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु' ( पा.६।१।६३ ) इति यकनादेशो वा । यकनि-यकृन्ति ।

**४.३.१०७. शकृत्** –शक्नोतीति विग्रहे 'शक्लृ शक्तौ' (स्वा.प.अ.१३४३) इति धातोः 'शकेर्ऋतिन्' (उ.४।५८) इति ऋतिन्प्रत्ययः । तकारान्तः क्लीबलिङ्गो विष्ठावाची शकृत्-शब्दः । 'वियज्जगत्सकृत्-शकन्पृषत्शकृद्यकृदुदश्वितः' ( पा.लि. १६४ ) इति

---

[३९३] दीक्षितः भानुजि, अमरकोश : (सुधा/रामाश्रमी व्याख्या), वाराणसी : चौखम्बा सुरभारती प्रकाशन, सन् २०११ ।

[३९४]पूर्ववत् पृ.४१०।

क्लीबत्वम् ।शकृत् शकृती शकृन्ति । शसादौ – 'पद्दन्नोमास्हृन्निशसन्यूषन्दोष-न्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु' ( पा.६।१।६३ ) इति शकनादेशो वा । शकानि-शकृन्ति ।

**४.३.१०८. भवत्** – भवतीति विग्रहे 'भू सत्तायाम्' (भ्वा.प.से.१) इति धातोः 'लटः शतृशानचावप्रथमासमानाधिकरणे' (पा.३।२।१२४) इति शतृप्रत्ययेऽनुबन्धलोपे शपि गुणेऽवादेशे पररूपः ।तकारान्तः ( शत्रन्तः ) विशेष्यनिघ्नः सत्तावद्वाची भवत्-शब्दः । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशष्यनिघ्नलिङ्गत्वम् ।पुंसि – भवन् भवन्तौ भवन्तः । स्त्रियाम् – 'उगितश्च' ( पा.४।१।६ ) इति ङीप्, भवन्ती भवन्त्यौ भवन्त्यः । क्लीबे – भवत् भवन्ती भवन्ति ।

**४.३.१०९. महत्** – महतीति विग्रहे 'मह पूजायाम्' (भ्वा.प.से.७७६) इति धातोः 'वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च' (उ.२।८४ ) इत्यतिप्रत्ययः । तकारान्तो विशेष्यनिघ्नो बृहद्वाची महत्-शब्दः । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् ।पुंसि – 'उगिदचां सर्वनामस्थानेऽधातोः' ( पा.७।१।७० ) इति नुम्, महान् महान्तौ महान्तः । शसि – महतः । स्त्रियाम् –'उगितश्च' ( पा.४।१।६ ) इति ङीप्, महती महत्यौ महत्यः । क्लीबे – महत् महती महान्ति ।

**४.३.११०. धीमत्** – धीरस्यास्तीति ग्रिहे 'तदस्यास्त्यस्मिन्निति मतुप्' (पा.५।२।९४) इति मतुप्प्रत्ययः । तकारान्तः ( मत्वन्तः ) विशेष्यनिघ्नः बुद्धिमद्वाची धीमत्-शब्दः । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । पुंसि – 'उगिदचां सर्वनामस्थानेऽधातोः' ( पा.७।१।७० ) इति नुम्, धीमान् धीमन्तौ धीमन्तः । शसि – धीमतः । स्त्रियाम् –'उगितश्च' ( पा.४।१।६ ) इति ङीप्, धीमती धीमत्यौ धीमत्यः । क्लीबे – धीमत् धीमती धीमन्ति ।

**४.३.१११. ददत्** – ददातीति विग्रहे 'डुदाञ् दाने' (जु.उ.अ.११६६) इति धातोः 'लटः शतृशानचावप्रथमासमानाधिकरणे' (पा.३।२।१२४)इति शतृप्रत्ययेऽनुबन्धलोपे 'कर्तरि शप्' ( पा.३।१।६८) इति शपि तस्य 'जुहोत्यादिभ्यः श्लुः' (पा.२।४।७५) इति श्लुरादेशे 'श्लौ' ( पा.६।१।१०) इति द्वित्वेऽभ्यासह्रस्वे 'श्नाभ्यस्तयोरातः' (६।४।११२) इत्याकारलोपः ।तकारान्तो विशेष्यनिघ्नो दातृवाची ददत्-शब्दः ।'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशष्यनिघ्नलिङ्गत्वम् ।पुंसि –

'नाभ्यस्ताच्छतु' ( पा.७।१।७८ ) इति नुम् निषेधः, ददत् ददतौ ददतः । स्त्रियाम् –'उगितश्च' ( पा.४।१।६ ) इति ङीप्, ददती ददत्यौ ददत्यः । क्लीबे – ददत् ददती जसि – 'वा नपुंसकस्य' ( ७।१।७९ ) इति सर्वनामस्थाने परे विकल्पेन नुम्,ददन्ति-ददति ।

**४.३.११२. तुदत्** – तुदतीति विग्रहे 'तुद व्यथने' (तु.उ.अ.१६६५) इति धातोः 'लटः शतृशानचावप्रथमासमानाधिकरणे' (पा.३।२।१२४)इति शतृप्रत्ययेऽनुबन्धलोपे 'तुदादिभ्यः शः' ( पा.३।१।७७) इति शप्रत्ययः पररूपः । तकारान्तो विशेष्यनिघ्नो व्यथकवाची तुदत्-शब्दः । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । पुंसि – 'उगिदचां सर्वनामस्थानेऽधातोः' ( पा.७।१।७० ) इति नुम्, तुदन् तुदन्तौ तुदन्तः । स्त्रियाम् – 'उगितश्च' ( पा.४।१।६ ) इति ङीप्, तुदन्ती तुदन्त्यौ तुदन्त्यः । क्लीबे – तुदत् 'आच्छीनद्योर्नुम्' ( पा.७।१।८० ) इति विक्ल्पेन नुम् शीपरे, तुदन्ती-तुदती तुदन्ति ।

**४.३.११३ (क)** यावत् – यत्परिमाणमस्येति विग्रहे 'यत्तदेतेभ्यः परिमाणे वतुप्' (पा.५।२।३९) इति वतुप्प्रत्यये 'आ सर्वनाम्नः' (पा.६।३।९१) इत्याकारान्तादेशे सवर्णदीर्घः । तकारान्तो विशेष्यनिघ्नो यत्परिमाणवाची यावत्-शब्दः । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । पुंसि – 'उगिदचां सर्वनामस्थानेऽधातोः' ( पा.७।१।७० ) इति नुम्, यावान् यावन्तौ यावन्तः । स्त्रियाम् –'उगितश्च' ( पा.४।१।६ ) इति ङीप्, यावती यावत्यौ यावत्यः । क्लीबे – यावत् यावती यावन्ति ।

**४.३.११३ (ख) तावत्** – तत्परिमाणमस्येति विग्रहे 'यत्तदेतेभ्यः परिमाणे वतुप्' (पा.५।२।२९) इति वतुप्प्रत्यये 'आ सर्वनाम्नः' (पा.६।३।९१) इत्याकारन्तादेशे सवर्णदीर्घः । तकारान्तो विशेष्यनिघ्नस्तत्परिमाणवाची तावत्-शब्दः । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् ।पुंसि – 'उगिदचां सर्वनामस्थानेऽधातोः' ( पा.७।१।७० ) इति नुम्, तावान् तावन्तौ तावन्तः । स्त्रियाम् –'उगितश्च' ( पा.४।१।६ ) इति ङीप्, तावती तावत्यौ तावत्यः । क्लीबे – तावत् तावती तावन्ति ।

**४.३.११४. भवत्** –भवतीति विग्रहे 'भा दीप्तौ' (अ.प.अ.११२७) इति धातोः 'भातेर्डवतु' ( उ.१।६३) इति डवतु प्रत्ययः । तकारान्तोडवतुप्रत्ययान्तोविशेष्यनिघ्नो युष्मद्वाची भवत्-शब्दः । 'सर्वादीनि सर्वनामानि' (१।१।२७) इति सर्वनामसंज्ञायाम् 'तद्धितार्थो द्विगुः

संख्यासर्वनामतदन्तकाः ।' ( अ.लि. ४३ ) इति विशेष्यनिघ्नत्वम् । पुंसि – 'उगिदचां सर्वनामस्थानेऽधातोः' ( पा.७1।७० ) इति नुम्, भवान् भवन्तौ भवन्तः । स्त्रियाम् – 'उगितश्च' ( पा.४।१।६ ) इति ङीप्, भवती भवत्यौ भवत्यः । क्लीबे – भवत् भवती भवन्ति ।

**४.३.११५. दधिमथ्** – दधि मथ्नातीति विग्रहे 'मन्थ विलोडने' (क्र्या.प.से.४३) इति धातोः 'क्विप् च' (पा.३।२।७६) इति क्विप्प्रत्ययः । थकारान्तो विशेष्यनिघ्नो दधिमन्थकवाची दधिमथ्-शब्दः । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् ।पुंसि – दधिमत् ( दधिमद् ) दधिमथौ दधिमथः ।स्त्रियाम् – पुंवत् । क्लीबे – दधिमत् दधिमथी दधिमन्थि ।

**४.३.११६. गोत्रभिद्** –गोत्रान् गिरीन् भिनत्तीति विग्रहे 'भिदिर् विदारणे' (रु.उ.अ.१५३३) इति धातोः 'सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्' ( ३।२।६१ ) इति क्विप् । दकारान्तो पुंलिङ्ग इन्द्रवाची गोत्रभिद्-शब्दः । 'देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तन-भुजकण्ठखड्गशरपङ्काभिधानानि' ( पा.लि. ४३ ) इति पुंस्त्वम् । तथैव 'पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुराः ।' ( अ.लि. ११ ) इति च पुंस्त्वम् ।'सुत्रामा गोत्रभिद्वज्री वासवो वृत्रहा वृषा ॥' ( अ.स्व.व. ४२ )इति च पुंलिङ्गनिर्देशः ।गोत्रभित् ( गोत्रभिद् ) गोत्रभिदौ गोत्रभिदः ।

**४.३.११७.(क) शरद्** –शीर्यन्तेऽस्यां पाकेनौषधय इति विग्रहे 'शॄ हिंसायाम्' ( क्र्या.प.से.१५८६) इति धातोः 'शॄदृभसोऽदिः' ( १।१३० ) इत्यदिप्रत्ययः । 'अथ शरत्स्त्रियाम्' - अ.का.व.१९) इति स्त्रीत्वनिर्देशः ।दकारान्तः स्त्रीलिङ्गः संवत्सर-शरदृतुवाची शरच्छब्दः । शरत् ( शरद् ) शरदौ शरदः ।

**४.३.११७.(ख) छागच्छिद्** – छागं छिनत्तीति विग्रहे 'छिदिर् द्वैधीकरणे' (रु.उ.अ.१५३४) इति धातोः 'सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्' ( ३।२।६१ ) इति क्विप् । दकारान्तो विशेष्यनिघ्नश्छागच्छेदिवाची छागच्छिद्-शब्दः ।'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । पुंसि – छागच्छिद् छागच्छिदौ छागच्छिदः । स्त्रियाम् – छागच्छिद् छागच्छिदौ छागच्छिदः । क्लीबे –छागच्छित् छागच्छिदी छागच्छिन्दि ।

**४.३.११८. सहस्रपाद्** –सहस्रं पादा अस्येति विग्रहे 'अनेकमन्यपदार्थे' ( २।२।२३ ) इति बहुव्रीहिसमासे 'संख्यासुपूर्वस्य' (५।४।१४० ) इत्यकारलोपः ।दकारान्तः पुंलिङ्गो विराट्वाची सहस्रपाद्-शब्दः ।'देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि' (

पा.लि. ४३ ) इति पुंलिङ्गत्वम्, तथैव 'पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुराः ।' ( अ.लि. ११ ) इति च पुंस्त्वम् । शसि – 'पादः पत्' ( ६।४।१३० ) इति पदादेशः ।सहस्रपात् (द्) सहस्रपादौ सहस्रपादः ।

**४.३.११९. यद्** – यच्छतीति विग्रहे 'यम उपरमे' (भ्वा.प.अ.१०४३) इति धातोः 'क्विप् च' ( पा.३।२।७६) इति क्विप्प्रत्यये 'गमादीनामिति वक्तव्यम्' (वा.६।४।४०) इति मलोपे 'ह्रस्वस्य पिति कृति तुक्' (पा.६।१।७०) इति तुक् । दकारान्तो विशेष्यनिघ्न उद्देश्यपरामर्शी यद्-शब्दः । 'सर्वादीनि सर्वनामानि' (पा.१।१।२७) इति सर्वनामसंज्ञायाम् 'तद्धितार्थो द्विगुः संख्यासर्वनामतदन्तकाः ।' ( अ.लि ४३ ) इति विशेष्यनिघ्नत्वम् ।पुंसि – 'त्यदादीनामः' ( पा.७।२।१०२) इत्यकारः, 'अतो गुणे' ( पा.६।१।९७ ) इति पररूपम्, यः यौ ये । स्त्रियाम् – या ये याः । क्लीबे – यत् ये यानि । सम्बोधनं नास्ति ।

**४.३.१२०. तद्** – तनोतीति विग्रहे 'तनु विस्तारे' (त.उ.से.१५५७) इति धातोः 'क्विप् च' ( पा.३।२।७६) इति क्विप्प्रत्यये 'गमादीनामिति वक्तव्यम्' (वा.६।४।४०) इति मलोपे 'ह्रस्वस्य पिति कृति तुक्' (पा.६।१।७०) इति तुक् । दकारान्तो विशेष्यनिघ्नो तद्-शब्दः ।'सर्वादीनि सर्वनामानि' (पा.१।१।२७) इति सर्वनामसंज्ञायाम् 'तद्धितार्थो द्विगुः संख्यासर्वनामतदन्तकाः ।' ( अ.लि. ४३ ) इति विशेष्यनिघ्नत्वम् । पुंसि – 'त्यदादीनामः' ( पा.७।२।१०२) इत्यकारः, 'अतो गुणे' ( पा.६।१।९७ ) इति पररूपम्, 'तदोः सः सावनन्त्ययोः' (७।२।१०६ ) इति सत्वम्, सः तौ ते । स्त्रियाम् – सा ते ताः । क्लीबे – तत् ते तानि । सम्बोधनं नास्ति ।

**४.३.१२१. एतद्** – एतीति विग्रहे 'इण् गतौ' (अ.प.अ.११२०) इति धातोः 'एतेस्तुट् च' ( उ.१।१३०) इत्यदिप्रत्ययस्तुडागमश्च । दकारान्तो विशेष्यनिघ्नः समीपतरपरामर्शी एतद्-शब्दः । 'सर्वादीनि सर्वनामानि' (पा.१।१।२७) इति सर्वनामसंज्ञायाम् 'तद्धितार्थो द्विगुः संख्यासर्वनामतदन्तकाः ।' ( अ.लि. ४३ ) इति विशेष्यनिघ्नत्वम् ।पुंसि – 'त्यदादीनामः' ( पा.७।२।१०२) इत्यकारः, 'अतो गुणे' ( पा.६।१।९७ ) इति पररूपम्, 'तदोः सः सावनन्त्योः' ( ७।२।१०६ ) इति सत्वम्, एषः एतौ एते । स्त्रियाम् – एषा एते एताः । क्लीबे – एतत् एते एतानि । सम्बोधनं नास्ति ।

**४.३.१२२. युष्मद्** – युषिति (उ.२१५३) सौत्रधातोः 'युष्यसिभ्यां मदिक्' (उ.१।१३६) इति मदिक्प्रत्ययः । दकारान्तः सर्वलिङ्गसमरूपस्तिङ्मध्यमपुरुषकर्तृवाची युष्मद्-शब्दः ।'सर्वादीनि सर्वनामानि' (पा.१।१।२७) इति सर्वनामसंज्ञायाम् 'अव्ययं कतियुष्मदस्मदः' ( पा.लि. १८४ ) इत्यविशिष्टं लिङ्गम् । तथैव 'तद्धितार्थो द्विगुः संख्यासर्वनामतदन्तकाः ।' ( अ.लि. ४३ ) इति

विशेष्यनिघ्नत्वम् च ।युष्मदस्मत्षट्संज्ञकास्त्रिषु सरूपाः ।'षट्संज्ञकास्त्रिषु समा युष्मदस्मत्तिङव्ययम् ।' ( अ.लि. ४६) इति सरूपत्वम् ।त्वम् युवाम् यूयम् ।सम्बोधनं नास्ति ।

**४.३.१२३. अस्मद्** – अस्यतीति विग्रहे 'असु क्षेपणे' (दि.प.से.१२८६) इति धातोः 'युष्यसिभ्यां मदिक्' (उ.१।१३६) इति मदिक्प्रत्ययः । दकारान्तः सर्वलिङ्गसमरूपस्तिङुत्तमपुरुषकर्तृवाची अस्मद्-शब्दः । 'सर्वादीनि सर्वनामानि' (पा.१।१।२७) इति सर्वनामसंज्ञायाम्'अव्ययं कतियुष्मदस्मदः' पा.लि. १८४ ) इत्यविशिष्टं लिङ्गम् । तथैव 'तद्धितार्थो द्विगुः संख्यासर्वनामतदन्तकाः ।' ( अ.लि. ४३ ) इति विशेष्यनिघ्नत्वम् च । युष्मदस्मत्षट्संज्ञकास्त्रिषु सरूपाः । 'षट्संज्ञकास्त्रिषु समा युष्मदस्मत्तिङव्ययम् ।' ( अ.लि. ४६) इति सरूपत्वम् । अहम् आवाम् वयम् । सम्बोधनं नास्ति ।

**४.३.१२४. समिध्** –समिध्यतेऽनयेति विग्रहे 'इन्धी दीप्तौ' (रु.आ.से.१५४२) इति धातोः 'संपदादिभ्यःक्विप्' ( वा.३।३।९४ ) इति क्विप् । 'इन्धनं त्वेध इध्ममेधः समित् स्त्रियाम्' ( अ.व.व.१३) इति स्त्रीत्वनिर्देशः । धकारान्तः स्त्रीलिङ्ग इध्मवाची समिध्-शब्दः ।समित् समिधौ समिधः ।

**४.३.१२५. बुध्** – बुध्यत इति विग्रहे 'बुध अवगमने' (दि.आ.अ.१२४८) इति धातोः 'क्विप् च' (पा.३।२।७६)इति कर्तरि क्विप्प्रत्ययः । धकारान्तो विशेष्यनिघ्नोबोद्धृवाची बुध्-शब्दः । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् ।'एकाचो बशो भष् झषन्तस्य स्ध्वोः' ( पा.८।२।३७ ) इति भष्भावः, भुत् बुधौ बुधः ।

**४.३.१२६ (क) ब्रह्मन्** – बृंहति वर्द्धयति प्रजा इति विग्रहे 'बृहि वृद्धौ शब्दे च' ( भ्वा.प.से.७८२) इति धातोरन्तर्भावितण्यर्थे 'बृंहेर्नोऽच्च' (उ.४।१४६) इति मनिन्प्रत्ययो नकारस्याकारादेशश्च ।नकारान्तः पुंलिङ्गो विधिवाची ब्रह्मन्-शब्दः ।'ब्रह्मन् पुंसि च' ( पा.लि १५० ) इति पुंस्त्वम् ।ब्रह्मा ब्रह्माणौ ब्रह्माणः ।

**४.३.१२६ (ख) ब्रह्मन्** – बृंहति शब्दं करोतीति विग्रहे 'बृहि वृद्धौ शब्दे च' (भ्वा.प.से.७८२) इति धातोः 'बृंहेर्नोऽच्च' (उ.४।१४६) इति मनिन्प्रत्ययो नकारस्याकारादेशश्च ।नकारान्तः क्लीबलिङ्गः परमात्मवाची ब्रह्मन्-शब्दः ।'ब्रह्मन् पुंसि च' ( पा.लि. १५० ) इति नपुंसकत्वम् । ब्रह्म ब्रह्मणी ब्रह्मणि । शसि –'न संयोगाद्वमन्तात्' ( ६।४।१३७ ) इत्यकारलोपनिषेधः, ब्रहमणः ।

**४.३.१२७. सीमन्** –सीयत इति विग्रहे 'षिञ् बन्धने' (स्वा.उ.अ.१३२८) इति धातोः 'नामन्सीमन्व्योमन्रोमन्लोमन्पाप्मन्धामन्' ( उ.४।१५० ) इति मनिन्प्रत्यये दीर्घश्चनिपातितः ।नकारान्तः स्त्रीलिङ्गः पाक्षिकडाबन्त अघाटवाची सीमन्-शब्दः । 'तृटिसीमासंबन्ध्याः' (पा.लि. ३१ )इति स्त्रीत्वम् । 'सीमसीमे स्त्रियामुभौ' ( अ.शै.व. २० ) इति च । सीमा सीमानौ सीमानः । 'डाबुभाभ्यामन्यतरस्याम्' ( पा.४।१।१३ ) इति पक्षे डाप्, सीमा सीमे सीमाः ।

**४.३.१२८. कर्मन्** –क्रियत इति विग्रहे 'डु कृञ् करणे' (त.उ.अ.१५६६) इति धातोः 'कृञो भावे कर्मणि च मनिन्' ( पा.४।१४५ ) इति मनिन्प्रत्ययः । नकारान्तः क्लीबलिङ्गः कार्यवाची कर्मन्-शब्दः । 'मन्द्व्यच्को्ऽकर्तरि' ( पा.लि. १४९ )इति नपुंसकत्वम् ।'कर्म क्रिया' ( अ.संकी.व.: १ ) इति नपुंसकनिर्देशः । कर्म कर्मणी कर्माणि ।

**४.३.१२९-(क).** राजन् –राजतीति विग्रहे 'राजृ दीप्तौ' (भ्वा.उ.से.८८०) इति धातोः 'कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः' (उ.१।१५६) इति कनिन्प्रत्ययः । नकारान्तः पुंलिङ्गो नृपवाची राजन्-शब्दः । 'नान्तः' ( पा.लि. ४८ ) इति पुंसि । तथैव 'श्रीवेष्टाद्याश्च निर्यासा, असन्नन्ता अबाधिताः । ( अ.लि. १२ ) इति पुंस्त्वम् । राजा राजानौ राजानः । शसि– 'अल्लोपो्ऽन' ( पा.६।४।१३४ ) अकारलोपः, 'स्तोः श्चुना श्चुः' ( पा.८।४।४० ) इति श्चुत्वम्, जञोर्ज्ञः, राज्ञः ।

**४.३.१२९-(ख).** पूषन् – पूषतीति विग्रहे 'पूष वृद्धौ' (भ्वा.प.से.७२१) इति धातोः श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्धन्मज्जन्नर्यमन्विश्वप्सन्परिज्मन्मातरिश्वन्मघवन्निति' ( उ.१।१५७) इति कनिप्रत्ययः ।'नकारान्तः पुंलिङ्गः सूर्यवाची पूषन्-शब्दः ।'नान्तः' ( पा.लि. ४८ ) इति पुंसि ।'पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुराः ।' ( अ.लि. ११ ) इति पुंलिङ्गत्वम् ।तथैव 'श्रीवेष्टाद्याश्च निर्यासा, असन्नन्ता अबाधिताः । ( अ.लि. १२ ) इति पुंस्त्वम् ।पूषा पूषणौ पूषणः । शसि– 'अल्लोपो्ऽनः' ( पा.६।४।१३४ ) अकारलोपः, पूष्णः ।

**४.३.१३०. वृत्रहन्** – वृत्रं हतवानिति विग्रहे 'हन हिंसागत्योः' (अ.प.अ.१८२) इति धातोः 'ब्रह्मभ्रूणवृत्रेषु क्विप्' (पा.३।२।८७) इति क्विप्प्रत्ययः । नकारान्तः पुंलिङ्ग इन्द्रवाची वृत्रहन्-शब्दः ।'नान्तः' ( पा.लि ४८ ) इति पुंसि । 'पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुराः ।' ( अ.लि.: ११ ) इति पुंलिङ्गत्वम् ।तथैव 'श्रीवेष्टाद्याश्च निर्यासा, असन्नन्ता अबाधिताः ।' ( अ.लि. १२ ) इति च पुंस्त्वम् ।वृत्रहा 'एकाजुत्तरपदे णः' ( ८।४।१२ ) इति णत्वम्, वृत्रहणौ

वृत्रहणः । शसि– 'अल्लोपोऽन' ( पा.६।४।१३४ ) इत्यकारलोपः, 'हो हन्तेर्ञ्णिन्नेषु' ( ७।३।५४ ) कुत्वम्, वृत्रघ्नः ।

**४.३.१३१. मघवन्** – मह्यते पूज्यत इति विग्रहे 'मह पूजायाम्' (भ्वा.प.से.७७६) इति धातोः श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्धन्मज्जन्नर्यमन्विश्वप्सन्परिज्मन्मातरिश्वन्मघवन्निति' ( उ.१।१५७) इति कनिप्रत्ययोहस्य घो वुगागमश्च निपातितः । नकारान्तः पुंलिङ्ग इन्द्रवाची मघवन्-शब्दः । 'नान्तः' ( पा.लि. ४८ ) इति पुंसि । 'पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुराः ।' ( अ.लि. ११ ) 'इति पुंलिङ्गत्वम् ।तथैव 'श्रीवेष्टाद्याश्च निर्यासा, असन्नन्ता अबाधिताः । ( अ.लि. १२ ) इति च पुंस्त्वम् । मघवा मघवानौ मघवानः ।शसि – 'श्वयुवमघोनामतद्धिते' (पा. ६।४।१३३ ) इति संप्रसारणम्, मघोनः ।पक्षे – 'मघवा बहुलम्' ( ६।४।१२८ ) इति विकल्पेन तृ इत्यन्तादेशः । 'उगिदचां सर्वनामस्थानेऽधातोः' ( पा.७।१।७० ) इति नुम्, मघवान् मघवन्तौ मघवन्तः ।

**४.३.१३२. श्वन्** – श्वयतीति विग्रहे 'टु ओ श्वि गतिवृद्ध्योः' (भ्वा.प.से.१०७९) इति धातोः श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्धन्मज्जन्नर्यमन्विश्वप्सन्परिज्मन्मातरिश्वन्मघवन्निति' ( उ.१।१५७) इति कनिप्रत्यय इकारलोपश्च ।नकारान्तः पुंलिङ्गः कुक्कुरवाची श्वन्-शब्दः । 'नान्तः' ( पा.लि. ४८ ) इति पुंसि । तथैव 'श्रीवेष्टाद्याश्च निर्यासा, असन्नन्ता अबाधिताः । ( अ.लि. १२ ) इति पुंस्त्वम् । श्वा श्वानौ श्वानः । शसि –'श्वयुवमघोनामतद्धिते' (पा. ६।४।१३३ ) इति संप्रसारणम्, शुनः ।

**४.३.१३३. युवन्** – यौतीति विग्रहे 'यु मिश्रणेऽमिश्रणे च ' (अ.प.से.११०७) इति धातोः 'कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः' (उ.१।१५६) इति कनिन्प्रत्ययः ।नकारान्तः पुंलिङ्गस्तरुणवाची युवन्-शब्दः । 'नान्तः' ( पा.लि. ४८ ) इति पुंसि । तथैव 'श्रीवेष्टाद्याश्च निर्यासा, असन्नन्ता अबाधिताः । - अ.लि. १२ ) इति पुंस्त्वम् युवा युवानौ युवानः । शसि – 'श्वयुवमघोनामतद्धिते' (पा. ६।४।१३३ ) इति संप्रसारणम्, यूनः ।

**४.३.१३४. अर्वन्** – अर्वतीति विग्रहे 'अर्व गतौ' (भ्वा.प.से.४४३) इति धातोः बाहुलकात् कनिन् ।[३९५]नकारान्तः पुंलिङ्ग अश्ववाची अर्वन्-शब्दः ।'नान्तः' ( पा.लि. ४८ ) इति पुंसि । तथैव 'श्रीवेष्टाद्याश्च निर्यासा, असन्नन्ता अबाधिताः । ( अ.लि. १२ ) इति पुंस्त्वम् ।अर्वा । 'अर्वणस्त्रसावनञः' ( पा.६।४।१२७ ) इति तृ इत्यन्तादेशः, अर्वन्तौ अर्वन्तः । शसि – अर्वतः ।

---

[३९५] दीक्षितः भानुजि, अमरकोश : (सुधा/रामाश्रमी व्याख्या), वाराणसी : चौखम्बा सुरभारती प्रकाशन, सन् २०११ ।

**४.३.१३५. ऋभुक्षिन्** – ऋभवो देवाः क्षियन्त्यत्रेति विग्रहे 'क्षि निवासगत्योः' (तु.प.अ.१५०१) इति धातोः 'अन्येष्वपि दृश्यते' (पा.३।२।१०१) इति डप्रत्यये ऋभुक्ष इति । ऋभुक्षो वज्रेन्द्रौ स्वर्गश्च । ऋभुक्षोऽस्त्यस्येति विग्रहे 'अत इनिठनौ (पा.५।२।११५) इतीनिप्रत्ययः । नकारान्तः पुंलिङ्ग इन्द्रवाची ऋभुक्षिन्-शब्दः ।

'देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि' ( पा.लि. ४३ ) इति पुंलिङ्गत्वम्, 'पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुराः ।' ( अ.लि. ११ ) इति च पुंस्त्वम् । 'पथिमथ्यृभुक्षामात्' ( पा.७।१।८५ ) इत्यात्वं सौ परे । 'इतोऽत्सर्वनामस्थाने' ( पा.७।१।८६ )इतीकारस्याकारः सर्वनामस्थाने परे, ऋभुक्षाः ऋभुक्षाणौ ऋभुक्षाणः । शसि – 'भस्य टेर्लोपः' ( ७।१।८८ ) इति टेर्लोपः, ऋभुक्षः ।

**४.३.१३६. पथिन्** – पथ्यन्तेऽनेनेति विग्रहे 'पथे गतौ' (भ्वा.प.से.९०५) इति धातोः 'पथिमथिभ्यामिनिः' (ग्रन्थे नास्ति) इतीनिप्रत्ययः (भानुजी) नकारान्तः पुंलिङ्गो मार्गवाची पथिन्-शब्दः । 'नान्तः' ( पा.लि. ४८ ) इति पुंसि । 'अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिः' ( अ.लि. १५ ) इति च पुंलिङ्गनिर्देशः । 'पथिमथ्यृभुक्षामात्' ( पा.७।१।८५ ) इत्यात्वं सौ परे ।'इतोऽत्सर्वनामस्थाने' ( पा.७।१।८६ ) इतीकारस्याकारः सर्वनामस्थाने परे, 'थो न्थः' ( ७।१।८७ ) इति न्थादेशः सर्वनामस्थाने परे, पन्थाः पन्थानौ पन्थानः । शसि – 'भस्य टेर्लोपः' ( ७।१।८८ ) इति टेर्लोपः, पथः ।

**४.३.१३७. सामन्** – स्यति पापमिति विग्रहे 'षोऽन्तकर्मणि' (दि.प.अ.१२२२) इति धातोः 'आदेच उपदेशेऽशिति' ( ६।१।४५ ) इत्यात्वे'सातिभ्यां मनिन्मनिणौ' ( उ.४।१५३ ) इति मनिन्प्रत्ययः । नकारान्तः क्लीबलिङ्गो वेदविभेदवाची सामन्-शब्दः । 'मन्द्व्यच्कोऽकर्तरि' ( पा.लि. १४९) इति नपुंसकत्वम् । ''स्त्रियामृक् सामयजुषी' ( अ.लि. ३ ) इति नपुंसकलिङ्गनिर्देशः । साम सामनी सामानि ।

**४.३.१३८. अहन्** – न जहातीति विग्रहे 'ओ हाक् त्यागे' (जु.प.अ.११६५) इति धातोः 'नञि जहातेः' ( उ.१।१५८ ) इति कनिन्प्रत्ययः ।नकारान्तः क्लीबलिङ्गो दिनवाची अहन्-शब्दः ।'घस्रो दिनाहनी वा तु क्लीबे दिवसवासरौ' ( अ.का.व. २ ) इति नपुंसलिङ्गनिर्देशः । 'रोऽसुपि' ( ८।२।६९ ) इति रेफादेशः, अहः । 'विभाषा ङिश्योः' ( ६।४।१३६ ) विकल्पेनाकारलोपः, अह्नी-अहनी अहानि ।

**४.३.१३९. दामन्** – द्यतीति विग्रहे 'दो अवखण्डने' (दि.प.अ.१२२३) इति धातोः'आदेच उपदेशेऽशिति' ( पा.६।१।४५ ) इत्यात्वे 'सर्वधातुभ्यो मनिन्' ( उ.४।१३३ ) इति

मनिन्प्रत्ययः। नकारान्तः स्त्रीक्लीबलिङ्गो बन्धनवाची दामन्-शब्दः। 'मन्द्व्यच्कोऽकर्तरि' ( पा.लि. १४९) इति नपुंसकत्वम्। 'न पुंसि दाम संदानम्' ( अ.लि.७३ ) इति स्त्रीक्लीबलिङ्गत्वम्। स्त्रियाम् – दामा दामानौ दामानः।'डाबुभाभ्यामन्यतरस्याम्' ( पा.४।१।१३ ) इति पक्षे डाप्, दामा दामे दामाः। क्लीबे – दाम दामनी दामानि।

**४.३.१४०. पञ्चन्** – 'पचि व्यक्तीकरणे' (भ्वा.आ.से.१८२) कनिन्। [३९६]नकारान्तः त्रिलिङ्गः बहुवचनान्तः संख्यार्थः पञ्चन्-शब्दः। 'ष्णान्ता षट्' ( १।१।२४ ) इति षट्संज्ञा, 'षड्भ्यो लुक्' इति जश्शसोर्लुक्, 'ष्णान्ता संख्या' ( पा.लि. १८५ ) इत्यविशिष्टं लिङ्गम्। तथैव 'तद्धितार्थो द्विगुः संख्यासर्वनामतदन्तकाः।' ( अ.लि. ४३ ) इति विशेष्यनिघ्नत्वम् च। 'षट्संज्ञकास्त्रिषु समा युष्मदस्मत्तिङव्ययम्।' ( पूर्ववत् ) इति सरूपत्वम्। पञ्च।'नोपधायाः' ( ६।४।७ ) इति नामि दीर्घः, पञ्चानाम्।

**४.३.१४१. अष्टन्** – अश्नुत इति विग्रहे 'अशू व्याप्तौ संघाते च' (स्वा.आ.से.१३४६) इति धातोः 'सप्यशूभ्यां तुट् च' (१।१५५) इति कनिन्प्रत्यये तुडागमश्च। नकारान्तः त्रिलिङ्गो बहुवचनान्तः संख्यार्थ अष्टन्-शब्दः। 'ष्णान्ता षट्' ( १।१।२४ ) इति षट्संज्ञा, 'षड्भ्यो लुक्' इति जश्शसोर्लुक्। 'ष्णान्ता संख्या' ( पा.लि. १८५ ) इत्यविशिष्टं लिङ्गम्। तथैव 'तद्धितार्थो द्विगुः संख्यासर्वनामतदन्तकाः।' ( अ.लि. ४३ ) इति विशेष्यनिघ्नत्वम् च। 'षट्संज्ञकास्त्रिषु समा युष्मदस्मत्तिङव्ययम्।' ( अ.लि. ४६) इति सरूपत्वम्।'अष्टाभ्य औश्' ( ७।१।२१ ) इत्यौश् अष्टौ/अष्ट।

**४.३.१४२. सुकर्मन्** – शोभनं कर्म यस्य यस्या वेति विग्रहे 'अनेकमन्यपदार्थे' (पा.२।२।२४) इति बहुव्रीहिसमासः। नकारान्तो विशेष्यनिघ्नः सुकृतिमद्वाची सुकर्मन्-शब्दः। 'बहुव्रीहिरदिङ्नाम्नामुन्नेयं तदुदाहृतम्।' ( अ.लि. ४४ ) इति विशेष्यनिघ्नलिङ्गत्वम्। सुकर्मा सुकर्माणौ सुकर्माणः। शसि –'न संयोगाद्वमन्तात्' ( ६।४।१३७ ) इत्यकारलोपनिषेधः, सुकर्मणः। स्त्रियाम् – पुंवत्। क्लीबे – सुकर्म सुकर्मणी सुकर्माणि।

**४.३.१४३. दीर्घलोमन्** – दीर्घानि लोमानि यस्य यस्या वेति विग्रहे 'अनेकमन्यपदार्थे' ( पा.२।२।२४) इति बहुव्रीहिसमासः। नकारान्तो विशेष्यनिघ्नो दीर्घकेशवाची दीर्घलोमन्-शब्दः। 'बहुव्रीहिरदिङ्नाम्नामुन्नेयं तदुदाहृतम्।' ( अ.लि. ४४ ) इति विशेष्यनिघ्नलिङ्गत्वम्। पुंसि – दीर्घलोमा दीर्घलोमानौ दीर्घलोमानः। शसि– 'अल्लोपोऽनः' ( पा.६।४।१३४ )

---

[३९६] आप्टे वामनः शिवरामः, संस्कृत हिन्दी कोश, वाराणसी : भारतीय विद्याप्रकाशन, ई.२००१।

इत्यकारलोपः, दीर्घलोम्नः । स्त्रियाम् – 'ऋन्नेभ्यो ङीप्' ( पा.४।१।५ ) इति ङीप्, दीर्घलोम्नी दीर्घलोम्न्यौ दीर्घलोम्न्यः । क्लीबे – दीर्घलोम दीर्घलोमनी दीर्घलोमानि ।

**४.३.१४४. वनमालिन्** – वनमालास्यास्तीति विग्रहे 'शिखामालासंज्ञादिभ्य इनिः' इति वार्तिकसहकारेण 'व्रीह्यादिभ्यश्च' (५।२।११६) इतीनिप्रत्ययः । इनन्तः पुंलिङ्गो विष्णुवाची वनमालिन्-शब्दः । 'देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि' ( पा.लि. ४३ ) इति पुंलिङ्गत्वम् । 'पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुराः ।' ( अ.लि. ११ ) इति च पुंस्त्वम् । 'सौ च' (६।४।१३ ) इति दीर्घः, वनमाली वनमालिनौ वनमालिनः ।

**४.३.१४५. दण्डिन्** – दण्डमस्यास्या वेति विग्रहे 'अत इनिठनौ' (पा.५।२।११५) इतीनिप्रत्ययः । इनन्तो विशेष्यनिघ्नो दण्डधर्तृवाची दण्डिन्-शब्दः ।'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् ।पुंसि – 'सौ च' (६।४।१३ ) इति दीर्घः, दण्डी दण्डिनौ दण्डिनः ।स्त्रियाम् – 'ऋन्नेभ्यो ङीप्' ( पा.४।१।५ ) इति ङीप्, दण्डिनी दण्डिन्यौ दण्डिन्यः । क्लीबे – दण्डि दण्डिनी दण्डीनि ।

**४.३.१४६. गुप्** – गोपायतीति विग्रहे 'गुपू रक्षणे' (भ्वा.प.से.४२२) इति धातोः 'क्विप् च' ( ३।२।७६) इति क्विप्प्रत्ययः । पकारान्तो विशेष्यनिघ्नो रक्षकवाची गुप्-शब्दः ।'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशष्यनिघ्नलिङ्गत्वम् । पुंसि – गुप् गुपौ गुपः । स्त्रियाम् – पुंवत् । क्लीबे – गुप् गुपी गुम्पि ।

**४.३.१४७. अप्** – आप्नुवन्ति/आप्यन्ते वेति विग्रहे 'आप्लृ व्याप्तौ' (स्वा.प.अ.१९८१) इति धातोः 'आप्नोतेर्ह्रस्वश्च' (उ.२।५८) इति क्विप्प्रत्ययो ह्रस्वश्च । पकारान्तः स्त्रीलिङ्गो बहुवचनान्तो जलवाची अप्-शब्दः । 'अप्सुमनस्समासिकतावर्षाणां बहुत्वं च' ( पा.लि. २९ ) इति स्त्रीत्वं बहुत्वं च । 'अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम्' (पा.६।४,११ ) इत्युपधाया दीर्घः, आपः शसि– अपः । 'अपो भि' ( पा.७४।४८ ) इति पस्य तकारः, जश्त्वम् , अद्भिः ।

**४.३.१४८. ककुभ्** – ककत इति विग्रहे 'कक लौल्ये' (भ्वा.आ.से.९३) इति धातोः बाहुलकादुभ्प्रत्ययः (भानुजी) ।'काष्ठा दिगर्थाः स्त्रियाम्' ( पा.लि. ७२ ) इति स्त्रीत्वम् । भकारान्तः स्त्रीलिङ्गो दिग्वाची ककुभ्-शब्दः । 'दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः' ( अ.दि.व. १ ) इति स्त्रीलिङ्गनिर्देशः ।ककुप् ( ककुब् ) ककुभौ ककुभः ।

**४.३.१४९. प्रशाम्** – प्रशाम्यतीति विग्रहे 'शमु उपशमे' (दि.प.से.१२७८) इति धातोः 'क्विप् च' (पा.३।२।७२) इति क्विप्प्रत्यये 'अनुनासिकस्य क्विझलोः क्ङिति' (पा.६।४।१५) इति दीर्घः । मकारान्तो विशेष्यनिघ्नः शान्तिमद्वाची प्रशाम्-शब्दः ।'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि.४४-४५ ) इति विशष्यनिघ्नलिङ्गत्वम् ।पुंसि स्त्रियां च – 'मो नो धातोः' ( पा.८।२।६४ ) इति मस्य नः पदान्ते, प्रशान् प्रशामौ प्रशामः । क्लीबे – प्रशान् प्रशामी प्रशामि ।

**४.३.१५०. किम्** – कायतीति विग्रहे 'कै शब्दे' (भ्वा.प.से.९८२) इति धातोः 'कायतेर्डिमिः' ( ४।१४७) इति डिमिप्रत्यये टिलोपः । मकारान्तो विशेष्यनिघ्नः प्रश्नार्थः किम्-शब्दः ।'सर्वादीनि सर्वनामानि' (पा.१।१।२७) इति सर्वनामसंज्ञायाम् 'तद्धितार्थो द्विगुः संख्यासर्वनामतदन्तकाः ।' ( अ.लि. ४३ ) इति विशेष्यनिघ्नत्वम् ।पुंसि – 'किमः कः' ( पा.७।२।१०३) इति कादेशः, कः कौ के । स्त्रियाम् – का के काः । क्लीबे – किम् के कानि ।

**४.३.१५१. इदम्** – इन्दतीति विग्रहे 'इदि परमैश्वर्ये' (भ्वा.प.से.६४) इति धातोः 'इन्देः कमिर्नलोपश्च' (उ.४।१५७) इति कमिप्रत्यये नलोश्च । मकारान्तो विशेष्यनिघ्नः पुरःस्थपरामर्शी इदम्-शब्दः ।'सर्वादीनि सर्वनामानि' (पा.१।१।२७) इति सर्वनामसंज्ञायाम् 'तद्धितार्थो द्विगुः संख्यासर्वनामतदन्तकाः ।' ( अ.लि. ४३ ) इति विशेष्यनिघ्नत्वम् ।पुंसि – 'इदोऽय् पुंसि' ( पा.७।२।१११ ) इत्यय् सौ । अयम्, त्यदाद्यत्वे पररूपे 'दश्च' ( पा.७।२।१०९ ) इतीदमो दस्य मः, इमौ इमे । स्त्रियाम् – 'यः सौ' ( पा.७।२।११० ) इति दस्य यः, इयम्इमे इमाः । क्लीबे – इदम् इमे इमानि ।

**४.३.१५२. चतुर्** – चततीति विग्रहे 'चते याचने परिभाषणे च' (भ्वा.उ.से.९२५) इति धातोः 'चतेरुरन्' (उ(५।६१) इत्युरन्प्रत्ययः । रेफान्तो विशेष्यनिघ्नो बहुवचनान्तः संख्यार्थश्चतुर्-शब्दः ।'तद्धितार्थो द्विगुः संख्यासर्वनामतदन्तकाः ।' ( अ.लि. ४३ ) इति विशेष्यनिघ्नत्वम् ।पुंसि – 'चतुरनडुहोरामुदात्तः' ( पा.७।१।९८ ) इत्याम्, चत्वारः शसि – चतुरः । आमि – 'षट्चतुर्भ्यश्च' - पा.७।१।५५ ) इति नुट्, चतुर्णाम् ।स्त्रियाम् – – 'त्रिचतुरोः स्त्रियां तिसृचतसृ' ( पा.७।२।९९ ) इति तिस्रादेशः, 'अचि र ऋतः' ( पा.७।२।१०० ) इति रेफादेशः, चतस्रः । क्लीबे – चत्वारि ।

**४.३.१५३. गिर्** – गृणन्त्येतामिति विग्रहे 'गॄशब्दे' (क्र्या.प.से.१५९८) इति धातोः 'संपदादिभ्यः क्विप्' ( वा.३।३।९४ ) इति क्विप् । रेफान्तः स्त्रीलिङ्गो वाग्वाची गिर्-शब्दः । 'आशीर्धूःपूर्गीर्द्वारः' ( पा.लि. २८ ) इति स्त्रीत्वम् ।'ब्राह्मी तु भारती भाषा गीर्वाग्वाणी

सरस्वती ।' ( अ.धीव. १ ) 'गीःस्त्री भाषासरस्वत्योः' ( भानुजिः ) । 'र्वोरुपधाया दीर्घ इकः' ( ८।२।७६ ) इति दीर्घः । गीः गिरौ गिरः ।

**४.३.१५४. वार्** – वारयतीति विग्रहे 'वृञ् आवरणे' (चु.उ.से.१९५२) इति ण्यन्तधातोः 'अन्येभ्योऽपि दृश्यते' ( ३।२।७८ ) इति क्विप् । रेफान्तः क्लीबलिङ्गो जलवाची वार्-शब्दः । 'मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहलधनान्नाभिधानानि' ( पा.लि. १३७ ) इति नपुंसकत्वम् । 'आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम् ।' ( अमरः वारिवर्गः ३ ) इति च क्लीबत्वमुक्तम् । वाः वारी वारि ।

**४.३.१५५. दिव्** – दीव्यन्त्यस्यामिति विग्रहे 'दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोद-मदस्वप्नकान्तिगतिषु' (दि.प.से.१८८२) इति धातोः 'उणादयो बहुलम्' (३।३।१) इति बाहुलकाड्डिविप्रत्ययः (तारानाथः वाचस्पत्यम् । वकान्तः स्त्रीलिङ्गो व्योमवाची दिव्-शब्दः । 'द्यौः स्त्रियाम्' ( पा.ल. ४५ ) इति स्त्रीत्वम्, 'द्योदिवौ द्वे स्त्रियाम्' ( अमरः) इति पुँस्त्वं च । 'दिव औत्' ( पा.७।१।८४ ) इत्यौत् सौ,द्यौः दिवौ दिवः ।

**४.३.१५६. विश्** –विशतीति विग्रहे 'विश प्रवेशने' (तु.प.अ.१२१८) इति धातोः 'अन्येभ्योऽपि दृश्यते' (पा.३।२।१७८ ) इति क्विप् । शकारान्तः पुंलिङ्गो वैश्यवाची विश्-शब्दः ।'ऊरुव्या ऊरुजा अर्या वैश्याः भूमिस्पृशो विशः' ( अ.वै.व. १ ) इति पुंलिङ्गनिर्देशः । 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' ( ८।२।३६ ) इति शस्य षः,जश्त्वचर्त्वे विट् ( विड् ) विशौ विशः ।

**४.३.१५७. नश्** – नश्यतीति विग्रहे 'णश अदर्शने' (दि.प.से.१२७१) इति धातोः 'अन्येभ्योऽपि दृश्यते' ( ३।२।१७८ ) इति क्विप् । शकारान्तो विशेष्यनिघ्नो नाशवद्वाची नश्-शब्दः । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । पुंसि –'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' - पा.८।२।३६ ) इति शस्य षः,जश्त्वचर्त्वे 'नशेर्वा' ( पा.८।२।६३ ) इति विकल्पेन कवर्गान्तादेशः, नक्-नग्, नट्-नड्, नशौ नशः । स्त्रियाम् पुंवत् । क्लीबे – नक्-नग्, नट्-नड्, नशी नंशि ।

**४.३.१५८. दृश्** –पश्यतीति विग्रहे 'दृशिर् प्रेक्षणे' (भ्वा.प.अ.१०५७) इति धातोः 'अन्येभ्योऽपि दृश्यते' ( ३।२।१७८ )इति क्विप् ।शकारान्तः स्त्रीलिङ्गो लोचनवाची दृश्-शब्दः ।'दृग् ज्ञाने ज्ञातरि त्रिषु' ( अ.ना.व. २१७ )। 'दृक् स्त्रियां दर्शने नेत्रे बुद्धौ च त्रिषु वीक्षके ।' इति

स्त्रस्त्वम् । [३९७] 'त्यदादिषु दृशोऽनालोचने कञ्च' ( पा.३।२।६० ) इति क्विन्विधानादन्यत्रापि कुत्वम्, दृक् ( दृग् ) दृशौ दृशौ ।

**४.३.१५९.तादृश्** – स इवायं पश्यतीति विग्रहे 'दृशिर् प्रेक्षणे' (भ्वा.प.अ.१०५७) इति धातोः 'त्यदादिषु दृशोऽनालोचने कञ्च' (पा.३।२।६०) इतिकर्मकर्तरिक्विन्प्रत्यये 'आ सर्वनाम्नः' ( पा.६।३।९१) इत्यात्वम् । शकारान्तो विशेष्यनिघ्नस्तत्तुल्यदर्शनविषयवाची तादृश्-शब्दः । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । पुंसि – 'व्रश्चभ्रस्जसृजमृज-यजराजभ्राजच्छशां षः' ( पा.८।२।३६ ) इति शस्य षः,जश्त्वचर्त्वे 'क्विन्प्रत्ययस्य कुः' ( पा.८।२।६२ ) इति कुत्वम्, तादृक् ( तादृग् ) तादृशौ तादृशः । स्त्रियाम् – पुंवत् । क्लीबे – तादृक् ( तादृग् ) तादृशी तादृंशि ।

**४.३.१६०. दोस्** –दाम्यत्यनेनेति विग्रहे 'दमु उपशमे' (दि.प.से.१२८०) इति धातोः 'दमेर्डोस्' ( उ.२।६९ ) इति डोस्प्रत्ययः । सान्तः पुंक्लीबलिङ्गः बाहुवाची दोस्-शब्दः । 'देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि' ( पा.लि. ४३ ) इति पुंलिङ्गत्वम् । 'करगण्डोष्ठदोर्दन्तकण्ठकेशनखस्तनाः ।' ( अ.लि. १२) इति पुंस्त्वम् । 'भुजबाहू प्रवेष्टो दोः स्यात्' ( अ.म.व.७९) इति पुंनपुंसकत्वम् । पुंसि – दोः दोषौ दोषः । क्लीबे – दोः दोषी दोंषि । शसादौ – 'पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्ना-सञ्छस्प्रभृतिषु' ( पा.६।१।६३ ) इति दोषनादेशः, 'अल्लोपोऽन' ( पा.६।४।१३४ ) अकारलोपः, णत्वम्, दोष्णः ।

**४.३.१६१. द्विष्** – द्वेष्टीति विग्रहे 'द्विष अप्रीतौ' (अ.उ.अ.१०८३) इति धातोः 'सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्' ( ३।२।६१ ) इति क्विप् । षान्तो विशेष्यनिघ्नोद्वेष्टृवाची द्विष्-शब्दः । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् ।पुंसि – जश्त्वचर्त्वे द्विट् द्विषौ द्विषः । स्त्रियाम् – पुंवत् । क्लीबे – द्विट् द्विषी द्वींषि ।

**४.३.१६२. आशिष्** – आशास्त इति विग्रहे 'आङ् शासु इच्छायाम्' (अ.आ.से.१०९२) इति धातोः 'क्विप् च' (पा.३।२।७६)इति क्विप्प्रत्यये 'आशासः क्वौ उपधाया इत्त्वं वाच्यम्' ( वा.८।३।६०) इतीत्वे 'शासिवसिघसीनां च' (पा.८।३।६०) इति षत्वम् ।षान्तः

[३९७] मेदिनीकरः, मेदिनीकोशः, वाराणसी : चौखम्बा संस्कृत सिरिज अफिस, वि.सं.२०२४ ।

स्त्रीलिङ्गआशंसावाची आशिष्-शब्दः। 'आशीर्धूःपूर्गीर्द्वारः' ( पा.लि. २८ ) इति स्त्रीत्वम्, 'र्वोरुपधाया दीर्घ इकः' (पा.८।२।७६ ) इति दीर्घः। आशीः आशिषौ आशिषः।

**४.३.१६३. षष्** – स्यतीति विग्रहे 'षो अन्तकर्मणि' (दि.प.अ.१२२२) इति धातोः 'क्विप् च' ( पा.३।२।७६)इति क्विप्प्रत्यये 'पृषोदरादीनि यथोपदिष्टम्' (पा.६।३।१०९) इतिषुगागमषत्वौ। षान्तः षट्त्ववद्वाची (द्विगुणितेषु त्रिषु) बहुवचनान्तः षष्-शब्दः। 'ष्णान्ता षट्' ( पा.१।१।२४ ) इति षट्संज्ञा, 'षड्भ्यो लुक्' इति जश्शसोर्लुक्। 'ष्णान्ता संख्या' ( पा.लि. १८५ ) इत्यविशिष्टं लिङ्गम्। तथैव 'तद्धितार्थो द्विगुः संख्यासर्वनामतदन्तकाः।' ( अ.लि. ४३ ) इति विशेष्यनिघ्नत्वम् च। 'षट्संज्ञकास्त्रिषु समा युष्मदस्मत्तिङव्ययम्।' ( अ.लि. ४६) इति सरूपत्वम्।जश्त्वचर्त्वे, षट्। आमि – 'षट्चतुर्भ्यश्च' ( पा.७।१।५५ ) इति नुट्, षण्णाम्।

**४.३.१६४ (क) वेधस्** – विदधातीति विग्रहे 'डु धाञ् धारणपोषणयोः' (जु.उ.अ.११६७) इति धातोः 'विधाञो वेध च' (उ.४।२२५) इति वेधादेशोऽसिप्रत्ययश्च।सान्तः पुंलिङ्गो विधिवाची वेधस्-शब्दः। 'श्रीवेष्टाद्याश्च निर्यासा, असन्नन्ता अबाधिताः। ( अ.लि. १२ ) इति च पुंस्त्वम्। 'अत्वसन्तस्य चाधातोः' ( पा.६।४।१४ ) इति दीर्घः, वेधाः वेधसौ वेधसः।

**४.३.१६४ (ख) अनेहस्** – नाहन्ति = नागच्छतीति विग्रहे आङ्पूर्वात् 'हन हिंसागत्योः' ( अ.प.अ.१०८२) इति धातोः 'नञ्याहन एह च' ( उ.४।२२४ ) इत्यसुन्, एहादेशश्च।ततो नञ्समासः। सान्तः पुंलिङ्गः कालवाची अनेहस्-शब्दः।'स्वर्गयागाद्रिमेघाब्धिद्रुकालासिशरादयः। ( अ.लि. ११ ) इति पुंलिङ्गत्वम्। 'कालो दिष्टोऽप्यनेहापि समयोऽपि' ( अ.का.व. १ ) इति च पुंस्त्वनिर्देशः। 'ऋदुशनस्पुरुदंसोऽनेहसां च' ( पा.७।१।९४ ) इत्यनङ्, अनेहा अनेहसौ अनेहसः।

**४.३.१६५. उशनस्** – वष्टीति विग्रहे 'वश कान्तौ' (अ.प.से.११५६) इति धातोः 'वशेः कनसिः' (उ.४।२३९) कनसिप्रत्यये 'ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च' (६।१।१६) इति संप्रसारणम्। सान्तः पुंलिङ्गो भार्गववाची उशनस्-शब्दः।'पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुराः।' ( अ.लि. ११ ) इति च पुंस्त्वम्। 'ऋदुशनस्पुरुदंसोऽनेहसां च' ( पा.७।१।९४ ) इत्यनङ्, उशना उशनसौ उशनसः। 'अस्य सम्बुद्धौ वाऽनङ् नलोपश्च वा वाच्यः' (वा.७।१।८९) इति वाऽनङ् नलोपश्च वा, हे उशनन् – हे उशन – हे उशनः।

**४.३.१६६. पुंस्** –पातीति विग्रहे 'पा रक्षणे' (अ.प.अ.११३२) इति धातोः 'पातेर्डुंसुन्' ( उ.४।१७८) इति डुंसुन्प्रत्ययः।सान्तः पुंलिङ्गः पुंवाची पुंस्-शब्दः। 'क्रतुपुरुषकपोलगुल्फमेघाभिधानानि' ( पा.लि. ४९) इति पुंस्त्वम्। 'पुंसोऽसुङ्' ( पा.७।१।८९ ) इत्यसुङ्, 'सान्तमहतः संयोगस्य' ( पा.६।४।१४ ) इति दीर्घः। पुमान् पुमांसौ पुमांसः।

**४.३.१६७. अर्चिस्** – अर्च्यत इति विग्रहे 'अर्च पूजायाम्' (भ्वा.प.से.२१२) इति धातोः 'अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः' (उ.२।१०८)इतीसिप्रत्ययः। सान्तः स्त्रीक्लीबलिङ्गो ज्वालावाची अर्चिस्-शब्दः।'अर्चिः स्त्रियां च' ( पा.लि. १३५ ) इति स्त्रीक्लीबलिङ्गत्वम्।'ज्वालाभासोर्न पुंस्यर्चिः' ( ना.व.२३०) स्त्रीक्लीबत्वम्।स्त्रियाम् – अर्चिः अर्चिषौ अर्चिषः। क्लीबे – अर्चिः अर्चिषी अर्चींषि।

**४.३.१६८.(क). धनुस्** – दधन्तीति विग्रहे 'धन धान्ये' (जु.प.से.११७९) इति धातोः 'अर्तिपृवपियजितनिधनितपिभ्यो नित्' (.४।११७) इत्युसिप्रत्ययः।सान्तः पुंक्लीबलिङ्गश्चापवाची धनुस्-शब्दः।'इसुसन्तः' ( पा.लि. १३४ ) इति नपुंसकत्वम्।'धनुश्चापौ धन्वशरासनकोदण्डकार्मुकौ। इष्वासः' -अ.क्ष.व.८३ ) इति पुंक्लीबत्वम्।तथैव 'द्व्यच्कमसिसुसन्नन्तं यदनान्तमकर्तरि। ( अ.लि. २४ ) इति च क्लीबत्वम्।पुंसि – धनुः धनुषौ धनुषः।क्लीबे – धनुः धनुषी 'सान्तमहतः संयोगस्य' ( पा.६।४।१० ) इति दीर्घः, धनूंषि।

**४.३.१६८.(ख).दुर्मनस्** – दुःस्थितं मनोऽस्य यस्या वेति विग्रहे 'अनेकमन्यपदार्थे'(२।२।२४) इति बहुव्रीहिसमासः। सान्तो विशेष्यनिघ्नो विमनोवाची दुर्मनस्-शब्दः। 'बहुवीहिरदिङ्नाम्नामुन्नेयं तदुदाहृतम्।' ( अ.लि. ४४ ) इति विशेष्यनिघ्नलिङ्गत्वम्।पुंसि – 'अत्वसन्तस्य चाधातोः' ( पा.६।४।१४ ) इति दीर्घः, दुर्मनाः दुर्मनसौ दुर्मनसः। स्त्रियाम् – पुंवत्। क्लीबे – दुर्मनः दुर्मनसी दुर्मनांसि।

**४.३.१६९. पयस्** –पीयत इति विग्रहे 'पीङ् पाने' (दि.आ.से.१२१६) इति धातोः 'सर्वधातुभ्योऽसुन्' (उ.४।१८९) इत्यसुन्प्रत्ययः।'पयः कीलालममृतं जीवनं भुवनं वनम्।' ( अ.वा.व.३) इति निर्देशात् क्लीबत्वम्। क्षीरे च नीरे च' इति मेदिनी।सान्तः क्लीबलिङ्गो जलदुग्ध-वाची पयस्-शब्दः। पयः पयसी पयांसि।

**४.३.१७०. विद्वस्** – वेत्तीति विग्रहे 'विद ज्ञाने' (अ.प.से.११४०) इति धातोः 'लटः शतृशानचावप्रथमासमानाधिकरणे' (पा.३।२।१२४)इति शतृप्रत्यये 'विदेःशतुर्वसुः' (पा.७।१।३६) इति विकल्पेन वसुरादेशः। सान्तः विशेष्यनिघ्नलिङ्गो ज्ञातृ-वाची विद्वस्-शब्दः। 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः। कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि॥ ( अ.लि.४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम्। पुंसि – 'उगिदचां सर्वनामस्थानेऽधातोः' ( पा.७।१।७० ) इति नुम्, 'सान्तमहतः संयोस्य' ( पा.६।४।१४ ) इति दीर्घः, विद्वान् विद्वांसौ विद्वांसः। शसि–'वसोः सम्प्रसारणम्' ( पा६।४।१३१ ) इति सम्प्रसारणम्, विदुषः। स्त्रियाम् –

'उगितश्च' ( पा.४।१।६ ) इति ङीप्, विदुषी विदुष्यौ विदुष्यः । क्लीबे – विद्वत् विदुषी विद्वांसि ।

**४.३.१७१. गरीयस्** – अयमनयोरतिशयेन गुरुरिति विग्रहे 'द्विवचनविभज्योपपदे तरबियसुनौ' (५।३।५७) इतीयसुन्प्रत्यये 'प्रियस्थिरफिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघिवृन्दाः' (६।४।१५७) इति गरादेशः । सान्तो विशेष्यनिघ्नलिङ्गः श्रेष्ठ-वाची गरीयस्-शब्दः । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । 'पुंसि – गरीयान्, गरीयांसौ गरीयांसः । स्त्रियाम् – 'उगितश्च' ( पा.४।१।६ ) इति ङीप्, गरीयसी गरीयस्यौ गरीयस्यः । क्लीबे – गरीयः गरीयसी गरीयांसि ।

**४.३.१७२. अदस्** – न दस्यत इति विग्रहे 'दस दर्शनदसनयोः' (चु.आ.से.१८०७) इति धातोः बाहुल्यात् क्विप् । सान्तः विशेष्यनिघ्नलिङ्गः विप्रकृष्टपरामर्शी अदस्-शब्दः । 'सर्वादीनि सर्वनामानि' (१।१।२७) इति सर्वनामसंज्ञायाम् 'तद्धितार्थो द्विगुः संख्यासर्वनामतदन्तकाः ।' ( अ.लि. ४३ ) इति विशेष्यनिघ्नत्वम् । 'अदस औ सुलोपश्च' (पा.७।२।१०७ ) इत्यौकादेशः, 'तदोः सः सवनन्त्यगोः' (पा.७।२।१०६ ) इति सत्वम्, असौ 'अदसोऽसेर्दादुदोमः' ( पा.८।२।८० ) इत्यूत्वमत्वे, अमू 'एत ईद्बहुवचने' ( पा.८।२।८१ ) इतीत्वमत्वे अमी । स्त्रियाम् – असौ अमू अमूः । क्लीबे – अदः अमू अमूनि ।

**४.३.१७३. मधुलिह्** – मधु लेढीति विग्रहे 'लिह आस्वादने' (अ.उ.अ.१०८६) इति धातोः 'क्विप् च' (पा.३।२।७६)इति क्विप्प्रत्ययः । हान्तो विशेष्यनिघ्नलिङ्गः क्षौद्राशिवाची मधुलिह्-शब्दः । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् । पुंसि – 'हो ढः' ( पा.८।२।३१ ) इति हस्य ढः, जश्त्वचर्त्वे, मधुलिट् ( मधुलिड् ) मधुलिहौ मधुलिहः । स्त्रियाम् – पुंवत् । क्लीबे – मधुलिट् मधुलिही मधुलींहि ।

**४.३.१७४. विश्ववाह्** – विश्वं वहतीत्यर्थे 'वह प्रापणे' (भ्वा.उ.अ.१०७३) इति धातोः 'वहश्च' (३।२।६४) इति ण्विः, णकार इत् वेर्लोपः 'अत उपधायाः' (पा.७।२।११६) इत्युपधावृद्धिरुपपदसमासः । हान्तः पुंलिङ्गो विश्वधर्तृवाचीविश्ववाह्-शब्दः । 'देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि' ( पा.लि. ४३ ) इति पुंलिङ्गत्वम्, तथैव 'पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुराः ।' ( अ.लि. ११ ) इति च

पुंस्त्वम् । 'हो ढः' ( पा.८।२।३१ ) इति हस्य ढः, जश्त्वचर्त्वे, विश्ववाट् विश्ववाहौ विश्ववाहः । शसि – 'वाह ऊठ्' ( पा.६।४।१३२ ) इति संप्रसारणमूठ्, 'एत्येधत्यूठ्सु' ( पा.६।१।८९ ) इति वृद्धौ, विश्वौहः ।

**४.३.१७५. तुरासाह्** – तुतोर्तीति विग्रहे 'तुर त्वरणे' (जु.प.से.११७७) इति धातोः 'इगुपधज्ञाप्रीकिरः कः' (३।१।१३५)इति कप्रत्यः । तुरं वेगवन्तं साहयतीति विग्रहे ण्यन्तात् 'षह मर्षणे' (भ्वा.आ.से.९१०) इति धातोः 'क्विप् च' (३।२।७६) इति क्विप्प्रत्ययः । 'सहेः साडः सः' (८।३।५६) इति षत्वम् । 'अन्येषामपि दृश्यते' (६।३।१३७) इति पूर्वपदस्य दीर्घः ।हान्तः पुंलिङ्ग इन्द्रवाची तुरासाह्-शब्दः । 'देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्ग-शरपङ्काभिधानानि' ( पा.लि. ४३ ) इति पुंलिङ्गत्वम्, तथैव 'पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुराः ।' ( अ.लि. ११ ) इति च पुंस्त्वम् । 'हो ढः' ( पा.८।२।३१ ) इति हस्य ढः, जश्त्वचर्त्वे, 'सहेः साडः सः' ( पा.८।३।५६ ) इति सस्य मूर्धन्यादेशः, तुराषाट् ( तुराषाड् ) तुरासाहौ तुरासाहः ।

**४.३.१७६. गोदुह्** – गां दोग्धीति विग्रहे 'दुह प्रपूरणे' (अ.उ.अ.१०८४) इति धातोः 'सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्' ( ३।२।६१ ) इति क्विप् । हान्तोविशेष्यनिघ्नो धेनुदोग्धृवाची गोदुह्-शब्दः । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् ।पुंसि – 'दादेर्धातोर्घः' ( पा.८।२।३२ ) इति दस्य घः, 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' ( पा.८।२।३७ ) इति बशो भष्, गोधुक् गोदुहौ गोदुहः । स्त्रियाम् – पुंवत् । क्लीबे – गोधुक् गोदुही गोदूंहि ।

**४.३.१७७. उपानह्** – उपनह्यतीति विग्रहे 'णह बन्धने' (दि.उ.अ.१२४२) इति धातोः 'क्विप् च' (३।२।७६) इति क्विप्प्रत्यये 'नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ' (६।३।११६) इति पूर्वपदस्य दीर्घः । हान्तः स्त्रीलिङ्गः पादूवाची उपानह्-शब्दः । 'भाःस्रुक्स्रग्दिगुष्णिगुपानहः' ( पा.लि. २० ) इति स्त्रीत्वम् ।'नहो धः' ( पा.८।२।३४ ) इति हस्य धः ।उपानत् ( उपानद् ) उपानहौ उपानहः ।

**४.३.१७८. अनडुह्** – अनः शकटं वहतीति विग्रहे 'वह प्रापणे'(भ्वा.उ.अ.१०७३) इति धातोः 'अनसि वहेः क्विबनसो डश्च' ( ..) इति क्विप्प्रत्ययः, अनसो डकारादेशश्च, (भानुजी) ततः 'ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च' (६।१।१६) इति संप्रसारणम् । 'अनड्वान् सौरभेयो गौः' ( अ.वै.व.६०) इति पुंस्त्वनिर्देशः । हान्तः पुंलिङ्गो वृषवाची अनडुह्-

शब्दः । 'चतुरनडुहोरामुदात्तः' ( ७।१।९८ ) इत्याम्, 'सावनडुहः' ( ७।१।८२ ) इति नुम्, अनड्वान् अनड्वाहौ अनड्वाहः । शसि – अनडुहः ।

**४.३.१७९. उष्णिह्** – उत्पूर्वात् 'ष्णिह प्रीतौ' (दि.प.से.१२७७) इति धातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' (३।२।५९) इति क्विन्प्रत्यय उदो दलोपः षत्वं च ।हान्तः स्त्रीलिङ्गउष्णिह्-शब्दः ।'भाः स्रुक्स्रग्दिगुष्णिगुपानहः' ( पा.लि. २०) इति स्त्रीत्वम् । 'वा द्रुहमुहष्णुहष्णिहाम्' ( ८।२।३३ ) इति हस्य वा घः, जश्त्वचर्त्वे उष्णिक् उष्णिहौ उष्णिहः ।

**४.३.१८०. द्रुह्** – द्रुह्यतीति विग्रहे 'द्रुह जिघांसायाम्' (दि.प.से.१२७४) इति धातोः 'क्विप् च' (३।२।७६) इति क्विप्प्रत्ययः । हान्तोविशेष्यनिघ्नलिङ्गो द्रोहिवाची द्रुह्-शब्दः । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लि. ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् ।'वा द्रुहमुहष्णुहष्णिहाम्' ( ८।२।३३ ) इति हस्य वा घः, जश्त्वचर्त्वे 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' ( पा.८।२।३७ ) इति बशो भष्, ध्रुक्-ध्रुट् द्रुहौ द्रुहः ।

**४.३.१८१. मुह्** – मुह्यतीति विग्रहे 'मुह वैचित्ये' (दि.प.से.१२७५) इति धातोः 'क्विप् च' ( ३।२।७६) इति क्विप्प्रत्ययः ।हान्तो विशेष्यनिघ्नलिङ्गो मोहिवाची मुह्-शब्दः । 'गुणद्रव्यक्रियायोगोपाधिभिः परगामिनः । कृतः कर्तर्यसंज्ञायां कृत्या कर्तरि कर्मणि ॥ ( अ.लिः ४४-४५ ) इति विशेष्यनिघ्नलिङ्गत्वम् ।'वा द्रुहमुहष्णुहष्णिहाम्' ( ८।२।३३ ) इति हस्य वा घः, जश्त्वचर्त्वे मुक् (ग्) मुट् (ड्) मुहौ मुहः ।

कुलचन्द्रः १८२ अङ्कान् अव्ययशब्दानां कृते टीकायां ददाति परन्त्वत्र न ददाति । षान्तशब्दानां क्रमो नास्ति । द्रुह्मुह्शब्दयोः सर्वाणि रूपाणि नैव सन्ति । कोशे शब्दाभावात् लृकारैकारादिशब्दानां रूपावलिर्नैव दत्ता । यथा भट्टोजिदीक्षितेन सिद्धान्तकौमुद्यां गम्लृशक्लोरनयोरनुकरणे, इना सह वर्तते इति सेः,स्मृतः इः कामो येनेति स्मृतेरित्यनयोश्चः रूपावलयो दत्ताः तथा कुलचन्द्रेण नैव दत्ताः ।

## ४.१.४ प्रत्येकशब्दानां लिङ्गनिर्धारणम्

अमरकोशस्य वास्तविकं नाम तु 'नामलिङ्गानुशासनम्' आसीत् । अत्र नामशब्दानां लिङ्गानि निर्दिष्टानि सन्ति । कोशस्य नाम सार्थकमस्ति ।अमरसिंहस्यानुकरणं कुर्वन् कुलचन्द्रः पाठकहिताय स्वयंबोधिनीटीकायां लिङ्गनिर्देशार्थं प्रत्येकशब्दानामग्रेऽङ्कान् ददाति । यथा–

(क) मूलशब्दस्याग्रे '१' इत्यङ्को भवेत्तर्हि स शब्दः पुंलिङ्गो भवति ।

(क) मूलशब्दस्याग्रे '२' इत्यङ्को भवेत्तर्हि स शब्दः स्त्रीलिङ्गो भवति ।

(ग) मूलशब्दस्याग्रे '३' इत्यङ्को भवेत्तर्हि स शब्दः नपुंसकलिङ्गो भवति ।

(घ) मूलशब्दस्याग्रे '४' इत्यङ्को भवेत्तर्हि स शब्दः पुंलिङ्गः स्त्रीलिङ्गश्च भवति ।

(ङ) मूलशब्दस्याग्रे '५' इत्यङ्को भवेत्तर्हि स शब्दः पुंलिङ्गः क्लीबलिङ्गश्च भवति ।

(च) मूलशब्दस्याग्रे '६' इत्यङ्को भवेत्तर्हि स शब्दः स्त्रीलिङ्गः क्लीबलिङ्गश्च भवति ।

(छ) मूलशब्दस्याग्रे '७' इत्यङ्को भवेत्तर्हि स शब्दः त्रिलिङ्गो (पु.स्त्री.नपुं.) भवति ।

(ज) मूलशब्दस्याग्रे '८' इत्यङ्को भवेत्तर्हि स शब्दोऽव्ययं भवति ।

## ४.१.५ संस्कृतनेपालीशब्दानां वर्णक्रमे स्थापनम्

अधुना वर्णक्रमकोशस्य लोकप्रियताऽस्ति । तस्मादेवकारणाद्विद्वच्छिरोमणिकुलचन्द-गौतमेनामरकोशस्य शब्दानां वर्णक्रमेण स्थापिताः सन्ति । अत्र परिश्रमेण पाठकास्तथान्वेषकाः सरलतया शब्दानन्वेष्टुं शक्नुवन्ति । अस्मिन् वर्णक्रमे रूपाङ्काश्च दत्ताः सन्ति । रूपाङ्कानन्वेष्टुं सरलता भवत्येवाल्पमतीनाञ्छात्राणां तथाज्ञातव्याकरणविषयाणां पाठकानाम् । एतादृशी वर्णक्रमव्यवस्थामरकोशस्यान्यासु टीकासु नैव प्राप्यतेऽधुना । तस्माद्वर्णक्रमकोशेऽपि कुलचन्दोऽग्रेसरोऽस्ति । यथोदाहरणानि–

| रूपाङ्काः | शब्दाः | प्रक्रमाङ्काः | लिङ्गनिर्देशनम् | आदर्शरूपावली |
|---|---|---|---|---|
| ८ | अंस | १२६९ | अंस ५ | क्षेमः क्षेमौ क्षेमाः, रामवत्<br>क्षेमम् क्षेमे क्षेमानि, ज्ञानवत् |
| १ | पक्ष | २८४२ | पक्ष १ | रामः रामौ रामाः ... |
| २ | बधा | ४९६ | वाधा२ | रमा रमे रमाः .. |
| १ | शृङ्गिन् | ८२ | शृङ्गिन् १ | वनमाली वनमालिनौ वनमालिनः |

अनेनैव प्रकारेण स्रोतोभाषासंस्कृते लक्ष्यभाषानेपाल्यामपि वर्णक्रमानुसारेण शब्दाः स्थापिताः सन्ति । नेपालीभाषाविकासाय च सहयोगो भवत्येव । अनयोर्भाषयोः परस्परानुवादेन संस्कृतभाषिणां तथा नेपालीभाषिणां पाठकानां कोश उपयोगी भवति । उदाहरणानि यथा–

| नमानि | प्रक्रमाङ्काः | शब्दाः |
|---|---|---|
| अउँठीका २ | १३२७ | अङ्गुलीयक ३, ऊर्मिका २ |
| घाँसका २ | १०१४ | शष्प ३, बालतृण |
| राङ्का ४ | १९७५ | त्रपु ३, पिच्चट ३, रङ्ग ३, वङ्ग ३ |

| | | |
|---|---|---|
| संपत्तिका ४ | १६८६-७ | संपद् २, संपत्ति २, श्री २, लक्ष्मी २ |

## ४.१.६. आदर्शरूपावलिप्रदर्शनम्

अमरकोशस्थानां सर्वेषां शब्दानामस्यां टीकायामादर्शरूपेण रूपावलिः स्थापिताऽस्ति । अस्यां रूपावल्यां प्रायोऽकारादिक्रमेण रूपाणि दत्तानि सन्ति । सामान्यया रूपवल्या सह विशिष्टानां सख्यादिशब्दानां रूपाण्यत्र सन्ति । अस्या रूपावल्या अध्ययनेन पाठकः प्रवीणो भवत्येव, यत्र शङ्का जायते तत्रैव जिज्ञासुर्द्रष्टुं शक्नोति । अनधीतव्याकरणानाञ्चा-गतिकगतिर्भवत्येव । अस्यां रूपावल्यां प्रायः सिद्धान्तकौमुद्यां स्थितानां विशिष्टशब्दानां रूपाणि दत्तानि सन्ति । पाठक इयं रूपावलिमधीत्य कोशस्थानां सर्वेषां शब्दानां रूपाणि ज्ञातुं शक्नोति । कोशविज्ञानानुसारेण टीकाकारेण सप्रयत्नेन दत्तानि रूपाणि पाठकानां रुचिकराणि हितकराणि च सन्त्येव ।

## ४.१.७. क्षेपकश्लोकाः

कुलचन्द्रप्रणीतायां स्वयंबोधिनीटीकायां मूले क्षेपकश्लोकाः सन्ति । एते क्षेपकश्लोका भानुजिदीक्षितप्रणीतायां रामाश्रमीटीकायामपि न प्राप्यन्ते । अन्यास्वपि टीकासु पुस्तकेषु वा पाठभेदो दृश्यते । क्षेपकानां स्थापनेन कोशस्य विस्तारः शब्दानां वृद्धिश्च भवत्येव । तेषां क्षेपकाणां गुणमङ्गीकृत्यात्र दीयन्तेऽत्र श्लोकाः क्रमशः ।

**ब्रह्मणो नामानि** प्र. २५–२६, (१.१.१८)

नाभिजन्माण्डजः पूर्वो निधनः कमलोद्भवः ।
सदानन्दो रजोमूर्तिः सत्यको हंसवाहनः ॥ १ ॥

**विष्णोर्नामानि** प्र. ३६–३७, (१.१.२३)

पुराणपुरुषो यज्ञपुरुषो नरकान्तकः ।
जलशायी विश्वरूपी मुकुन्दो मुरमर्दनः ॥ १ ॥

**लक्ष्म्या नामानि** प्र. ५०, (१.१.२९)

इन्दिरा लोकमाता मा क्षीरोदतनया रमा ।
भार्गवी लोकजननी क्षीरसागरकन्यका ॥ १ ॥

**विष्णोश्चापादीनां नामानि** प्र. ५३–५५, (१.१.३१)

चापः शार्ङ्गं मुरारेस्तु श्रीवत्सो लाञ्छनं स्मृतम् ।
अश्वाश्च शैब्यसुग्रीवमेघपुष्पवलाहकाः ॥ १ ॥
सारथिर्दारुको मन्त्री ह्युद्धवश्चानुजो गदः ।

**शिवस्य नामानि**प्र. ६८, (१.१.३७)

अहिर्बुध्न्योऽष्टमूर्तिश्च गजारिश्च महानटः ।

**चण्डिकाया नामानि**प्र. ६८, (१.१.४३)

शृङ्गी भृङ्गी रिटिस्तुण्डी नन्दिको नन्दिकेश्वरः ।

कर्ममोटी तु चामुण्डा चर्ममुण्डा तु चर्चिका ॥ १ ॥

**अग्नेर्ज्वालाया भस्मनश्च नामानि**प्र. ११८–९, (१.१.६१)

उल्का स्यान्निर्गतज्वाला भूतिर्भसितभस्मनि ।

क्षारो रक्षा च दावस्तु दवो वनहुताशनः ॥१ ॥

**आकाशस्य नामानि**प्र.१५२–५३, (१.२.२)

विहायसोऽपि नाकोऽपि द्युरपि स्यात् तदव्ययम् ।

तारापथोऽन्तरिक्षं च मेघाध्वा च महाविलम् ॥ १ ॥

**दिशासम्बन्धिनो नामानि**प्र. १५७–५८, (१.३.२)

अवाग्भवमवाचीनमुदीचीनमुदग्भवम् ।

प्रत्यग्भवं प्रतीचीनं प्राचीनं प्राग्भवं त्रिषु ॥ १ ॥

**पूर्वादिदिशां ग्रहाणां नामानि**प्र.१६१–६२, (१.३.२)

रविः शुक्रो महीसूनुः स्वर्भानुर्भानुजो विधुः ।

बुधो बृहस्पतिश्चेति दिशां चैव तथा ग्रहाः ॥ १ ॥

**सूर्यस्य नामानि**प्र.२१९–२२, (१.३.३१)

पद्माक्षस्तेजसांराशिश्छायानाथस्तमिस्रहा ।

कर्मसाक्षी जगच्चक्षुर्लोकबन्धुस्त्रयीतनुः ॥ १ ॥

प्रद्योतनो दिनमणिःखद्योतो लोकबान्धवः ।

इनो भगो धामनिधिश्चांशुमाल्यब्जिनीपतिः ॥ २॥

**प्रातःकालस्य नामानि**प्र. २३६, (१.४.३)

व्युष्टं विभातं द्वे क्लीवे पुंसि गोसर्ग इष्यते ।

**पौषीपूर्णिमाया नाम** प्र. २६०–६१, (१.४.१४)

पुष्ययुक्ता पौर्णमासी पौषी, मासे तु यत्र सा ।

नाम्ना स पौषो, माघाद्याश्चैवमेकादशाऽपरे ॥ १ ॥

**बुद्धेर्भेदस्य नामनी** प्र. २९९, (१.५.२)

प्रतिभा धीः स्फूर्तिमती पण्डा सैव विवेकिनी ।

**अवधानस्य नामानि** प्र. ३०१, (१.५.२)

अवधानं समाधानं प्रणिधानं तथैव च ।

**विमर्शस्य नामानि** प्र.३०३, (१.५.३)

विमर्शो भावना चैव वासना च निगद्यते ।

**आक्षेपादीनां नामानि** प्र. ३६७, (१.६.१७)

चोद्यमाक्षेपाभियोगौ शापाक्रोशौ दुरेषणा ।

अस्त्री चाटु चटु श्लाघा प्रेम्णा मिथ्याऽविकत्थनम् ॥ १ ॥

**सोल्लुण्ठनस्य नामानि** प्र.३७७, (१.६.२१)

सोल्लुण्ठनं तु सोत्प्रासं मणितं रतिकूजितम् ।

श्राव्यं हृद्यं मनोहारि विस्पष्टं प्रकटोदितम् ॥ १ ॥

**दर्पस्य नामानि** प्र.४३२, (१.७.२२)

दर्पोऽवलेपोऽवष्टम्भश्चित्तोद्रेकः स्मयो मदः ।

**सर्पस्य नामानि** प्र.४८२–८४, (१.८.९)

लेलिहानो द्विरसनो गोकर्णः कञ्चुकी तथा ।

कुम्भीनसः फणधरो हरिर्भोगधरस्तथा ॥ १ ॥

अहेः शरीरं भोगः स्यादाशीरप्यहिदंष्ट्रिका ।

**नद्या नामानि** प्र.५५८, (१.१०.३१)

कूलङ्कषा निर्झरिणी रोधोवक्रा सरस्वती ।

**भूमेर्नामानि** प्र.५८९, (२.१.४)

विपुला गह्वरी धात्री गौरिला कुंभिनी क्षमा ।

भूतधात्री रत्नगर्भा जगती सागराम्बरा ॥ १ ॥

**द्यावापृथिव्योर्लवणाकरस्य च नामानि** प्र.६२१–२२, (२.१.१८)

द्यावापृथिव्यौ रोदस्यौ द्यावाभूमी च रोदसी ।

दिवस्पृथिव्यौ गञ्जा तु रुमा स्याल्लवणाकरः ॥ १ ॥

**कुट्टिमाद्योर्नामनी** प्र.६३९, (२.२.९)

कुट्टिमोऽस्त्री निबद्धाभूश्चन्द्रशाला शिरोगृहम् ।

**दन्तकस्य नाम** प्र.६७६, (२.३.७)

दन्तकास्तु बहिस्तिर्यक्प्रदेशान्निर्गता गिरेः ।

**सिंहस्य नामानि** प्र.१०२१, (२.५.१)

कण्ठीरवो मृगरिपुर्मृगदृष्टिर्मृगाशनः ।

पुण्डरीकः पञ्चनखचित्रकायमृगद्विषः ॥ १ ॥

**मूषकस्य नामानि** प्र.१०४४, (२.५.१२)

अधोगन्ता तु खनको वृकः पुंध्वज उन्दुरः ।

**काकस्य नामानि** प्र.१०६४, (२.५.२१)

स एव च चिरञ्जिवी चैकदृष्टिश्च मौकुलिः ।

**जामातुर्भगिनीपतेश्च नामानि** प्र.११७५, (२.६.३३)

विट्पतिश्च स एवोक्तो भाम स्यद् भगिनीपतिः ।

**श्लीपदस्य केशघ्नस्य च नामानि** प्र.१२२३, (२.६.५६)

श्लीपदं पादवल्मीकं केशघ्नस्त्विन्द्रलुप्तकः ।

**नासामलादीनां नामानि** प्र.१२४६, (२.६.६७)

नासामलं तु सिंघाणं पिञ्जूषं कर्णयोर्मलम् ।

**मीमांसकादीनां नामानि** प्र.१४०५–८, (२.७.७)

मीमांसको जैमिनीये वेदान्ती ब्रह्मवादिनि ।

वैशेषिके स्यादौलूक्यः सौगतः शून्यवादिनि ॥ १ ॥

नैयायिकस्त्वाक्षपादः स्यात् स्याद्वादिक आर्हतः ।

चार्वाकलौकायतिकाः सत्कार्ये सांख्यकापिलौ ॥२॥

**प्राचेतसादीनां नामानि** प्र.१४६९–७३, (२.७.३७)

प्राचेतसश्चादिकविः स्यान्मैत्रावरुणिश्च सः ।

वाल्मीकिश्चाथ गाधेयो विश्वामित्रश्च कौशिकः ॥ १ ॥

व्यासो द्वैपायनः पाराशर्यः सत्यवतीसुतः ।

गौतमोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ कश्यपः ।

जमदग्निर्वसिष्ठश्च सप्तर्षय इमे स्मृताः ॥ २ ॥

**विवाहयात्रादीनां नामानि** प्र.१५१९–२०, (२.७.५९)

विवाहयात्रा सत्रा स्वैर्वरयात्रा प्रकीर्तिता ।

जनित्रयात्रा सजनेर्वरस्य स्वगृहागमः ॥ १ ॥

**मेलादीनां नामानि** प्र.१५५२–५५, (२.८.१६)

मेला मसी कालिका च स्यात् पत्राञ्जनमित्यपि ।
मत्स्याधानी मसीपात्रं मेलान्धुर्मसिकूपिका ॥ १ ॥
मेलानन्दो वर्णतूली लेखनी पुस्तमस्त्रियाम् ।
पुस्तके पत्रकं पत्रं लेख्यपत्रं समार्थकम् ॥ २ ॥

**शाकक्षेत्रस्य नामानि** प्र.१७७९, (२.९.८)

शाकक्षेत्रादिकं शाकशाटकं शाकशाकिनम् ।

**म्रक्षणस्य कृसरस्य च नामानि** प्र.१८६४, (२.९.५०)

म्रक्षणाभ्यञ्जने तैलं कृसरस्तु तिलौदनः ।

**कटकादीनामर्थाः** प्र.२४२१–३०, (३.३.१८)

भूभृन्नितम्बवलयचक्रेषु कटकोऽस्त्रियाम् ।
सूच्यग्रे क्षुद्रशत्रौ च रोमहर्षे च कण्टकः ॥ १ ॥
पाकौ पक्तिशिशू मध्यरत्ने नेतरि नायकः ।
पर्यङ्कः स्यात्परिकरे स्याद् व्याघ्रेऽपि च लुब्धकः ॥ २ ॥
पेटकस्त्रिषु वृन्देऽपि गुरौ देश्ये च देशिकः ।
खेटकौ ग्रामफलकौ धीवरेऽपि च जालिकः ॥ ३ ॥
पुष्परेणौ च किञ्जल्कः शुल्कोऽस्त्री स्त्रीधनेऽपि च ।
स्यात्कल्लोलेऽप्युत्कलिका वार्धकं भाववृन्दयोः ॥ ४ ॥
करिण्यां चापि गणिका दारको बालभेदकौ ।
अन्धेऽप्यनेडमूकः स्याट्टङ्कौ दर्पाश्म दारणौ ॥ ५ ॥

**अच्छादीनामर्थाः** प्र.२४५५–५६, (३.३.३०)

प्रसन्ने भल्लुकेऽप्यच्छो गुच्छस्तवकहारयोः ।
परिधानाञ्चले कच्छो जलप्रान्ते त्रिलिङ्गकः ॥ १ ॥

**वरणस्य वेण्याश्चार्थाः** प्र.२५१२, (३.३.५७)

सेतौ च वरणो वेणी नदीभेदे कचोच्चये ।

**कुतपशब्दस्यार्थाः** प्र.२६६४, (३.३.१३२)

कुतपो मृगरोमोत्थपटे चाह्नोऽष्टमेंऽशके ।

**घर्मस्य विभ्रमस्य चार्थाः** प्र.२६८४, (३.३.१४२)

उष्णेऽपि घर्मश्चेष्टालङ्कारे भ्रान्तौ च विभ्रमः ।

### ४.१.८ पदपदावलीवाक्यानामनुवादः

विदुषा कुलचन्द्रेण स्वयंबोधिनीटीकायां व्याख्याक्रमे न केवलं भावानुवादः कृतः परन्तु छात्राणां हिताय पदानां वाक्यावलीनां च वाक्यानामनुवादः कृतः । भाषायां छात्राणां लक्ष्यीकृत्य लिखितास्टीका अन्यासु भाषास्वपि न प्राप्यन्ते । इयं टीका तु शिक्षकेन विनाऽपि पाठकः स्पष्टतया ज्ञातुं शक्नोति । व्युत्पत्तिमूलिका टीका तु भानुजिदीक्षितप्रणीता सुधैवाऽस्ति । अन्याष्टीकाः सन्त्यपि नामावशिष्टानि । विवृत्तिमूलिका टीका तु केवलं विदुषां व्याकरणशास्त्रपारङ्गतानामेवोपकारिणी भवति न तु रटनशीलानां वटूनाम् ।

विद्वच्छिरोमणिः कुलचन्द्रः स्वकीये ग्रन्थेऽमरकोशस्य टीकायां सरलतया धैर्यपूर्वकं टीकायां प्रतिभां कलाञ्च दर्शयति । यद्यपि कुलचन्द्रः सर्वज्ञोऽस्ति व्युत्पत्तौ तथापि लोकेऽमरकोशस्य बालानां हिताय नेपालीभाषिनां सौविध्याय सौहार्दतया संस्कृतभाषाया नेपालीभाषायाश्च बुभुत्सूनुत्सुकान् बालान् सावलम्बनान् कारयति । यद्यपि संपूर्णग्रन्थ उदाहरणरूपेणोपस्थितोऽस्ति तथाप्युदाहरणानि दीयन्ते कानिचन यथा –

' अस्य जनकः ( ई कृष्णका पिता जो छन्सो ) वसुदेवः ( वसुदेव कहिन्छन् ) । स एव ( उनै वसुदेव ) आनकदुन्दुभिः ( आनकदुन्दुभि पनि कहिन्छन् ) वसुदेव १, आनकदुन्दुभि १, ़२ कृष्णजीका पिता (वसुदेव) का नाम` '[३९८]

' अस्य ( ई महादेवको ) जटाजूटः ( जटाको गुँथो जो छ सो ) कपर्दः ( कपर्द कहिन्छ ) कपर्दः १, ़ महादेवका-जटामण्डलको नाम` अस्य धनुः ( ई महादेवको धनु जो छ सो ) पिनाकः अगजवम् ( पिनाक, अगजव कहिन्छ ) पिनाक १ अगजव ३ ़ २ महादेवका धनुका नाम` अस्य पारिषदा (ई महादेवका-पार्श्ववर्ती (नगीचरहने सेवक ) जो छन्सो ) प्रमथाः स्युः ( प्रमथ कहिन्छन् ) प्रमथ १, ़ १ महादेवका -पाश्ववर्वी-सेवको नाम [३९९]

' उर्वशीप्रमुखाः ( उर्वशी-आदिगरेका ) स्वर्वेश्याः ( स्वर्गका वेश्या जो छन्सो ) अप्सरसः ( अप्सरस् कहिन्छन् ) अप्सरसः ( अप्सरस् शब्द जो छ सो )स्त्रियां बहुषु ( स्त्रीलिङ्गमा रहेर बहुवचनान्त हुन्छ ) अप्सरस् २, उर्वशी प्रभृति-अप्सराको नाम '[४००]

---

[३९८] गौतमः कुलचन्द्रः, **अमरकोशः** (स्वयंबोधिनी टीका), नेपाल : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, वि.सं.२०२६, पृ.७ ।

[३९९] पूर्ववत् पृ.१० ।

[४००] पूर्ववत् पृ.१४ ।

## ४.१.९ नेपालीभाषायां पर्यायवाचिशब्दाः

कुलचन्द्रगौतमो व्याख्याक्रमे पूर्वं मूलसंस्कृतशब्दानामनुवादं नेपालीभाषायां करोति ततः पुनः पर्यायवाचिशब्दाँश्च ददाति । एतादृशेनानुवादेन संस्कृतशब्दानां सम्यग्ज्ञानं भवति तथैव नेपालीभाषायाः समृद्धिश्च जायते । तस्माज्ज्ञायते विद्वच्छिरोमणिर्न केवलं संस्कृतभाषायाश्चिन्तनं करोति परन्तु नेपालीभाषायाश्च । व्याख्याकारेण संस्कृतशब्दाः, तद्भवशब्दाः, तत्समशब्दाः, नेपालीशब्दाः, तथाऽऽगन्तुकशब्दाश्च प्रयुक्ताः सन्ति । दीयन्ते केचन शब्दा उदाहरणार्थम् –

**४.१.९.१ प्रकम्पन १**, महावात १=२ आँधी =( **हुरी** )का नाम ( प्र. १३१, स्व.व.६६ )

**४.१.९.२ सतत ३**, अनारत ३,अश्रान्त ३, सन्तत ३, अविरत ३,अनिश ३, नित्य ३, अनवरत ३, अजस्र ३ =९ निरन्तर =( **सँधै** )का नाम ( प्र. १३७, स्व.व. ६९ )

**४.१.९.३ तुरङ्गवदन** १, मयु १ =२ घोडाको-जस्तो-मुख, मानिसको-जस्तो-अरुअङ्गहुने देवविशेषका =(**घोडमुखाका** ) नाम ( प्र. १४७, स्व.व.७४ )

**४.१.९.४ अपदिश** ३-८, विदिश् =२ दिशाको माझ =( **आग्नेय-वायव्य-ईशान-नैर्ऋत्य** )-का नाम ( प्र. १६७, दि.व. ५ )

**४.१.९.५ काल** १, दिष्ट १, अनेहस् १, समय १ = ४ काल =( **समय = वखत** )का नाम ( प्र. २३२, का.व. १ )

**४.१.९.६ ज्यौत्स्नी** २ = १ उज्याली =( **जुनेली** ) रातको नाम ( प्र. २४१, का.व. ५ )

**४.१.९.७ अहोरात्र** १ = १ ३० मुहूर्तको =( **६० घडीको** ) नाम ( प्र. २५५, का.व. १२ )

**४.१.९.८ दैव** ३, दिष्ट ३, भागधेय ३, भाग्य ३, नियति ३, विधि १ = ६ भाग्य =**दैवका** नाम ( प्र. २८९, का.व. २८ )

**४.१.९.९ प्रधान** ३, प्रकृति २ = २ प्रकृति =( **माया** )का नाम ( प्र. २९१, का.व. २९ )

**४.१.९.१० प्रमाद** १, अनवधानता २ = २ चुक्नु =( **गाफिलपर्नु** )का नाम ( प्र. ४४९, ना.व. ३० )

**४.१.९.११ व्याज** १, अपदेश १ =लक्ष्य ३ = ३ निहुँ =( **वहाना** )का नाम ( प्र. ४५४, ना.व. ३३ )

४.१.९.१२ विष्टि २, आजू २ =२ झारा ( **वेगारी** )का नाम =( प्र. ४९५, न.व. ३ )

४.१.९.१३ मत्स्याधानी २, कुवेणी २ =२ ढडिया =( **माछा राख्नेभाँडा** )का नाम ( प्र. ५२९, वा.व. १६ )

४.१.९.१४ कमठ १ =कच्छप १, ३ कछुवा =(**ठोटरी** )का नामे ( प्र. ५३८, वा.व. २१ )

**४.१.९.१५ ह्रद** १ = १ गहिराजलाशय =( **रह** )का नामे ( प्र. ५४७, वा.व. २५ )

**४.१.९.१६ नेमि** २ =त्रिका २, २ इनारबाट पानी भिक्ता डोरी अड्याउने पाङ्ग्रा =( **गडाडी** )का नाम ( प्र. ५५०, वा.व. २७ )

**४.१.९.१७ शालूक** ३ = १ सवैथरीकमलका कन्द =( **गाना** )का नामे (प्र.५७३, वा.व.३८ )

**४.१.९.१८ झर्झर** १ = झ्याली ( **झाँज**)को नामे (प्र. ४०३, ना.व. ८ ) ।

**४.१.९.१९ अब्रह्मण्य**३ =गुहार र गुहार र= (**दुहाई महाराजकी**)को नामे (प्र. ४१५, ना.व. १४ )

**४.१.९.२० व्याज** १ = निहुँ = **(वहाना)**को नामे ( प्र. ४५४, ना.व. ३३ ) ।

**४.१.९.२१ कोलाहल** १= कोहोलो = (**खलवल** ) को नामे (प्र. ३८७, श.व. २५) ।

**४.१.९.२२ वामन**७=वाउन्ये = (**पुड्का** ) को नामे (प्र.१२०२, म.व. ४६) ।

**४.१.९.२३ आमय** १ =रोग = (**वेथा** ) को नामे (प्र. १२१२, म.व. ५१) ।

**४.१.९.२४ अर्शस्** ३ =हर्सा = (**अल्काई** ) को नामे (प्र. १२१९, म.व. ५४) ।

**४.१.९.२५ नितम्ब** १ =कटिको पश्चाद्भाग = (**चाक = फिला**को नामे (प्र. १२६१, म.व.७४) ।

**४.१.९.२७६परिणाह** १ =गज = (**पनाहा** ) को नामे (प्र. १३४१, म.व. ११४) ।

**४.१.९.२७ आर्य** ७=कुलीन =(**घरानिया** ) को नामे (प्र. १३९७, ब्र.व. ३) ।

**४.१.९.२८**लक्ष्य ३ = निशाना = (**तारो** ) को नामे (प्र. १६९५, क्ष.व. ८६) ।

**४.१.९.२९ मूल्य** ३ =मोल = (**दाम** ) को नामे (प्र. १९२३, वै.व.७९) ।

**४.१.९.३० अतिरिक्त**७= बढता = (**अर्घेलो**(प्र. २२२६,वि.नि.व.७५) ।

**४.१.९.३१ भाण्ड** ३ =व्यापारीको मूलधन = (**साऊँ =डोको**को नामे (प्र.२४८५, ना.व. ४४) ।

**४.१.९.३२ आस्पद** ३ =इज्जत = (**दर्जा**को नामे (प्र. २५८७, ना.व. ९४ ) ।

**४.१.९.३३ स्पश** १ = चर चीवा = (**जासूस**) को नामे (प्र. २८२९, ना.व. २१४ ) ।

## ४.१.१० तद्भवशब्दानां प्रयोगः

जानन्त्येव विद्वांसो नेपालीभाषायां तद्भवशब्दानां प्रयोगम् । कुलचन्द्रस्तद्भवशब्दैरर्थसिद्धे सत्यपि पुनस्तद्भवशब्दानां नेपालीभाषाया ज्ञानाय रक्षणाय च वीनवाजा, वीना, इत्यादिशब्दानां प्रयोगं करोति –

- निक्वाण १, निक्वण १ क्वाण १, क्वण १, क्वणन, प्रक्वाण १, प्रक्वण १, ़ ७ वीणा ( **वीनवाजा** )का - आवाजका नाम ( प्र. ३८६) शब्दादिवर्गः २४ )

(ख) वीणा २, वल्लकी २,विपञ्ची २, ़ ३ वीणा ( **वीन** )का नाम` ( प्र. ३९३, नाट्यवर्गः ३ )

## ४.१.११ निर्देशनम्

अमरकोशस्य व्याख्याक्रमे कुलचन्द्रो न केवलं सामान्यानुवादं करोति परन्तु स्पष्टार्थमधिकं निर्देशनं करोति दृष्टान्तादिभिर्यथा –

–सन्धि १, विग्रह १, यान ३, आसन ३, द्वैध ३, आश्रय १ ़ ६ सन्धि-आदि ६ गुणका १ १ नाम` आफुभन्दा -बलियो-अथवा-बरोवर-भयेका-शत्रुलाई, केहि दियेर मिलाई राख्नालाई "सन्धि"भनदछन्। यो सन्धिका धेरै भेद छन् नीतिशास्त्र हेर। शत्रुको देशमा-आगो-लगाईदिनू-लूट्नू-इत्यादि-उपद्रवलाई 'विग्रह', फौजलिई, शत्रुलाई-थाहादिई अथवा तेसै-चडाई-गर्नालाई 'यान' , शत्रुबलवान् छ भन्ठानेर फौज, किल्ला, तयार गरि परि-आयेको-गर्नु-पर्ला भन्ने-हिसावले वाटो-हेर्नालाई 'आसन' , बलवान्को मद्दत् मागेर, औसर परेमा सिध्याउँला ऐले मेलै गरौं भन्ने विचार गरि शत्रुसँग मिलेझै गर्नालाई 'द्वैध' , शत्रुले साह्रै दुःखदिदा बलवान्-अर्को-राजाको शरण-लिनलाई 'आश्रय' , ई ६ कर्मलाई 'षड्गुण' भन्दछन्। ( प्र. १५६०, क्ष.व. १८ )

–सामन् ३, दान ३, भेद १, दण्ड १ ़ ४ सामादि ४ उपायको १।१ नाम` परस्परमा उपकार गर्नु , गुणको वर्णन गर्नु , आपत्ति परेमा प्रकाश गर्नु , मधुर बोल्नु , इन्लाई 'साम' उपाय भन्दछन्। 'दान' प्रसिद्धै छ , शत्रुका मन्त्रिप्रभृतिलाई आफुतिर मिलाउनु , अथवा , शत्रुका अरु शत्रुसँग झगडा पारिदिनुलाई 'भेद' भन्दछन्॥( प्र. १५६४, क्ष.व. २० )

## ४.१.१२ अध्याहारः

स्वयंबोधिन्यां टीकायां संस्कृतशब्दानां नेपालीभाषायामनुवादक्रमे कुलचन्द्रः केवलं शब्दानुवादं न करोति परन्तु क्रियाशब्दानामध्याहारमपि करोति –

–तस्य प्रिया तु ( इन्द्रकी पत्नी ता )॥ ४७॥ पुलोमजा, शची, इन्द्राणी, ( पुलोमजा-शची-इन्द्राणी कहिन्छिन् ) पुलोमजा २,शची २, इन्द्राणी२, ़ ३ इन्द्रकी पत्नीका नाम` तस्य नगरी तु ( इन्द्रको पुरी ता ) अमरावती (

अमरावती कहिन्छिन् ) अमरावती २¸ १ इन्द्रका पुरीको नाम ` तस्य हयः ( इन्द्रको घोडा ) उच्चैःश्रवाः ( उच्चैःश्रवा कहिन्छ ) उचैःश्रवस् १¸ १ इन्द्रका घोडाविशेषको नाम` तस्य सूतः (इन्द्रको सारथि जो छ सो ) मातलिः ( मातलि कहिन्छ ) मातलि १¸ १ इन्द्रका-सारथिको नाम ` तस्य वनम् ( इन्द्रको वघैंचा जो छ सो ) नन्दनम् ( नन्दन कहिन्छ ) नन्दन ३¸ १ इन्द्रका वघैंचाको नाम ` तस्य प्रासादः ( इन्द्रको महल जो छ सो ) वैजयन्तः स्यात् ( वैजयन्त कहिन्छ ) वैजयन्त १¸ १ इन्द्रका महलको नाम ` ( प्र. ९१-९४, स्व.व. ४७-४९ )

## ४.१.१३ अधिकव्याख्या

कुलचन्द्रगौतमोऽमरकोशस्य व्याख्याक्रमे स्पष्टार्थं बालानां सरलतया बोधनाय च पुनर्व्याख्यां कृत्वार्थस्य पोषणं करोति, चिन्तितमपि चिन्तयति च –

–(उदासीन १ [१ शत्रुका-शत्रुका-शत्रुको नाम] पल्लोफाल्को-हुनाले तेसले भलो, कुभलो, केहि गर्दैन भन्ने हिसाबले तेसलाई ‘उदासीन’ भनेको हो। ( प्र.१५३९, क्ष.व. १० )

## ४.१.१४ विशेषटिप्पणी

विद्वच्छिरोमणिः कुलचन्द्रः स्वकीयायां टीकायां वह्यष्टिप्पण्यो बह्वीः टिप्पणीः ददाति। तास्वपि कुत्रचित् स्थाने विशेषाष्टिप्पण्योऽपि प्राप्यन्ते। यथा –

–वार्ता(क(की २, हिङ्गुली २, सिंही २, भण्टाकी २, दुष्प्रधर्षिणी २ [५ साना-सेता-विहिका नाम] कसै-कसैले भन्टाका नाम हुन् भनेको ठीक होइन। विहिका भेदैका नाम हुन्। विशेष प्रमाणको जिज्ञासा (जान्ने इच्छा) छ भने यसै वर्गका (९३।९४ श्लोक) को टीकामा हेर्नु। फरक जानिने छ। (प्र.९०७, व.व.११४)

–निदिग्धिका २, स्पृशी २, व्याघ्री २, बृहती २, कण्टकारिका २, प्रचोदनी २, कुली २, क्षुद्रा २,दुःस्पर्शा २, राष्ट्रिका २ [१० कटकारी (ठूलोबिहि)का नाम] यो विहि पनि ठूलो सानु दुई थरका हुनाले २ भेदका नाम छन्। यसै वर्गका (११४ श्लोकमा) पनि यसैका भेद (सानु सेतो चाहिने) का नाम हुन्। भण्टाका नाम होइनन्। भावप्रकाशमा –

कण्टकारी तु दुःस्पर्शा क्षुद्रा व्याघ्री निदिग्धिका।
कण्टालिका कण्टकिनी धावनी बृहती ( तथा)॥

भनि सामान्य विहिका नाम लेखेर –

वार्ताकी क्षुद्रभण्टाकी महती बृहती कुली ।

हिंगुली राष्ट्रिका सिंही महोष्ट्री दुष्प्रधर्षिणी ॥

भनि साना चाहिने विहिको नाम लेखेको छ । (प्र.८६६-६७, व.व. ९३-९४)

–नाकुली २, सुरसा २, रास्ना २, सुगन्धा २, गन्धनाकुली २, नकुलेष्टा २, भुजङ्गाक्षी २, छत्राकी २, सुवहा २ [९ फ्याक्सेकन्दका नाम] यति ९ फ्याक्सेकन्दका नाममा 'गाइतिहारे'का नाम पनि मिलेका हुनाले यसैमा गाइतिहारेका नाम भनि कसैले भनेको ठीक होइन। गाइतिहारेका नाम यसैवर्गको (१४० श्लोकमा) छन्। भावप्रकाशनिघण्टुमा –

**रास्ना युक्तरसा रस्या सुवहा रसना रसा ।**

**एलापर्णी ( च ) सुरसा सुगन्धा श्रेयसी ( तथा ) ॥**

भनि गाइतिहारेका नाम लेखेपछि –

**नाकुली सुरसा नागसुगन्धा गन्धनाकुली ।**

**नकुलेष्टा भुजङ्गाक्षी सर्पाङ्गी विषनाशिनी ॥**

भनि फ्याक्सेकन्दका नाम बतायेका छन् । ( प्र. ९०९, व.व. ११५ )

## ४.१.१५ विविधव्याख्या

कुलचन्द्रः स्वयंबोधिनीटीकायां विविधपद्धत्या व्याख्यां करोति। टिप्पण्यादीनि तु स्वाभाविकानि परन्तु विश्वकोशवत् प्रत्येकशब्दानां स्पष्टीकरणं ददाति । यथा –

–मणिः (मणि जो छ सो) कौस्तुभः (कौस्तुभ कहिन्छ) कौस्तुभ १ विष्णुका-वक्षस्थलमा लाइने मणिविशेषको नाम (प्र. ५२,स्व.व. ३०)

–मुरारेः (विष्णुको) लाञ्छनम् (चिह्न जो छ सो) श्रीवत्सः स्मृतम् (श्रीवत्स कहिन्छ ) श्रीवत्स १ [१ विष्णुका-वक्षस्थल (छाती) को चिह्न] दक्षिणावर्त (दाहिने बटारियेका) रउँको अनन्यसाधारण (अन्यत्र कसैको नभयेको) भुँवरीको नाम ( प्र.५३,स्व.व.३० )

–षट्कर्मन् १ , १ षट्कर्मगर्ने ब्राह्मणको नाम यजन, याजन (यज्ञगर्नु, गराउनु) पठन, पाठन ( पढ्नु, पढाउनु ) दान, आदान ( दानदिनु, लिनु ) ई ६ 'षट्कर्म' हुन् । ( प्र.१४००, ब्र.व.(४)

## ४.१.१६ संस्कृतशब्दानुक्रमणिका

आधुनिकयुगे वर्णक्रमकोशाः प्रचलिता लोकप्रियश्च सन्ति ।अधुनाङ्गलभाषायां तथा नेपालीभाषायाञ्च वर्णक्रमकोशा उपलब्धाः सन्ति । शीघ्रायमाणानां वर्णक्रमकोशेन शीघ्रमर्थं ददाति । तस्मादेवकारणात् कुलचन्द्रेणाप्यमरकोशस्य स्वयंबोधिनीटीकायां परिशिष्टे शब्दानामनुक्रमणिका दत्ता ।

| रूपाङ्काः | शब्दाः | प्रक्रमाङ्काः |
|---|---|---|
| १८२ | अ | २९३८ |
| ४ | कमल | ५०२ |
| १२ | पुरित | २२७२ |
| १८२ | ह्यस् | २९५९ इत्यादयः । |

### ४.१.१७ भाषाशब्दानां वर्णानुक्रमः

नेपलीभाषिणां संस्कृतजिज्ञासूनां कृते वर्णानुक्रम उपकारकोऽस्ति । स्तरीयनेपालीभाषायां पर्यायवाचिशब्दानन्वेष्टुमपि भाषाया वर्णानुक्रमोऽत्यावश्यकम् । संस्कृतभाषा नेपालीभाषाया जननी तस्मादपि समृद्ध्यर्थमस्योपयोगो भवति ।

| नामानि | प्रक्रमाङ्काः |
|---|---|
| अंकोट (अङ्कोल = अंकी) का | ७३७ |
| कचौडाका २ | १९१० |
| पहलवान्को १ | ३००३ |
| हलेदाका ५ | १८४५ इत्यादयः । |

## ४.२ स्वयंबोधिनीटीकाया न्यूनतावलोकनम्

यद्यपि कुलचन्द्रगौतमप्रणीतायां स्वयंबोधिनीटीकायां त्रुटयो मुद्रणविषये दृश्यन्ते नतु लेखनविषये तथापि ‘क्रमेलकः केलिवनं प्रविश्य निरीक्षते कण्टकजालमेव ।’ इत्युक्तिमवलम्व्य न्यूनताः स्थाप्यन्ते ।

### ४.२.१ प्रतिपृष्ठं वर्गाणामभावः

सर्वेषु कोशेषु प्रत्येकपृष्ठानां शीर्षभागे वर्गाणां नामानि तथा क्रमाङ्का भवन्ति । यथा प्रथमकाण्डे–

स्वर्गवर्गः १ । व्योमवर्गः २ । दिग्वर्गः ३ । कालवर्गः ४ । धीवर्गः ५ । शब्दादिवर्गः ६ । नाट्यवर्गः ७ । पातालभोगिवर्गः ८ ।नरकवर्गः ९ । वारिवर्गः १० ।

द्वितीयकाण्डे–भूमिवर्गः १। पुरवर्गः २। शैलवर्गः ३। वनौषधिवर्गः ४। सिंहादिवर्गः ५। मनुष्यवर्गः ६। ब्रह्मवर्गः ७। क्षत्रियवर्गः ८। वैश्यवर्गः ९। शूद्रवर्गः १०।

तृतीयकाण्डे– विशेष्यनिघ्नवर्गः १। सङ्कीर्णवर्गः २। नानार्थवर्गः ३। अव्ययवर्गः ४। लिङ्गादिसंग्रहवर्गः ५।

कुलचन्द्रस्यामरकोशे (२०२६) तु सर्वत्रैव वर्गनामान्यपि न सन्ति तथैवाङ्का अपि न सन्ति। तस्मात् कारणात् पाठकानां तथान्वेषकानामन्वेष्टुं काठिन्यं भवति।

टिप्पण्यामक्षराणां वाङ्कानामेकरूपता नास्ति

स्वयंबोधिनीटीकायाः कर्त्रा कुलचन्द्रेण टिप्पण्यामक्षराणि तथैवाङ्काश्च दत्ताः सन्ति। तथापि सर्वत्र ग्रन्थेऽक्षराणामङ्कानाञ्चैकरूपता न दृश्यते। सर्वप्रथमं ककारादारभ्य हकारपर्यन्तं ततोऽकारादारभ्य अः पर्यन्तम्, पुनः काकारादारभ्य हाकारपर्यन्तं ततः किखीत्यत्र क्रमः समाप्तोऽस्ति। ततः १,२ इत्यादयोऽङ्काः सन्ति। पुनश्चाक्षराणि चाङ्काश्च भग्नक्रमेण सन्ति। उपटिप्पण्यामङ्काश्चिह्नानि च सन्ति। अत्र कोशविज्ञानानुसारेण ग्रन्थे संघटनं नास्ति।

### ४.२.२ कामदेवस्य नामानि वानिरुद्धस्य ?प्र. ४७, (१|१|२८)।

कुलचन्द्रः कामदेवस्य नामान्येकोनविंशतिसंख्याकानि लिखति परन्तु भानुजिदीक्षित एकविंशतिसंख्याकानि  लिखति। तस्मात्कारणात् कुलचन्द्रस्य मतेऽनिरुद्धस्य नामानि चत्वारि भवन्ति भानुजिदीक्षितस्य मते त्वनिरुद्धस्य द्वे नामनी भवतः।यद्यपि टीकाकारेषु 'ब्रह्मसूऋष्यकेतुः' इत्यत्रमतभेदोऽस्ति तथापि द्वे नामन्यनिरुद्धस्योचिते स्याताम्।

### ४.२.३ किरणस्य नामानि  प्र. २२६, (१|३|३३)।

यद्यपि टीकाकारेण पर्यायवाचिशब्दप्रसङ्गे वैकल्पिकाः शब्दाः स्थापिताः सन्ति तथाप्यत्र 'रश्मि' शब्दस्य प्रसङ्गे वृष्णिशब्द एव दत्तोऽस्ति। अनेन प्रकारेण शब्दो दीयते तर्हि वैकल्पिकाः शब्दाः तु पाठभेदादन्येऽपि सन्ति। यथा– १.धृष्णिः, २.वृश्निः।

### ४.२.४ कषायरसस्य नामनी  प्र. ३१६, (१|५|९)। तुवर५/तूवर५

अत्र कुलचन्द्रो बकारवकारयोर्भेदं दर्शयति परन्त्वन्येषु कोशेषु ह्रस्वदीर्घयोर्भेदो दृश्यते। भानुजिदीक्षितश्च स्वकीयायां टीकायां ह्रस्वदीर्घयोर्भेदमुल्लिखति।

### ४.२.५ नरकस्य भेदाः– प्र.४९१, (१|९|१)  ।

| क्रमसंख्या. | नरकनामानि | क्रमसंख्या | नरकनामानि |
|---|---|---|---|
| **१** | तामिश्रः | **१५** | पूयोदः |

| | | | |
|---|---|---|---|
| २ | अन्धतामिश्रः | १६ | प्राणरोधः |
| ३ | रौरवः | १७ | विशसनम् |
| ४ | महारौरवः | १८ | लालाभक्षः |
| ५ | कुम्भीपाकः | १९ | सामेयादनम् |
| ६ | कालसूत्रम् | २० | अवीचिः |
| ७ | असिपत्रवनम् | २१ | अयःपानम् |
| ८ | सूकरमुखम् | २२ | क्षारकर्दमः |
| ९ | अन्धकूपः | २३ | रक्षोगणभोजनः |
| १० | कृमिभोजनः | २४ | शूलप्रोतः |
| ११ | सन्दंशः | २५ | दन्दशूकः |
| १२ | तप्तसूर्मिः | २६ | अवटनिरोधनः |
| १३ | वज्रकण्टकशाल्मली | २७ | पर्यावर्तनः |
| १४ | वैतरणी | २८ | सूचीमुखम् |

स्वयंबोधिन्याटिप्पण्यां चत्वारि नामानि नैव सन्ति ।[४०१]

यथा– ३.रौरवः, ४.महारौरवः, ६.कालसूत्रम्, २०.अवीचिः एतानि न सन्ति टिप्पण्याम् ।

### ४.२.६ परिशेषकोशस्याभावः

कुलचन्द्रेण प्रणीतः परिशेषः कोशोऽस्त्येव परन्तु नेपालराजकीयप्रज्ञाप्रतिष्ठानेन प्रकाशितेऽमरकोशे २०२६ तमे वैक्रमाब्दे तत्र परिशेषकोशस्य शब्दानां सूचीपत्रमन्तिमे भागे प्रत्तं तथापि परिशेषकोशो नैव स्थापितः । मुद्रणक्रमे त्रुटिः स्याद्वा । बालकृष्णाचार्य-लक्ष्मीनाथगौतमाभ्यां २०१७ तमे वैक्रमाब्दे प्रकाशितेऽमरकोशे तु परिशेषकोशोऽङ्गरूपेण स्थापितोऽस्ति । रत्नपुस्तकप्रकाशनेनापि २०६५ तमे वैक्रमाब्दे प्रकाशितेऽमरकोशे परिशेषकोशोऽङ्गरूपेण स्थापितोऽस्ति ।

### ४.२.७ अमरकोशपरिशेषः

अमरकोशपरिशेषस्य पृथगस्तित्वमस्ति, व्यावहारिकशब्दकोशः, परिशेषकोषः, इत्यादीनि नामानि सन्ति तथापि केषुचित् पुस्तकेष्वमरकोशस्य चतुर्थकाण्डत्वेन

[४०१] व्यास, **श्रीमद्भागवतमहापुराणम्,** (स्कन्ध ५, अध्यायः २६, श्लोकः ७), गोरखपुर : गीताप्रेस, पृष्ठः २५४ ।

स्वीकृतोऽस्ति । नेपालराजकीयप्रज्ञाप्रतिष्ठानेन २०२६ तमे वैक्रमाब्दे प्रकाशितेऽमरकोशेऽमरकोशपरिशेषो नास्ति तथापि शब्दानां सूची वर्णक्रमानुसारेणान्तिमे भागे प्रत्तास्ति मुद्रणप्रमादाद् भवेत् । अस्मिन् कोशे छात्राणां हिताय व्यावहारिका शब्दाः स्थापिताः सन्ति । तस्मादेव व्यावहारिकशब्दकोशः कथ्यतेऽसौ । स्वयं लिखति कुलचन्दो ग्रन्थादौ यथा –

**नामानि व्यवहार्याणां बोधयन् दिविषद्गिरा ।**

**छात्राणामुपयुक्तोऽयं परिशेषो विरच्यते ॥** ( परिशेषकोशः श्लोकः १ )

अत्रामरकोशपरिशेषे बाहुल्येन व्यावहारिकाः शब्दाः सन्ति । अमरकोशस्य परिशेषकोशत्वेन स्थापितेऽप्यमरकोशात् शब्दानानीय पौनरुक्तचं दृश्यते । यथा –

पूर्णपुनरुक्तिः –

जीवन्ती जीवनी जीवा जीवनीया मधुश्रवा । (अमरः वनौषधिवर्गः १४२ )

जीवन्ती जीवनी जीवा जीवनीया मधुश्रवा । (कुलचन्द्रः परिशेषकोशः २४ ) इति जीवन्तीशाकस्य पञ्च नामानि सन्ति । जिरीशाक इति भाषायाम् ।

फलपूरो बीजपूरो रुचको मातुलुङ्गके । ( अमरः वनौषधिवर्गः ७८ )

फलपूरो बीजपूरो रुचको मातुलिङ्गकः । (कुलचन्द्रः परिशेषकोशः ७८ ) इति बीजपूरफलस्य चत्वारि नामानि । बिमिरा इति भाषायाम् ।

श्रीपर्णिका कुमुदिका कुम्भी कैडर्यकट्फलौ ।( अमरः वनौषधिवर्गः ४० )

श्रीपर्णिका कुमुदिका कुम्भी कैटर्यकट्फलौ । (कुलचन्द्रः परिशेषकोशः ११० ) इति कट्फलस्य पञ्च नामानि । काफल इति भाषायाम् ।

मकरन्दः पुष्परसः परागः सुमनोरजः । ( अमरः वनौषधिवर्गः १७ )

मकरन्दः पुष्परसः परागः सुमनोरजः । (कुलचन्द्रः परिशेषकोशः ११० ) इति पुष्परसस्य द्वे सुमनोरजस्य च द्वे नामनी ।

आंशिकपुनरुक्तिः –

.......................................आढकी ।।

काक्षी मृत्ना तुवरिका मृतालकसुराट्रजे । ( अमरः वनौषधिवर्गः १३०-३१ ) इति तुवरीकायाः षट् नामानि ।

आढकी तुवरी वर्या काक्षी मृत्ना सुराष्ट्रजा ।

मृत्तालकं.......................................॥ ( कुलचन्द्रः परिशेषकोशः १० )

इति तुवरीकायाः सप्त नामानि ।

परिशेषकोशे यद्यपि पुनरुक्तयः सन्ति तथापि स्वयं लिखति कुलचन्द्रः क्वचित् पुनरुक्तिर्दोषो न भवति । –

नाम्नां प्रसङ्गतः प्राप्तं तत्प्राचुर्याय दर्शितम् ।

क्वचित्क्वचिद्वर्तमानं पौनरुक्त्यं न दुष्यति ॥ ( कुलचन्द्रः परिशेषकोशः १८७ )

### ४.२.८ आदर्शरूपावल्यामव्ययस्य प्रसङ्गाभावः

स्वयंबोधिनीटीकायाममरकोशस्य शब्देष्वप्यव्ययशब्दानामग्रे वर्णक्रमे रूपावल्याः १८२ अङ्का दत्ताः सन्ति परन्त्वादर्शरूपावल्यां १८२ अङ्का एव न सन्ति । तत्राव्ययानां रूपाणि नभवन्तीति वाक्यं लेखनीयमासीत् ।

### ४.२.९ वकारस्य बकारः

शैवालशब्दस्य प्रसङ्गेऽस्मिन् ग्रन्थे मूले टीकायां च वकारस्य बकारोऽस्ति यथा – **शैवालस्य नामनी**प्र. ५७४, (१।१०।३८) ।**शैवाल३/शेवाल३**

शैवालम् – जले शेते =तिष्ठतीति विग्रहे 'शीङो धुक्लक्वलञ्वालनः' (उ.४.३८) इति वलञ्प्रत्यये शी वल इति जाते 'अचो ञ्णिति' (पा.७।२।११५) इति वृद्धौ स्वादिकार्ये शैवालइति सिद्धम् ।

शेवालः – पूर्वसूत्रेणैव बाहुलकात् वालन्प्रत्यये गुणे शेवालः सिद्धम् । तथाऽन्येषु पुस्तकेष्वपि वकार एव दृश्यते ।

### ४.२.१० आगमशब्दस्यार्थाभावः

**वृक्षस्य नामनी**प्र. ६९०, (२।४।५) ।**अगम१/आगम१**

–अगमः – न गच्छतीति विग्रहे 'गम्लृ गतौ' (भ्वा.प.अ.) इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा.३।१।१३४) इत्यच्प्रत्यये नञ्समासेऽगम इति ।

–आगमः – आ = समन्तात् गच्छतीति विग्रहे 'आगमः' वृक्षार्थेऽयं शब्दो न दृश्यते ।?

### ४.२.११ द्विरूपमज्जीशब्दाभावः

**वृक्षादेः स्थिरांशस्य नामनी** प्रक्रमाङ्कः ७०४, वनौषधिवर्गः(४) श्लोकः१२, **मज्जन्१/मज्जी२**

–मज्जा – मज्जतीति विग्रहे ‘टुमस्जो शुद्धौ’ (तु.प.अ.) इति धातोः ‘श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्धन्मज्जन्नर्यमन्विश्वप्सन्परिज्मन्मातरिश्वन्मघवन्निति’ (उ.१।१५७) इति निपातनात् कनिन्प्रत्यये स्वादिकार्ये ‘मज्जा’ इति ।

–मज्जी – अयं शब्दः कुत्रापि न प्राप्यते ।

### ४.२.१२ स्त्रीलिङ्गनेमिशब्दस्याभावः

**तिनिशस्य नामनी**प्र.७३२, (२।४।२६) । **नेमि१/नेमी१**

–नेमिः – नयतीति विग्रहे ‘णीञ् प्रापणे’ (भ्वा.प.से.९०१) इति धातोः ‘नियो मि’ (उ.४।४३) इति मिप्रत्यये ‘नेमिः’ इति सिद्धम् । ‘साधन’ इति भाषायाम् ।

–नेमी – ‘पुंलिङ्गस्तिनिशे नेमिश्चक्रप्रान्ते स्त्रियामपि’ इति रुद्रः(भानुजिः) । अत्र मूले तु ‘ढ्रलोपे पूर्वस्य दीर्घोऽणः’ (पा.६।३।१११) इति दीर्घस्तस्मादत्र दीर्घ रूपं नोपयुक्तम् ।

### ४.२.१३ शोभाञ्जनशब्दस्य न्यूनरूपे

**शोभाञ्जनस्य नामनी**प्रक्रमाङ्कः ७४१, वनौषधिवर्गः(४) श्लोकः३०, **शोभाञ्जन१/सौभाञ्जन१**

–शोभाञ्जनः – शोभामनक्तीति विग्रहे ‘अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु’ (रु.प.से.१४५८) इति धातोः ‘कृत्यल्युटो बहुलम्’ (पा.३।३।११३) इति कर्तरि ल्युट्प्रत्यये ‘युवोरनाकौ’ (पा.७।१।१) इत्यनादेशे ‘शोभाञ्जनः’ इति ।

–शौभाञ्जनः –शोभाञ्जन एवेति विग्रहे ‘प्रज्ञादिभ्यश्च’ (पा.५।४।३८) इत्यणि ‘शौभाञ्जनः’ इति ।

–सुभाञ्जनः – सुष्ठु भा तामनक्तीति विग्रहे ‘अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु’ (रु.प.से.) इति धातोः ‘कृत्यल्युटो बहुलम्’ (पा.३।३।११३) इति कर्तरि ल्युट्प्रत्यये ‘युवोरनाकौ’ (पा.७।१।१) इत्यनादेशे ‘सुभाञ्जनः’ इति ।

–सौभाञ्जनः – सुभाञ्जन एवेति विग्रहे ‘प्रज्ञादिभ्यश्च’ (पा.५।४।३८) इति सूत्रेण स्वार्थेऽण्नप्रत्यये ‘सौभाञ्जनः’ इति । ‘सहेंज’ इति भाषायाम् । कुलचन्द्रस्तु द्वितीयतृतीये रूपे नैव ददाति ।

### ४.२.१४ प्लक्षस्य नामनी प्र.७४४, (२।४।३२) । जटिन्१/जटी२

–जटी – जटा अस्य सन्तीति विग्रहे ‘अत इनिठनौ’ (पा.५।२।१५)इतीन्प्रत्यये स्वदिकार्ये जटीति सिद्धम् ।

–जटिः – जटतीति विग्रहे ‘जट संघाते’ (भ्वा.प.से.) इति धातोः ‘सर्वधातुभ्य इन्’ (उ.४।११८) इतीन्प्रत्यये ‘जटिः’ इति ।

– जटिशब्दात् 'कृदिकारादक्तिनः' (ग.सू.४।१।४२) इति वा ङीषि जटीति सिद्धम् । कुलचन्द्रस्तु द्वितीयं रूपं 'जटिः' इति नैव ददाति ।

### ४.२.१५ तिन्तिडीशब्दस्य रूपत्रयाभावः

**तिन्तिड्यानामनी** प्र.७६६, (२।४।४२) **अम्लिका२/आम्लीका२/आम्लिका२ ।**

–अम्लिका – अमयति रुजत्यरुचिमिति विग्रहे 'अम रोगे' (चु.प.से.) इति धातोः बाहुलकात्क्लप्रत्यये 'अम्लः' इति । अम्लो रसोऽस्यास्तीति विग्रहे 'अत इनिठनौ' (पा.५।२।११५) इति ठन्प्रत्यये टापि स्वादिकार्ये 'अम्लिका' सिद्धम् ।

(ख)आम्लीका –'अलीकादयश्च' (उ.४।२५)इति निपातितः ।

–आम्लिका – पूर्ववत् बाहुलकात् ।

–अम्ब्लिका – अम्ब्यते शब्द्यते भोक्तृभिरिति विग्रहे 'अबि शब्दे' (भ्वा.प.से) इति धातोः 'मूशक्यबिभ्यः क्लः' (उ.४।१०८) इति क्लप्रत्यये 'अम्लः' इति । अम्ब्लो रसोऽस्यास्तीति विग्रहे 'अत इनिठनौ' (५।२।११५)इतिठन्प्रत्यये टाप्युपान्तस्याऽकारस्येत्वे स्वादिकार्ये 'अम्ब्लिका' इति सिद्धम्

–अम्ब्लीका –'अलीकादयश्च' (उ.४।२५)इति निपातितः ।

–आम्ब्लीका – पूर्ववत् बाहुलकात् [४०२] ।अत्र कुलचन्द्रस्त्वन्तिमानि त्रीणि रूपाणि नैव ददाति ।

### ४.२.१६ चिरबिल्लशब्दस्य समग्ररूपाप्रदर्शनम्

**चिरिबिल्वस्य नामनी** प्र.७७४, (२।४।४७) **चिरिबिल्व१/चिरबिल्ल१ ।**

–चिरिबिल्वः – चिरिं बिलतीति विग्रहे 'बिल भेदने' (तु.प.से.) इति धातोः बाहुलकाद् वप्रत्यये 'चिरिबिल्वः' इति रूपं सिद्धम् ।

–चिरबिल्लः – चिरं बिलं लातीति इति विग्रहे 'ला आदाने दाने च' (अ.प.अ.) इति धातोः 'आतोऽनुपसर्गे कः' (पा.३।२।३) इति कप्रत्यये निपातनादकारलोपे 'चिरबिल्लः' इति (आप्टेः)।

–चिरिविल्वः – चिरिं विलतीति विग्रहे 'विल भेदने' (तु.प.से.) इति धाताोः बाहुलकाद् वप्रत्यये 'चिरिविल्वः' इति रूपं सिद्धम् ।

---

[४०२]'अम्ब्लीका चाम्ब्लिका चिञ्चा तिन्तिडीका च तिन्तिला' इति चन्द्रः । भानुजिदीक्षितः, ***अमरकोशः*** (सुधाटीका २.४.४३), वाराणसी : चौखम्बा विद्याभवन, सन्.२०११, पृ.१४३ ।

–चिरविल्लः – चिरं विलं लातीति विग्रहे 'ला आदाने दाने च' (अ.प.अ.) इति धातोः 'आतोऽनुपसर्गे कः' (पा.३।२।३) इति कप्रत्यये निपातनदकारलोपे 'चिरविल्लः' इति। उपपदशब्दभेदेन, धातुभेदेन, प्रत्ययभेदेन चानेकरूपाणि भवन्ति तथापि कुलचन्द्रो रूपद्वयं ददाति।

### ४.२.१७ केषाञ्चन क्षेपकाणामभावः

कुलचन्द्रः स्वयंबोधिन्यां टीकायां मूलेऽनेकान् क्षेपकशब्दान् ददाति परन्तु काञ्चन नैव ददाति। तेषां संग्रहोऽत्र दीयते। व्याख्यां तु करोत्येव नेपालीभाषायां कासाञ्चन।कश्चन क्षेपकश्लोको विविधसंस्करणेषु प्राप्यते –

**सप्तमातृणां नामानि**प्रथमं काण्डम्, स्वर्गवर्गः(१), श्लोकः ३६।

ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा।
वाराही च तथेन्द्राणी चामुण्डा सप्तमातरः ॥ १ ॥

**अष्टसिद्धीनां नामानि**प्रथमं काण्डम्, स्वर्गवर्गः(१), श्लोकः ३६।

अणिमा महिमा चैव गरिमा लघिमा तथा।
प्राप्तिः प्रकाम्यमीशित्वं वशित्वं चाष्टसिद्धयः ॥ १ ॥

**दधिकूर्चिकायास्तक्रकूर्चिकायाश्च प्रसङ्गः**द्वितीयं काण्डम्, वैश्यवर्गः(९), श्लोकः ४४।

दध्ना सह पयः पक्तं यत्तत्स्याद्दधिकूर्चिका।
तक्रेण पक्तं यत्क्षीरं सा भवेत् तक्रकूर्चिका[४०३] ॥ १ ॥

### ४.२.१८ तात्कालिकनेपालीभाषाप्रयोगप्रदर्शनम्

भाषा नदीवत् सदा प्रवहति परिवर्तनशीला भवति च। तस्याः रोद्धुं कोऽपि न सक्नोति। केवलं व्याकरणमेव तटस्थं तिष्ठति। यथा पूर्वं वैदिकभाषाऽऽसीत्पश्चात्कालक्रमेण संस्कृतभाषाऽभूत् प्रतिष्ठिता। एवमेव प्राकृतभाषा, नेपालीभाषा, हिन्दीभाषैत्यादयोऽधुना दृश्यन्ते सर्वत्र। तथैव नेपालीभाषाऽपि कालक्रमेण परिवर्तमानास्ति। यथा भानुभक्तस्य समये नेपालीभाषाऽऽसीत्तथाधुना तादृशी भाषा नास्ति। यथा संस्कृतभाषाया व्याकरणमस्ति तथा नेपालीभाषाया व्याकरणं नास्त्येव। काले काले नेपालीभाषायां विचलनक्रिया दृश्यत एव। तस्मात्तादृशाः शब्दा अत्र प्रस्तूयन्ते। यथा – 'ई, जो छ सो, केहि, ठुला, कन भये गरि' की? आम्नी इत्यादयः।

---

[४०३] त्रिपाठी ब्रह्मानन्दः, **अमरकोशः** (हिन्दी व्याख्या), वाराणसी : चौखम्बा सुरभारती प्रकाशन, सन् १९९६।

– ‘अस्य जनकः ( **ई** कृष्णका पिता **जो छन्सो** ) वसुदेवः ( वसुदेव कहिन्छन् ) । (प्र. ३८, स्व.व. २३ )

– तस्य सूतः ( इन्द्रको सारथि **जो छ सो** ) मातलिः ( मातलि कहिन्छ ) मातलि १, १ इन्द्रका सारथिको नाम तस्य वनम् ( इन्द्रको वगैंचा **जो छ सो** ) नन्दनम् ( नन्दन कहिन्छ ) नन्दन ३ १ इन्द्रका वघैंचाको नाम (प्र.९३, स्व.व. ४८ )

– सत्त्वम् रजः तमः गुणाः (सत्त्व-रज-तम **ई** ३ गुण कहिन्छन् ) गुण १, १ सत्त्वरजतम **ई**३गुणको नाम (प्र. २९२, का.व. २९ )

– अध्यक्ष १, अधिकृत १, २ अध्यक्ष ( **केहि** काममा-मालिक-**तुल्याइयेका** )का नाम` (प्र.१५३४, क्ष.व.७ )

सेनाङ्ग ३ , हात्ती , घोडा, रथ, सिपाही **ई** ४ को नाम (प्रक्रमाङ्कः १५९०, क्ष.व. ३३ )

ऐश्वर्यस्य, समग्रस्य, धर्मस्य, यशस,ः श्रियः, ।

ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥ ( **ई** ६-लाई षडैश्वर्य भन्दछन्, **ई** हुने-लाई भगवान् भन्दछन् ) । (प्र. २४७०, ना.व. ३६ )

–महत् ७ **ठुलाको** नाम (प्र.२५५६, ना.व.७९ )

–स्फूर्तिमती धीः प्रभिभा (स्फूर्तिले-युक्त-**भयेकी**= नयाँनयाँ-कल्पना-गर्ना-सक्ने = फुर्तिबाज-**भयेकी** बुद्धि प्रतिभा कहिन्छ । प्रतिभा २ १ कल्पनाकुशल-**भयेकी** बुद्धिको नाम विवेकिनी सैव पण्डा ( विवेकवती-त्यही-बुद्धि पण्डा कहिन्छे) पण्डा २‸ १ विवेकवती बुद्धिको नाम “ यही-पण्डा-हुने-लाई पण्डित भन्दछन् ” धारणावती धीः मेधा (देखेसुनेको-कुरा-संभ्कीराख्ने-बुद्धि मेधा कहिन्छे) मेधा २‸ १ धारणागर्ने बुद्धिको नाम ( प्र. २९९-३००, धीव. २ )

–सन्धि १, विग्रह १, यान ३, आसन ३, द्वैध ३, आश्रय १‸ ६ सन्धि-आदि ६ गुणका १ १ नाम आफुभन्दा -बलियो-अथवा-बरोवर-**भयेका**-शत्रुलाई, **केहिदियेर** मिलाई राख्नालाई “सन्धि”भनदछन् । यो सन्धिका धेरै भेद छन् नीतिशास्त्र हेर । शत्रुको देशमा-आगो-लगाईदिनू-लूट्नू-इत्यादि-उपद्रवलाई ‘विग्रह’, फौजलिई, शत्रुलाई-थाहादिई अथवा तेसै-चडाई-गर्नालाई ‘यान’ , शत्रुबलवान् छ भन्ठानेर फौज, किल्ला, तयार **गरि** परि-आयेको-गर्नु-पर्ला भन्ने-हिसावले वाटो-हेर्नालाई ‘आसन’ , बलवान्को मद्दत् मागेर, औसर परेमा सिध्याउँला ऐले मेलै गरौं भन्ने विचार **गरि**

शत्रुसँग मिलेझै गर्नालाई 'द्वैध' , शत्रुले साह्रै दुःखदिदा बलवान्-अर्को-राजाको शरण-लिनलाई 'आश्रय' , **ई** ६ कर्मलाई 'षड्गुण' भन्दछन् । ( प्रक्रमाङ्कः १५६०, क्ष.व.१८ )

### ४.२.१९ क्रियायां स्त्रीलिङ्गत्वम्

सर्वासु भाषासु लिङ्गव्यवस्था दृश्यत एव तथापि प्रत्येकभाषायां यादृच्छिकता प्राप्यते । तस्माद्यथा संस्कृते लिङ्गव्यवस्था वर्तते तथा नेपाल्यां किञ्चित् पृथक् तत्त्वं प्राप्यते ।नगरी, पुरी, दया, करुणेत्यादीनां शब्दानां संस्कृते येन प्रकारेण प्रयोगो भवति तेन प्रकारेण नेपाल्यां न भवति तथापि संस्कारवशात् प्रयोगो दृश्यते । यथा संस्कृते – नदी वहन्ती वर्तते । इत्यत्र नेपाल्यां – नदी बग्दै छ । इत्यत्र नेपालीभाषायां क्रियायां प्रभावोऽत्र सर्वत्र न दृश्यते तथापि केचन विद्वांसः प्रयोगं कुर्वन्ति स्म । अधुनैतादृशः प्रयोगो न भवति –

–गदा ( गदा जो **छे** सो ) कौमोदकी ( कौमोदकी **कहिन्छे** ) कौमोदकी २ (कौपोदकी २ ) १ विष्णुका गदाको नाम (प्र. ५२, स्व.व.३० )

–तस्य नगरी तु ( इन्द्रको पुरी ता ) अमरावती ( अमरावती **कहिन्छिन्** ) अमरावती २ १ इन्द्रका पुरीको नाम (प्र. ९२, स्व.व.४८ )

–पुष्ययुक्ता ( पुष्य नक्षत्रले-युक्त-**भयेकी** ) पौर्णमासी ( पूर्णिमा जो **छे** सो ) पौषी ( पौषी **कहिन्छे** ) पौषी २ १ पुष्यनक्षत्रले-युक्त भएका पूर्णिमाको नाम सा यत्र मासे भवति (त्यो पौषीपूर्णिमा जुन् महिनामा **हुन्छे** ) सः मासः पौषः ( त्यो महिना पौष कहिन्छ ) पौष १ १ पौषीपूर्णिमाले-युक्त-भएका-महिनाको नाम अपरे माघाद्याःएकादश एवम् ( अरु-माघ-आदिगरेका-१ १ महिनाका -नाम पनि यस्तै व्युत्पत्तिले सिद्ध हुन्छन् ) ( प्र. २६०, का.व.१४ )

–स्फूर्तिमती धीः प्रतिभा ( स्फूर्तिले-युक्त-**भयेकी**= नयाँनयाँ-कल्पना-गर्न-सक्ने = फुर्तिबाज - **भयेकी** बुद्धि प्रतिभा कहिन्छ । प्रतिभा २ , १ कल्पनाकुशल - **भयेकी** बुद्धिको नाम विवेकिनी सैव पण्डा ( विवेकवती-त्यही-बुद्धि पण्डा **कहिन्छे** ) पण्डा २ १ विवेकवती बुद्धिको नाम " यही-पण्डा-हुने-लाई पण्डित भन्दछन् " धारणावती धीः मेधा (देखेसुनेको-कुरा-संझीराख्ने-बुद्धि मेधा **कहिन्छे** ) मेधा २ , १ धारणा गर्ने बुद्धिको नाम ( प्र. २९९-३००, धीव. २ ) ।

### ४.२.२० हिन्दीभाषायाः प्रभावः

विदुषां लेखनक्रमे रचनाक्रमे वा नेपालीभाषायां हिन्दीभाषायाः प्रभावः कुत्रचित् दृश्यते । तथैवाऽत्राऽपि केचन हिन्दीभाषायाः शब्दाः प्राप्यन्ते । शब्दभण्डारक्रमे

वाऽऽवश्यकतानिवारणे च तेषां प्रयोगं कर्तुं शक्यते। तद्वत् कुलचन्द्रोऽपि हिन्दीभाषायाः शब्दानां कुत्रचित् प्रयोगं करोति ' जी ' इत्यादीन् शब्दान् –

अस्य जनकः ( ई कृष्णका पिता जो छन्सो ) वसुदेवः ( वसुदेव कहिन्छन् ) स एव ( उनै वासुदेव ) आनकदुन्दुभिः ( आनकदुन्दुभि पनि कहिन्छन् ) वसुदेव १, आनकदुन्दुभि १, २ **कृष्णजीका**-पिता (वसुदेव )का नाम ( प्र.३८, स्व.व. २३ )

– ओ र (भले **आद्यी**) निधारमा विभूतिले उज्याला भयेका तिमी होउ की ? । (प्र. २८८६, तृ. का., ना.व. २४२ टि.८)

## ४.२.२१ विष्वद्रचङ्शब्दस्य रूपाप्रदर्शनम्

सूच्यां विष्वद्रचङ्शब्दोऽस्ति परन्तु रूपावल्यां तस्य रूपाणि न सन्ति। (९७ ) अङ्का अपि न प्राप्यन्ते।

## ४.२.२२ लिङ्गाभावः

दिव् – वकारान्तः पुंस्त्रीलिङ्गः व्योमवाची दिव्-शब्दः। 'द्योदिवौ द्वे स्त्रियाम्' ( अमरः स्व.व.६, व्यो.व.१ ) पुंसि – द्यौः दिवौ दिवः। स्त्रियाम् – पुंवत्। कुलचन्द्रस्तु प्रमादाद्वा पुंलिङ्गं न लिखति (रू. १५५,पृ.२२७ )।

## ४.२.२३ रूपावल्यां धनुश्शब्दस्य स्थाने दुर्मनश्शब्दस्य प्रयोगः

आदर्शरूपावल्यां तत्र १६८ तमे क्रमे सूचीपत्रे धनुश्शब्दस्य नामाऽस्ति परन्त्वग्रे दुर्मनश्शब्दस्य रूपाणि दत्तानि सन्ति। धनुश्शब्दस्य रूपाणि तु नैव दत्तानि। ( कुलचन्द्रः पृ.६३३ )

## ४.२.२४ विश्ववाह्-द्रुह्-मुह्शब्दानां रूपाप्रदर्शनम्

कुलचन्द्रेणादर्शरूपावल्यां विश्ववाह्शब्दस्य १७४ तमे द्रुह्शब्दस्य १८० तमे मुह्शब्दस्य १८१ तमे सूचीक्रमे विशेष्यनिघ्नशब्दा उक्तास्तथापि तत्र पुंलिङ्गस्य सर्वाणि रूपाणि सन्ति परन्तु स्त्रीनपुंसकलिङ्गयोः सर्वाणि रूपाणि नैव दत्तानि प्रमादाद् भवेद्वा मुद्रणे त्रुटिर्भवेत्। ( कुलचद्रः पृ.६३१-३२ )

## ४.२.२५ अर्थासङ्गतिः

विदुषा शिवराजाचार्यकौण्डिन्न्यायनेन पञ्चयज्ञ-प्राग्वंश-सामिधेनी-धाय्या-उत्तरारणि-आनाय्य-और्ध्वदेहिक-आतिथ्य-पादग्रहणादिशब्दानामर्थ आलोचितः।[४०४८]परन्तु तेन केवलं धार्मिकदृष्ट्या दृष्टः ।

## ४.२.२६ केषाञ्चनापशब्दानां दिग्दर्शनम्

१.क्षीरसागर कन्यका – क्षीरसागरकन्यका, (प्र.: ५०, (१।१।२९) पृ.८ प.५) ।

२.मुरारे – मुरारेः, (प्र. ५३, (१।१।३०) पृ.८, प.२४ ।

३.पतच्रिराजः – पतत्रिराजः, (प्र.५७, (१।१।३१)पृ.९, प.३३ ।

४.सूर्याचन्द्रमसौ – सूर्यचन्द्रमसौ, (प्र.६८, (१।१।३७) पृ.१०, प.२० ।

५.शृङ्गी – भृङ्गी, प्र.८२, (१।१।४३) पृ.११, प.९ ।

६.दहस्रलोचनः – सहस्रलोचनः, प्र.९१, (१।१।४७)पृ.१२, प.३३ ।

७.पुलोमजा १ – पुलोमजा २, प्र.९२, (१।१।४८) पृ.१२, प.१९ ।

८.कर्बरः १ – कर्वरः १,(प्र.१२४, (१।१।६३) पृ.१५, प.२७ ।

९.ऐलबिलः १ – ऐलविलः १, प्र.१४४, (१।१।७३) पृ.१७, प.१५ ।

१०.मकर कच्छपो – मकरकच्छपौ, (प्र.१४८, (१।१।७५) पृ.१८, प.२१ ।

११.ऐरात्रती – ऐरावती, प्र.१७४, (१।३।९) पृ.२२, प.१६ ।

१२.सौदामिनी–इति त्वपपाठ इति भानुजिदीक्षितोऽलिखत् ।(प्र.१७५, .(१।३।९) पृ.२२, प.१७ ।

१३.शराधरः – शशधरः प्र.१८६, (१।३।२३) पृ.२३, प.१० ।

१४.तारा का २ – तारका २, प्र.१९८, (१।३।२१) पृ.२४, पृ.१८ ।

१५जाति – जति, प्र.२५३, (१।४।११) पृ.३२, प.१२ ।

१६.मेधा १ – मेधा २, प्र.३००, (१।५।२) पृ.३८, प.१९ ।

१७.ऊहापोहोर्थऽविज्ञानं – ऊहापोहोऽर्थविज्ञानं, प्र.३००, (१।५।२) पृ.३८, प.३५ ।

१८.दण्डनीति र्स्कविद्यार्थशास्त्रयोः – दण्डनीतिस्तर्कविद्यार्थशास्त्रयोः, प्र.३४२, (१।६।५) पृ.४३, प.१० ।

१९.ओंकार १, प्रणव २, – ओंकार १, प्रणव १,प्र. ३४०, (१।६।४) पृ.४३, प.२५ ।

२०.मृगात्ः सिंह पलायते – मृगात् सिंहः पलायते, प्र.३४६, (१।६।७) पृ.४५, प.३२ ।

२१.विव्वोकस्त्वनिगर्वेण – विव्वोकस्त्वतिगर्वेण, प्र.४५१, (१।७।३१) पृ.५९, प.१८ ।

---

[४०४८] कौण्डिन्न्यायन शिवराजः आचायः, **मर्यादा** (अङ्कः १७, सम्पा.नीलमणि ढुङ्गाना आदि), काठमाण्डौ : वल्मीकिविद्यापीठम्, वि.स.२०४३, पृ.७-१२ ।

२२.आशी स्तालुगता दंष्ट्रा – आशीस्तालुगता दंष्ट्रा, प्र.४८४, .(१।८।९) पृ.६३, प.२९ ।

२३.दर्षाभ्वी – वर्षाभ्वी, प्र.५४५, (१।१०।२४) पृ.६९, प.३ ।

२४.शैबालं शैबलोऽथ – शैवालं शैवलोऽथ, प्र.५७४, (१।१०।३८) पृ.७१, प.९ ।

२५.शैबाल ३, (शेबाल ३), शैबल ३ – शैवाल ३, (शेवाल ३), शैवल ३,प्र.५७४,(१।१०।३८) पृ.७१, प.३० ।

२६.सरतीरुह ३ – सरसीरुह ३, प्र.५७८, (१।१०।४०) पृ.७१, प.३४ ।

२७.वि(पि)ष्ट्रप ३ – वि(पि)ष्टप ३, प्र.५९५, (२।१।६) पृ.७३, प.२९ ।

२८.साल २ (२ परखालका नाम) – साल १ (३ परखालका नाम), प्र.६२८, (२।२।४) पृ.७६, प.२० ।

२९.पत्स्य ३ (वत्स्य ३) – पस्त्य ३ (वस्त्य ३), प्र.६६१, (२।२।५) पृ.७७, प.१७ ।

३०.चंद्रशाला – चन्द्रशाला, प्र.६३९, (२।२।९) पृ.७७, प.८ ।

३१.संमार्जनि – संमार्जनी, प्र.६५९, (२।२।१८) पृ.७८, प.१३ ।

३२.शिखिरः – शिखरः, प्र.६६९,(२।३।३) पृ.८०, प.३४ ।

३३.बुध्न १ (मज्जी) – बुध्न १, प्र.७०३, (२।४।१२) पृ.८३, प.२६ ।

३४.(जामकव ३) – जाम्बव ३, प्र.७१७, द्वि.का., व.व.(२।४।१९) पृ.८४, प.२४ ।

३५.(अभ्रातक १) – अम्रातक १, प्र.७३४, (२।४।२७) पृ.८५, प.२९ ।

३६.शे(सें)लु १ – शे(से)लु १, प्र.७४८, (२।४।३४) पृ.८६, प.२७ ।

३७.रण्डा १ – रण्डा २,प्र.८५५, (२।४।८८) पृ.९३, प.२७ ।

३८. कर्पासी – कार्पासी, प्र.९११, (२।४।११६) पृ.९८, प.१६ ।

३९.मृङ्गराजः – भृङ्गराजः, प्र.९८२,(२।४।१५१) पृ.१०४, प.७ ।

४०.शाकभेदाः स्पुदूर्वा – शाकभेदाः स्युदूर्वा, प्र.९९५, (२।४।१५८) पृ.१०५, प.४ ।

४१.कान् – कानू, प्र.१०१९, (२।४।१६९) पृ.१०७, प.१४ ।

४२.मधव्रत १ – मधुव्रत १, प्र.१०८१, (२।५।२९) पृ.१११, प.३३ ।

४३.स्त्रीकद्याः – स्त्रीकट्याः, प्र.१२६१, (२।६।७४) पृ.१२५, प.१३ ।

४४.स्मेत ज्मा ८ – समेत जम्मा ८, प्र.१५५९, (२।८।१८) पृ.१४८, प.२३ ।

४५.कराउनी – कुराउनी, प्र.१८५१, (२।९।४४) पृ.१७१, प.२३ ।

४६.ञाचार – आचार, प्र.१८७७, (२।९।५६) पृ.१७२, प.३३ ।

४७.हालिकसैरिको – हालिकसैरिकौ, प्र.१८९३, (२।९।६४) पृ.१७३, प.१७ ।

४८.सरिक १ – सैरिक १, प्र.१८५१, (२।९।४४) पृ.१७४, प.१६ ।

४९.अन्जम् – अब्जम्, प्र.१९३३, (२।९।८४) पृ.१७७, प.१५ ।

५०.शङ्कव स्तस्मात् – शङ्कवस्तस्मात्, प्र.१९३३, (२।९।८४) पृ.१७७, प.२५ ।

५१.अलब्योचिताध्यापकानां – अलब्धोचिताध्यापकानां, प्र.२०८०, (२।१०।४७) पृ.१८९, प.१५ ।

५२.रहस्युपतिषत् – रहस्युपनिषत्, प्र.२५८५, (३।३।९३) पृ.२३५, प.८ ।

५३सर्षपशैलराजयोः स्तदन्तरं – सर्षपशैलराजयोस्तदन्तरं, प्र.२७७५, (३।३।१८७) पृ.२५०, प.२९ ।

५४.यत्नेमन्तरसेवत्त्वं सत्त्वरं – यत्नमन्तरमेवत्वं सत्वरं, प्र.२७७५, (३।३।१८३) पृ.२५१, प.१२ ।

५५प्रसरत्नि – प्रसरन्ति, प्र.२८८२, (३।३।२४०) पृ.२६०, प.९ ।

५६.आसू – आः(आस्), प्र.२८८२, (३।३।२४०) पृ.२६०, प.१६ ।

५७.त्त्वम् – त्वम्, प्र.२८८३, (३।३।१४०) पृ.२६१, प.४ ।

५८.गत्त्वा – गत्वा,प्र.२८८४, (३।३।२४१) पृ.२६१, प.१६ ।

५९.द्रष्टुमुत्सष्टकार्या – द्रष्टुमुत्सृष्टकार्या, प्र.२८८९, (३।३।२४३) पृ.२६३, प.२३ ।

६०.साऽय मायातिकालः – सोऽयमायाति कालः, प्र.२८८९, (३।३।२४३) पृ.२६४, प.५ ।

६१.वतः पुत्रैश्च – वत र पुत्रैश्च, प्र.२८९०, (३।३।२४४) पृ.२६४, प.११ ।

६२.जानकीनाथ सद्गुणान् – जानकीनाथसद्गुणान्, प्र.२८९१, (३।३।२४४) पृ.२६४, प.१७ ।

६३.इत्त्थंभूताख्यान – इत्थंभूताख्यान, प्र.२८९२, (३।३।२४५), पृ.२६५, प.४ ।

६४.पीता – प्रीता, प्र.२८९२, (३।३।२४५) पृ.२६५, प.१० ।

६५.प्रकासादि समाप्तिषु – प्रकासादिसमाप्तिषु, प्र.२८९३, (३।३।२४५) पृ.२६६, प.२ ।

६६.मत्सूनु रित्युक्त्वा – मत्सूनुरित्युक्त्वा, प्र.२८९३, (३।३।२४५) पृ.२६६, पङ्क्तिः१९ ।

६७.श्रीमद्दासरथि प्रथिता – श्रीमद्दासरथिप्रथिता, प्र.२८९३, (३।३।२४५) पृ.२६६, प.२० ।

६८.वदनमुदज्वय - वदनमुज्ज्वलय, प्र.२८९९, (३।३।२४८) । पृ.२६८, प.१८ ।

६९.जोषमारस्व – जोषमास्स्व, प्र.२९०४, (३।३।२५१) ।पृ.२७०, प.१४ ।

७०कव्युजित्रङ्निशा – क्यब्युजित्रङ्निशा, प्र.२९७०, (३।५।४) पृ.२९३, प.३ ।

७१.त्रिखद्व – औचित्य, (रू.९, पृ.५९१, प.१०)

७२.विष्वध्रञ्च् – विष्वद्र्यङ्, (रू.९७, पृ.५९२, प.४)

७३.सुधी – सुधीः, (रू.६२, पृ.६०५, प.२५)

७४.धेन्वै – धेनवे, (रू.६४, पृ.६०६, प.१८)

७५धेनौः – धेनोः, (रू.६४, पृ.६०६, प.१९)

७६.पङ्ग – पङ्गु, (रू.६९, पृ.६०६, प.३७)

७७.पङ्गूनी – पङ्गूनि, (रू.६९, पृ.६०६, प.३७)

७८.तिरवाची – नौकावाची, (रू.८८, पृ.६११, प.२४)

७७.पृषन्-शब्दः – पृशत्-शब्दः, (रू.१०३, पृ.६१५, प.३३)

८०.मकारान्तः – नकारान्तः, (रू.१३१, पृ.६२२, प.१४)

८१.अवतः – अर्वतः, (रू.१३४, पृ.६२३, प.२३)

७२.अर्वना – अर्वता, (रू.१३४, पृ.६२३, प.२४)

८३.सान्तः – षान्तः, (रू.१६२, पृ.६२८, प.१९)

८४.आशिये – आशिषे, (रू.१६२, पृ.६२८, प.२४)

८५.१०८ – १८०, (रू.१८१, पृ.६३२, प.२४)

## ४.२.२७ अध्यायनिष्कर्षः

टीकाकारेण कुलचन्द्रगौतमेन 'परिशेषकोशः' रचितोऽस्ति। तस्य शिष्येण बालकृष्णचार्येण 'अमरकोशपरिशेषः' नामधेयः कोशोऽमरकोशस्य चतुर्थकाण्डरूपेण स्थापितः। अन्यत्र पृथगस्तित्वमपि वर्तत एव। अस्यापरं नाम व्यवहारकोशोऽप्यस्ति स्वयं मूले लिखति कुलचन्द्रः। अस्मिन् प्रबन्धे तत्रत्याः शब्दा व्याकरणद्वारा विवृताः।

अस्यां टीकायामादर्शरूपावल्यपि दत्तास्ति। टीकाकारेण वैयाकरणसिद्धान्तकौमुदीस्थानां शब्दानां संक्षेपेणादर्शरूपावलीरूपेण रूपाणि स्थापितानि। आर्शरूपावल्या दर्शनेन पिपठिषुः शीघ्रमेव शब्दानां रूपाणि द्रष्टुं ज्ञातुं च शक्नोति। तस्यां रूपावल्यां व्युत्पत्तिपूर्वकं पाणिनेः 'नामलिङ्गानुशासनम्' तथामरसिंहस्य 'लिङ्गादिसंग्रहः' इत्यनयोः सङ्गमनं कृतम्।

तथैव संस्कृते नेपालीभाषायाञ्च शब्दानामनुक्रमणिका दत्ता। याभ्यां पिपठिषुः शीघ्रं शब्दान् द्रष्टुं समर्थो भवति व्यवहारे। कुलचन्द्रेण द्विभाषिककोशत्वात् नेपालीभाषायां पर्यायवाचिनः शब्दा दत्ता। ततोऽप्यधिकं नेपालीभाषायाः शब्दानामपि पर्यायवाचिशब्दा दत्ताः। यथामरकोशस्य नाम नामलिङ्गानुशासनं तथैव स्वयंबोधिनीटीकाप्यनुकरोति व्याख्यानविषये।

कुलचन्द्रगौतमस्य कुशाग्रीया बुद्धिरासीत्। महता यत्नेन हस्तामलकवदध्ययनं कृत्वा ग्रन्थमरचयत्। तस्मादेवकारणात् त्रुटयस्तु नैव प्राप्यन्ते। तथापि प्रमादाद्वा मुद्रणत्रुट्या कापि

न्यूनता प्राप्यते। बहुयत्ने कृतेऽपि केषाञ्चित् वाक्यानां शब्दानाञ्च त्रुटिर्दृश्यते। यथा वकारबकारयोरभेदः, हिन्दिभाषायाः प्रभावः, क्रियायाः स्त्रीलिङ्गत्वमित्यादयस्त्रुटयः सन्ति। तात्कालिकी नेपालीभाषा, मुद्रणकालेऽवशिष्टाः केचनाशुद्धशब्दाः, वाक्यानि च दर्शितानि। रत्नपुस्तकेन प्रकाशितं संस्करणमपि पूर्णरूपेण परिस्कृतं नैव जातम्। काचन न्यूनता तु मानवस्वभावाद् भवत्येव।

# पञ्चमोऽध्यायः

# ५.अध्ययनसारांशनिष्कर्षोपलब्धयः

## ५.१ विषयप्रवेशः

अस्मिन्नध्यायेऽध्ययनगतसारांशः स्थाप्यते।

## ५.२ उपसंहारः

अमरकोशस्य कुलचन्द्रगौतमप्रणीता स्वयंबोधिनीटीका नेपालीभाषायां प्रसिद्धा । अयं द्विभाषिककोशः स्रोतोभाषा संस्कृतं लक्ष्यभाषा नेपाली । तस्मादत्रोभयोः संस्कृतनेपाल्योः प्रयोगः । कोशकोशकारयोः परिचयः कुलचन्द्रस्य व्याकरणात्मकग्रन्थानां कोशविज्ञानस्य चानुशीलनं टिप्पणीसमस्तबहुरूपाव्ययशब्दानां विमर्षणं विशेषतान्यूनतयोर्निरूपणमत्रत्या विषयाः ।

## ५.३ अध्ययनसारांशः

वाङ्मये कोशव्याकरणयोर्महत्त्वपूर्णा भूमिकास्ति । अनयोः सहसम्बन्धश्चास्ति । यथानेकानि व्याकरणान्यभूवन् तथापि पाणिनीयव्याकरणमधिप्रकाशते जगति । तथैव निघण्टोरारभ्यानेके कोशा अपि सन्ति । तथाप्यमरकोशोऽधिप्रकाशते । पूर्वं वैदिकभाषा प्रचलितासीत्तस्माद्वैदिका निघण्टवोऽभूवन् पश्चाल्लौकिकाः कोशा अभूवन् । निघण्टोर्व्याख्यारूपेण निरुक्तं संजातम् । तथैव पश्चादनेककोशानामुपरि टीका लिखिताः । अमरकोशस्यापि सार्धशतं टीकाः सन्ति । तासां टीकानां मध्ये भानुजिदीक्षितप्रणीता सुधा नाम्नीटीका प्रसिद्धा । विश्वस्मिन्ननेकासु भाषासु टीका रचिताः सन्ति । नेपालीभाषायां कुलचन्द्रगौतमेनामरकोशस्य स्वयंबोधिनी नामिका टीका लिखिता । एषा प्रथमाऽद्वितीया चास्ति । अस्याष्टीकाया अनुसन्धानं करणीयमासीत् ।

प्रथमेऽध्याये व्याकरणदर्शने शब्दः साक्षाद् ब्रह्मैव । वागर्थौ तु भवानीशङ्कररूपौ । शब्दज्ञानं विना तु विद्वान् किमपि कार्यं कर्तुं नैव शक्नोति यथा कोशं विना नृपः । व्याकरणकोशयोः परिचयः । शोधसमस्या, शोधोद्देश्यं, पूर्वकार्यसमीक्षा,शोधविधिः,प्राक्कल्पना, अध्ययनस्य क्षेत्रं सीमा च,शोधसामग्रीसंकलनं, रूपरेखा च प्रतिपादिताः ।

द्वितीयेऽध्याये वाङ्मयस्य विकासक्रमे कोशस्यावश्यकता । व्याकरणं कोशाय सहयोगं करोति । अमानकता, मानकता, अशुद्धता, शुद्धतादिविषयेषु सहयोगं करोति । कोषस्य संग्रहे भाषाविज्ञानस्यागाधं योगदानम् । कोशविज्ञानकार्यं कष्टसाध्यम् । व्याकरणत्मककोशो व्याकरणात्मकव्यवस्थायामाधृतः । अमरकोशो विषयानुक्रमकोशः । कुलचन्द्रगौतमेन वर्णक्रमोऽपि संस्कृते नेपाल्याञ्च स्थापितः । स्वयंबोधिनीटीका द्विभाषिका । अत्र स्रोतोभाषा संस्कृतं लक्ष्यभाषा नेपाली । शब्दार्थयोः सम्बन्धो वाच्यवाचकः । शब्दार्थो शब्दोऽपि भवति पदार्थश्च । नानार्थशब्देषु संयोगादिकारणादर्थो ज्ञायते । शब्दे योगारूढादयः शक्तयो भवन्तीत्यादयो विषया वर्णिताः ।

कुलचन्द्रगौतमप्रणीतायां स्वयंबोधिनीटीकायां केन्द्रीभूयैषः प्रबन्धो लिखितः। अस्मिन् प्रसङ्गे कोशसाहित्येतिहासस्य तथैव कोशविज्ञानस्य च प्रसङ्ग उपस्थापितः। कोशस्य महत्त्वमपि दर्शितम्। स्वयंबोधिनीटीकाया विविधपक्षे वर्गीकरणं कृत्वा व्याकरणदृष्ट्या चिन्तनं कृतम्। कोशस्य टिप्पणीविषये, समस्तशब्दविषये, बहुरूपिशब्दविषये, स्वयंबोधिनीटीकायां स्थितानामुदाहरणविषये, अमरकोशपरिशेषविषये, आदर्शरूपावलीविषये च विविच्य प्रबन्धो लिखितः।

टीकायां व्याकरणदृष्ट्या प्रसङ्गानुसारेण ग्रन्थानां टीप्पणीं दत्त्वा पाणिनीयसूत्राणां सङ्केतं दत्त्वा शोधः कृतः। टर्नरकृतात् नेपालीभाषायास्तुलनात्मकस्तथा व्युत्पत्तिमूलककोशात् प्रागेव कुलचन्द्रेणामरकोशस्य स्वयंबोधिनीटीकां लिखित्वा संस्कृतजिज्ञासूनां तथा नेपालीभाषाजिज्ञासूनां पोषणं कृतम्। तस्मात् संस्कृतवाण्युपासकानाममरकोशस्य स्वयंबोधिनीटीका वरदेत्यादयो विषया वर्णिता।

तृतीयेऽध्याये कोशविज्ञानानुसारेणैव कोशेषु टिप्पण्यः विवेचिताः। कुलचन्द्रेणापि सपादशतं टिप्पण्यो दत्ताः। अधिकाः टिप्पण्य आयुर्वेदस्य भावप्रकाशादिग्रन्थेभ्य उद्धृताः। टिप्पण्यः साहित्यज्योतिषनीतिधर्मपुराणग्रन्थेभ्यश्चोद्धृताः। प्रसङ्गानुसारेण शब्दार्थयोविचारः कृतः

कुलचन्द्रेण स्वकीयायां टीकायां समस्तशब्दनिर्माणकला निर्दिष्टा। तत्र देवसुरगन्धर्वादीनां गरुडादिपक्षिणां सूर्यचन्द्रादिग्रहाणां भागिरथियमुनादिनदीनां कमलादिपुष्पाणां नामानि दत्तानि तानि विचितानि।

स्वयंबोधिनीटीकायां बहुरूपशब्दानां प्रदर्शनं कृतम्। तत्र धातुभेदेन, प्रत्ययभेदेन, समासभेदेन, वकारबकारभेदेन, रलयोर्भेदेन, ह्रस्वदीर्घभेदेन, शकारादिभेदेन, कोशकाराणां मतभेदेन शब्दानां रूपाणि दत्तानि। तेषां पाणिनीयव्याकरणशास्त्रव्युत्पत्या शब्दानां रूपाणि शोधप्रबन्धे परिशीलितानि।

कोशविज्ञानानुसारेण कोश उदाहरणानि दत्तानि। विशेषतयाऽव्ययशब्दानामुदाहरणानि दत्तानि। **अत्र** कुत्रचित् शास्त्रादुद्धृतानि कुत्रचित् स्वयं निर्मितान्युदाहरणानि सन्ति। तानि सर्वाणि विवेचितानि।

चतुर्थेऽध्याये कुलचन्द्रेणामरकोशस्य टीकाप्रसङ्के मूलेऽपि क्षेपकश्लोकाः स्थापिताः। कुलचन्द्रेण विविधप्रकारेण व्याख्या कृता। टीकायां पदार्थं, अन्वयार्थं, भावार्थं, दृष्टान्तादिकञ्च दत्वा पाठकेभ्यः सारल्यं दत्तम्। लिङ्गव्यवस्था तु प्रसिद्धैव।

अमरकोशस्यापरं नाम नामलिङ्गानुशासनम् तस्मात् लिङ्गस्य चर्चोचितैव । स्वयंबोधिनीटीकायां रूपावली दत्ता । न केवलममरकोशस्थशब्दानां परन्त्वस्मदादिशब्दानामपि रूपावली दत्ता । परिशिष्टे वर्णक्रमेण शब्दाः स्थापिताः सन्ति तेषामग्रे सर्वेषां शब्दानां रूपाङ्काश्च दत्ताः सन्ति । तस्मादेव कारणात् स्वयंबोधिनीटीकायां रूपावल्यप्यभिन्नाङ्गमस्ति । संपूर्णरूपावली पाणिनीयव्याकरणानुसारेण विवेचिता ।

पञ्चमेऽध्याये अध्ययनसारांशनिष्कर्षोपलब्धयो विवेचिताः ।

## ५.४ निष्कर्षः

गीर्वाणवाणी सृष्टेरादिकालादेव जनचेतसि विचरन्त्यस्ति । समस्तज्ञानविज्ञानयोर्भाषाप्यस्ति । विविधासु विधासु भाषा प्रकाशिका । तस्य ज्ञानाय व्याकरणस्य यथावश्यकता भवति तथैव शब्दशक्तिज्ञानाय कोशस्यावश्यकता । नेपाल्यादिभाषाणां स्रोतभाषास्ति संस्कृतम् । ‘अष्टाध्यायी जगन्माता अमरकोशो जगत्पिता ।’ इत्युक्तिश्चरितार्थाप्यस्त्येव । बालकाय प्रारम्भे कोशज्ञानस्यावश्यकता भवति । तस्मात्कोशस्य चर्चा चिन्तनञ्च कृतम् ।

शब्दस्य शक्तिग्रहणार्थं कोशस्यातीवावश्यकता । सर्वेषु कोशेष्वमरकोशः प्रसिद्धः । कोशस्य स्पष्टज्ञानार्थं बह्यस्टीका लिखिता विद्वद्भिः । संस्कृते भानुजीदीक्षितप्रणीता सुधा ( रामाश्रमी) टीका प्रसिद्धा । नेपालीभाषायां कुलचन्द्रगौतमेनामरकोशोपरि टीकां विलिख्य प्रथमः प्रयासः कृतः । अमरकोशमनुसृत्य कुलचन्द्रेण टीका प्रणीता । यद्यपि रामाश्रमीटीका गभीरा तथापि कुलचन्द्रप्रणीता स्वयंबोधिनी नाम्नी टीका छात्राणां कृते बहूपकारिका, रामाश्रमी तु विदुषामेव ।

टीकायां सर्वेभ्यः शास्त्रेभ्यष्टिप्पण्य उद्धृताः । समस्तशब्दनिर्माणकलाऽपि दर्शिता । द्विरूपबहुरूपशब्दानां कोष्ठके भेदोऽपि दत्तः । अग्रे चाव्ययशब्दानां बहुष्वर्थेषूदाहरणानि दत्तानि । अन्ते व्यावहारिककोशस्य (अमरकोशपरिशेषकोशस्य) स्थापनं तथा शब्दानुक्रमणिका संस्कृते नेपाल्याञ्च लिखिता । रूपावलिस्थापनात्तु बहूपकारिका व्यावहारिका च स्वयंबोधिनी ।

कोशविज्ञानपरम्परायामर्थस्य स्पष्टार्थं टिप्पण्यो दीयन्ते । कुलचन्द्रेणापि स्वकीयायां स्वयंबोधिनीटीकायामनेकाष्टिप्पणीर्ददाति ।

शब्दकोशे समस्तशब्दा अपि स्थाप्यन्ते । ‘समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत् ।’ इत्युक्तत्वात् समस्तशब्दानां पृथक् शक्तिरस्ति । कुलचन्द्रोऽप्यमरकोशमनुसृत्य समस्तशब्दनिर्माणकलां दर्शयति ।

कोशवाङ्मये प्रविष्टीनां रूपभेदस्य स्थापनापरम्परा वर्तते । कुलचन्द्रेणाप्यमरकोशस्य स्वयंबोधिनीटीकायां कोष्ठके शब्दानां रूपभेदस्थापना कृता । अस्यां टीकायां द्विरूपशब्दा बहुरूपशब्दाश्च स्थापिताः । तेषां शब्दानां परिशीलनप्रसङ्गे पाणिनीयव्याकरणसूत्रैः सर्वे शब्दाः सिद्धा भवन्ति । शब्दानां रूपभेदो धातुभेदेन, प्रत्ययभेदेन, वर्णविकल्पेन, ह्रस्वदीर्घभेदेन, सकारभेदेन, रेफलकारभेदेन, विसर्गभेदेन, कोशकारभेदेन बहुरूपशब्दाः सिद्धाः । प्राचीनकोशकारैर्द्विरूपकोशोऽपि लिखितस्तथापि बहुरूपकोशो नैव प्राप्यते ।

कोशसाहित्ये प्रविष्टिचयनानन्तरं केषाञ्चन शब्दानामुदाहरणानि दीयन्ते । उदाहरणेन शब्दार्थः स्पष्टीभवति । कुलचन्द्रेण स्वयंबोधिनीटीकायामव्ययशब्दानामुदाहरणानि दत्तानि । प्रायः अव्ययशब्दा अनेकार्था भवन्ति तस्मादुदाहरणस्यावश्कता भवत्येव । अव्ययशब्दा सूक्ष्मार्थकाः भवन्ति तस्मादर्थज्ञातुमावश्यकता भवति ।

अधुना वर्णक्रमकोशस्य प्रचलनमस्ति तस्मात् कुलचन्द्रेण संस्कृतशब्दानां नेपालीशब्दानाञ्चानुक्रमणिका दत्ता । पाठकेभ्यः शब्दानन्वेष्टुं सारल्यं भवत्येव । नेपालीपाठकानां संस्कृतपाठकानाञ्चोभयोर्हितं लक्ष्यीकृत्य स्थापिता वर्णक्रमानुक्रमणिकेति ।

कुलचन्द्रेणामरकोशपरिशेषकोशं विलिख्य संस्थाप्य च व्यावहारिकशब्दानां प्रविष्टिर्दत्ता । पाठकेभ्यः पठनाय नवशब्दनिर्माणाय च निर्दिशति परिशेषकोशः । तस्मादस्मिन्प्रबन्धे केचन शब्दा व्युत्पत्तिपूर्वकं दर्शिताः । अमरसिंहस्य संकल्पं ज्ञात्वा कुलचन्द्रेण परिशेषकोशरूपेण विस्तारितः प्रविष्टिश्च समृद्धा ।

कुलचन्द्रेण स्वयंबोधिनीटीकायामादर्शरूपावलिं संस्थाप्य स्वर्णे सुगन्धिर्दत्तः । अनयाऽदर्शरूपावल्या पाठको रूपज्ञाने कुशलो भवत्येव । यद्यपि सिद्धान्तकौमुद्यां स्थिताः शब्दाः स्थापितास्तथापि स्थापनाक्रमः स्वतन्त्रोऽस्ति । गौतमेन शब्दानामङ्कान् संस्थाप्य श्रमः कृतः । टीकाकारस्य भावनानुसारेण रूपावलिज्ञानायावश्यकत्वादत्र ग्रन्थे शब्दव्युत्पत्तिर्दर्शिता । आदर्शरूपावलिं पठित्वा पाठक आदर्शवान् भवत्वेव रूपावलिज्ञाने व्यवहारे चेति ।

कुलचन्द्रः सदाचारी यशस्वीविद्वान् संस्कृतजगति न केवलं भारतवर्षस्य परन्तु विश्वस्यैव प्रतिभासीत् । तस्यामरकोशस्य स्वयंबोधिनी टीकापि बहूपयोगिनी बहुसूचनाः प्रददाति । द्विभाषिककोशस्यावधारणा कुलचन्द्राज्जाता । एवमेवकुलचन्द्रेण वर्णानुक्रमकोशः स्वीकृतः । न केवलं संस्कृते नेपाल्यामपि वर्णक्रमेण शब्दाः स्थापिताः । आदर्शरूपावली च व्यवस्थिता । व्यवहारार्थममरकोशपरिशेषश्च निर्मितः । अमरकोशस्य न केवलमनुवादः कृतः परन्तु विस्तृतरूपेण व्याख्या कृता । व्याख्यायां केषाञ्चनशब्दानां परिभाषा स्थापिता

विविधप्रसङ्गैः । समस्तपदनिर्माणकला च दर्शिता कुशलतया । केषाञ्चन शब्दानां वैकल्पिकरूपाणि स्थापितानि । नानार्थशब्देष्वव्ययेषूदाहरणानि दत्तानि । अनुवादक्रमेऽपि सहजबोधाय नेपाल्यां पर्यायवाचिशब्दा दत्ताः । समग्रतायां स्वयंबोधिनी टीका सार्थिकोपयोगिन्यद्वितीया च ।

कुलचन्द्रस्यानुकरणं कुर्वन् टर्नरेणापि शब्दानां सम्यक्तया व्युत्पत्तिर्दत्ता नेपालीशब्दकोशे । टर्नरस्यानुकरणं कैश्चन नैपालकैः कोशकारैः कृतम् । अधुना व्युत्पत्तिमूलककोशस्यावश्यकताया अनुभवो सर्वैः कोशकारैः कृतः । कोशव्याकरणयोः सम्बन्धः प्रगाढत्वात् व्युत्पत्तिमूलककोशो व्यवहारोपयोगी भवति । व्युत्पत्तिमूलककोशेन भाषायाः संस्कृतेर्भाषाविज्ञानस्य च कार्यं निर्वहति । संस्कृते तथा नेपाल्यां तत्समशब्दानां तद्भवशब्दानाञ्च व्युत्पत्तेरावश्यकता । शुद्धनेपाल्यादिशब्दानाञ्च पथप्रदर्शनं करोति व्याकरणमूलककोशः ।

अजयपालेन १२२९–३२ तमे ईसवीये वर्णानुक्रमस्यावलम्बनं कृत्वा नानार्थसंग्रहनामकः कोशः प्रस्तुतः । सा पद्धतिरन्यैः कोशकारैर्नैवावलम्बिता । पौरस्त्यशब्दकोशपरम्परायां वर्गीयपद्धत्या व्यापकता प्रप्ता । वर्णक्रमकोशस्य लोकप्रियतां ज्ञात्वा कुलचन्द्रेणानुसूच्यां वर्णक्रमः स्थापतिः ।

कुलचन्द्रस्यादर्शरूपावल्यपि विशिष्टा । शब्दानां स्वरूपं विचार्य पुंलिङ्गे स्त्रीलिङ्गे नपुंसकलिङ्गे त्रिलिङ्गे तथा वैकल्पिकलिङ्गे च टाप्ङीपौ लक्ष्यीकृत्य रूपाणि दत्तानि । अधुना सुसांख्यस्य समये पाठकानां शीघ्रोपस्थितिर्भवति । युष्मदस्मदादिशब्दानां सर्वनामशब्दानाञ्च रूपाणि दत्तानि । तस्यां रूपावल्यां शब्दस्वरूपञ्च स्थापितम् । न केवलं परम्परायां लिखति स्वयं विवेचयति कुलचन्द्रः । शब्दानामलौकिकावस्थायां चिन्तयन्ति वैयाकरणास्तथापि व्यवहारे तु रूपावलीं दृष्ट्वा व्यवहारं कुर्वन्ति सर्वे ।

संस्कृतवाण्यामधुना व्यवहारार्थं नवशब्दानामावश्यकता भवति तस्मात् कुलचन्द्रेणामरकोशपरिशेषकोशो निर्मितः । जगति समये समये नवीनाः पदार्था आविष्कृता भवन्ति । तेषां नामानि ज्ञातुं शब्दनिर्माणकलाया आवश्यकता । कोशेऽपि प्रविष्टौ नवशब्दाः स्थापनीया एव । अतिसंयमेन शब्दा निर्मीयन्ते स्थाप्यन्ते च । कुलचन्द्रस्यानुकरणं कृत्वा कोशे शब्दानां प्रविष्टिर्वर्धत एव ।

यद्यपि कोशा अनेके सन्ति तथापि व्याकरणपरककोशस्याधिकं महत्त्वं भवति । अस्मिन् कोशे शब्दानां व्युत्पत्तिः शब्दवर्गो विकल्पव्यवस्थानेकार्थता समासः परिभाषेत्यादयो भवन्ति ।

शब्दज्ञानेन भाषाविज्ञानस्य संस्कृतेः धर्मस्य साहित्यस्य दर्शनस्य च मार्गः पशस्तो भवति । एकशब्दज्ञानेनापि बह्वर्थाः प्रकाश्यन्ते । व्याकरणं विना कोश एकाङ्गी भवति । अधुना विद्युत्संचारेऽपि कोशस्य शीघ्रबोधकत्वं दृश्यत एव ।

अपरपक्षे तु कुलचन्द्रवर्णक्रमशैल्यापि लिखति । नेपालसंस्कृतविश्वविद्यालयेन प्रकाशितो *लघुनामकोश* उदाहरणरूपेण दृश्यते । वर्णक्रमकोशे पाठकानां शब्दानन्वेष्टुं सारल्यं भवति । आधुनिकपाठ्यक्रमेऽपि भाषाशिक्षणकाले बालकानां वर्णानुक्रमकोशस्य शिक्षा दीयते ।

कुलचन्द्रः शिक्षाया रहस्यं ज्ञात्वा द्विप्रकारकयोः कोशयोराश्रयं करोति न त्वेकाङ्गितया । पूर्वस्मिन् कालेऽपि वर्णक्रमकोशस्य प्रचलनमासीदेव । अजयपालेनापि वर्णक्रमशैल्या कोशो रचितः । सर्वप्राचीनतमकोशो निघण्टुः गद्ये लिखितः पश्चात् पदस्य प्रचलनमभूत् । इति प्रथमः निष्कर्षः ।

यद्यपि कुलचन्द्र आलंकारिकस्थापि अमरकोशस्य स्वयंबोधिनीटीकायां व्याकरणं लक्ष्यीकृत्य व्याख्यां करोति । टिप्पणीप्रदाने समस्तशब्दकलानिर्माणे बहुरूपीशब्दनिर्माणे›व्ययादिशब्देषु रूपावलीप्रदर्शने च व्याकरणस्य घटका दृश्यन्ते । व्याकरणपरकः कोशो व्युत्पत्तिमूलको भवति । नेपालीभाषायाः प्रथमेन शब्दकोशकारेण टर्नरेणापि व्युत्पत्तिमूलककोशनिर्माणं कृतम् । अन्यैश्च कोशकारैर्व्युत्पत्तिमूलककोशस्य प्रयाशः कृतः । तस्मादेव कारणत् व्युत्पत्तिमूलककोशस्यावश्यकता वर्तते । इति द्वितीयो निष्कर्षः ।

कुलचन्द्रः कोशस्य व्याख्यानक्रमे स्वयंबोधिनीटीकायां सरलमार्गं निर्दिशति न तु काठिन्यम् । एवं प्रकारेण कोशनिर्माणे सति बालानां प्रौढानाञ्च मार्गः प्रशस्तो भवति । श्लोकानां प्रक्रमाङ्कस्थापनेन रूपावली प्रदानेन रूपाङ्कस्थापनेन चात्यन्तं सारल्यं सञ्जातम् । तस्मात् सरलताप्रदानं तृतीयो निष्कर्षः ।

अमरसिंहेन लिङ्गानुशासनम् नामको ग्रन्थो लिखितः । तेन प्रथमाविभक्तिसङ्केतेन लिङ्गानुशाशनं निर्दिष्टम् । कुलचन्द्रेण प्रतिशब्दमङ्कान् दत्वा लिङ्गं दर्शितम् । मया तु पाणिनेर्लिङ्गानुशासनस्य अमरसिंहस्य लिङ्गादिसंग्रहस्य च सङ्गमनेन लिङ्गं स्पष्टीकृतमिति चतुर्थो निष्कर्षः ।

कुलचन्द्रो यद्यपि साहित्याचार्योऽस्ति तथापि वैयाकराणोऽप्यस्ति । तस्य भावनामङ्गीकृत्य शोधग्रन्थे पाणिनीयव्याकरणस्य सूत्राणि प्रयुक्तानि । आचार्यपाणिनिममरसिंहं कुलचन्द्रञ्च संस्मृत्य विरमामि ।

## ५.५ उपलब्धयः

–अमरकोशो वर्गीयपर्यायवाचिलिङ्गानुशासनकोशः । अधुना लोकप्रियो व्यावहारिकश्च ।

–अमरकोशस्यानेकासु टीकासु नेपालीभाषायां कुलचन्द्रगौतमप्रणीता स्वयंबोधिनीटीकापूर्वा ।

–अमरकोशो लिङ्गानुशासनकोशोऽस्ति, इतोऽप्यग्रे कुलचन्द्रेणाङ्कसंकेतान् दत्त्वा सरलीकृतः ।

–स्वयंबोधिनीटीकायां कुलचन्द्रेण विशिष्टशब्दानां टिप्पणीं दत्त्वा स्पष्टीकृता । अस्मात् कारणात् शब्दार्थः प्रकाश्यते ।

–कुलचन्द्रेणामरसिंहस्य शब्दाशयं ज्ञात्वा समस्तशब्दनिर्माणप्रक्रिया व्याकरणानुकूल्येन प्रदर्शिता ।

–स्वयंबोधिनीटीकायां व्याख्याकारेण द्विरूपबहुरूपशब्दानां भेदाः प्रदर्शिताः । ते शब्दाः पाणिनीयव्याकरणेन सिद्धा भवन्ति ।

–टीकाकारेण विशेषतोऽव्ययशब्दानामुदाहरणनि दत्तानि सन्ति । येन कारणेन पाठकः सम्यक् शब्दान् ज्ञातुं प्रयोक्तुञ्च समर्थो भवति ।

–कुलचन्द्रेणामरकोशस्य शब्दाः संस्कृते नेपाल्याञ्चाकारक्रमेण संस्थाप्य सरलीकृता टीका ।

–टीकायामादर्शरूपावलीं दत्त्वा सरलरीत्या रूपाणि ज्ञातुं समर्था भवन्ति पाठकाः ।

–कुलचन्द्रोऽमरकोशपरिशेषकोशं विरच्य व्यावहारिकशब्दज्ञानमकारयत् ।

–स्वयंबोधिनीटीकायां न्यूनता न्यूनं दृश्यते मुद्रणत्रुटिस्तु भवत्येव कुत्रापि स्वभावेन प्रविधिवसात् ।

–यद्यपि स्वयंबोधिनीटीका विस्तृताऽस्ति तथापि छात्राणां कृते तु बहूपकारिका ।

अमरसिंहेन लिङ्गानुशासनं कृतम् । तस्य कोशस्य नाम च लिङ्गानुशासनमासीत् । तथापि शब्दानामन्येष्वर्थेषु शासनं नैव जातम् । कुलचन्द्रेणापि टीकायामङ्काः प्रदत्ताः परन्तु तत्रापि शास्त्रीयदृष्ट्या ज्ञानं नैव भवति । पाणिनेर्लिङ्गानुशासनमस्ति तथैवामरस्य लिङ्गानुसंग्रहश्च । मया त्वेतयोरत्र सङ्गमनं कृतम् । लिङ्गानुशासनपूर्वकज्ञानेनैव व्यापकबोधो भवति । तस्मात् मयादर्शरूपावल्यां, परिशेषकोशे, टिप्पण्याञ्च लिङ्गस्य सङ्गमनं कृतम् ।

## ५.६ भाविशोधस्य विषयाः

–अमरकोशस्य स्वयंबोधिनीटीकायाः साहित्यिकदृष्ट्याध्ययनम् ।

–अमरकोशस्य स्वयंबोधिनीटीकाया भाषाविज्ञानदृष्ट्याध्ययनम् ।

–अमरकोशस्य स्वयंबोधिनीरामाश्रमीटीकयोस्तुलनात्मकाध्ययनम् ।

–अमरकोशपरिशेषकोशस्य व्युत्पत्तिप्रदर्शनम् ।

# परिशिष्टम्

## अन्तर्वार्ता

कुलचन्द्रगौतमस्यामरकोशस्य स्वयंबोधिनीटीकायाः परिशीलनक्रमे *विद्वच्छिरोमणि कुलचन्द्र गौतम प्रतिष्ठा* गौरीधारायां काष्ठमण्डपे गतवानहम् । तस्याः संस्थायाः सचिवेन उषागौतमेन सह अन्तर्वार्ताभूत् । अन्तर्वार्ताया अंश एवमस्ति ।

भवती कुलचन्द्रगौतमस्य प्रपौत्री कुलचन्द्रगौतमप्रणीताया अमरकोशस्य स्वयंबोधिनीटीकाया विषये किञ्चित्प्रष्टुमिच्छामि । कुलचन्द्रेण १९८३ तमे वैक्रमात्तब्दे अमरकोशस्य सर्वप्रथमप्रकाशितायाः स्वंबोधिनीटीकायाः पुस्तकमस्ति न वा ।

उषागौतमः – अस्ति प्रथमवारप्रकाशितामरकोशस्य स्वयंबोधिनीटीका । मकालुप्रकाशनेन प्रकाशयितुमनुमतिः प्राप्तास्ति । तत्रैवास्ति पुस्तकम् ।

कुलचन्द्रगौतमप्रणीताया अमरकोशस्य स्वयंबोधिनीटीकाया २०१७ तमे वैक्रमाब्दे प्रकाशनक्रमे बालकृष्णाचार्येण सह विवादः सञ्जात इति सत्यं वा ।

उषागौतमः – अहमपि प्रत्यक्षं तु नैव जानामि नैव दृष्टं केवलं श्रुतमेव प्रपौत्रीत्वात् । प्रपितामहस्य कुलचन्द्रस्य शिष्येण बालकृष्णाचर्येणानुमतिं विना प्रकाशितः कोशो वाराणस्यां तस्मात् कुलचन्द्रस्य पुत्रेण मम पितामहेन लक्ष्मीनाथेन न्यायालयेऽनुरुद्धम् । सभीतेन बालकृष्णेन गुरुणा सह क्षमां प्राप्य कोशः प्रकाशितः ।

एतादृश्यवस्था त्वधुनाप्यभूत् । नेपालप्रज्ञाप्रतिष्ठानेन तीर्थ उप्रेत्याः कार्यकालेऽनुमतिं विना कुलचन्द्रप्रणीताया अमरकोशटीकायाः प्रकाशनं कृतम् । तस्मात्कारणादस्माकं परिवारेणावरुद्धम् । पश्चात् प्रज्ञाप्रतिष्ठानेनार्धपुस्तकानि द्रव्यञ्च *विद्वच्छिरोमणि कुलचन्द्र प्रतिष्ठानाय* दत्तम् ।

उषे महोदयेऽधुना कुलचन्द्रस्य पाण्डुलिपयः सन्ति न वा ।

उषागौतमः – कुलचन्द्रस्य ये पाण्डुलिपय आसन् ते प्रायः सर्वे प्रकाशिताः सन्ति । अस्माभिः स्वकीयं कर्तव्यं कृतम् ।

अस्याः संस्थाया गतिविधयः के केऽभूवन् ?

उषागौतमः – अनया संस्थया कुलचन्द्रप्रणीतान्युपलब्धपुस्तकानि प्रकाशितानि । तथैव त्रिभुवनविश्वविद्यालयस्य संस्कृतविभागस्य परिसरे प्रतिष्ठानं स्थापितम् । सहयोगो दत्तः

संस्कृतकक्षापि सञ्चालिता । तत्रत्येन विभागाध्यक्षेण नारायणगौतमेन तथैव नेपालसंस्कृतविश्वविद्यालयस्य तात्कालिकेनोपकुलपतिना माधवराजगौतमेनापि सहयोगः कृतः । पश्चादस्माभिर्हस्तान्तरणं कृतं विभागाय । कुलचन्द्रस्य जन्मभूमौ च विद्यालयस्य नाम कुलचन्द्रेण संबद्धमस्ति ।

धादिङ्मण्डले जीवनपुरे जन्मभूमौ कुलचन्द्रस्यापत्यानि सन्ति न वा ?

उषागौतमः – अधुना तत्र धादिङ्मण्डले जीवनपुरे जन्मभूमौ कुलचन्द्रस्यापत्यानि नैव सन्ति केवलं गोत्रीया बान्धावाः सन्ति । अपत्यानि विदेशे सन्ति । मम पिता प्रसन्नचन्द्रगौतमोऽपि विदेशे प्राध्यपकोऽस्ति । तस्य पुत्र्यः काष्ठमण्डपे सन्ति ।

भवत्याः परिवारोऽपत्यानि वा कुत्र सन्ति ?

उषागौतमः – मम पतिरपि विदेशेऽस्ति । मम पुत्रौ द्वौ विदेशे हार्वर्ढविश्वविद्यालये प्राध्यापकौ स्तः । अहमेकाकी नेपालेऽधुना । सन्तु धन्यवादाः । इति शम् ।

## कुलचन्द्रस्य जन्मभूमिः

संस्कृतनेपालीजगति ख्यातिप्राप्तस्य नेपालभारतजर्मनसर्वकारैः सम्मानितस्य कुलचन्द्रस्य जन्मभूमि काष्ठमण्डपतः पश्चिमभागे धादिङमण्लस्य जीवनपुरग्रामे वर्तते । जीवनपुरस्य द्वितीयभागे जीवनपुरभञ्ज्याङ्स्थानमस्ति । तत्रैव कुलचन्द्रस्य जन्म । जीवनपुरः सुन्दरो ग्रामः । अधुना धुनिवेशीनगरपालिकायाश्चतुर्थभागे वर्तते । तत्रैवाध्यानक्रमे गतवानहम् । तत्र कुलचन्द्रस्य सन्ततयो नैव सन्ति । केवलं बान्धवा गोत्रीयाः सन्ति । एकः कुलचन्द्रस्य ज्येष्ठपितुर्भद्रनिधेः प्रपौत्रस्य पुत्रः भूमिप्रसादगौतमो›स्ति । स तत्रैव वसति केवलम् । अधुना जन्मस्थाने एव जीवनपुरकाठमाण्डौ मार्गो›स्ति । स मार्गः शिखरे शिखरे काष्ठमण्डपस्य सीतापाइलामागच्छति । अपरमार्गो नीचैः धार्केस्थाने आगच्छति । जन्मस्थानस्य समीपे एव विश्रामालयो वर्तते । धुनिवेशीनगरपालिकाया चतुर्थभागस्य कार्यालयो›पि तत्रैव वर्तते ।

कुलचन्द्रस्य नाम्ना सम्बद्धो विद्यालयस्तु किञ्चित दूरे पश्चिमभागे अम्रेनीस्थाने वर्तते । तत्रत्यैः शिक्षकैः सह वार्ताभूत । ते शिक्षकाः सन्ति -

१. रमेशप्रसादगौतमः (प्रधानाध्यापकः)

२. योगराजरेग्मी

३. आत्मारामरुपाखेती

४. सीमारेग्मी

५. सुजनगौतमः

६. वडाध्यक्ष हरिप्रसादसुवेदी

एते कुलचन्द्रस्य विषये कथयन्ति -

कुलचन्द्रो विद्वच्छिरोमणिरासीदिति तु केवलमस्माभिः श्रुतं नैव दृष्टम् । अधुनात्र द्रष्टारः के›पि न सन्ति । केवलं भूमिराजगौतमो जानाति । अन्ये गोत्रीया बान्धवास्तथा ग्रामवासिनः के›पि अनभिज्ञा एव ।

गोकर्णशर्मणः परामर्शेन प्रसन्नचन्द्रेण सार्धसप्तलक्षं विद्यालयाय दत्तं २०६६ तमे वैक्रमाब्दे तस्मात् कुलचन्द्रस्य नाम्नि विद्यालयस्य नाम सम्बद्धम् । अधुना विद्यालयस्य नाम 'श्री जीवनपुर कुलचन्द्र आधारभूत विद्यालयÚ cl:t . c:o ljBfno:o :yfkgf t'

@)$) td] j}qmdfAb]›e"t\ . s'nrGb|:o k'qf] ueg{/f]›Koe"t\

nIdLgfyuf}tdM . Olt zd\ .

## ५.७ स्वयंबोधिनीटीकायां प्रयुक्तानां शब्दानामनुक्रमणिका


| शब्दाः । अङ्काः। | पृष्ठाः |
|---|---|
| अक्षिशब्दः । रू.५४ | २७२ |
| अक्षीवः । प्र.७४१ | १९४ |
| अक्षोटः । प्र.७३७ | १८० |
| अक्षौहिणीशब्दः । प्र.१६८६ | १३० |
| अगमः । प्र.६९० | १९० |
| अगस्तिः । प्र.१९६ | १६१ |
| अगस्त्यः । प्र.१९६ | १६१ |
| अगारम् । प्र.६२१ | १७७ |
| अग्रतःशब्दस्योदाहरणानि । प्र.२८९४ | १९७ |
| अङ्गशब्दः । प्र. ३४० | १०५ |
| अङ्कोटः । प्र.७३७ | १८१ |
| अङ्कोलः । प्र.७३७ | १८१ |
| अचलकिशोरी । प्रक्रमाङ्कः ७५ | १४९ |
| अजरशब्दः । रू.२६ | २६६ |
| अतटः । प्र.६७१ | १७९ |
| अतिशब्दस्योदाहरणानि । प्र.२८८५ | १९७ |
| अत्तिका । प्र.४१७ | १७० |
| अथोऽथशब्दयोरुदाहरणानि । प्र.२८९६ | १९८ |
| अदस्-शब्दः । रू.१७२ | ३०१ |
| अदितितनयः । प्र.८ | १४७ |
| अदितितनुजः । प्र.८ | १४७ |
| अदितिसूनुः । प्र.८ | १४७ |
| अनडुह्शब्दः । रू.१७८ | २०३ |
| अनादिशब्दः । रू.८४ | २७१ |

अनुशब्दस्योदाहरणे । प्र.२८९८ १९८
अनूपशब्दः । प्र.६०४ १२०
अनेहस्-शब्दः । रू.१६४-२ २९९
अन्तरशब्दस्योदाहरणानि । प्र.२७७५ १९८
अन्तरायपतिः । प्र.७७ १४६
अन्तिका । प्र.४१७ १७०
अन्धकारि । प्रक्रमाङ्कः ६८ १५०
अन्यशब्दः । रू.२९ २६७
अन्यतरशब्दः । रू.३० २६७
अपिशब्दस्योदाहरणानि । प्र.२९०० १९९
अप्शब्दः । रू.१४७ २९६
अप्सरश्शब्दः ।प्र. १०६ ९४
अबद्धशब्दः । प्र.३७५ १०५
अभितःशब्दस्योदाहरणानि । प्र.२९१३ १९९
अभिवादनशब्दः । प्र.१४८३ १२७
अभिलाषः । प्र.४४४ १६९
अभिलाषा । प्र.४४४ १६९
अमरगुरुः । प्र.२०४ १५२
अमरभवनम् । प्र.२ १५१
अमा । प्र.२४८ १६४
अमाशब्दस्योदाहरणे । प्र.२९०२ १९९
अमावस्या । प्र.२४८ १६४
अमावस्या प्र.२४८ १५६
अमावास्या । प्र.२४८ १५६
अमृतकिरणः । प्र.१८६ १५१
अमृतादः । प्र.८ १४८
अमोघा । प्र.७८८ १८९
अम्बाशब्दः । रू.४२ २७०

| | |
|---|---|
| अम्बुशब्दः । रू.६५ | २७५ |
| अम्बुदः । प्र.१७१ | २५२ |
| अम्बुनिधिः । प्र.५०० | १५५ |
| अम्बुमुक् । प्र.१७१ | १५३ |
| अम्बुवाहः । प्र.१७१ | १५३ |
| अम्रातकः । प्र.७३४ | १८१ |
| अम्ब्लिका । प्र.७६६ | १८५ |
| अम्ब्लीका । प्र.७६६ | १८५ |
| अम्लवेतसशब्दः । प्र.९६१ | १२२ |
| अम्लिका । प्र.७६६ | १८५ |
| अर्चिस्-शब्दः । रू.१६७ | ३०० |
| अर्वन्शब्दः । रू.१३४ | २९३ |
| अलंशब्दस्योदाहरणानि । प्र.२९०६ | २०० |
| अलकापतिः । प्र.१४४ | १४६ |
| अलिन्दः । प्र.६४७ | १७६ |
| अवदातदीधितिः । प्र.१८६ | १५२ |
| अवनिः । प्र.५८८ | १७४ |
| अवनी । प्र.५८८ | १७४ |
| अवलक्षः । प्र.३२४ | १६७ |
| अवहित्थम् । प्र.४५६ | १६९ |
| अवहित्था । प्र.४५६ | १६९ |
| अश्रपः । प्र.१२३ | १५९ |
| अष्टन्शब्दः । रू.१४१ | २९४ |
| अष्टमूर्तिशब्दः। प्र.६८ | ९५ |
| असनः । प्र.७६७ | १८१ |
| असमसायक । प्र.४६ | १४५ |
| असुरारिः । प्र.८ | १४७ |
| असृज्शब्दः । रू.१०१ | २८४ |

| | |
|---|---|
| अस्थिशब्दः । रू.५१ | २६२ |
| अस्मद्-शब्दः । रू.१२३ | २९० |
| अस्रपः । प्र.१२३ | १५९ |
| अहन्शब्दः । रू.१३८ | २९४ |
| अहर्मणिः । प्र.२२२ | १५३ |
| अहह(अहहा)शब्दस्योदाहरणानि । प्र.२९१६ | २०० |
| अहितुण्डिकः । प्र.४९० | १७२ |
| आःशब्दस्योदाहरणे प्र. २८८२, | २०१ |
| आकाङ्क्षा । प्र.४४३ | १६९ |
| आक्षीवः । प्र.७४१ | १९४ |
| आक्षोटः । प्र.७३७ | १८० |
| आक्षोडः । प्र.७३७ | १८० |
| आखुवाहनः । प्र.७७ | १४६ |
| आगमः । प्र.६९० | १९० |
| आगारम् । प्र.६२१ | १७७ |
| आङ्शब्दस्योदाहरणानि । प्र.२८८१ | २०१ |
| आङ्गिकशब्दः । प्र.४२० | ११० |
| आततायिशब्दः । प्र.२१६४ | १३७ |
| आभीरपल्लिः । प्र.६६३ | १७६ |
| आभीरपल्ली । प्र.६६३ | १७६ |
| आम्रातकः । प्र.७३४ | १८१ |
| आम्ब्लीका । प्र.७६६ | १८५ |
| आम्लिका । प्र.७६६ | १८५ |
| आम्लीका । प्र.७६६ | १८५ |
| आरात्शब्दस्योदाहरणानि । प्र.२८८७ | २०१ |
| आलिः । प्र.६११ | १७६ |
| आलिन्दः । प्र.६४७ | १७६ |

| | |
|---|---|
| आली । प्र.६११ | १७६ |
| आवलिः । प्र.६८७ | १८१ |
| आवली । प्र.६८७ | १८१ |
| आशरः । प्र.१२३ | १६९ |
| आशब्दस्योदाहरणानि । प्र.२८८२ | २०० |
| आङ्शब्दस्योदाहरणानि । प्र.२८८२ | २०१ |
| आशिःशब्दः । प्र.४८४ | ११७ |
| आशिरः । प्र.१२३ | १५९ |
| आशिष्-शब्दः । रू.१६२ | २९९ |
| आसनः । प्र.७६७ | १८१ |
| आस्यशब्दः । रू.३६ | २६८ |
| आहतशब्दः । प्र.३७६ | १०५ |
| आहितुण्डिकः । प्र.४९० | १७२ |
| इडा । प्र.१४८२ | १५६ |
| इतरशब्दः । रू.३१ | २६७ |
| इतिशब्दस्योदाहरणानि । प्र.२८९३ | २०१ |
| इदम्शब्दः । रू.१५१ | २९६ |
| इन्द्रियशब्दस्य प्रसङ्गः । प्र.३१५ | १०३ |
| इला । प्र.१४८२ | १५६ |
| इष्टशब्दः । प्र.१४५१ | १२७ |
| ईतिशब्दः । प्र.२५३५ | १३९ |
| ईश्वरा । प्र.७२ | १५९ |
| ईश्वरी । प्र.७२ | १५९ |
| उच्छ्रशब्दः । प्र.१७६७ | १३२ |
| उडुशब्दः । रू.६८ | २७५ |
| उडुनाथः । प्र.१८६ | १५२ |
| उतशब्दस्योदाहरणानि । प्र.२८८८ | २०२ |
| उत्कण्ठाशब्दः । प्र.४४६ | १११ |

| | |
|---|---|
| उदकशब्दः । रू.३३ | २६८ |
| उदञ्च्शब्दः । रू.९४ | २८२ |
| उदूखलम् । प्र.१८१४ | २५६ |
| उन्दुरुयानः । प्र.७७ | १४६ |
| उपानह्शब्दः । रू.१७७ | ३०३ |
| उरगारि । प्र. ५७ | १४७ |
| उररीशब्दस्योदाहरणम् । प्र.२९१० | २०२ |
| उरुवुकः । प्र.७८१ | १८२ |
| उरुवूकः । प्र.७८१ | १८२ |
| उलूखलम् । प्र.१८१४ | १५६ |
| उलूखलकम् । प्र.७४७ | १८३ |
| उशनस्-शब्दः । रू.१६५ | ३०० |
| उषः । प्र.२३५ | १६५ |
| उषा । प्र.२३५ | १६५ |
| उष्णिह्शब्दः । रू.१७९ | ३०३ |
| ऊररीशब्दस्योदाहरणम् । प्र.२९१० | २०२ |
| ऊरीशब्दस्योदाहरणम् । प्र.२९१० | २०२ |
| ऊर्मिशब्दः । रू.४७ | २७१ |
| ऊषः प्र.२३५ | १६५ |
| ऋक्षपतिः । प्र.१८६ | १५२ |
| ऋक्षाध्वा प्र. १५३ | १५१ |
| ऋतशब्दः । प्र.१७६७ | १३२ |
| ऋतुशब्दः । प्र.२७३ | ९९ |
| ऋद्धिशब्दः । प्र.९०४ | १२२ |
| ऋभुक्षिन्शब्दः । रू.१३५ | २९३ |
| ऋषभशब्दः । प्र.९१२ | १२२ |
| एकतरशब्दः । रू.३२ | २६७ |
| एडूकम् । प्र.३२९ | १७६ |

| | |
|---|---|
| एडूकशब्दः । प्र.६२९ | १२० |
| एडोकम् । प्र.३२९ | १७६ |
| एतद्-शब्दः । रू.१२१ | २८९ |
| एवंशब्दस्योदाहरणे । प्र.२९०३ | २०३ |
| ऐडविलः । प्र.१४४ | १५८ |
| ऐलविलः । प्र.१४४ | १५८ |
| ऐश्वर्यशब्दः । प्र. ७१ | ९४ |
| ओषधिः । प्र.६९२ | १८२ |
| ओषधी । प्र.६९२ | १८२ |
| औचित्यशब्दः । रू.९ | २६२ |
| कंशब्दस्योदाहरणे । प्र.२९०२ | २०३ |
| कंसारिः । प्र.३७ | १५० |
| ककुभ्शब्दः । रू.१४८ | २९६ |
| कच्छपीशब्दः । प्र.२६६३ | १३९ |
| कतमशब्दः । रू.२८ | २६६ |
| कतरशब्दः । रू.२७ | २६६ |
| कदर्यशब्दः । प्र.२१७२ | १३७ |
| कन्दः । प्र.५८३ | १७३ |
| कन्दरालः । प्र.७३७ | १८१ |
| कन्दुकः । प्र.१३८९ | १५६ |
| कपर्दिप्रेयसी । प्रक्रमाङ्कः ७५ | १४९ |
| कपर्दिमित्रः । प्र.१४४ | १४५ |
| कपाटः । प्र.६५७ | १७७ |
| कपित्थः । प्र.७२१ | १८२ |
| कबित्थः । प्र.७२१ | १८२ |
| कमलजः । प्रक्रमाङ्कः२६ | १४९ |
| कमलिनीवल्लभः । प्र.२२२ | १५३ |
| करभः । प्र.१२७४ | १५६ |

| | |
|---|---|
| कर्कटः । प्र.५३८ | १६२ |
| कर्कटकः । प्र.५३८ | १६२ |
| कर्कन्धुः । प्र.७५२ | १८२ |
| कर्कन्धूः । प्र.७५२ | १८२ |
| कर्परालः । प्र.७३७ | १८१ |
| कर्बरः । प्र.१२४ | १६० |
| कर्बुरः प्र.१२४ | १६० |
| कर्मन्शब्दः । रू.१२८ | २९१ |
| कलभः । प्र.१५९४ | १५६ |
| कलिकारकः । प्र.७७५ | १८७ |
| कलिमारकः । प्र.७७५ | १८७ |
| कल्पशब्दः । प्र.२७६ | १०० |
| कल्यम् । प्र.२३५ | १६५ |
| कल्लोलिनीवल्लभः । प्र.५०० | १५५ |
| कवाटः । प्र.६५७ | १७७ |
| काकलिः । प्र.३९१ | १७१ |
| काकली । प्र.३९१ | १७१ |
| काङ्क्षा । प्र.४४३ | १६९ |
| काचस्थाली । प्र.७८८ | १९४ |
| कापथः । प्र.६१६ | १७४ |
| कामशब्दः । प्र.४६ | ९५ |
| कार्श्यः । प्र.७६८ | १९५ |
| कार्ष्यः । प्र.७६८ | १९५ |
| कालशब्दः । प्र.२५३ | १०१ |
| काला । प्र.७८८ | १९४ |
| काल्यम् । प्र.२३५ | १६५ |
| किंशब्दस्योदाहरणे । प्र.२९०४ | २०३ |
| किन्नरपतिः । प्र.१४४ | १४६ |

| | |
|---|---|
| किम्शब्दः । रू.१५० | २९६ |
| किलशब्दस्योदाहरणे । प्र.२९११ | २०३ |
| कीर्तिशब्दः । प्र.३५५ | १०९ |
| किशलयः । प्र.७०८ | १८३ |
| किसलयः । प्र.७०८ | १८३ |
| कुटिः । प्र.६३३ | १७८ |
| कुटी । प्र.६३३ | १७८ |
| कुतूहलशब्दः । प्र.४५० | १११ |
| कुन्जरमुखः । प्र.७७ | ११४६ |
| कुपथः । प्र.६१६ | १७४ |
| कुम्भोलू । प्र.७४७ | १८३ |
| कुम्भोलूखलकम् । प्र.७४७ | १८३ |
| कुलिशपाणिः । प्र.९१ | १४४ |
| कुशब्दस्योदाहरणानि । प्र.२८८३ | २०३ |
| कृशरशब्दः । प्र.१८६४ | १३२ |
| कृषरशब्दः । प्र.१८६४ | १३३ |
| कृसरशब्दः । प्र.१८६४ | १३३ |
| केतुशब्दः । प्र.२५१९ | १४० |
| केलिः । प्र.४५३ | १७० |
| केली । प्र.४५३ | १७० |
| केशरः । प्र.७३० | १८४ |
| केसरः । प्र.७३० | १८४ |
| कैटभद्विट् । प्र.३७ | १५० |
| कोलिः । प्र.७५२ | १८३ |
| कोली । प्र.७५२ | १८३ |
| कुञ्च्शब्दः । रू.९० | २८१ |
| कोष्टुशब्दः । रू.७२ | २७७ |
| क्लिष्टशब्दः । प्र.३७३ | १०६ |

| | |
|---|---|
| क्षेमशब्दः । रू.८ | २६२ |
| खण्डः(खण्डम्) । प्र.५८२ | २७२ |
| खलकम् । प्र.७४७ | २८३ |
| खलुशब्दस्योदाहरणानि । प्र.२९१२ | २०४ |
| खेटकशब्दः । प्र.२४२६ | १४० |
| गणनाथः । प्र.७७ | १४६ |
| गणपतिः । प्र.७७ | १४६ |
| गणेशः । प्र.७७ | १४६ |
| गन्धर्वशब्दः । प्र.१०७ | ९६ |
| गभीरम् । प्र.५२६ | १५६ |
| गम्भीरम् । प्र.५२६ | १५६ |
| गरीयस्-शब्दः । रू.१७१ | ३०१ |
| गर्हणम् । प्र.३५८ | १६९ |
| गर्हणा । प्र.३५८ | १६९ |
| गाण्डिवः/म् । प्र.१६९१ | १५६ |
| गाण्डीवः/म् । प्र.१६९१ | १५६ |
| गि)(पतिः । प्र.२०४ | १६२ |
| गिःपतिः । प्र.२०४ | १६२ |
| गिरितनया । प्र.७५ | १४९ |
| गिर्-शब्दः । रू.१५३ | २९७ |
| गिर्पतिः । प्र.२०४ | १६२ |
| गीर्वाणतरङ्गिणी । प्र.५६० | १५४ |
| गीर्वाणमार्गः । प्र.१५३ | १५१ |
| गुप्शब्दः । रू.१४६ | २९५ |
| गुह्यकपतिः । प्र.१४४ | १४६ |
| गेन्दुकः । प्र.१३८९ | १५६ |
| गोशब्दः । रू.८६ | २८० |
| गोत्रभिद्शब्दः । रू.१६ | १८८ |

गोदुह्शब्दः । रू.१७६ ३०३
गोशालशब्दः । रू.१० २६२
गौरीशब्दः । प्र.११२५ १२४
गौरीपति । प्र. ६८ १५०
ग्रस्तशब्दः । प्र.३७४ १०६
ग्रहणीशब्दः । प्र.१२२० १२४
ग्रहपरिवृढः । प्र.२२२ १५३
ग्रहाधीशः । प्र.२२२ १५३
ग्रामणीशब्दः । रू.६० २७४
ग्राम्यशब्दः । प्र.३७२ १०६
घटशब्दः । रू.७ २६१
घण्टा । प्र.७५८ १८४
घण्टापाटलिः । प्र.७५८ १८४
घनवाहनः । प्र.९१ १४४
चक्करः । प्र.३७ ११५०
चकवाडः । प्र.६६६ १८०
चकवालः । प्र.६६६ १८०
चतुरास्यः । प्र.२६ १४९
चतुर्-शब्दः । रू.१५२ २९७
चतुर्वदनः । प्र.२६ १४९
चतुर्वाहुः । प्र.३७ १५०
चतुष्करः । प्र.३७ १५०
चशब्दस्योदाहरणानि । प्र.२८८४ २०४
चिरिबिल्वः । प्र.७७४ १८४
चिरिबिल्लः । प्र.७७४ १८४
चिरिविल्वः । प्र.७७४ १८४
चिरिविल्लः । प्र.७७४ १८४
छागछिद्शब्दः । रू.११७-२ २८८

| | |
|---|---|
| छायानायकः । प्र.२२२ | १५३ |
| छायापतिः । प्र.२२२ | १५३ |
| जगत्शब्दः । रू.१०५ | २८५ |
| जटाशब्दः । प्र.१३०७ | १२५ |
| जटिः । प्र.७४४ | १८६ |
| जटी । प्र.७४४ | १८६ |
| जम्पती । प्र.११८६ | १५६ |
| जम्बिरः । प्र.७२८ | १८५ |
| जम्बीरः । प्र.७२८ | १८५ |
| जम्भरः । प्र.७२८ | १८५ |
| जम्भलः । प्र.७२८ | १८५ |
| जम्भवैरी । प्र.९१ | १४४ |
| जराशब्दः । रू.४३ | २७० |
| जलदः । प्र.१७१ | १५२ |
| जलधिः । प्र.५०० | १५५ |
| जलवाहः । प्र.१७१ | १५३ |
| जलजम् । प्र.६७९ | १५४ |
| जलजविष्टरः । प्र.२६ | १४९ |
| जह्नुदुहिता । प्र.५६० | १५४ |
| जह्नुनन्दिनी । प्र.५६० | १५४ |
| जातुधानः । प्र.१२५ | १६० |
| जाह्नवी । प्र.५६० | १५४ |
| जीमूतमार्गः । प्र.१५३ | १५१ |
| जीवकशब्दः । प्र.९६४ | १२३ |
| जोषंशब्दस्योदाहरणे । प्र.२९०४ | २०५ |
| ज्ञानशब्दः । रू.४ | २६१ |
| झषकेतु । प्र.४६ | १४४ |
| तटः । प्र.६७१ | १७९ |

| | |
|---|---|
| तटशब्दः । रू.११ | २६२ |
| तटाकः । प्र.५५२ | १६२ |
| तटागः । प्र.५५२ | १६२ |
| तडाकः । प्र.५५२ | १६२ |
| तडागः । प्र.५५२ | १६२ |
| तद्-शब्दः । रू.१२० | २८९ |
| तन्द्रा । प्र.४६२ | १७० |
| तन्द्रिः । प्र.४६२ | १७० |
| तन्द्री । प्र.४६२ | १७० |
| तपनः । प्र.२१८ | १६४ |
| तपनतनया । प्र.५६१ | १५५ |
| तमः(तम) । प्र.२०९ | १६२ |
| तमः(तमस्) । प्र.२०९ | १६२ |
| तमा । प्र.२४९ | १६६ |
| तमिः । प्र.२४० | १६६ |
| तमी । प्र.२४० | १६६ |
| तरङ्गिणीरमणः । प्र.५०० | १५५ |
| तादृश्शब्दः । रू.१५९ | २९८ |
| तापनः । प्र.२१८ | १६४ |
| तारकरिपुः । प्र.८१ | १४५ |
| तारकवैरी । प्र.८१ | १४५ |
| तारकारिः । प्र.८१ | १४५ |
| ताराधीशः । प्र.१८६ | १५२ |
| तावत्शब्दः । रू.११३-२ | २८७ |
| तावत्शब्दस्योदाहरणानि । प्र.२८९५ | २०५ |
| तितउः । प्र.१८१५ | १५६ |
| तिन्तिडी । प्र.७६६ | १८५ |
| तिन्तिली । प्र.७६६ | १८५ |

| | |
|---|---|
| तिन्दुकः । प्र.७५६ | १८६ |
| तिन्दुकी । प्र.७५६ | १८६ |
| तिमिशब्दः । प्र.५३५ | ११९ |
| तिरःशब्दस्योदाहरणे । प्र.२९१५ | २०५ |
| तिर्यञ्च्शब्दः । रू.९६ | २८३ |
| तुदत्शब्दः । रू.११२ | २८७ |
| तुरगः । प्र.१६१० | १५७ |
| तुरङ्गः । प्र.१६१० | १५६ |
| तुरासाह्शब्दः । रू.१७५ | ३०२ |
| तुशब्दस्योदाहरणे । प्र.२८८६ | २०६ |
| तुवरः । प्र.३१६ | १६७ |
| तूवरः । प्र.३१६ | १६७ |
| तोयदः । प्र.१७१ | १५२ |
| तोयनिधिः । प्र.५०० | १५५ |
| तोयमुक् । प्र.१७१ | १५३ |
| तोयवाहः । प्र.१७१ | १५३ |
| त्रिशब्दः । रू.५६ | २७३ |
| त्रिदशतटिनी । प्र.५६० | १५४ |
| त्रिदशदेशः । प्र.२ | १५१ |
| त्रिदशदेशिकः । प्र.२०४ | १५२ |
| त्रिदशपतिः । प्र. ९१ | १४४ |
| त्रिदशवैरी । प्र.१४ | १४८ |
| त्रिदिवपतिः । प्र.९१ | १४४ |
| त्रिदिवसदनः । प्र.८ | १४७ |
| त्रिपुरारि । प्र. ६८ | १५० |
| त्रिपिष्टपम् । प्र.२ | १६१ |
| त्रिविष्टपम् । प्र.२ | १६१ |
| त्रिविष्टपनिकेतनः । प्र.८ | १४७ |

| | |
|---|---|
| ददत्शब्दः । रू.१११ | २८६ |
| दधिशब्दः । रू.५२ | २७२ |
| दधिमथ्शब्दः । रू.११५ | २८८ |
| दनुजरिपुः । प्र.८ | १४८ |
| दण्डिन्शब्दः । रू.१४५ | २९५ |
| दन्तशब्दः । रू.२२ | २६५ |
| दन्तिवदनः । प्र.७७ | १४६ |
| दम्पती । प्र.११८६ | १५६ |
| दयितशब्दः । रू.१२ | २६२ |
| दामन्शब्दः । रू.१३९ | २९४ |
| दारकशब्दः । रू.१६ | २६३ |
| दितितनयः । प्र.१४ | १४८ |
| दिततनुजः । प्र.१४ | १४८ |
| दितिनन्दनः । प्र.१४ | १४८ |
| दिधिषुः । प्र.११५५ | १५६ |
| दिधिषूः । प्र.११५५ | १५६ |
| दिनपतिः । प्र.२२२ | १५३ |
| दिव्शब्दः । रू.१५५ | २९७ |
| दीर्घलोमन्शब्दः । रू.१४३ | २९५ |
| दुर्मनस्-शब्दः । रू.१६८-२ | ३०० |
| दृश्शब्दः । रू.१५८ | २९८ |
| देवकीतनयः । प्र.३७ | १५१ |
| देवकीसूनुः । प्र.३७ | १५१ |
| देवदेशः । प्र.२ | १५१ |
| देवराजः । प्र.९१ | १४४ |
| देवलोकः । प्र.२ | १५१ |
| देवरिपुः । प्र.१४ | १४८ |
| दैत्यरिपुः । प्र.३७ | १५० |

दैत्यारातिः । प्र.८ १४८
दोस्-शब्दः । रू.१६० २९८
द्रुह्शब्दः । रू.१८० ३०३
द्विशब्दः । रू.५५ २७३
द्वितयशब्दः । रू.१९-२ २६४
द्वितीयशब्दः । रू.२० २६५
द्विष्-शब्दः । रू.१६१ २९९
धनपतिः । प्र.१४४ १४६
धनुः । प्र.७४९ १९१
धनुपटः । प्र.७४९ १९१
धनुस्-शब्दः । रू.१६८-१ ३००
धनुष्पटः । प्र.७४९ १९१
धरणिः । प्र.५८६ १७४
धरणी । प्र.५८६ १७४
धवलांशुः । प्र.१८६ १५२
धातुशब्दः । प्र.६७९ १२१
धातृशब्दः । रू.८० २७८
धान्यशब्दः । प्र.१८०६ १३३
धिक्शब्दस्योदाहरणानि । प्र.२८८३ २०६
धीमत्शब्दः । रू.११० २८६
धृष्णिः । प्र.२२६ १६२
धेनुशब्दः । रू.६४ २७४
नक्तमालः । प्र.७७४ १८५
नक्षत्रपतिः । प्र.१८६ १५२
नक्षत्रवर्त्म । प्र.१५३ १५१
नक्षत्रशब्दः । प्र.१९९ ९८
नदीशब्दः । रू.३ २६१
नदीपतिः । प्र.५०० १५५

| | |
|---|---|
| ननुशब्दस्योदाहरणानि । प्र.२८९९ | २०६ |
| नमुचिपरिपन्थी । प्र.९१ | १४४ |
| नरकशब्दः । प्र.४९१ | ११८ |
| नरकरिपुः । प्र.३७ | १५० |
| नश्शब्दः । रू.१५७ | २९८ |
| नाकनायकः । प्र.९१ | १४४ |
| नाकनिकेतनः । प्र.८ | १४७ |
| नागरिपु । प्र. ५७ | १४७ |
| नागवैरिन् । प्र. ५७ | १४७ |
| नागाराति । प्र. ५७ | १४७ |
| नानाशब्दस्योदाहरणे । प्र.२८९७ | २२६ |
| नामशब्दस्योदाहरणानि । प्र.२९०५ | २२६ |
| नालम् । प्र.५८१ | १७३ |
| नाला । प्र.५८१ | १७३ |
| नाली । प्र.५८१ | १७३ |
| नाशिकाशब्दः । रू.४० | २६९ |
| निःशब्दस्योदाहरणे । प्र.२९०८ | २०७ |
| निःश्रेणिः । प्र.६५८ | १७८ |
| निःश्रेयसम् । प्र.३११ | १६८ |
| निधिपतिः । प्र.१४४ | १४६ |
| निधिशब्दः । प्र. १४८ | ९६ |
| नियमशब्दः । प्र.१४९९ | १२८ |
| निर्जरशब्दः । रू.२५ | २६६ |
| निशाशब्दः । रू.३९ | २६९ |
| निशानाथः । प्र.१८६ | १५२ |
| निशीथिनीदयितः । प्र.१८६ | १५२ |
| निश्रेणिः । प्र.६५८ | १७८ |
| निश्रेयसम् । प्र.३११ | १६८ |

| | |
|---|---|
| नीशब्दः । रू.६१ | २७४ |
| नूतनः । प्र.२२३० | १५६ |
| नूत्नः । प्र.२२३१ | १५६ |
| नुशब्दस्योदाहरणे । प्र.२८९८ | २०७ |
| नुनंशब्दस्योदाहरणे । प्र.२९०३ | २०७ |
| नृशब्दः । रू.८२ | २७९ |
| नेमिः । प्र.७३२ | १८६ |
| नेमी । प्र.७३२ | १८६ |
| नौशब्दः । रू.८८ | २८० |
| पङ्कजम् । प्र.६७९ | १५४ |
| पङ्कजातम् । प्र.६७९ | १५४ |
| पङ्क्तिशब्दः । प्र.१९३३ | १३३ |
| पङ्गुशब्दः । रू.६९ | २७६ |
| पञ्चन्शब्दः । रू.१४० | २८४ |
| पञ्चवाण । प्र. ४६ | १४५ |
| पञ्चसायक । प्र. ४६ | १४५ |
| पटः । प्र.७४९ | १९१ |
| पट्टी ।(पट्टिन्) प्र.७६१ | १८६ |
| पट्टी । प्र.७६१ | १८६ |
| पण्यवीथिका । प्र.६२६ | १७९ |
| पण्यवीथी । प्र.६२६ | १७९ |
| पतत्त्रिराज । प्रक्रमाङ्कः ५७ | १४७ |
| पतिशब्दः । रू.४९ | २७१ |
| पथिन्शब्दः । रू.१३६ | २९३ |
| पदविः । प्र.३१३ | १७५ |
| पदवी । प्र.३१३ | १७५ |
| पद्मभूः । प्र. २६ | १४९ |
| पद्मासनः ।। प्र. २६ | १४९ |

पन्नगरिपु । प्र. ५७ १४६

पन्नगारि । प्र. ५७ १४६

पयस्-शब्दः । रू.१६९ ३०१

पयोधिः । प्र.५०० १५५

पयोधिपुत्री । प्र. ५० १५०

पयोनिधिः । प्र.५०० १५५

पयोमुक् । प्र.१७१ १५३

परिवादः । प्र.३५८ १६८

परिवेषशब्दः । प्र.२२५ ९८

परिहासः । प्र.४५३ १७०

परीवादः । प्र.५३८ १६८

परीहासः । प्र.५४३ १७०

पर्कटिः । प्र.७४४ १८७

पर्कटी । प्र.७४४ १८७

पर्वः । प्र.२४२ १६५

पर्वतशब्दः । प्र.६६९ १२१

पर्वसन्धिः । प्र.२४२ १६५

पश्चात्शब्दस्योदाहरणानि । प्र.२८८८ २०७

पस्त्यम् । प्र.६२१ १७७

पाकारिः । प्र.९१ १४४

पाटलिः । प्र.७५८ १८४

पातालशब्दः । प्र.४६६ ११७

पाथोदपथः । प्र.१५३ १५१

पादशब्दः । रू.२१ २६५

पानीयशाला । प्र.६३६ १७८

पानीयशालिका । प्र.६३६ १७८

पापशब्दः । प्र.२७९ १०१

पारिपार्श्विकशब्दः । प्र.२२३ ९८

| | |
|---|---|
| पारियात्रकः । प्र.६६८ | १८० |
| पारियात्रिकः । प्र.६६८ | १८० |
| पितृशब्दः । रू.८१ | २७८ |
| पियालः । प्र.७४९ | १९१ |
| पिष्टपम् । प्र.५९५ | १७४ |
| पीयूषम् । प्र.९९ | १५७ |
| पीयूषमयूखः । प्र.१८६ | १५१ |
| पीयूषाशी । प्र.८ | १४८ |
| पुँश्चलीशब्दः । प्र.११३० | १२४ |
| पुंस्-शब्दः । रू.१६६ | ३०० |
| पुनःशब्दस्योदाहरणे । प्र.२९०८ | २०८ |
| पुरस्तात्शब्दस्योदाहरणानि । प्र.२८९४ | २०८ |
| पुराशब्दस्योदाहरणानि । प्र.२९०९ | २०८ |
| पुराणशब्दः । प्र. ३४३ | १०७ |
| पुरारिसुन्दरी । प.७५ | १४९ |
| पुष्पवन्तशब्दः । प्र.२५२ | १०२ |
| पुष्पायुध । प्र. ४६ | १४५ |
| पूतिकः । प्र.७७५ | १८७ |
| पूतीकः । प्र.७७५ | १८७ |
| पूतीकरजः । प्र.७७५ | १८७ |
| पूतीकरञ्जः । प्र.७७५ | १८७ |
| पूर्तशब्दः । प्र.१४५१ | १२८ |
| पूर्वशब्दः । रू.१८ | २६४ |
| पूषन्शब्दः । रू.१२९-२ | २९१ |
| पृतनाशब्दः । रू.४१ | २७० |
| पृथवी । प्र.५८८ | १७४ |
| पृथिवी । प्र.५८८ | १७४ |
| पृश्निः । प्र.२२६ | १६२ |

पृषतशब्दः । प्र. ५०९ १११
पृषत्शब्दः । रू.१०३ २८५
पेयूषम् । प्र.९९ १५७
पौलोमीवल्लभः । प्र.९१ १४४
प्ताशब्दः । प्र.१३०७ १२५
प्रततिः । प्र.६९७ १९०
प्रतनः । प्र.२२२९ १५६
प्रतिशब्दस्योदाहरणानि । प्र.२८९२ २०८
प्रत्नः । प्र.२२२९ १५६
प्रत्यञ्च्शब्दः । रू.९२ २८१
प्रत्युहाधिनाथः । प्र.७७ १४६
प्रत्युषः । प्र.२३५ १६५
प्रत्यूषः । प्र.२३५ १६५
प्रथमशब्दः । रू.१९-१ २६४
प्रमथनाथ । प्र. ६८ १५०
प्रलम्बरिपुः । प्र.४२ १४८
प्रलम्बारिः । प्र.४२ १४८
प्रलापशब्दः । प्र.३६३ १०८
प्रवारणशब्दः । प्र.२३०७ १३८
प्रवाहिकाशब्दः । प्र.१२२० १२५
प्रशाम्शब्दः । रू.१४९ २९६
प्रसूनशर । प्र. ४६ १४५
प्रहेलिकाशब्दः । प्र.३४४ १०८
प्राञ्च्शब्दः । रू.९१ २८१
प्रादुःशब्दस्योदाहरणे । प्र.२९१४ २०९
प्रियालः । प्र.७४९ १९१
फणशब्दः । रू.६ २६१
फाण्टशब्दस्य प्रसङ्गः । प्र.२२६४ १३८

| | |
|---|---|
| फेलाशब्दः । प्र.१८७७ | १३४ |
| बर्हिः । प्र.११० | १५६ |
| बर्हिणधोरणः । प्र.८१ | १४५ |
| बर्हिवाहनः । प्र.८१ | १४५ |
| बर्हिशुष्मा । प्र.११० | १५७ |
| बलरिपुः । प्र.९१ | १४४ |
| बलाहकवर्त्म । प्र.१५३ | १५१ |
| बालतनयः । प्र.७७८ | १८८ |
| बालपत्रः । प्र.७७८ | १८८ |
| बाल्यशब्दः । प्र.११९० | १२६ |
| बुध्शब्दः । रू.२२५ | २९० |
| ब्रह्मन्शब्दः । रू.१२६-१ (पुंलिङ्गी) | २९० |
| ब्रह्मन्शब्दः । रू.१२६-२ (क्लीबलिङ्गी) | २९१ |
| ब्रह्मचारिशब्दः । प्र.१४८६ | १२९ |
| ब्रह्मबन्धुशब्दः । प्र.२६०७ | १४० |
| भगशब्दः । प्र.२४४८ | १४१ |
| भगीरथतनया । प्र.५६० | १५४ |
| भगीरथदुहिता । प्र.५६० | १५४ |
| भगीरथनन्दिनी । प्र.५६० | १५४ |
| भमार्गः । प्र.१५३ | १५१ |
| भवत्शब्दः । रू.११४ (क) | २८८ |
| भवत्शब्दः । रू.१०८ (ख) | २८६ |
| भविष्णुशब्दः । रू.७० | २७६ |
| भानुशब्दः । रू.६३ | २७४ |
| भारतीपतिः । प्र.२०४ | १५२ |
| भावशब्दः । प्र.४३० | १११ |
| भाष्यशब्दः । प्र.३०२४ | १४२ |
| भिक्षुशब्दः । प्र.१४८४ | १२९ |

| | |
|---|---|
| भिदिरम् । प्र.९६ | १६० |
| भिदुरम् । प्र.९६ | १६० |
| भिन्दिपालशब्दः । प्र.१७०६ | १३१ |
| भीष्मजननी । प्र.५६० | १५५ |
| भीष्मप्रसूः । प्र.५६० | १५५ |
| भीष्माम्बा । प्र.५६० | १५५ |
| भूशब्दः । रू.७५ | २७७ |
| भृकुटिः । प्र.४६२ | १७१ |
| भृकुटी । प्र.४६२ | १७१ |
| भेरिः । प्र.३९९ | १७१ |
| भेरी । प्र.३९९ | १७१ |
| भ्रकुटी । प्र.४६२ | १७१ |
| भ्रूशब्दः । रू.७९ | २७८ |
| भ्रुकुटी । प्र.४६२ | १७१ |
| भ्रूकुटी । प्र.४६२ | १७१ |
| मघवन्शब्दः । रू.१३१ | २९२ |
| मघवा । प्र.८४ | १५७ |
| मघवान् । प्र.८४ | १५७ |
| मज्जा । प्र.७०४ | १८८ |
| मज्जी । प्र.७०४ | १८८ |
| मञ्जरिः । प्र.७०६ | १८८ |
| मञ्जरी । प्र.७०६१४८ | १८८ |
| मतिशब्दः । रू.४५ | २७० |
| मत्तशब्दः । प्र.१५९५ | १३१ |
| मधुलिह्शब्दः । रू.१७३ | ३०२ |
| मधुशब्दः । रू.६७ | २७५ |
| मधूकः । प्र.७३४ | १८९ |
| मधूलकः । प्र.७३४ | १८९ |

| | |
|---|---|
| मधुवैरी । प्र.३७ | १५० |
| मनुशब्दः । रू.६६ | २७५ |
| मन्वन्तरशब्दः । प्र.२७७ | १०२ |
| मयूरवाहनः । प्र.८१ | १४५ |
| मरालवाहनः । प्र.२६ | १४९ |
| मल्लकशब्दः । रू.५ | २६१ |
| महत्शब्दः । रू.१०९ | २८६ |
| महिः । प्र.५८८ | १७५ |
| महिका । प्र.१९३ | १६४ |
| मही । प्र.५८८ | १७५ |
| महीधरनन्दिनी । प्र.७५ | १४९ |
| मांसशब्दः। रू.३४ | २६८ |
| मातृशब्दः । रू.८३ | २७९ |
| मार्तण्डः । प्र.२१५ | १६४ |
| मार्ताण्डः । प्र.२१५ | १६४ |
| मासशब्दः । रू.२३ | २६५ |
| मिथशब्दस्योदाहरणे । प्र.२९१४ | २०९ |
| मिहिका । प्र.१९३ | १६४ |
| मीनकेतु । प्र. ४६ | १४४ |
| मुनिशब्दः । प्र.१४८५ | १२९ |
| मुरारिः । प्र.३७ | १५० |
| मुरारिदयिता । प्र. ५० | १५० |
| मुरारिसहधर्मिणी । प्र. ५० | १५० |
| मूषकधोरणः । प्र.७७ | १४६ |
| मुसली । प्र.४२ | १४८ |
| मुह्शब्दः । रू.१८१ | ३०४ |
| मृणालम् । प्र.५८२ | १७३ |
| मृणाली । प्र.५८२ | १७३ |

मेखलाशब्दः । प्र.१३२९ १२६
मेनकाकन्यका । प्र.७५ १४९
मेनकातनया । प्र.७५ १४९
मेनकादुहिता । प्र.७५ १४९
मेधाशब्दः । प्र.३०० १०४
मोक्षशब्दः । प्र.३१२ १०४
मोघा । प्र.७८८ १८९
म्लेच्छशब्दः । प्र.२०२७ १३७
यकृत्शब्दः । रू.१०६ २८५
यक्षपतिः । प्र.१४४ २४६
यद्-शब्दः । रू.११९ २८९
यमशब्दः । प्र.१४९८ १३०
यमानुजा । प्र.५६१ १५५
यशश्शब्दः । प्र.३५५ १०९
यशस्करशब्दः । रू.१५ २६३
यातुधानः । प्र.१२५ १६०
यावत्शब्दः । रू.११३.१ २८७
यावत्शब्दस्योदाहरणानि । प्र.२८९५ २०९
युवन्शब्दः । रू.१३३ २९२
युस्मद्-शब्दः । रू.१२२ २९०
यूषशब्दः । रू.२४ २६६
रक्तमालः । प्र.७७४ २८५
रजनिः । प्र.२४० १६६
रजनी । प्र.२४० १६६
रजनीपतिः । प्र.१८६ १५२
रथाङ्गपाणिः । प्र.३७ १५०
रमाशब्दः । रू.२ २६०
रमावल्लभः । प्र.३७ १५०

रश्मिः । प्र.२२६ १६२

रसशब्दः ।। प्र.४२२ ११२

रसाञ्जनशब्दः । प्र.१९६७ १३४

रसालाशब्दः । प्र.१८५१ १३५

राजन्शब्दः । रू.१२९-१ २९१

राजातनम् । प्र.७४९ १९१

राजादनम् । प्र.७४९ १९१

राज्शब्दः । रू.९८ २८३

राज्याङ्गशब्दः । प्र.१५५९ १३१

रात्रिः । प्र.२३९ १६६

रात्री । प्र.२३९ १६६

रामशब्दः । रू.१ २६०

रुवुकः । प्र.७८१ १८२

रुवूकः । प्र.७८१ १८२

रेखा । प्र.६८७ १९२

रेवतीदयितः । प्र.४२ १४८

रेवतीपतिः । प्र.४२ १४८

रैशब्दः । रू.८७ २८०

रोहिणीपुत्रः । प्र.४२ १४९

रोहिणीसूनुः । प्र.४२ १४९

लक्ष्मीशब्दः । रू.५९ २७४

ललितशब्दः । प्र.४५१ ११३

लाजशब्दः । प्र. १८५७ १३५

लीलाशब्दः । प्र.४५२ ११४

लेखा । प्र.६८७ १९२

लोहशब्दः । प्र.१९६२ १३६

वज्रपाणिः । प्र.९१ १४४

वणिज्शब्दः । रू.९९-१ २८३

| | |
|---|---|
| वतशब्दस्योदाहरणानि । प्र.२८९० | २१० |
| वधूशब्दः । रू.७८ | २७८ |
| वनमालिन्शब्दः । रू.१४४ | २९५ |
| वरवर्णिनीशब्दः । प्र.१११८ | १२७ |
| वर्तनिः । प्र.६१४ | १७५ |
| वर्तनी । प्र.६१४ | १७५ |
| वर्त्मनिः । प्र.६१४१३७ | १७५ |
| वर्वराशब्दः । प्र.९५८ | १२३ |
| वर्वरीशब्दः । प्र.९५८ | १२३ |
| वर्षाभूशब्दः । रू.७७ | २७८ |
| वलक्षः । प्र.३२४ | १६७ |
| वलभिः । प्र.६५२ | १७८ |
| वलभी । प्र.६५२ | १७८ |
| वल्लरिः । प्र.७०६ | १८८ |
| वल्लरी । प्र.७०६ | १८८ |
| वल्ली । प्र.६९७ | १८९ |
| वस्त्यम् । प्र.६२१ | १७७ |
| वाशब्दस्योदाहरणे । प्र.२९०१ | २२० |
| वाक्पतिः । प्र.२०४ | १५२ |
| वाच्शब्दः । रू.८९ | २८० |
| वाणीपतिः । प्र.२०४ | १५२ |
| वायुशब्दः । प्र. १३३ | ९६ |
| वारिशब्दः । रू.४६ | २७१ |
| वारणाननः । प्र.७७ | १४६ |
| वारिजम् । प्र.६७९ | १५४ |
| वारिदवाहनः । प्र.९१ | १४४ |
| वार्-शब्दः । रू.१५४ | २९७ |
| वासरपतिः । प्र.२२२ | १५३ |

वासरमणिः । प्र.२२२ १५३

विकङ्कतः । प्र.७५४ १९०

विघ्नराजः । प्र.७७ १४६

विच्छन्दकः । प्र.६४४ १७६

विच्छन्दकशब्दः । प्र.६४४ १२०

विच्छर्दकः । प्र.६४४ १७६

विडोजाः । प्र.८४ १५८

विडौजाः । प्र.८४ १५८

विद्वस्-शब्दः । रू.१७० ३०१

विनतातनय । प्र. ५७ १४६

विनतानन्दन । प्र. ५७ १४६

विनतासूनु । प्र. ५७ १४६

विपणिः । प्र.६२६ १७८

विपणी । प्र.६२६ १७८

विबुधगुरुः । प्र.२०४ १५२

विबुधाध्वा । प्र.१५३ १५१

विभ्रमशब्दः । प्र.४५१ ११४

विरञ्चिः । प्र.२३ १५९

विरिञ्चिः । प्र.२३ १५९

विलासशब्दः । प्र.४५१ ११५

विव्वोकशब्दः । प्र.४५१ ११५

विश्शब्दः । रू.१५६ २९६

विश्वक्सेनः । प्र.३० १६०

विश्वपाशब्दः । रू.३७ २६९

विश्वम्भरसुन्दरी । प्र ५० १५०

विश्वराज्शब्दः । रू.१०२ २८४

विश्ववाह्शब्दः । रू.१७४ ३०२

विष्टपम् । प्र.५९५ १७५

| | |
|---|---|
| विष्वक्सेनः । प्र.३० | १६० |
| विष्वद्रचञ्च्शब्दः । रू.९७ | २९३ |
| विसमेषु । प्र. ४६ | १४५ |
| विहगपति । प्र. ५७ | १४७ |
| विहङ्गमाधीश । प्र. ५७ | १४७ |
| विहसितशब्दः । प्र.४५८ | ११४ |
| वृत्रशत्रुः । प्र.९१ | १४४ |
| वृत्रहन्शब्दः । रू.१३० | २९२ |
| वृथाशब्दस्योदाहरणे । प्र.२८९७ | २१० |
| वृष्णिः । प्र.२२६ | १६२ |
| वेधस्-शब्दः । रू.१६४-१ | २९९ |
| वेल्लिः । प्र.६९७ | १८९ |
| वेसवारशब्दः । प्र.१८३३ | १३६ |
| वैकङ्कतः । प्र.७५४ | १९० |
| व्यसनशब्दः । प्र.२६४० | १४१ |
| व्याकोशः । प्र.६९४ | १९१ |
| व्याकोषः । प्र.६९४ | १९१ |
| व्यालवैरिन् । प्र. ५७ | १४७ |
| व्रततिः । प्र.६९७ | १९० |
| व्रतती । प्र.६९७ | १९० |
| व्रीहिशब्दः । प्र.१८०६ | १३३ |
| शंपाकः । प्र.७२६ | १८९ |
| शकृत्शब्दः । रू.१०७ | २८५ |
| शचीदयितः । प्र.९१ | १४४ |
| शनिः । प्र.२०८ | १६३ |
| शमनभगिनी । प्र.५६१ | १५५ |
| शम्बः । प्र.९७ | १६० |
| शम्भुसुहृत् । प्र.१४४ | १४५ |

| | |
|---|---|
| शम्याकः । प्र.७२६ | १८९ |
| शरणिः । प्र.६१४ | १७५ |
| शरद्शब्दः । रू.११७.१ | २८८ |
| शर्वः । प्र.५९ | १६१ |
| शश्वत्शब्दस्योदाहरणानि । प्र.२८८९ | २११ |
| शस्यम् । प्र.७०९ | १९२ |
| शस्यसंवरः । प्र.७६८ | १९५ |
| शाकशब्दः । प्र.९५१ | १२३ |
| शारदः । प्र.७२५ | १९२ |
| शारदी । प्र.७२५ | १९२ |
| शालः । प्र.६२८ | १७९ |
| शालः । प्र.६९० | १९० |
| शालः । प्र.७६८ | १९५ |
| शावरः । प्र.७४५ | १९२ |
| शिफा । प्र.५८३ | १७३ |
| शिफाकन्दः । प्र.५८३ | १७३ |
| शिलशब्दः । प्र.१७६७ | १३२ |
| शिला । प्र.६७० | १८० |
| शिली । प्र.६७० | १८० |
| शिवसखः । प्र.१४४ | १४५ |
| शिशिररस्मिः । प्र.१८६ | १५२ |
| शीकरः । प्र.१७९ | १६३ |
| शीतांशुः । प्र.१८६ | १५२ |
| शुनाशीरः । प्र.८५ | १५८ |
| शुनासीरः । प्र.८५ | १५८ |
| शुष्मन् । प्र.११० (१।१।५७) | १५७ |
| शूरः । प्र.२१२ | १६३ |
| शेलुः । प्र.७४८ | १९३ |

शेवालम् । प्र.५७४ १७४

शेवालम् । प्र.५७४ १७४

शैवलः । प्र.५७४ १५६

शैवालम् । प्र.५७४ १५६

शोणकः। प्र.७९४ १९३

शोणाकः ।७९३ १९३

शोनकः। प्र.७९४ १९३

शोभाञ्जनः । प्र.७४१ १९४

शौभाञ्जनः । प्र.७४१ १९४

शौरः । प्र.२०८ १६३

शौरिः । प्र.२०८ १६३

श्योनाकः । प्र.७९३ १९३

श्रीरः (वैदिकशब्दः) १५६

श्रीलः (वैदिकशब्दः) १५६

श्रीशब्दः । रू.५८ २७३

श्लीलः (वैदिकशब्दः) १५६

श्वन्शब्दः । रू.१३२ २९२

षडास्यः । प्र.८१ १४५

षण्डम् (षण्डः) । प्र.५८२ १७२

षण्मुखः । प्र.८१ १४५

षड्वक्त्रः । प्र.८१ १४५

षष्-शब्दः । रू.१६३ २९९

संकरः । प्र.६५९ २७९

संकारः । प्र.६५९ २७९

संज्ञाधवः । प्र.२२२ १५३

संज्ञावल्लभः । प्र.२२२ १५३

संपाकः । प्र.७२६ १८९

संयमशब्दः । प्र.२३३७ १३९

| | |
|---|---|
| सकृत्शब्दस्योदाहरणानि । प्र.२८८७ | २११ |
| सक्तुफला । प्र.७८३ | १९४ |
| सक्तुफली । प्र.७८३ | १९४ |
| सक्थिशब्दः । रू.५३ | २७२ |
| सखिशब्दः । रू.५० | २७१ |
| सटाशब्दः । प्र.१३०७ | १२५ |
| सदनम् । प्र.६२१ | १७७ |
| सध्र्यञ्च्शब्दः । रू.९३ | २८२ |
| सप्तमातृकाशब्दः । प्र.७० | ९७ |
| सप्तर्षिशब्दः । प्र.२१० | ९९ |
| सप्तसप्तितिः । प्र.२२२ | १५४ |
| सप्तार्चिशब्दः । प्र. ११४ | ९७ |
| समज्ञा । प्र.३५५ | १६८ |
| समज्या । प्र.३५५ | १६८ |
| समयाशब्दस्योदाहरणे । प्र.२९०७ | २११ |
| समस्याशब्दः । प्र.३४६ | १०९ |
| समाज्ञा । प्र.३५५ | १६८ |
| समिध्-शब्दः । रू.१२४ | २९० |
| सम्बः । प्र.९७ | १६० |
| सम्यञ्च्शब्दः । रू.९५ | २८२ |
| सरणिः । प्र.६१४ | १७५ |
| सरसिजम् । प्र.६७९ | १५४ |
| सरोजम् । प्र.६७९ | १५४ |
| सरोजिनीदयितः । प्र.२२२ | १५३ |
| सरोजिनीपतिः । प्र.२२२ | १५३ |
| सर्वः । प्र.५९ | १६१ |
| सर्वशब्दः । रू.१७ | २६४ |
| सस्यम् । प्र.७०९ | १९२ |

सस्यसंवरः । प्र.७६८ १९५
सहस्रकिरणः । प्र.२२२ १५३
सहस्रपात्शब्दः । रू.११८ २८९
सहस्रमयूखः । प्र.२२२ १५३
सहस्रनेत्रः । प्र.९१ १४४
सहस्रलोचनः । प्र.९१ १४४
साक्षात्शब्दस्योदाहरणानि । प्र.२८८९ २११
सागरसुता । प्र. ५० १५०
सात्विकशब्दः । प्र.४२० ११५
सादनम् । प्र.६२१ १७७
सानुशब्दः । रू.७३ २६६
सामन्शब्दः । रू.१३७ २९३
सामिशब्दस्योदाहरणे । प्र.२९०१ २११
सायः । प्र.२३७ १६७
सायम् । प्र.२३७ १६७
सालः । प्र.६२८ १७९
सालः । प्र.६९० १९०
सालः । प्र.७६८ १९५
सावरः । प्र.७४५ १९२
सितकिरणः । प्र.१८६ १५२
सिन्धुतनया । प्र ५० १५०
सीकरः । प्र.१७९ १६३
सीमन्शब्दः । रू.१२७ २९१
सीरी । प्र.४२ १४८
सुकर्मन्शब्दः । रू.१४२ २९४
सुखभुज्शब्दः । रू.९९-२ २८५
सुदर्शनशब्दः । प्र. ५१ ९७
सुधाकरः । प्र.१८६ १५१

सुधाशनः । प्र.८ १४८
सुधिशब्दः । रू.६२ २७४
सुनासीरः । प्र.८५ १५८
सुपर्णकः । प्र.७२७ १८९
सुपर्ववर्त्म । १५३ १५१
सुभाञ्जनः । प्र.७४१ १९४
सुमम् । प्र.७१३ १९६
सुमुखशब्दः । रू.१३ २६३
सुरधुनी । प्र.५६० १५४
सुरसद्मः । प्र.२ १५१
सुरारिः । प्र.१४ १४८
सुवर्णशब्दः । प्र.२४१२ १४२
सुवर्णकः । प्र.७२७ १८९
सुसमम् । प्र.७१३ १९६
सूतकागृहम् । प्र.६३८ १७९
सूतिकागृहम् । प्र.६३८ १७९
सूनाशब्दः । प्र.२६२५ १४२
सूरः । प्र.२१२ १६३
सेलुः । प्र.७४८ १९३
सौदामनी । प्र.१७५ १६३
सौदामिनी । प्र.१७५ १६३
सौभाञ्जनः । प्र.७४१ १९४
सौरः । प्र.२०८ १६३
सौरिः । प्र.२०८ १६३
स्त्रीशब्दः । रू.५७ २६३
स्थाली । प्र.७८८ १९४
स्मरारि । प्र. ६८ १५०
स्मरारिदयिता । प्र.७५ १४९

| | |
|---|---|
| स्मितशब्दः । प्र.४५७ | ११६ |
| स्मृतिशब्दः । प्र.३४५ | ११० |
| स्योनाकः । प्र.७९३ | १९३ |
| स्रज्शब्दः । रू.१०० | २८४ |
| स्वःशब्दस्योदाहरणे । प्र.२९११ | २१२ |
| स्वयंभूशब्दः । रू.७६ | २७७ |
| स्वरशब्दः । प्र.३९० | ११६ |
| स्वस्तिशब्दस्योदाहरणानि । प्र.२८८५ | २१२ |
| स्वसृशब्दः । रू.८४ | २७९ |
| स्वादुशब्दः । रू.७१ | २७६ |
| स्वित्शब्दस्योदाहरणानि । प्र.२८८६ | ११२ |
| हंसयानः । प्र. २६ | १४९ |
| हन्तशब्दस्योदाहरणानि । प्र.२८९१ | २१२ |
| हन्तृशब्दः । रू.८५ | २८० |
| हरिशब्दः । रू.४४ | २७० |
| हरितशब्दः । रू.१४ | २६३ |
| हरित्शब्दः । रू.१०४ | २८५ |
| हली । प्र.४२ | १४८ |
| हहा । प्र.१०७ | १५८ |
| हाशब्दस्योदाहरणानि । प्र.२९१५ | २१३ |
| हावशब्दः । प्र.४५२ | ११२ |
| हाहा । प्र.१०७ | १५८ |
| हाहाशब्दः । रू.३८ | २६९ |
| हिमकरः । प्र.१८६ | १५२ |
| हिशब्दस्योदाहरणे । प्र.२९१६ | २१३ |
| हुंशब्दस्योदाहरणे । प्र.२९०७ | २१३ |
| हुहु । प्र.१०७ | १५८ |
| हूहू । प्र.१०७ | १५८ |

| | |
|---|---|
| हूहूशब्दः । रू.७४ | २७७ |
| हृदयशब्दः । रू.३५ | २६८ |
| हेलाशब्दः । प्र.४५२ | ११७ |
| हेलिदुहिता । प्र.५६१ | १५५ |

# सन्दर्भसामग्रीसूची

अधिकारी, टीकाराम, *पं. कुलचन्द्रगौतम र उनको साहित्यसाधना,* दाङ् नेपाल : महेन्द्रसंस्कृतविश्वविद्यालय,. २०५६ ।

अधिकारी, हेमाङ्गराज, नेपाली वर्णविन्यास र यसको मानकीकरण अवधारणा पत्र, चितवन : बालकुमारी कलेज, २०६३ ।

*अनुसन्धानप्रकाश,* काठमाण्डौ : ने.सं.वि. अनुसन्धान केन्द्र, २०६५ ।

अमरसिंहः (सम्पा.ब्रह्मानन्द त्रिपाठी), ***अमरकोशः*** (स्व.व.,क्षे.श्लो.), वाराणसी : चौखम्बा सुरभारती प्रकाशन, सन् १९९६ ।

आचार्य, तुलसीराम, *एकादशीमाहात्म्यम्* वाराणसी : बम्बइ पुस्तक भण्डार २०२० ।

आचार्य, बालकृष्ण, *अमरकोशटीका,* वाराणसी : यशोदा पुस्तकालय, २०१७ ।

आचार्य नारायण, *सुभाषितरत्नभाण्डागारम्,* दिल्ली : मुन्सीराम मनोहरलाल, सन् १९५२ ।

आप्टे, वामन शिवराम, *संस्कृत हिन्दी कोश,* वाराणसी : भारतीय विद्या प्रकाशन, ई.२००१ ।

आचार्यः हेमचन्द्रः, ***अभिधानचिन्तामणिः,*** (३।११६), वाराणसी : चौखम्बा विद्याभवन, २०२० ।

ईश्वरकृष्ण (सम्पा.श्रीकृष्णमणि त्रिपाठी), *सांख्यकारिका,* वाराणसी : चौखम्बा सुरभारती प्रकाशन १९७७ ।

उपाध्याय, माधव, *आयुर्वेदप्रकाश,* वाराणसी : चौखम्बा भारती अकादमी, सन् २०१४ ।

कवि, माधव, (सम्पा.यदुनन्दनोपाध्याय), *माधवनिधानम्,* वाराणसी : चौखम्बा प्रकाशन, २०७१ ।

कालिदास, *रघुवंशः,* वाराणसी : चौखम्बा संस्कृत संस्थान, पञ्चमसंस्करण २०३९ ।

कुल्लूकभट्ट, *मनुस्मृतिः,* वाराणसी : चौखम्बा संस्कृत भवन,.२०७१ ।

कौण्डभट्टः, *वैयाकरणभूषणसारः* (सम्पा.चन्द्रिकाप्रसाद द्विवेदी), वाराणसी : चौखम्वा संस्कृत प्रतिष्ठान १९९९ ।

कौण्डिन्न्यायन शिवराज आचार्य, *मर्यादा* (अङ्कः १७, सम्पा.नीलमणि ढुङ्गाना आदि), काठमाण्डौ : वल्मीकिविद्यापीठम्, .२०४३ ।

खतिवडा, चिरञ्जीवी, अमरकोशः, देवघाट : महेशसंस्कृतगुरुकुलम् रामानन्द अनुसन्धान केन्द्र, २०७८ ।

गुप्त, गोपीनाथ, *भारत भैषज्यरत्नाकर,* नई दिल्लीः बी.जैन पब्लिशर्स प्रा.लि.,सन् २०१२ ।

गुरागाई, मुकुन्दप्रसाद, *पण्डितकुलचन्द्र गौतमको व्यक्तित्व र कृतित्वको अध्ययन,* काठमाण्डौ : (शोधपत्र २०५३ त्रि.वि. ।

गोयन्दका, हरिकृष्णदास (व्याख्याकारः) *तैत्तिरीयोपनिषद्,*गोरखपुर : गीताप्रेस,२०६१ ।

गौड, अशोकचन्द्र, *व्याकरणशास्त्रस्येतिहासविमर्शः,* वाराणसी : भारतीय विद्यासंस्थान, २०५५ ।

गौतम, कुलचन्द्र, (सं.आचार्य बालकृष्ण), *परिशेषकोश* वाराणसी : यशोदा पुस्तकालय, २०१७ ।

गौतम, कुलचन्द्र, *अमरकोश (स्वयंबोधिनी टीका)* नेपाल : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, २०२६ ।

गौतम, कुलचन्द्र, *संस्कृत नेपाली शब्दकोश (लघुनामकोश),* नेपाल : नेपाल संस्कृत विश्वविद्यालय, २०५४ ।

गौतम, कुलचन्द्र, कृष्णकर्णाभरणम् आत्मारामशर्मणा जार्जप्रिटिङ्गमुद्रणालये काश्यां मुद्रितं प्रकाशितञ्च १९७५ ।

गौतम, नारायण, *कुलचन्द्रगौतमस्य काव्यात्मकसंस्कृतकृतीनां विश्लेषणम्,* नेपाल : शोधप्रबन्ध ने.सं.वि., २०५७ ।

गौतम, प्रसन्नचन्द्र, स्मृतिग्रन्थ : विद्वच्छिरोमणि श्री कुलचन्द्र गौतम, काठमाण्डौ : कुलचन्द्र स्मृतिग्रन्थ संस्था गैरीधारा, २०८५ ।

घिमिरे खेमराज, *अमरकोशस्य ब्रह्मवर्गेण सह वेदभाषानिघण्टोर्ब्रह्मवर्गस्य तुलनात्मकमध्ययनम् दाङ् :* आचर्यशोधपत्रम् ने.सं.वि. ।

चतुर्वेदी, द्वारकाप्रसादशर्मा, झा,तारणी, *संस्कृत शब्दार्थ कौस्तुभ,* इलाहावाद : रामनारायणलाल, द्वितीय संस्करण,.२०१४ ।

चरक (सम्पा.विद्याधर शुक्ल रविदत्त शास्त्री),*चरकसंहिता,* वाराणसी : चौखम्बा संस्कृत प्रतिष्ठान, सन् २०१२ ।

चालिसे चक्रपाणि, *नेपाली बगली कोश,* ललितपुर : साझा प्रकान,.२०५२ ।

ज्ञवाली सूर्यवित्रम, *भूमिका* नेपाली शब्द परिचय सम्पा. महानन्द सापकोटा, विराटनगर : जानुका पुस्तक भण्डार, २०३४ ।

टर्नर र्‍याल्फ लिली, *अ कम्परेटिभ एण्ड इटिमलोजिकल डिक्सनरी अफ द नेपाली लङ्गेज,* रिप्रिन्टेड इण्डिया १९९६ ई,न्यु डिल्ली : अलाइड पब्लिसर्स लिमिटेड, १९३१ ई.।

तिमिल्सिना डिल्लीराम, *नेपालीको व्युत्पत्तिशास्त्र,* नेपाली शब्द परिचय सम्पा. महानन्द सापकोटा, विराटनगर : जानुका पुस्तक भण्डार,२०३४ ।

तुलसीदास, *रामायण*(माहात्म्य ६), वाराणसी : ज्ञानमण्डललिमिटेड, सन् १९६३, ।

त्रिपाठी, कैलाशचन्द्र, *अमरकोश का कोशशास्त्रीय तथा भाषाशास्त्रीय अध्ययन,* वाराणसी : चौखम्बा सुरभारती प्रकाशन, सन् २००८ ।

त्रिपाठी, ब्रह्मानन्द, *अमरकोश* (रत्नप्रभा टीका), वाराणसी : चौखम्बा सुरभारती प्रकाशन,सन् १९९६ ।

दाहाल, बल्लभमणि, *नेपाली भाषा र कोश,* नेपाली भाषा अधिगोष्ठी सम्पा. चूडानाथ भट्टराय, काठमाण्डौः नेपाल राजकीय प्रज्ञाप्रतिष्ठान, २०३३ ।

दीक्षित, भट्टोजि, *वैयाकरणसिद्धान्तकौमुदी,* (जेबी गुटका, सम्पा.गोपालशास्त्री नेने) वाराणसी : चौखम्वा अमरभारती प्रकाशन, पंचम संस्करण २०३४ ।

दीक्षित, भानुजि, *अमरकोश* .(सुधा/रामाश्रमी व्याख्या), वाराणसी : चौखम्बा सुरभारती प्रकाशन, सन् २०११ ।

दीक्षित, वासुदेव,*वैयाकरणसिद्धान्तकौमुदी* (बालमनोरमा टीका),वाराणसी : दशम संस्करण चौखम्वा संस्कृत संस्थान, २०३९ ।

देवः राधाकान्तः ***शब्दकल्पद्रुम,*** वाराणसी : चौखम्वा संस्कृत सिरीज आफिस, २०२४ ।

धनञ्जय,*दशरूपकम्* , वाराणसी : चौखम्बा अमरभारती प्रकाशन,.२०४३ ।

नेपाल ज्ञानमणि, *नेपाली शब्द परिचय नियालेर हेर्दा,* मधुपर्क वर्ष ११ अङ्क ५, वि.सं. २०३५ ।

पतञ्जलिः (हरिहरानन्द आरण्यः), *पातञ्जलयोगदर्शनम्* (विभूतिपादः श्लो.४, वाराणसी : मोतीलाल बनारसीदास, सन् २००३ ।

पतञ्जलिः (सम्पा.चारुदेव शास्त्री), *व्याकरणमहाभाष्यम्,* दिल्ली : मोतीलाल बनारसीदास, सन् १९८४ ।

पतञ्जलिः (सम्पा.दधिराम शर्मा), *व्याकरणमहाभाष्यम्* वाराणसीः चौखम्बा संस्कृत प्रतिष्ठान, सन् २००० ।

पतञ्जलिः, (सम्पा.भार्गव शास्त्री),*व्याकरणमहाभाष्यम्,* वाराणसी : चौखम्बा सुरभारती प्रकाशन, (सन् १९९१) ।

पराजुली, कृष्णप्रसाद आदि, (निर्देशक बालकृष्ण पोखेल)*नेपाली बृहत्शब्दकोश,* काठमाण्डौ : नेपाल राजकीय प्रज्ञाप्रतिष्ठान, द्वितीय संस्करण वि.सं.२०५१ ।

पाणिनि, *अष्टाध्यायीसूत्रपाठ,* वाराणसी : चौखम्बा संस्कृत सीरिज आफिस,.२०३२ ।

पाणिनि, (सम्पा.गोस्वामी प्रह्लाद गिरि),*पाणिनीयशिक्षा,* वाराणसी : चौखम्बा संस्कृत सीरिज आफिस, .२०४० ।

पाणिनि, *लिङ्गानुशासनम्* (सिद्धान्तकौमुदी), वाराणसी : मोतीलाल बनारसीदास, सन् १९९७ ।

पुष्पदन्त,*शिवमहिम्नः स्तोत्रम्,* गोरखपुर : गीताप्रेस, प्रथमसंस्करण सन् २०६६ ।

पोखरेल, माधवप्रसाद, *महानन्दका कोशको सामान्य समीक्षा,* भानु (पूर्णाङ्कः ८०) .२०५७ ।

बन्धु, चूडामणि, *डिक्सनरी मेकिङ् इन नेपाली* लेक्सिकोग्राफी इन नेपाल काठमाण्डौ : रोयल नेपाल एकेडमी, सन् १९९८ ।

बाणभट्ट, *कादम्बरी,* वाराणसी : चौखम्बा सुरभारती प्रकाशन, सन् १९८१ ।

भट्ट, नागेश, (सम्पा.जयशङ्करलाल त्रिपाठी) *परमलघुमञ्जूषा,* वाराणसी : कृष्णदास अकादमी, सन् १९८५ ।

भट्टराई घटराज, *मोतिराम भट्टको शब्दकोश* मोती स्मृति ग्रन्थ सम्पा.रमा शर्मा, काठमाण्डौ : नेपाली शिक्षा परिषद्, २०३९ ।

भट्टराई, घटराज, *बालचन्द्र शर्मा व्यक्तित्व र साधना,* काठमाण्डौ : प्रकाशक लेखक स्वयम्, वि.सं.२०४४ ।

भट्टराई, बद्रीविशाल,*नेपाली बृहत्शब्दकोश (२०४०) को कोशवैज्ञानिक अध्ययन,* काठमाण्डौ नेपाल : त्रिभुवन विश्वविद्यालय, शोधग्रन्थ, २०६४ ।

भट्टराई, हर्षनाथ, *कोशको नालीबेली* प्रशासकीय तथा कानूनी शब्दकोश, काठमाण्डौ : नेपाल रिसर्च एसोसियट्स्, . २०४० ।

भट्टाचार्य, तारानाथतर्कवाचस्पति, *वाचस्पत्यम्,* वाराणसी : संस्कृत सीरीज अफिस, .२०२५, ।

भट्टाचार्यः, विश्वनाथपञ्चाननः,*कारिकावली* (प्रत्यक्षखण्डः४५), वाराणसी : हरिकृष्णनिबन्धभवनम्, .२०५३, पृ.१०३ ।

भट्टाचार्यः, *शब्दस्तोममहानिधिः*, वाराणसीः, चौखम्बा संस्कृत सिरिज, तृ.सं.सन् १९६७ ।

भर्तृहरि, *वाक्यपदीयम्,* वाराणसी : कृष्णदाश एकेडमी,सन् २०४४ ।

भावमिश्र,*भावप्रकाशनिघण्टु,* वाराणसी : चौखम्बा भारती अकादमी, सन् २०1३ ।

भास्कराचार्य,*लीलावती,*वाराणसीः चौखम्बा विद्याभवन, सन् २००1 ।

भोजनरेन्द्र,*सरस्वतीकण्ठाभरणम्,* काशी : भैरव शर्मा जैनप्रभाकरनाम्नि मुद्रणालये, .१९४९ ।

मन्नालाल,'अभिमन्यु' *अमरकोश* (धरा टीका)वाराणसी : चौखम्बा विद्याभवन, सन् २०1२ ।

मेदिनीकरः, *मेदिनीकोशः,* वाराणसी : चौखम्बा संस्कृत सिरिज अफिस, २०२४ ।

याज्ञवल्क्यः, *याज्ञवल्क्यशिक्षा,* वाराणसी : चौखम्बा ओरिइण्टलिया, सन् १९८९, ।

याज्ञवल्क्य, (सम्पा.कपिलदेव गिरि),*याज्ञवल्क्यस्मृति,* वाराणसी : चौखम्बा संस्कृत संस्थान, २०३९ ।

राव जी.प्रभाकर *भैषज्यकल्पनाविज्ञान* (सन्२००९) चौखम्बा पब्लिकेशन नई दिल्ली

रेग्मी, शिव, *मोतीराम भट्ट र उनको शब्द सङ्ग्रह प्रकरण,* रोलम्ब भाग ६ संख्या ३, सन् १९८६ ।

लम्साल, रामचन्द्र, *कोशविज्ञान र नेपालीकोश,* काठमाण्डौ : विद्यार्थी पुस्तक भण्डार, .२०५७ ।

वरदराजाचार्यः,*लघुसिद्धान्तकौमुदी,* गोरखपुर : गीताप्रेस,सन् २०६६ ।

वराहमिहिरः,*बृहत्संहिता* वाराणसी : चौखम्वा विद्याभवन, सन् १९७७ ।

वर्मा,सत्यकाम, *व्याकरण की दार्शनिक भूमिका*( नई दिल्ली : मुंशिराम मनोहरलाल, सन् १९७1 ।

वहादुर,राधाकान्तदेव *शब्दकल्पद्रुम,* वाराणसी : चौखम्वा संस्कृत सिरीज आफिस, . २०२४ ।

वाल्मीकिः, *वाल्मीकीयरामायणम्* , गोरखपुर : गीताप्रेस, २०४५ ।

विश्वनाथः, *साहित्यदर्पण,* वाराणसी : चौखम्बा संस्कृत संस्थान, .२०५८ ।

व्यास, *कूर्मपुराण,* गोरखपुर : गीताप्रेस, षष्ठसंस्करण २०६९ ,

व्यासः, *गरुडपुराण* (प्रेतकल्पअ.१५ श्लो.३७ ) कचौडीगली वाराणसी : जय नेपाल प्रकाशन, .२०४० ।

व्यासः(सम्पा.वेणीमाधव ढकाल) देवीभागवत(१।३।२) काठमाण्डौ : विद्यमर्थी पुस्तक भण्डार, २०७३ ।

व्यास, *महाभारत* (सम्पा.रामचन्द्र शास्त्री) दिल्ली : ओरियण्टल बक्स रीप्रिण्ट कारपुरेशन, इ.सं.१९७९ ।

व्यासः, *महाभारतम्* (उद्योगपर्वः अध्यायः ७ श्लो.१७-२०), गोरखपुर : गीताप्रेस, २०४४ ।

व्यासः, *विष्णुपुराणम्* , गोरखपुर : गीताप्रेस, संस्करण १९, .२०६१ ।

व्यास,*श्रीमद्भागवतमहापुराणम्,* गोरखपुर : गीताप्रेस, एकत्रिंशत् संस्करण २०५४ ।

शर्मा, पि.भि,.सम्पा. *सुश्रुतसंहिता,* वाराणसी : चौखम्बा विश्वभारती, सन् १९९८ ।

श्रीहर्षः,*नैषधीयचरितम्,* वाराणसी : चौखम्बा संस्कृत प्रतिष्ठान,सन् १९९१ ।

सरूप, लक्ष्मण, *निघण्टु तथा निरूक्त,* विहार : मोतिलाल बनारसी दास,सन्.१९६७ ।

सापकोटा महानन्द, *सरि शब्द,* विराटनगर : नेपाली साहित्य भण्डार, २०२१ ।

........................, *नेपाली शब्द परिचय,* विराटनगर : जानुका पुस्तक भण्डार, २०३४ ।

Sardesai N . G . Padhye D . G .*Amarakośa of Amarasingh*, Varanasi : Chowkhmba Vidyabhwan, 2009 .